सांख्यसूत्रम्

महर्षि-कपिल-प्रणीतम्

अनिरुद्धकृतवृत्तिसहितम्

आर्य्यसभासम्पादकेन वेदोदर्शनविद्यालयाध्यापकेन काव्यतर्कतीर्थोपनाम्ना

श्रीकुञ्जविहारि-तर्कसिद्धान्तेन

स्वप्रणीतया तत्त्वबोधिनीसमाख्यटीकया वङ्गानुवादेन च

समलङ्कृत्य प्रकाशितम्।

बङ्गाब्दाः १३२५।

मूल्यं २) रूप्यकद्वयम्।

प्रकाशक-
श्रीकृष्णविहारीतर्कतीर्थ
पो: बड़ोबेलतोरा,
मानभूम।

Uttarpara [illegible] Public Library
Acc No. 20208 [illegible]

कलिकातानगर्य्यां।
१नं विद्यासमुद्दिलेनस्थितभास्करप्रेसयन्त्रे
श्रीकुलचन्द्र दे द्वारा मुद्रितम्।

भूमिका।

प्रसिद्धेषु न्यायवैशेषिकसांख्ययोगवेदान्तमीमांसाख्यषड्-दर्शनेषु सांख्यदर्शनं महर्षिकपिलाचार्य्यप्रणीतमिति सर्व्व एव जानन्ति, किन्तु शास्त्रसमालोचनेन त्रयः कपिलाचार्य्याः श्रूयन्ते— तत्रैको ब्रह्मणो मानसपुत्रः, अपरः वैश्वानरावतारः, अपरश्च देवहूतिगर्भजातः कर्द्दममुनितनयो भगवन्नारायणावतारः। सांख्यशास्त्रञ्च द्विविधं दृश्यते—तत्रैकं द्वाविंशतिसूत्रात्मकं तत्त्वसमासाख्यं आदिसांख्यत्वेन प्रसिद्धम्, अपरञ्च—षड़ध्यायात्मकमेतत्। तथाच कतरत् केन कपिलेन प्रणीतमिति सन्देहः स्वत एवोपजायत इति तन्निराकरणार्थं प्राचीनटीकाकाराणामभिप्राया एवादावालोचनीयाः :—

तत्रच "नन्वेवमपि तत्त्वसमासाख्यसूत्रैः सहास्याः षड़ध्याय्याः पौनरुक्त्यमिति चेन्मैवं संक्षेपविस्तररूपेणोभयोरप्यपौनरुक्त्या-" दित्यादिसन्दर्भेणोभयोरेव सांख्यशास्त्रयोरेक एव कपिलः प्रणेतेति "तदिदं सांख्यशास्त्रं कपिलमूर्त्तिर्भगवान् विष्णुरखिललोकहिताय प्रकाशितवान्, यत्तु वेदान्तिब्रुवः कश्चिदाह—सांख्यप्रणेता कपिलो न विष्णुः, किन्त्वग्न्यवतारः कपिलान्तरम् 'अग्निः स कपिलो नाम सांख्यशास्त्रप्रवर्त्तक' इति स्मृतेरिति तन्लोकव्यामोहनम् 'एतन्मे जन्म लोकेऽस्मिन् मुमुक्षूणां दुराशयात्। प्रसंख्यानाय तत्त्वानां सम्मतायात्मदर्शनम्॥' इत्यादि स्मृतिषु विष्ण्ववतारस्य देवहूतिपुत्रस्यैव सांख्योपदेष्टृत्वावगमात् कपिलद्वयकल्पनागौरवाच्च। तत्र चाग्निशब्दोऽग्न्याख्यशक्त्यावेशादेव प्रयुक्त" इत्यादिसन्दर्भेण स कपिलो विष्ण्ववतार इति च विज्ञानभिक्षोर्म्मतं स्पष्टमेव गम्यते।

आचार्य्यवर्य्यगौरपादस्वामिना च सांख्यकारिकाभाष्यप्रारम्भे "इह भगवान् ब्रह्मसुतः कपिलो नामे"त्यादि सन्दर्भेण ब्रह्मसुतकपिलस्यैव सांख्यप्रणेतृत्वमङ्गीकृतम्।

आदिसांख्यीयसर्व्वोपकारिणीसमाख्यटीकाकारस्य "अथात्रा-

नादिक्लेशकर्म्मवासनासमुद्रपतितान् अनाथानुद्दिधीर्षुः परम-
श्री कृपालुः स्वतःसिद्धज्ञानो महर्षिर्भगवान् कपिलो ब्रह्मसुतो द्वाविंशति-
सूत्राण्युपादिक्षत्, सूचनात् सूत्रमिति हि व्युत्पत्तिः, तत एतैः
समस्ततत्त्वानां सकलषष्टितन्त्रार्थानां सूचनं भवति। ततश्चेदं सकल-
सांख्यतीर्थमूलभूतम्, तीर्थान्तराणि तत् प्रपञ्चभूतान्येव। षड्-
ध्यायी तु वैश्वानरावतारभगवत्कपिलप्रणीता। इयञ्च द्वाविंशति-
सूत्री तस्या अपि बीजभूता, ब्रह्मसुतमहर्षिभगवत्कपिलप्रणीतेति वृद्धा
वदन्ती"ति सन्दर्भेण आदिसांख्यस्य ब्रह्मसुतकपिलप्रणीतत्वं एतत्-
षड़ाध्यायी सांख्यस्य च वैश्वानरावतारकपिलप्रणीतत्वं स्पष्टमाचष्ट।

एवं स्थितायां विप्रतिपत्तौ कस्य मतं वास्तविकमित्यस्य दुर्व्व-
चत्वेऽपि "अग्निः स कपिलो नाम सांख्ययोगप्रवर्त्तक" इत्यन्तमहा-
भारतीयश्लोके अग्निपदस्यौपचारिकत्वप्रसङ्गेन देवहूतिपुत्र-
कपिलेन स्वमात्रे कथितस्य भागवतग्रन्थीयसांख्ययोगस्य एतत्
षड्ध्यायीसांख्यविपरीतत्वेन च विज्ञानभिक्षोर्म्मतं न समीचीनं
विवेचयामः। परन्तु निरुक्तसर्व्वोपकारिणीसुमाख्यटीकाकार-
मतस्यैव साधुत्वं मन्यामहे, यतस्तथात्वे "अग्निः स कपिलोनामे"
त्यादिमहाभारतश्लोकीयाग्निपदस्य सारसिकत्वं शुकदेवशिष्यत्वे-
नातिप्रामाणिकानां प्राचीनतमगौरपादस्वामिनां वचसः प्रामाण्यञ्च
सुरक्षितं भवति। एवञ्च देवहूतिपुत्रः कपिलः कञ्चित् सांख्यग्रन्थं
न प्रणिनाय, परन्त्वाजन्मसिद्धतत्त्वज्ञानः स स्वमात्रे एव सांख्ययोग-
मुपदिदेश" इत्येतावदुक्तौ एव "एतन्मे जन्मलोकेऽस्मि"न्नित्यादि
भागवतवचनप्रामाण्यमपि न व्याहन्येत, इतीयतावदुक्त्वैव विचार-
चतुराणां सतां शिरसि निर्द्धारणभारमगत्या समर्प्यात्र विरमामः।

एतत्षड्ध्यायी सांख्यस्य—अनिरुद्धवृत्तिः, विज्ञानभिक्षुकृत-
प्रवचनभाष्यं, वेदान्तिमहादेवकृतटीका चेति त्रीणि व्याख्या-
पुस्तकानि दृश्यन्ते। तत्रानिरुद्धवृत्तितो वेदान्तिमहादेवकृतटीकाया
अर्व्वाचीनत्वं।

"दृष्ट्वानिरुद्धवृत्तिं बुद्ध्वा सांख्यीयसिद्धान्तं ।
विरचयति वृत्तिसारं वेदान्त्यादिर्महादेवः ॥"

इति तद्वचनेनैव स्पष्टमायातीत्यत्र नास्ति वक्तव्यावसरः ।

प्रवचनभाष्ये यद्यप्यनिरुद्धवृत्तेर्नामोल्लेखो नास्ति, तथापि अनिरुद्ध-वृत्तिव्याख्यानपाठानामिव "प्रकृतिनिबन्धना चेदिति पाठे (१।१६१) असम्बन्धात् साक्षित्वमिति पाठे (५।८२) इतरवियोगवदिति पाठे (६।५०) इत्यादिभिर्भाष्यसन्दर्भैर्विधृतत्वेन द्वितीयाध्यायस्य षट्चत्वारिंशत्तमसूत्रप्रवचनभाष्ये "यत्तु कश्चिदविवेकी वदती"त्यादि सन्दर्भेण तृतीयाध्यायस्य नवमसूत्रप्रवचनभाष्ये "न तु सप्तदशमेकञ्चे-त्यष्टादशतयाव्याख्येय"मित्यादिसन्दर्भेण पञ्चमाध्यायस्य शततम-सूत्रप्रवचनभाष्ये "कश्चित्त्वित्यादि सन्दर्भेण एवमन्यत्रापिच भाष्यसन्द-र्भविशेषेणानिरुद्धकृतव्याख्यानानां दूषितत्वेन च अनिरुद्धवृत्तिं दृष्ट्वैव प्रवचनभाष्यं विरचितमित्यनुमातुं शक्यत इति प्रवचनभाष्य-मप्यनिरुद्धवृत्तेः परवर्त्तीत्युपयुज्यते वक्तुम् ।

अनिरुद्धस्य कदा कं देशं जन्मनालमकरोदित्यत्र स्पष्टं प्रमाणं नोपलभ्यते, परन्तु वाचस्पतिमिश्रान्माधवाचार्य्याच्चार्व्वाचीनः प्रवचन-भाष्यकारविज्ञानभिक्षोः प्राचीनश्चायमनिरुद्धः खृष्टीयपञ्चदशशता-ब्दीयांशविशेषे भारतस्यैव कुत्रचित् जन्म जग्राहेति प्रत्नतत्त्वविदः । वाचस्पतिमिश्रात् माधवाचार्य्याच्चार्व्वाचीनत्वञ्चास्य प्रथमाध्यायस्य विंशत्यधिकशततमसूत्रवृत्तौ "दृष्टश्चाभिव्यक्तिः पीडनेन तिलेषु-तैलस्ये"ति तत्त्वकौमुदीसन्दर्भाविकलोपन्यासेन तस्यैव चतुस्त्रिंशत्तम-सूत्रवृत्तौ "सत्त्वमर्थक्रियाकारित्वं तच्च क्रमाक्रमाभ्यां व्याप्त" मित्यनेन "तच्चार्थक्रियाकारित्वं क्रमाक्रमाभ्यां व्याप्त" मित्यस्य सर्व्वदर्शन-संग्रहस्थबौद्धदर्शनसन्दर्भस्यानुकरणेन चानुमीयत इत्यास्तां विस्तरः ।

अनिरुद्धवृत्तेर्दुर्लभता च तत्पठनपाठनशीलानां सर्व्वेषामेव सुविदिता सूक्ष्मानुसन्धाननियतानाम् । तत्र च मुद्रितपुस्तकानाम-प्राप्तिरेव प्रधानतः कारणमिति मन्यमानेन जगत्पुराश्रमे तदध्यापन-

व्यासक्तेनैव मया पुस्तकत्रयं संगृह्य तत्संशोधने दुरूहस्थलानां विशदीकरणे च मनो निवेशितम्। ततो विद्यार्थिसार्थमुखपरम्परया तदवगत्य कतिपयैः परमसुहृत्पण्डितप्रवरैरुत्साहितेन कतिपयार्य्यप्रभाग्राहकैः साग्रहमनुरुद्धेन च ससूत्रानिरुद्धवृत्तिं सुविस्तृतटीकया वङ्गानुवादेन च यथामति विशदीकृत्य क्रमश आर्य्यप्रभायां प्रकाशयितुमारभ्य नानाविधविघ्नपराहतेनापि मया परमेश्वरस्यापारकरुणया सम्प्रति तत्प्रकाशनं समाहितम्। तत्समाधाने च निरुक्तपुस्तकेषु यस्य पाठः समीचीनतया विवेचितः, स एव सन्निवेशितो व्याख्यातश्च, कदाचित् पाठान्तरमपि प्रदर्श्य व्याख्यातम्। यत्र च पुस्तकत्रयस्थित एकविध एव पाठः प्रयतमानेनापि मया योजयितुं नापारि, तत्र प्रमादस्खलनादिकं सम्भाव्य पदविशेषपरिवर्ज्जनपरिवर्द्धनपरिवर्त्तनैरपि पाठः सन्निवेशितः। तत्परिवर्ज्जनादौ वृत्तिव्याख्याने च यदि मम कञ्चित् प्रमादं परिलक्ष्य केचित् कृपया मत्कारणं विज्ञापयेयुस्तदा सादरं तन्मतं ग्रहणीयमिति सन्तस्तत्र प्रवर्त्तन्तामिति सविनयमभ्यर्थये।

एतदप्यत्र वक्तव्यम्—पुस्तकस्यास्य मुद्रापणसंशोधनादेर्भारस्य परहस्तन्यस्ततया स्थाने स्थाने व्यवस्थितास्वशुद्धिषु अर्थावगमव्याघातिकानामेव शोधनप्रकारः शुद्धिपत्रे प्रदर्शनीयः, इतरासान्तु वाचकैः स्वत एवोहनीया इति।

परन्तु वक्तव्यं—कलिकातावासिना परमस्नेहास्पदेन श्रीमता नगेन्द्रनाथसिद्धान्तरत्नेनास्य मुद्रापणादिविधौ परमं साहाय्यं कृतमिति स सर्व्वान्तःकरणेनाशीर्व्वादार्ह इति।

परिशेषे च वक्तव्यमेतावदेव—यदि मत्कृतयानया टीकया वङ्गानुवादेन चानिरुद्धवृत्तिः पाठार्थिनामणुरप्युपकारः साधयिष्यति तदैव मे सर्व्वं परिश्रमादिकं सफलं भवेदिति शम्॥

श्रीकृष्णविहारिशर्म्मणः।

शुद्धिपत्रम् ।

अशुद्धम्	शुद्धम्	पृष्ठ	पंक्ती
सुवचो ...	सद्वाणी ...	१	४
परवैराग्यात् ...	परवैराग्याभ्यासेत ..	२	३
मङ्गलाय ...	मङ्गलार्थः ...	३	४
वर्त्तमानारम्भः ...	वर्त्तमानावस्था ...	६	९
वैद्यादयो वसन्ति ...	वैद्यादयः सम्भवन्ति ...	१०	३
रागादिना ...	रागादीत्यादिना ...	१०	१२
मोहः ...	मोक्षः ...	११	६
प्रतारणावाक्यं ...	प्रतारणावाक्य ...	१५	१९
शङ्काद्वयाभ्या ...	शङ्काद्वयानुद्भवाभ्या	१६	२
दग्धवीजैरित्यादिना ..	दग्धवीजैरित्यादिः	१६	६
शुक्लत्वस्यैव ...	शुक्लत्वस्य व ...	१६	८
विचिताचगतः षयतः ...	विनिश्चतावगतः ...	१६	२३
सम्यगायातम ...	सम्यगतायातम ...	१८	३
कार्य्यजनन ...	कार्य्यजनने ...	२२	८
यत इत्यादि ...	यत इत्यादि ...	२२	१४
घटते ...	न घटते ...	२३	१६
नाशप्रतियोगित्वरूपा ...	नाशाप्रतियोगित्वरूपा ..	२६	१२
नाङ्गीकुर्म्मः ..	अङ्गीकुर्म्मः ...	२८	६
स्थित्यभावात् को बन्धः	स्थित्यभावात् केन को बद्ध	२९	६
नश्यप्रवादादिति न पाठेन	नश्यप्रवादादिति पाठे न	२९	९
सम्बन्ध आनिते ...	सम्बन्धजनित ...	२९	२६
वाह्यं कर्द्दमेनासम्बन्धा	वाह्यं कर्द्दमेनात्मसम्बन्धा	३१	५
स्थायित्वा ..	स्थायित्वाभावा ...	३१	६
सन्तानस्या ...	सन्तानस्य ...	३१	७
विषमोपरागा ...	विषयोपरागा ..	३२	२
दृष्टान्तसिद्धिरूपं ...	दृष्टान्तासिद्धिरूपं ...	३४	१३
तथा न लभते दृष्टान्तसिद्धिः	तथाच न लभते दृष्टान्तासिद्धिः	३५	१०
कार्य्यस्यसिद्धेः ...	कार्य्यस्यासिद्धेः ...	३५	१३
यद्यत् स ...	यद्यत् सत् ...	३५	१६
अचेपिके स्थिरत्वे नाभि	अक्षणिके—स्थिरत्वेनाभि	३६	४
न कल्पनपथ ...	कल्पनपथ ...	३६	१४
आक्रमेण कार्य्योत्पादपचोपि	अक्रमेण कार्य्योत्पादपचेपि	३७	१२
नचेति ...	नवेति ..	३८	१०
निर्जेर फल ...	फल निर्जेर ...	३९	१८
विषयि ...	विषाद ...	३९	२२

साधनाभावे	साधनाभावेर	४०	२५
अवयवी । न	अवयवी न	४७	१०
भावस्य	तदा भावस्य	५३	८
व्यवहारहेतः	व्यवहारहेतुत्वम	५५	६
अभावाय	स्वस्य अभावाय	५७	११
यथाच	तथाच	५८	३
अयमपि	पयमप	५९	३
वाङ्मात्रं तु न	वाङ्मात्रं न तु	६८	८
वाह्यं	बाह्यानि	७१	८
प्रकृतिस्थानं	प्रकृतेस्मूलकारणस्य प्रधानस्य स्थानं	७३	७
प्रकृतेः	प्रकृतेरपि	७५	३
प्रकृतेः	यत्प्रकृतेः	७९	४
तस्मात्महत्त्वं बुद्धि	तस्मात् महत्तत्वं बुद्धिः तदेव	७९	४
कारणमात्र	कारणकत्वस्य	८५	८
यथा	यथा	९७	३
प्रत्यक्षलक्षण	प्रत्यक्षलक्षणं युक्त	९८	१
क्षित्यादि	क्षित्यादि	१००	६
मृतशरीरस्य	नहि मृतशरीरस्य	१०५	१
आप्तोपदेशः	आप्तो युक्तः उपदेशः	१०८	५
त्वं यथा	त्वं यथात	१२६	४
किं	तत किं	१२९	१
एव	एवं	१३४	८
द्रवकठिनता	द्रवकठिनतादिमत्त्वं	१३८	५
तस्य	तस्यैव	१४०	८
न तात्त्विकः	स न तात्त्विकः	१६०	६
तन्मात्राणि	तन्मात्राणि यति	१६५	६
अन्तर्बाह्यकार	आन्तराणि बुद्ध्यहङ्कार	१७८	३
मारभकस्य भावत्वं	आरम्भकस्वभावत्वे	१८४	४
दंशोपि	दंशोऽपि	२३०	५
मायात्वं	माविद्यात्वं	२५६	६
विशेषापच्चः	विशेषापेक्षः	३०४	१
दृश्यन्ते	दृश्यन्ते	३०७	४
न नियमः	न नियमः वर्षा दृष्टत्वात् । घटे वेति च न नियमो अन्यथापि सम्भवात् ॥ ११ ॥	३२७	४
अधिमात्रस्य	अधिमात्रस्य	३४९	७

टीकावङ्गानुवादयोर्मुद्राकरप्रमादकृतान्यशुद्धानि वाचकमहोदयैरेव शोधनीयानि ।

सांख्यसूत्रवृत्तिः ।

प्रथमोऽध्यायः ।

विनायकं नमस्कृत्य विष्णुं सूर्य्यं सरस्वतीम् ।
लक्ष्मीं गङ्गां महेशानं वृत्तिं कर्त्तुं समारभे ॥

पुरुषः खलु वैराग्यात् मोक्षशास्त्रे प्रवर्त्तते । वैराग्यं च द्वेधा

प्रणम्य वाणीं सुवचोविन्यासाभ्यासदायिनीम् ।
तर्कसिद्धान्तसिद्धेन विप्रकुञ्जविहारिणा ॥
अनिरुद्धकृता वृत्तिः साङ्ख्यसूत्रस्य दुर्यहा ।
व्याख्यया तत्त्वबोधिन्या विशदीक्रियतेतराम् ॥

प्रारिप्सितग्रन्थपरिपन्थिविघ्नविघाताय शिष्टाचारपरम्पराप्राप्तं नमस्काररूपं मङ्गलमाचरन् वृत्तिग्रन्थारम्भं प्रतिजानीते—विनायकमित्यादिना । शास्त्रारम्भप्रयोजनाभिधानाय भूमिकामारचयति—पुरुष इत्यादिना । खलु—निश्चये, वैराग्यात—अपरवैराग्यादित्यर्थः, परवैराग्यस्य मोक्षशास्त्रप्रवृत्त्याद्युत्तरभूमिकतया तद्धेतुत्वानुपपत्तः । शास्त्रे प्रवृत्त्यसम्भवात् शास्त्रपदमत्र शास्त्रविहितानुष्ठानादिपरं, तथाच मोक्षशास्त्रे—मोक्षशास्त्रविहितप्रव्रज्याग्रहणाद्यनुष्ठाने इत्यर्थः, अतएवैतत्समर्थनपरं "यदहरेवे" त्यादि श्रुतिप्रदर्शनमपि साधु सङ्गच्छते । परापरभेदेन वैराग्यं द्विविधं तयोरपरवैराग्यस्य पुनः कारणभेदेन द्वैविध्यं दर्शयति—वैराग्यञ्च द्वेधेति ।

গ্রন্থারম্ভে বিঘ্নবিঘাতের জন্য নমস্কার করা শিষ্টাচারসিদ্ধ, তাই বৃত্তিকার নমস্কার করিয়া শাস্ত্রারম্ভের প্রতিজ্ঞা করিতেছেন—

আমি গণেশ, বিষ্ণু, সূর্য্য, সরস্বতী, লক্ষ্মী, গঙ্গা ও মহেশ্বরকে নমস্কার করিয়া বৃত্তি আরম্ভ করিতেছি।

স্যাৎ, শোকাদিনা, জন্মান্তরীয়দুরিতক্ষয়াদ্বা। তথা চ শ্রুতিঃ—'যদহরেব বিরজেত্তদহরেব প্রব্রজেৎ' ইতি। (জাবাল' উপ' ৪ মন্ত্রঃ), শাস্ত্রে প্রবৃত্তস্য পরবৈরাগ্যাৎ, তথাচাহ পতঞ্জলিঃ—"দৃষ্টানুশ্রবিক-বিষয়বিতৃষ্ণস্য বশীকারসংজ্ঞা বৈরাগ্য" "তৎপরং পুরুষখ্যাতের্গুণ-বৈতৃষ্ণ্যম্" ইতি (সমা পা ১৫।১৬ সূত্রে)। এতদেব পরবৈরাগ্যং বক্তুম্

শোকাদিনেত্যাদিনা বিষয়দোষদর্শনপরিগ্রহঃ, জন্মান্তরীয়াণাং প্রাক্তনজন্মপ্রভবানাং দুরিতানাং ক্ষয়াৎ তীর্থদর্শনাদিনা বিনাশাৎ, অত্র দুরিতে "জন্মান্তরীয়" ইতি বিশেষণং এতজ্জন্মোৎপন্নদুরিতানা-মুপলক্ষকমপি প্রারব্ধস্যাহৃত্যর্থং,প্রারব্ধস্য ভোগমন্তরেণ ক্ষয়াসম্ভবাৎ, তৎসত্ত্বেঽপি বৈরাগ্যোদয়াৎ। বৈরাগ্যাৎ মোক্ষশাস্ত্রে প্রবর্ত্তত ইতি যদুক্তং তৎসমর্থনায় জাবালশ্রুতিমুত্থাপয়তি—তথাচ শ্রুতিরিতি। যদহরেব বিরজেৎ বৈরাগ্যং লভেত, তদহরেব প্রব্রজেৎ প্রব্রজ্যাং গৃহ্নীয়াৎ, নতু বিলম্বং কুর্য্যাদিতি শ্রুত্যর্থঃ। তথাচানয়া শ্রুত্যা বৈরাগ্যস্য প্রব্রজ্যাগ্রহণরূপমোক্ষশাস্ত্রবিহিতানুষ্ঠান-প্রবৃত্তিহেতুত্বমেব ফলতঃ প্রতিপাদিতং ভবতি। ততঃ কিং স্যাদিত্যাকাঙ্ক্ষায়ামাহ—শাস্ত্রপ্রবৃত্ত-স্যেতি, অপরবৈরাগ্যেণ গৃহীতসন্ন্যাসাশ্রমাদিরূপমোক্ষশাস্ত্রবিহিতানুষ্ঠান ইতি তদর্থঃ। পর-বৈরাগ্যাদিতি রাগদ্বেষাদিবিধ্বংসনাদিক্রমেণ লভ্যাদিত্যাদিঃ। বৈরাগ্যয়োঃ স্বরূপং প্রদর্শয়িতুং পতঞ্জলিঃ সূত্রদ্বয়মুত্থাপয়তি—তথাচেত্যাদিনা। দৃষ্টেতি, দৃষ্টঃ প্রত্যক্ষঃ ঐহিকঃ কামিনীকাঞ্চনাদিঃ,

পুরুষ নিশ্চয় অপর বৈরাগ্যবশতঃ মোক্ষশাস্ত্রবিহিত সন্ন্যাস গ্রহণাদি অনুষ্ঠানে প্রবৃত্ত হয়। অপর বৈরাগ্য দুই প্রকার, শোকাদি বশতঃ এক প্রকার বৈরাগ্য হয়, এবং জন্মান্তরের পাপক্ষয় হইলে এক প্রকার বৈরাগ্য হয়। অপর বৈরাগ্য বশতঃই যে সন্ন্যাসগ্রহণাদি অনুষ্ঠান প্রবৃত্ত হয়, এ বিষয়ে শ্রুতিও আছে, "যখন বৈরাগ্য লাভ করিবে, তখনই সন্ন্যাস গ্রহণ করিবে" সন্ন্যাসাদি গ্রহণ করিলে রাগদ্বেষাদি বিধ্বংসক্রমে লব্ধপরবৈরাগ্য বশতঃ পুরুষ মুক্তিলাভ করে। ভগবান্ পাতঞ্জলি মুনি বলিয়াছেন—"ঐহিক ও পারত্রিক সমস্ত বিষয়ে অনুরাগশূন্যের বশীকারসংজ্ঞায় (বিষয় সকল আমার

अतिपरमकारुणिको महामुनिः जगदुद्दिधीर्षुः कपिलो मोक्ष-शास्त्रमारभमाणः प्रथमसूत्रं चकार—

अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः ॥ १ ॥

अथेत्ययं मङ्गलाय, न तु कर्मानन्तर्य्यार्थः, 'यदहरेव' इत्यादि-

---

गुरुपाठादनुश्रूयत इति अनुश्रवो वेदः तत्र भवः आनुश्रविकः वेदप्राप्तः स्वर्गादिः, तत्स्वरूपो यो विषयः भोग्यः, तत्र वितृष्णस्य वशीकरणसंज्ञा समेते विषया वश्याः नाहमेतेषां वश्य इत्येवं विमर्शः वैराग्यं अपरवैराग्यमिति सूत्रार्थः । यद्यप्यत्रापरशब्दो नास्ति, तथापि परसूत्रे परशब्दोपादाना-दनेनापरवैराग्यमेवोक्तमिति मन्तव्यम् । तत्परमिति, पुरुषख्यातेः आत्मसाक्षात्कारात् हेतोः जायमानमिति शेषः, गुणेषु व्यक्ताव्यक्तधर्म्मकजड़विषयेषु वैतृष्ण्यं रागाभावः, तत् वैराग्यं परं परसंज्ञकं श्रेष्ठमित्यर्थः ।' तथाचात्मसाक्षात्कारजन्यगुणवैतृष्ण्यं परवैराग्यमिति लक्षणं फलितम् । प्रकृतमुपसंहरति—एतदेव परवैराग्यमिति, पातञ्जलसूत्रबोधितमेव परवैराग्यमित्यर्थः । कथैतत्परवैराग्याभिधानार्थमेव यदि शास्त्रारम्भस्तर्हि विज्ञानस्याव्यक्तादिमहाभूतान्तानाञ्च प्राधान्येन निरूपणमफलं न च परं वैराग्यं यस्मादिति बहुव्रीहिणा परवैराग्यशब्द एवात्र विवेकज्ञानपर इति तन्निरूपणमेव प्रकृतं,तन्निरूपणार्थञ्चाव्यक्तादीनां निरूपणमिति समीचीनं वचः, तथा सति समीपतरवर्त्तिपरवैराग्यपरामर्शकैतच्छब्दस्यानुग्रतापत्तेरिति चेन्न परवैराग्यहेतुभूतस्य विज्ञानस्य तद्विषयाणामव्यक्तादीनाञ्च स्वरूपनिर्द्धारणं विना परवैराग्यस्वरूपनिर्द्धारणं दुष्करमिति मत्वैव परमकारुणिकेन महामुनिना तेषां निरूपणात् ।

तृतीयमथपदं व्याचष्टे—अथेत्यादि । अयं सूत्रघटकः अथ इति शब्दः मङ्गलार्थः, मङ्गल-

---

বশ্য আমি বিষয়ের বশ্য নহি এইরূপ জ্ঞানের) নাম অপর বৈরাগ্য" প্রকৃতি হইতে নির্গুণ নিষ্ক্রিয় আত্মা পৃথক্, এইরূপ তত্ত্বজ্ঞান বশতঃ প্রকৃতি ও তৎকার্য্য জড়বর্গ বিষয়ে অনুরাগ না হওয়ার নাম পর বৈরাগ্য।" এই পর বৈরাগ্য বলিবার জন্যই অতি পরম কারুণিক মহামুনি কপিল জগতের উদ্ধারেচ্ছু হইয়া মোক্ষশাস্ত্র আরম্ভ করতঃ প্রথম সূত্র করিয়াছেন

श्रुतेरानन्तर्य्यस्य अप्रयोजनत्वात्। कर्मारम्भे च मङ्गलकरणं न्याय्यं, अथशब्दश्च मङ्गलवाचको दृश्यते—

ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।
कण्ठं भित्त्वा विनिर्यातौ तस्मात् माङ्गलिकावुभौ॥ इति।

प्रयोजनक इति योजना। कर्म्मणोऽपि साक्षात्प्रव्रज्याग्रहणादिहेतुत्वं वदतां मतं खण्डयति—नत्विति, कर्म्मानन्तर्य्यार्थः—कर्म्मानन्तर्य्यवाचकः। अत्र हेतुं दर्शयति—यदहरेवेत्यादि। आनन्तर्य्यस्य कर्म्मानन्तर्य्यस्य, अप्रयोजनत्वात्—प्रयोजनाभावात् अपेक्षाविरहादिति यावत्। तथाहि यदहरेवेत्यादि श्रुत्या वैराग्यानन्तर्य्यस्यैव फलतः सूचनात् कर्म्मानन्तर्य्यस्य प्रसक्तोऽपि नास्तीति भावः। कर्म्मारम्भे—कार्य्यानुष्ठानाव्यवहितपूर्व्वक्षणे, मङ्गलाचरणं अथशब्दोच्चारणादि माङ्गलिकानुष्ठानं न्याय्यं—विघ्नविघाताय कृतत्वेन शिष्टाचारपरम्पराप्राप्तं। मङ्गलवाचक इति, अत्र वाचकशब्दो साधकपरः, अथशब्दस्य वस्तुगत्या मङ्गलवाचकत्वाभावात् अन्यार्थनीयमानोदकुम्भदर्शनवदन्यार्थप्रयुक्ताथशब्दस्यापि श्रवणोच्चारणाभ्यां मङ्गलसाधकत्वात् "ओङ्कारश्चाथशब्दश्चे"ति श्रुतेर्माङ्गलिकशब्दस्यापि मङ्गलसाधकपरत्वात् ब्रह्मसूत्रभाष्यादौ शङ्करादिभिरथशब्दस्य मङ्गलवाचकताया अनभ्युपगमाच्च। अतएवैतद्भाष्यकारेण विज्ञानभिक्षुणापि एतदथशब्दस्यैवाधिकारार्थत्वं स्वीकृत्योच्चारणमात्रेणैव माङ্গলिकत्वमुक्तमित्यनुसन्धेयम्।

नन्वाधिभौतिकाधिदैविकातिरिक्तमपि व्याध्यादिजनितं शारीरं, अभिलषिताप्राप्त्यादि-

---

"আধ্যাত্মিক, আধিভৌতিক ও আধিদৈবিক এই ত্রিবিধ দুঃখের অত্যন্ত নিবৃত্তি অর্থাৎ বর্ত্তমান সমস্ত দুঃখের অতীতাবস্থা এবং কোন কালেও আর দুঃখের আবির্ভাব না হওয়াই পরম পুরুষার্থ।"

সূত্রের "অথ" শব্দ মঙ্গলসাধক কর্ম্মানন্তর্য্যের বাচক নহে, যে হেতু "যদহরেব বিরজেৎ"ইত্যাদি শ্রুতিতে কর্ম্মানন্তর্য্যের কোন প্রসঙ্গই নাই। শাস্ত্রারম্ভে মঙ্গলাচরণ করা ন্যায্য, অথশব্দও মঙ্গলসাধক দেখা যায়—"পূর্ব্বকালে ওঙ্কার ও অথ এই দুইটি শব্দ ব্রহ্মার কণ্ঠ ভেদ করিয়া নির্গত হইয়াছিল,

त्रिविधदुःखेति, शारीरमानसिकयोः आध्यात्मिकत्वेन संग्रहणात् एकत्वम्। आधिभौतिकं पशुपक्ष्यादिजनितम्, आधिदैविकं ग्रह-भूतादिजनितम्। नन्वेवं तेषां निवृत्तिः स्वत एव भवति, सुखदुःखानां क्षिप्रावस्थायित्वात्, अत आह—अत्यन्तेति। न दुःखविशेषाणां निवृत्तिरभिमता, किन्तु दुःखजातीयानाम्। भविष्यतामपि हि निवृत्तिः

निबन्धनं मानसञ्चेति द्विविधं दुःखमनुभूयते, तत् कथं दुःखं त्रिविधमित्याशङ्कायां तयोराध्यात्मिकत्वं व्यवस्थापयति—शारीरमानसिकयोरित्यादिना। तथाहि—आत्मानं स्वसङ्घातं आन्तरोपायमिति यावत्, अधिकृत्य प्रवृत्तं आध्यात्मिकमिति व्युत्पत्त्या शारीरमानसिकयोरुभयोरेवान्तरोपायसाध्यत्वेनाध्यात्मिकत्वान्न त्रिविधत्वहानिरिति भावः। भूतानि प्राणिनः अधिकृत्य प्रवृत्तं आधिभौतिकं। देवान् ग्रहादीन् अधिकृत्य प्रवृत्तमित्याधिदैविकं। यद्यपि सर्व्वमेव दुःखं मानसं तथापि मनोमात्रजन्यत्वमत्र मानसत्वं ग्राह्यमिति नान्यत्रातिप्रसङ्गः। सूत्रघटक-प्रथमात्यन्तपदस्य व्यावृत्तिमभिधित्सुः शङ्कते—नन्विति। "द्विक्षणे"त्यत्र "द्वित्रिक्षणे"ति क्वचित् पाठः, तत्र त्रीति सम्पातायातमेव सुखदुःखादीनां द्विक्षणावस्थायित्वस्यैव व्यवस्थापितत्वात्। परिहरति—अत आहेति, अत्यन्तपदस्य प्रयोजनमेव स्पष्टयति—न दुःखविशेषाणां निवृत्तिरिति। निवृत्तिरत्रातीतावस्थत्वमेव न तु ध्वंसः, सांख्यमते अतिरिक्ताभावानभ्युपगमात्। न च तत्त्वत्वे-नाभिमतानां भावानामेव मुनिना परिगणनात् अतिरिक्ताभावस्वीकारेऽपि न सिद्धान्तविरोध

সুতরাং এই উভয়ই মঙ্গলসাধক” রোগাদিজনিত শারীরিক দুঃখের এবং অভিলষিতের অপ্রাপ্ত্যাদিনিমিত্তক মানসিক দুঃখের ও আধ্যাত্মিকরূপে গ্রহণ করায় একত্ব আছে (অর্থাৎ এই দ্বিবিধ দুঃখকে আধ্যাত্মিকরূপে এক ধরিয়াই দুঃখকে তিন প্রকার বলা হইয়াছে), পশুপক্ষী প্রভৃতি প্রাণিসমূহ হইতে উৎপন্ন দুঃখের নাম আধিভৌতিক। গ্রহভূতাদি হইতে উৎপন্ন দুঃখের নাম আধিদৈবিক “সেই ত্রিবিধ দুঃখের নিবৃত্তি ত স্বতঃই হইতে পারে, যেহেতু সুখদুঃখাদিমাত্রই দ্বিক্ষণস্থায়ী,” এই আশঙ্কাতেই সূত্রে অত্যন্ত পদ প্রদত্ত হইয়াছে। ত্রিবিধ দুঃখবিশেষের নিবৃত্তি অভিমত নহে, কিন্তু বর্ত্তমান সমস্ত

अत्यन्तशब्दार्थः। धर्मार्थकाममोक्षाणां पुरुषार्थत्वं, न तु त्रयाणाम् अत्यन्तत्वं, क्षयित्वात् विषयजसुखत्वाद्वा। मोक्षस्य च न तथा. नित्यत्वात् प्रकाशरूपत्वात्। अत उक्तं "अत्यन्तपुरुषार्थ इति॥ १॥

...ति वाच्यं, तावतापि नासदुत्पद्यते न च सद्विनश्यतीति सिद्धान्तव्याघातापत्तेर्दुर्व्वारत्वात्। दुःखजातीयानां वर्त्तमानावस्थसमस्तदुःखानामित्यर्थः, निवृत्तिरभिमतेति सम्बन्धः। नन्वेवमपि ...ति क्षिमायातम्? दुःखमात्रस्यैव द्विक्षणमात्रावस्थायित्वेन वर्त्तमानावस्थसमस्तदुःखानामपि निवृत्तेः स्वत एव सम्भवादित्यतोऽत्यन्तपदस्य फलान्तरं दर्शयति—भविष्यतामपीति। अनागता-वस्थानामपीत्यर्थः, दुःखानामिति शेषः, निवृत्तिः—अनाविर्भावः। तथाच तत्पुरुषीयवर्त्तमाना-वस्थसमस्तदुःखानामतीतावस्थत्वं तत्पुरुषीयानागतावस्थसमस्तदुःखानामनाविर्भावश्च तत्-पुरुषीयात्यन्तदुःखनिवृत्तिरिति फलितं, तत्र च अनागतावस्थदुःखानाविर्भावायैव तत्त्वज्ञानस्योप-योगः, अतएवोक्तं भगवता पतञ्जलिनापि "हेयं दुःखमनागत" मिति। न च कदाचिदप्य-वर्त्तमानावस्थाना अनागतावस्थदुःखाना सत्त्व एव प्रमाणं नास्तीति कथं तदाविर्भावाभावस्य पुरुषार्थत्वमिति वचनीयं दाहादिशून्यवह्नादेः क्वाप्यदर्शनात्, स्वस्वकार्य्यजननशक्त्याविद्धत्वा-दग्न्यादित्वस्य पातञ्जलादिसिद्धान्तसिद्धतया तत्तत्शक्तेश्च अनागतावस्थतत्तत्कार्य्यरूपतया ...तावदेव तादृशदुःखसत्त्वस्यानुमीयमानत्वात्। तत्त्वज्ञानेन च दग्धबीजभावानां तेषां नाविर्भाव इति स एव पुरुषार्थ इति। ननु दुःखस्य चित्तधर्म्मतयेदृशी दुःखनिवृत्तिस्तु पुरुषे ...—कुतस्तत्र तत्त्वज्ञानापेक्षेति चेन्न प्रतिबिम्बरूपेण—पुरुषे यो भोगाख्यो दुःख-...निवृत्तेरेवात्र दुःखनिवृत्तिपदेन विवक्षितत्वादिति सङ्क्षेपः। सूत्रघटकद्वितीयात्यन्त-

---

...দুঃখের নিবৃত্তি ও ভবিষ্যৎ দুঃখের আবির্ভাব না হওয়াই অত্যন্ত শব্দের অর্থ। ...তাবতা ইহাই বলা হইল যে, দুঃখের দ্বিক্ষণস্থায়িত্বনিবন্ধন বর্ত্তমান দুঃখের ... স্বতঃ হইতে পারিলেও ভবিষ্যৎ দুঃখের অনাবির্ভাব কখনও কোন ... কারণ ব্যতিরেকে হইতে পারে না এবং তজ্জন্যই তত্ত্বজ্ঞানাদি সাধনের ...) ধর্ম্ম, অর্থ ও কামের পুরুষার্থত্ব থাকিলও সেই পুরুষার্থত্বে অত্যন্তত্ব ... অর্থাৎ ধর্ম্ম, অর্থ ও কাম অত্যন্ত পুরুষার্থ নহে, যে হেতু তাহারা ক্ষয়ী ও ... সুখস্বরূপ। মোক্ষ ক্ষয়ী বা বিষয়জ সুখস্বরূপ নহে, যে হেতু মোক্ষ

भवतु दुःखनिवृत्तिः पुरुषार्थः, तथापि दृष्टादेव सुकरोपायात् तत्सिद्धेः शास्त्रसाध्ये दुष्करोपाये अनेकजन्मपरम्परायाससम्पाद्ये चित्तनिरोधादौ कः स्वस्थात्मा प्रवर्त्तते ? तथा च—

अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत् ।
इष्टस्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरेत् ॥

तथा हि,—शारीरदुःखनिवृत्तये औषधादयः सन्ति, मानसदुःखनिवृत्तये प्रवरस्त्रीमिष्टान्नादयः सन्ति, आधिभौतिकदुःखनिवृत्तये च नीतिशास्त्रार्थवादिभिः प्रोक्ता नानाप्रकाराः उपायाः सन्ति, आधिदैविकदुःखनिवृत्तये च शान्तिमणिमन्त्रादयः सन्ति, इत्यत उत्तरसूत्रम्—

पदस्य फलं स्फुटतः प्रदर्शयति—धर्मार्थेत्यादिना। पुरुषार्थत्वं—अभिलाषविषयत्वं। तथाच धर्मार्थकामानां पुरुषार्थत्वं इति शेषः, अधमत्वं—परमत्वं, अत्यन्तत्वाभावे हेतुमाह—अधिकारीति पूर्वोक्तत्रयाणामिति सम्बन्धः। सांख्यनये वस्तुगत्या कस्यापि विनाशस्याभावादाह—विषयसुखत्वादिति। अत्र वाशब्दश्चार्थे। न तथा—नश्वरत्वं विषयजसुखत्वं चेत्यर्थः। अतैव हेतुमाह—नित्यत्वादिति। ननु मोक्षस्यापि तत्त्वज्ञानजन्यत्वात् कथं नित्यत्वमित्याशङ्क्याह—प्रकाशरूपत्वादिति, तथाच मोक्षो न जन्यते, किन्तु निरुक्तदुःखनिवृत्त्या प्रकाशते "श्रुतिर्हि

নিত্য ও প্রকাশস্বরূপ। অতএবই ত্রিবিধ দুঃখের অত্যন্ত নিবৃত্তিরূপ মোক্ষকে অত্যন্ত পুরুষার্থ বলা হইয়াছে ॥ ১ ॥

দুঃখনিবৃত্তি পুরুষার্থ হউক, তথাপি প্রত্যক্ষ সহজ উপায় হইতেই সেই দুঃখনিবৃত্তি সিদ্ধ হইতে পারে, সুতরাং অনেক জন্মান্তরী আয়াসসাধ্য শাস্ত্রবোধ্য চিত্তনিরোধাদি দুষ্কর কার্য্য কোন সুস্থমনা ব্যক্তি কর্ত্তৃক প্রবর্ত্ত হইবে ? দেখ অর্কবৃক্ষে (বাড়ীর আকন্দগাছে) যদি মধু লাভ করিতে পারে, তবে কিজন্য পর্ব্বতে যাইবে ? অভীষ্ট অর্থের সিদ্ধি হইল কোন্ বিদ্বান্ ব্যক্তি যত্ন করে ?" দেখ শারীরিক দুঃখ নিবৃত্তির জন্য ঔষধাদি রহিয়াছে, মানসিক দুঃখ নিবৃত্তির জন্য উৎকৃষ্ট স্ত্রী ও মিষ্টান্নাদি বিদ্যমান আছে, আধিভৌতিক দুঃখ

न दृष्टात्तत्सिद्धिर्निवृत्तेरप्यनुवृत्तिदर्शनात् ॥ २ ॥

न वयं निवृत्तिमात्रं पुरुषार्थं इति ब्रूमः, किन्तु उत्पत्तिनिवृत्तिः औषधादिना च नावश्यं दुःखं निवर्तते, यदि वा कथञ्चिन्निवर्तेत पुनरन्येन न भवितव्यमिति नास्ति नियमः ॥ २ ॥

भवतु दुःनिवृत्तिस्तथापि न तथा पुरुषार्थः, पुनःपुनस्तथाविधप्रतीकारकरणादित्यत आह—

यथाभावं स्वरूपेण व्यवस्थिति'रित्यादिवाक्यैरात्यन्तिकस्वरूपावस्थानस्यैव मोक्षत्वात्। निरुक्तदुःखनिवृत्तेरात्यन्तिकपुरुषार्थत्वाभिधानमुत्तरत्र मोक्षत्वाभिधानञ्च सहभावितया मोक्षत्वव्यपदेशिनेति ध्येयम् ॥ १ ॥

द्वितीयसूत्रस्यावतरणिकामाचष्टे—भवत्वित्यादिना । अल्पायासेनेष्टसिद्धिसम्भवे कोऽपि बह्वायासं न करोतीति स्वाभिमतं समर्थयितुं लौकिकाभाणकं प्रमाणयति—अर्के चेदिति। "अर्के" इत्यत्र "अक्के" इति वाचस्पतिमिश्रादिसम्मतः पाठः, अक्के गृहकोणे इति तदर्थः। अतोत्तरसूत्रमिति, अत—अस्यां शङ्कायां उत्तराय—प्रतिवचनाय सूत्रं नदृष्टादित्यादि सूत्रमित्यर्थः।

सूत्रतात्पर्य्यं विवृणोति—न वयमित्यादिना । निवृत्तिमात्रं—यथाकथञ्चिन्निवृत्तिं । उत्पत्तिनिवृत्तिः—अनागतावस्थदुःखानामनाविर्भाव इत्यर्थः, नास्ति नियम इति, तथाच भाविदुःखप्रसक्त्यैव तादृशदुःखनिवृत्त्या न कृतकृत्यतेति भावः ॥ २ ॥

নিবৃত্তির জন্য নীতিশাস্ত্রার্থবাদী কর্তৃক কথিত নানা প্রকার উপায় আছে, আধিদৈবিক দুঃখ নিবৃত্তির জন্য ও শান্তিমণিমন্ত্রাদি উপায় আছে, এই আশঙ্কাতেই উত্তর সূত্র বলিয়াছেন "দৃষ্ট উপায় হইতে সেই ত্রিবিধ দুঃখের অত্যন্ত নিবৃত্তি সিদ্ধ হইতে পারে না, যে হেতু নিবৃত্তি হইলেও পুনরায় দুঃখের আবির্ভাব হইতে দেখা যায়"।

আমরা দুঃখ নিবৃত্তিমাত্রকেই পুরুষার্থ বলি নাই, কিন্তু দুঃখের উৎপত্তি ই পুরুষার্থ, ঔষধাদি দ্বারা নিয়তঃই দুঃখনিবৃত্তি হয় না, কথঞ্চিন্নিবর্ত্তিত হইলেও পুনরায় অন্য দুঃখ যে হইবে না, তাহার কোনও নিয়ম নাই॥ ২ ॥

प्रात्यहिकक्षुत्प्रतीकारवत् तत्प्रतीकारचेष्टनात् पुरुषार्थत्वम् ॥ ३ ॥

यथा प्रत्यहं क्षुत्प्रतीकाराय वरान्नभक्षणादिना तृप्तस्य पुरुषार्थता, तथा दुःखनिवृत्तये औषधादिना पुनःपुनःप्रतीकारात् पुरुषार्थतेति ॥३॥

सिद्धान्तमाह—

अभ्युपगमवादेन तृतीयसूत्रमवतारयति—भवत्विति। दुःखनिवृत्तिरिति औषधादिना नियमतो दुःखनिवृत्तिरित्यर्थः। न तथा पुरुषार्थः—नात्यन्तिकपुरुषार्थः। अत्र हेतुमाह—पुनःपुनस्तथाविधप्रतीकारकरणादिति, पुनःपुनस्तत्सजातीयदुःखान्तरनिवृत्तौ तदुपायसजातीयोपायान्तरानुष्ठानादित्यर्थः। इति इममेवार्थं, अतः—अतःपरं आह परसूत्रेणेत्यर्थः। सूत्रार्थं विवृणोति—यथेत्यादिना ॥ ३ ॥

चतुर्थसूत्रस्योपष्टम्भं दर्शयति—सिद्धान्तमाहेति। ननु दृष्टोपायसाध्यदुःखनिवृत्तेः पुरुषार्थत्वसद्भावे तथैव कृतकृत्यता स्यादित्याशङ्कायां सिद्धान्तमित्यर्थः।

দৃষ্ট উপায়দ্বারা দুঃখনিবৃত্তি হয় হউক, তথাপি সেই নিবৃত্তি অত্যন্ত পুরুষার্থ নহে, যে হেতু বার বার সেইরূপ প্রতিকারের চেষ্টা করিতে হয়, এই কথাই অতঃপর সূত্রকার বলিয়াছেন—

"বারবার প্রতীকারের চেষ্টা করিতে হয় বলিয়া প্রাত্যহিক ক্ষুধা প্রতীকারের ন্যায় সেই দুঃখ নিবৃত্তির পুরুষার্থতা," (অর্থাৎ অত্যন্তিক পুরুষার্থতা) নাই।

প্রতিদিন ক্ষুৎপ্রতীকারের জন্য উৎকৃষ্ট অন্ন ভক্ষণাদিদ্বারা পরিতৃপ্ত ব্যক্তির যেরূপ পুরুষার্থতা, দুঃখনিবৃত্তির জন্য ঔষধাদিদ্বারা (বহুচেষ্টা করিয়া) বারবার প্রতীকার লাভ করিয়াও সেইরূপ পুরুষার্থতা ॥ ৩ ॥

सर्वासम्भवात् सम्भवेऽपि सत्तासम्भवाद्धेयः प्रमाणकुशलैः ॥ ४ ॥

न हि सर्वदेशे सर्वकाले वा वैद्यादयो वसन्ति। सम्भवेऽपि वा न अत्यन्तत्रिविधदुःखनिवृत्तिः स्यात्। अवश्यं हि देहनिबन्धनात् रागादीनां सम्भवः, देही सुखीति न दृष्टमिति। तस्मादेष पुरुषार्थः प्रामाणिकैः हेयः शास्त्रगम्यश्च उपादेयः॥ ४ ॥

सूत्रघटकसर्व्वासम्भवादित्यत्र सर्व्वत्रासम्भवादिति सप्तमीतत्पुरुषं मनसि कृत्य तदर्थं विवृणोति—न हि सर्व्वदेश इत्यादिना। सम्भवेऽपीति, कदाचित् कस्यचित् भाग्यवशात् सर्व्वत्र सर्व्वदा सर्व्वदृष्टोपायसङ्घटनेऽपीत्यर्थः। नात्यन्तिकेत्यादिकं सत्तासम्भवादित्यस्य तात्पर्य्यार्थवर्णनं, तथाच दृष्टोपायैर्दुःखनिवृत्तावपि तन्निवृत्तेः सत्त्वस्य आत्यन्तिकत्वस्य असम्भवादिति मूलार्थः फलितः। सत्तासम्भवे हेतुं दर्शयति अवश्यं हीत्यादिना। हि यस्मादर्थे। देहनिबन्धनादिति—देहसम्बन्धाभिमानवशादित्यर्थः। रागादिना द्वेषादिपरिग्रहः, तथाच दुःखनिदानीभूतरागादिसद्भावे पुनर्दुःखोत्पत्तेरवश्यम्भावादात्यन्तिकत्वस्य सर्व्वथैवासम्भव इति भावः। एतदेव विशदयति—देही सुखीति। देहाभिमानी सर्व्वथा सुखीत्यर्थः। उपसंहरति—तस्मादिति। सूत्रीयहेयपदस्य कर्म्मपदं पूरयति—एष पुरुषार्थ इति, एष पूर्व्वसूत्रोक्तदृष्टोपायजन्यदुःखनिवृत्ति-

দৃষ্টোপায়সাধ্য দুঃখনিবৃত্তির পুরুষার্থতা থাকিলে তদ্দ্বারাই চরিতার্থতা হইতে পারে, এই আশঙ্কায় সিদ্ধান্ত বলিতেছেন—

“সর্ব্বত্র দৃষ্টোপায়ের অসম্ভববশতঃ কদাচিৎ সম্ভব হইলেও সেই দুঃখনিবৃত্তির সত্ত্বেও (পুনরায় দুঃখোৎপত্তির সম্ভাবনা থাকায় আত্যন্তিকত্বের) অসম্ভববশতঃ প্রামাণিক ব্যক্তিরা তাদৃশ দুঃখনিবৃত্তিকে হেয় অর্থাৎ দুঃখমধ্যেই গণ্য করিয়া থাকেন”।

সকলদেশে বা সকলকালে বৈদ্যাদির সদ্ভাব হয় না, হইলেও তদ্দ্বারা আত্যন্তিক দুঃখ নিবৃত্তি হইতে পারে না, যে হেতু দেহ থাকিলেই অবশ্য রাগদ্বেষাদি

যুক্ত্যন্তরমাহ—

উৎকর্ষাদপি মোক্ষস্য সর্ব্বোৎকর্ষশ্রুতেঃ ॥ ৫ ॥

অথবা—দুঃখত্রয়নিবৃত্তেরন্যোঽন্যমুৎকর্ষো দৃষ্টঃ, মোক্ষস্য সর্ব্বোৎকৃষ্টঃ, নিত্যত্বাদেকত্বাৎ সর্ব্বদুঃখোচ্ছেদরূপত্বাচ্চ ॥ ৫ ॥

ননু নাস্ত্যেব তদ্দর্শনং যত্র মোক্ষো ন পুরুষার্থঃ, নচ ঔষধাদিনা দুঃখনিবৃত্তিমাত্রং মোক্ষঃ। তস্মাদ্যস্তব সিদ্ধান্তঃ সোঽস্মাকং ভবিষ্যতি ইত্যত আহ—

রূপঃ। প্রামাণিকৈরিতি প্রমাণকুশলৈরিত্যস্য বিবরণং, হেয়ঃ ত্যাজ্যঃ দুঃখপক্ষে নিক্ষেপণীয় ইতি যাবৎ ॥ ৪ ॥

যুক্ত্যন্তরমিতি, দৃষ্টোপায়জন্যনিকৃষ্টদুঃখনিবৃত্তের্ম্মোক্ষাপেক্ষয়া হেয়ত্বে ইত্যাদিঃ।

সূত্রতাৎপর্য্যং বিবৃণোতি—অথবেত্যাদিনা। তথাচ "ন চ পুনরাবর্ত্ততে" (ছান্দোগ্য ৮ অ, ১৫ খ, ১ মন্ত্রঃ) ইত্যাদি সর্ব্বোৎকর্ষশ্রুতের্ম্মোক্ষস্য উৎকর্ষাদপি পুরুষার্থান্তরাপেক্ষয়া উৎকৃষ্টত্বাদপি মোক্ষাপেক্ষয়া নিকৃষ্টদুঃখনিবৃত্তিরূপপুরুষার্থস্য হেয়ত্বমিতি সূত্রার্থঃ ফলিতঃ ॥ ৫ ॥

থাকিবে, (রাগদ্বেষাদি থাকিলে দুঃখও অবশ্যম্ভাবী); দেহী যে সর্ব্বদা সুখী এরূপ দৃষ্ট হয় না। অতএব প্রামাণিক ব্যক্তিগণ এইরূপ পুরুষার্থকে পরিত্যাগ ও শাস্ত্রগম্য পুরুষার্থকে গ্রহণ করিয়া থাকেন ॥ ৪ ॥

দৃষ্টোপায়জন্য দুঃখনিবৃত্তিরূপ পুরুষার্থ যে মোক্ষ অপেক্ষায় হেয়, তদ্বিষয়ে যুক্ত্যন্তর বলিতেছেন—

"সর্ব্বোৎকর্ষশ্রুতিনিবন্ধন মোক্ষের উৎকর্ষ বশতঃ ও (মোক্ষ অপেক্ষা উক্ত পুরুষার্থ হেয়)।"

দুঃখত্রয় নিবৃত্তির পরস্পর উৎকর্ষ পরিলক্ষিত হয়, তন্মধ্যে নিত্যত্ব, একত্ব ও দুঃখোচ্ছেদস্বরূপত্বনিবন্ধন মোক্ষই সমস্ত দুঃখনিবৃত্তি অপেক্ষা উৎকৃষ্ট। ("সুতরাং অন্য সমস্ত দুঃখ নিবৃত্তি অপেক্ষা হেয়) ॥ ৫ ॥

अविशेषश्चोभयोः ॥ ६ ॥

स्वपक्षसिद्धया परपक्ष उपालभ्यते, न त्वन्यथा । तत्रास्तु—
यत्रोभयोः समो दोषः परिहारोऽपि तादृशः ।
नैकः पर्य्यनुयोक्तव्यस्तादृगर्थविचारणे ॥ ६ ॥
किं स्वभावतो बन्धस्य मोक्षसाधनोपदेशोऽन्यथा वा इत्यत्राह

दृष्टोपायसाध्याया दुःखनिवृत्तेः परमपुरुषार्थत्वं निराकृत्य तन्निराकरणस्य सर्व्वदार्शनिकाना-मेव समानत्वं व्यवस्थापयितुं षष्ठसूत्रस्योपष्टम्भमाचष्टे—नन्वित्यादिना । न चौषधादिना दुःखनिवृत्तिमात्रं मोक्ष इति, कस्यापि सम्मत इति शेषः । तस्मात् मोक्षस्य पुरुषार्थत्वादीनां सर्व्वमत एव समानत्वात् तव पूर्व्वपक्षकारिणो दार्शनिकस्य, अस्माकं सांख्यमतावलम्बिनां । इति इममर्थं, अतः—अतःपरं आह परसूत्रेणेत्यर्थः । "उभयोः सांख्यतदितरदार्शनिकयोः अविशेषः मोक्षपुरुषार्थतादिसिद्धान्ते विशेषाभावः तुल्यतेति यावदिति सूत्रार्थः । तथाच नास्ति कस्यापि प्रश्नावसर इति भावः । ननु स्वमते यथा तथास्तु,तथापि भवान् पृच्छ्यते इति यदि कश्चिद्-ब्रूयात्तं प्रत्याह—स्वपक्षेत्यादि । नत्वन्यथा स्वपक्षसिद्धिं विना । अत्र प्राचीनसंवादं दर्शयति—यत्रेति, यत्र यादृगर्थविचारणे, उभयोः वादिप्रतिवादिनोः, परिहारोऽपि दोषनिराकरणमपि, तादृशः समः । एकः तयोरन्यतरः, पर्य्यनुयोक्तव्यः—प्रष्टव्यः ॥ ६ ॥

এমন কোন দর্শনই নাই, যাহাতে মোক্ষ পুরুষার্থ নহে, ঔষধাদি দ্বারা দুঃখ-নিবৃত্তিমাত্রকেও কেহই মোক্ষ বলিয়া স্বীকার করেন না, সুতরাং মোক্ষ বিষয়ে পূর্ব্বপক্ষবাদীদের যেরূপ সিদ্ধান্ত সাংখ্যমতাবলম্বীদেরও সেরূপই সিদ্ধান্ত হইবে, এই কথাই অতঃপর বলিতেছেন—

"মোক্ষসিদ্ধান্ত বিষয়ে উভয়ের অর্থাৎ সাংখ্য ও তদিতর দার্শনিকদের কোনই বিশেষ নাই" (অর্থাৎ এবিষয়ে সকলকেই একরূপ সিদ্ধান্তে উপনীত হইতে হইবে বলিয়া কেহই কাহাকে প্রশ্ন করিতে পারেন না)।

নিজের পক্ষ সমর্থন করিতে পারিলেই পরকে দোষ দেওয়া যায়, নিজের

न स्वभावतो बद्धस्य मोक्षसाधनोपदेशविधिः ॥ ७ ॥

स्वभावनाशात् स्वरूपनाशप्रसङ्गात्। उक्तञ्च—

वस्तुस्थित्या न बन्धोऽस्ति तदभावान्न मुक्तता।

विकल्पघटितावेतावुभावपि न किञ्चन ॥ ७ ॥

एतदेव दृढयति—

सप्तमसूत्रावतारणार्थं शङ्कते—किमित्यादिना। स्वभावतो बद्धस्य स्वाभाविकबन्धयुक्तस्य, अन्यथा वा स्वाभाविकबन्धरहितस्य वा, मोक्षाय साधनोपदेशः मोक्षसाधनोपदेशः, इत्यत्र—इति शङ्कायां।

नेति। स्वभावतो बद्धस्य मोक्षसाधनोपदेशेन विधिः अनुष्ठानं न, नियोज्यानां घटत इति शेषः।

कस्मादित्याकाङ्क्षायां वृत्तिकारो हेतुं पूरयति—स्वभावनाशात् स्वरूपनाशप्रसङ्गादिति। स्वाभाविकस्य काल्पनिकत्वमेव सूचितं भवति, तत्र प्राचीनसंवादं दर्शयितुं वृत्तिकृदाह—उक्त-

পক্ষ সমর্থন করিতে না পারিলে পরকেও দোষ দেওয়া যায় না। প্রাচীনেরাও বলিয়াছেন—

"যাদৃশ বিষয়ের বিচারে উভয় পক্ষেরই সমান দোষ ও সমান মীমাংসা, তাদৃশ বিষয়ের বিচারে কেবল এক পক্ষই প্রশ্নের বিষয় (অর্থাৎ প্রশ্নের জন্য দায়ী) হইতে পারে না" ॥ ৬ ॥

স্বাভাবিক বন্ধযুক্ত পুরুষের জন্য কি স্বাভাবিক বন্ধরহিত পুরুষের জন্য মোক্ষ সাধনের উপদেশ প্রদত্ত হইয়াছে? এই আশঙ্কায় বলিতেছেন—

"স্বাভাবিক বন্ধযুক্ত পুরুষের জন্য মোক্ষসাধনের উপদেশবিধি সম্ভবপর হইতে পারে না।"

যেহেতু স্বভাবনাশে বস্তুর স্বরূপনাশের আপত্তি উপস্থিত হয়। ইহার তাৎপর্য্য এই যে, স্বভাব যাবদ্দ্রব্যভাবি, অর্থাৎ যে পর্য্যন্ত বস্তুর সত্তা থাকে, সে পর্য্যন্ত স্বভাবও নিয়তঃই থাকে, স্বভাববিচ্যুত বস্তু কখনও পরিদৃষ্ট হয় না, যেমন

स्वभावस्यानपायित्वादननुष्ठानलक्षणमप्रामाण्यम् ॥ ८ ॥

नित्यस्वभावस्य बन्धस्या… नाशार्थमनुष्ठानमशक्यमिति ॥८॥

कश्चिद्विप्रलम्भाय अशक्यमपि उपदिशेत्, यथा अङ्गुल्यग्रे करियूथशतमिति, अत आह—

इति। वस्तुस्थित्या वस्तुगत्या, स्वाभाविक इति यावत्। तदभावात् स्वाभाविकबन्धाभावात् मुक्तता मुक्तिः न, साधनीयेति शेषः। स्वतःसिद्धमुक्ततायां साधनापेक्षाविरहादिति भावः। तर्हि किं स्वरूपौ बन्धमोक्षावित्याकाङ्क्षायामाह—विकल्पघटिताविति। उभौ बन्धमोक्षौ विकल्पघटितौ काल्पनिकौ, न किञ्चन न वास्तवावित्यर्थः ॥ ७ ॥

एतदेवेति, पूर्व्वसूत्रप्रतिपादितं स्वाभाविकबन्धविमुक्ताय शास्त्रविहितानुष्ठानाघटनमेवेत्यर्थः।

सूत्रतात्पर्य्यं वर्णयति—नित्येत्यादिना। अपचायादिति अनपायित्वादित्यस्य विवरणं अविनाशित्वादिति तदर्थः। तन्नाशार्थं—बन्धनाशार्थं, अनुष्ठानं—मोक्षशास्त्रबोधितशमदमाद्यनुष्ठानं, अशक्यं—अकरणीयं इष्टसाधनत्वाभावनिश्चयादिति भावः। सूत्रे अननुष्ठानलक्षणमिति, अननुष्ठानं लक्षणं स्वरूपं यस्य तादृशं अप्रामाण्यं, मोक्षशास्त्रस्य स्यादिति शेषः ॥ ८ ॥

मोक्षसाधनोपदेशशास्त्रं केनचित् प्रतारकेण कृतमिति वदतो मतस्य निरासकं सूत्रमवतारयितुमाह—कश्चिदित्यादि। विप्रलम्भाय—प्रतारणाय।

উষ্ণত্ব বহ্নির স্বভাব, সেই উষ্ণত্ববিহীন বহ্নি কেহ কখনও দেখিয়াছেন কি ? সুতরাং স্বাভাবিক বন্ধ অপগমের জন্য কখনও শাস্ত্রানুষ্ঠান হইতে পারে না। এবিষয়ে প্রাচীনেরাও বলিয়াছেন—

বস্তুতঃ পুরুষের বন্ধ নাই, বন্ধ না থাকিলে স্বতঃসিদ্ধত্বনিবন্ধনও সাধনাপেক্ষ হইতে পারে না ; সুতরাং এই বন্ধ ও মুক্তি উভয়ই কাল্পনিক, ইহার কোনটিই যথার্থ নহে ॥ ৭ ॥

এ বিষয়ই আরও দৃঢ় করিতেছেন—

"নিত্যের স্বভাবের অবিনাশিত্বনিবন্ধন (তাহার বিনাশের জন্য বিহিত হইলে) মোক্ষশাস্ত্রের অনুষ্ঠানরূপ অপ্রামাণ্য হইতে পারে।"

নাশক্যোপদেশবিধিরুপদিষ্টেঽপ্যনুপদেশঃ ॥ ৯ ॥

অশক্যকার্য্যায় উপদেশঃ ন সম্ভবতি। উপদিষ্টেঽপি ন উপদেশঃ, নিষ্ফলীভবতি ইত্যর্থঃ ॥ ৯ ॥

অত্র শঙ্কতে—

শুক্লপটবদ্বীজবচ্চেৎ ॥ ১০ ॥

স্বভাবস্যাপি নাশো দৃশ্যতে, যথা পটে শুক্লত্বস্য রাগাদিভিঃ, বীজস্য বা অগ্ন্যুত্তাপাৎ অঙ্কুরজননশক্তেঃ ॥ ১০ ॥

সূত্রতাৎপর্য্যং বিবৃণোতি—অশক্যেত্যাদিনা। উপদিষ্টেঽপি—প্রতারকাদিভির্ব্বিহিতেঽপি, অশক্যানামুপায়ে ইতি শেষঃ। ন উপদেশ ইতি অনুপদেশ ইত্যস্য বিবরণং তস্য চ স উপদেশ ইত্যাদিঃ। নিষ্ফলীভবতীতি চ ন উপদেশ ইত্যস্য বিবরণম্। তথাচ উপদিষ্টেঽপি স উপদেশঃ নিষ্ফলীভবতীতি সূত্রার্থঃ ফলিতঃ ॥ ৯ ॥

পূর্ব্বপক্ষসূত্রমবতারয়িতুমাহ—অত্র শঙ্কত ইতি।

সূত্রতাৎপর্য্যং বিবৃণোতি—স্বভাবস্যেত্যাদিনা। অঙ্কুরজননশক্তেরিতি—নাশ ইতি শেষঃ। তথাচৈবং স্বাভাবিকস্য বন্ধস্যাপি নাশঃ সম্ভবত্যেবেতি তৎসাধনোপদেশঃ স্যাদিতি পূর্ব্বপক্ষাশয়ঃ ॥১০॥

নিত্যের স্বভাববন্ধের অবিনাশিত্বনিবন্ধন তাহার বিনাশের জন্য মোক্ষ শাস্ত্রার্থের অনুষ্ঠান কোনরূপেই সম্ভবপর হইতে পারে না ॥ ৮ ॥

কেহ প্রতারণা করিবার জন্য অশক্য কার্য্যেরও উপদেশ দিয়া থাকেন, যেমন (কেহ বলেন) অঙ্গুলির অগ্রভাগে শত হস্তীর যূথ আছে, বস্তুতঃ এটি প্রতারণাবাক্য, যে হেতু অঙ্গুলির অগ্রভাগে একটি হস্তি থাকাও সম্ভবপর হইতে পারে না, সেইরূপ এই মোক্ষশাস্ত্রও কোন প্রতারক ব্যক্তিই লিখিয়া থাকিবেন, এই আশঙ্কায় বলিতেছেন—

অশক্য কার্য্যের জন্য উপদেশ সম্ভবপর নহে, প্রতারক ব্যক্তিরা উপদেশ দিলেও সেই উপদেশ উপদেশ নহে, অর্থাৎ নিস্ফল হয় ॥ ৯ ॥

সিদ্ধান্তমাহ—

শক্ত্যুদ্ভবাভ্যাং নাশক্যোপদেশঃ ॥ ১১ ॥

সৎকার্য্যসিদ্ধের্ন পটস্য শৌক্ল্যং নষ্টং, কিন্তু রাগাদিনা অভিভূতং,

সিদ্ধান্তসূত্রমবতারয়তি—সিদ্ধান্তমাহেতি। সূত্রমাপূর্য্য বিবৃণোতি—সৎকার্য্যসিদ্ধেরিত্যাদিনা। সৎকার্য্যসিদ্ধেঃ নাসদুৎপদ্যতে ন চ সদ্বিনশ্যতীতি সিদ্ধান্তস্য যুক্তিপ্রমাণসিদ্ধত্বাৎ। অভিভূতং তিরোভূতং, উদ্ভূতং আবির্ভূতং। অঙ্কুরাজননাদপীতি দগ্ধবীজেনেত্যাদিনা বীজং ন নষ্টমিত্যত্র বীজপদং বীজগতাঙ্কুরজননশক্তিপরং। ননু দগ্ধবীজস্যাঙ্কুরজননশক্তের্যদি ন নাশস্তর্হি ক্ষালনেন শুক্লত্বস্যেব তস্যা অপি কদাচিদাবির্ভাবঃ স্যাদিত্যাশঙ্কায়ামাহ—তস্য চেত্যাদি। ন দৃশ্যতে ইত্যত্র হেতুমাহ—বস্তুবৈচিত্র্যাদিতি। নহি সর্ব্বৈর্বস্তুভিরেকরূপৈর্ভবিতব্যমিত্যস্তি নিয়ম ইতি ভাবঃ। অত্রামনুষ্টং প্রত্যাচষ্টে—কথমেতি। তথাচ উক্তদৃষ্টান্তদ্বয়োরপি নাশক্যস্য স্বাভাবিকস্য, উপদেশঃ সম্ভবতীতি শেষঃ, কুতঃ শক্ত্যুদ্ভবানুদ্ভবাভ্যাং উক্তদৃষ্টান্তদ্বয়েঽপি শক্তেঃ শুক্লত্বাদেরাবির্ভাবতিরোভাবাভ্যাং। ন

এস্থলে আশঙ্কা করিতেছেন—স্বভাবেরওত নাশ দেখা যায়, যেমন কুঙ্কুমাদিদ্বারা বস্ত্রের শুক্লত্বের নাশ হয়, এবং অগ্নির উত্তাপ হইতে বীজের অঙ্কুর জননশক্তির নাশ হয়; সুতরাং বন্ধরূপ স্বভাবেরওত নাশ হইতে পারে এবং তজ্জন্য শাস্ত্রোপদেশও সার্থক হইতে পারে ॥ ১০ ॥

পূর্ব্বসূত্রীয় আশঙ্কার সিদ্ধান্ত বলিতেছেন—

"উক্ত দৃষ্টান্তদ্বয় হইতেও স্বাভাবিকের বিনাশোপদেশ সম্ভবপর নহে, যে হেতু উক্ত স্থানেও শুক্লত্বাদি শক্তির আবির্ভাব এবং তিরোভাবই হইয়াছে, কিন্তু বিনাশ হয় নাই।"

সৎকার্য্যবাদের যুক্তি প্রমাণসিদ্ধত্বনিবন্ধন পরে শুক্লত্ব বিনষ্ট হয় না, কিন্তু রক্তিমাদিদ্বারা তিরোভূত হইয়া থাকে, আর সংযোগাদিদ্বারা ধৌত করিলে পুনরায় আবির্ভূত হয়। দগ্ধবীজে অঙ্কুর জন্মায় না বলিয়া তাহার অঙ্কুরোৎপাদন শক্তিরও বিনাশ হয় না, কিন্তু তিরোভাব হয়, পরন্তু বস্তুর চিত্রিতাবশতঃ

चालनात् पुनरङ्कुरम्। अङ्कुराजननादपि बीजं न नष्टं, किन्त्वभिभूतं, तस्य च पुनरुद्भवो न दृश्यते वस्तुवैचित्र्यात्, अथवा योगिसङ्कल्पादिभिः तच्छक्त्याविर्भावात् ॥ ११ ॥

नन्वात्मा स्वभावतो न बद्धः, किन्तु कालवशाद्बद्धो भविष्यतीत्यत आह—

न कालयोगतो व्यापिनो नित्यस्य सर्वसम्बन्धात् ॥ १२ ॥

भवतु अयं, यदि तस्य कदापि कालयोगः स्यात् न स्याद्वा।

दृष्टान्त एव विनाशो न भवतीति कुतो दार्ष्टान्तिके तत्सम्भव इति भावः इति सूत्रार्थः फलितः ॥ ११ ॥

एवं बन्धस्य स्वाभाविकत्वं निराकृत्य नैमित्तिकत्वमपि निराकरिष्यती—सूत्रजातेन। तत्र कालयोगरूपनिमित्तजन्यत्वनिराकरणसूत्रमवतारयितुमाह—नन्वित्यादि।

सूत्रतात्पर्यं विवृणोति—भवत्वित्यादिना। अयं—कालयोगतो बन्धः, तस्य—पुरुषस्य। सर्व्वकालसम्बन्धोपाधित्वादिति, तथा च नित्यसंयोगस्य बन्धकारणत्वे अनिर्मोक्षः स्यादिति भावः। परसूत्र एव प्रयोजनीयस्य "व्यापिन" इति पदस्येह सन्पातायातत्वं दर्शयति—नित्यस्ये-त्यादिना। सूत्रे न कालयोगत इत्यनन्तरं "बन्ध" इति पूरणीयं, एवमुत्तरत्रापि। अत्र च

বশতঃ তাহার পুনরায় আবির্ভাব দেখা যায় না। অথবা যোগিসঙ্কল্পাদি দ্বারা কদাচিৎ সেই শক্তির পুনরায় আবির্ভাবও হইয়া থাকে ॥ ১১ ॥

আত্মা স্বভাবতঃ বদ্ধ নহে, কিন্তু কালসংযোগবশতঃ বদ্ধ হয়, এই প্রশ্নে বলিতেছেন—

"কালসংযোগবশতঃ পুরুষের বন্ধ হইতে পারে না; যেহেতু নিত্য ও ব্যাপী কালের সম্বন্ধ সর্ব্বদাই বর্ত্তমান আছে।"

কালসংযোগবশতঃ বন্ধ তবেই হইতে পারে, যদি পুরুষের কালসংযোগ কদাচিৎ হয় ও কদাচিৎ না হয়, কিন্তু তাহা নহে; যেহেতু নিত্য ও ব্যাপী আত্মার সর্ব্বকালেই সমান সম্বন্ধ আছে। সুতরাং সেই সংযোগকে বন্ধের

नित्यस्य व्यापिनः सर्वकालसम्बन्धोपाधित्वात्। नित्यस्येत्यनेन सर्वकालसम्बन्धे प्राप्ते। "व्यापिन" इत्युत्तरसूत्रपर्य्यालोचनया सम्यगायातम् ॥ १२ ॥

देशवशाद्बन्धो भविष्यतीत्यत आह—

न देशयोगतोऽप्यस्मात् ॥ १३ ॥

व्यापिनो नित्यस्य सर्वदेशसम्बन्धादिति ॥ १३ ॥

अथावस्थातो बन्धो भविष्यतीत्यत आह—

नावस्थातो देहधर्मत्वात्तस्याः ॥ १४ ॥

प्रकरणे श्रुतिस्मृतियुक्तिसिद्धं कालादीनां सामान्यतो निमित्तत्वं नापलप्यते, किन्तु विशिष्टजनकत्वमेवेति सुनिपुणं विभावनीयम् ॥ १२ ॥

सूत्रान्तरमवतारयति—देशवशादिति। सूत्रीय"अस्मा"दिति पदं व्याचष्टे—व्यापिन इत्यादिना। नित्यस्याप्यविभुनः सर्व्वदेशसम्बन्धासम्भवाद्व्यापिन इति, व्यापिनोऽप्यनित्यस्य भूतभविष्यद्देशासम्बन्धित्वान्नित्यस्येति च पूर्व्वसूत्रादानीय इह योजितमिति मन्तव्यम्। तथा च देशयोगस्य बन्धहेतुत्वेऽपि पूर्व्ववदनिर्म्मोक्षप्रसङ्ग एव दोष इति ॥ १३ ॥

सूत्रान्तरमवतारयितुमाह—अथेत्यादि। सूत्रघटकं पदं व्याचष्टे—तस्या इत्यादिना।

কারণ বলিলে কখনও পুরুষের মুক্তি হইতে পারে না। "নিত্যস্য" এই বিশেষণদ্বারাই আত্মার সর্ব্বকাল-সম্বন্ধ প্রাপ্ত হইয়াছে; সুতরাং "ব্যাপিনঃ" এই বিশেষণটির এই সূত্রে কোনই প্রয়োজনীয়তা নাই; কিন্তু পরসূত্রে প্রয়োজনীয়তা আছে; অতএব পরসূত্র পর্য্যালোচনা-প্রসঙ্গই এই সূত্রে আসিয়া পড়িয়াছে ॥ ১২ ॥

দেশযোগবশতঃ বদ্ধ হইবে এই আশঙ্কায় বলিতেছেন—

"দেশযোগবশতঃও বদ্ধ হইতে পারে না; যেহেতু ব্যাপী ও নিত্য আত্মার সর্ব্ব দেশেই সম্বন্ধ আছে।" (সুতরাং দেশসংযোগকে বন্ধের কারণ বলিলেও সর্ব্বদাই দেশসংযোগরূপ বন্ধের কারণ থাকায় কখনও পুরুষের মুক্তি হইতে পারে না, ইহাই দোষ) ॥ ১৩ ॥

অবস্থা হইতে পুরুষ বদ্ধ হইবে এই প্রশ্নে বলিতেছেন—

तस्याः अवस्थायाः। देहधर्मत्वादित्युपलक्षणं, अपरिणामित्वादिति परमार्थः॥ १४॥

आत्मनोऽप्यवस्था भविष्यतीत्यत आह—

असङ्गोऽयं पुरुष इति॥ १५॥

"असङ्गो ह्ययं पुरुष" इति श्रुतिरस्ति, सा बाधिता स्यात्॥ १५॥

देहे अवस्था च बाल्ययौवनादिरूपपरिणामः। कार्य्यकारणयोः सामानाधिकरण्यनियमात् देहधर्म्मः पुरुषीयबन्धहेतुर्भवितुं नार्हतीति सूत्राशयः। ननु अन्यधर्म्मोऽपि अन्यदीयकार्य्यहेतुर्भवत्येव, यथा कारणगुणः कार्य्यगुणहेतुरित्याशङ्कायां हेत्वन्तरं पूरयितुमाह—देहेत्यादि। उपलक्षणीयं हेतुं दर्शयति—अपरिणामित्वादिति। पुरुषस्येत्यर्थः, तथा च पुरुषस्य बन्धो यदि अवस्थारूपपरिणामजन्यः स्यात्तदा कार्य्यकारणयोरभेदेन तस्यापि परिणामरूपत्वात् परिणामाभावरूपमपरिणामित्वं पुरुषस्य न स्यादिति भावः॥ १४॥

पुरुषस्यावस्थावत्त्वे बाधप्रदर्शकं सूत्रमवतारयितुमाह—आत्मन इति। सूत्रे इति शब्दो हेत्वर्थे। तथा च अयं पुरुषः असङ्ग इति हेतोः अवस्थाया न पुरुषधर्म्मत्वमिति सूत्रार्थः फलितः।

पुरुषस्यासङ्गत्वे बृहदारण्यकोपनिषदश्चतुर्थाध्यायतृतीयब्राह्मणस्य पञ्चदशमन्त्रात्मिकां श्रुतिं प्रमाणयति—असङ्ग इति। ननु पुरुषस्यासङ्गत्वेऽपि अवस्थायास्तद्धर्म्मत्वे को दोष इत्याशङ्काया-

"অবস্থার দেহধর্ম্মত্বনিবন্ধন অবস্থা হইতে পুরুষের বন্ধ হইতে পারে না।" (ইহার অভিপ্রায় এই যে, কারণ কার্য্যের অধিকরণে থাকিয়াই কার্য্য জন্মাইয়া থাকে, সুতরাং দেহের ধর্ম্ম-অবস্থা বন্ধরূপ কার্য্যের অধিকরণ আত্মাতে না থাকায় কখনও আত্মার বন্ধ জন্মাইতে পারে না)।

এই সূত্রে "দেহধর্ম্মত্বাৎ" এইটি উপলক্ষণ; পুরুষের অপরিণামিত্বনিবন্ধন অবস্থা হইতে বন্ধ হইতে পারে না, ইহাই বাস্তবিক অর্থ॥ ১৪॥

অবস্থা আত্মারই ধর্ম্ম হউক এই প্রশ্নে বলিতেছেন—

"যে হেতু পুরুষ অসঙ্গ (অন্য ধর্ম্মের অনাশ্রয়), অতএব অবস্থা আত্মার ধর্ম্ম হইতে পারে না।"

অবস্থা আত্মার ধর্ম্ম হইলে "অসঙ্গো হ্যয়ং পুরুষঃ" এই যে বৃহদারণ্যক শ্রুতি আছে, তাহা বাধিত হয়। ইহার অভিপ্রায় এই যে, শ্রুতিতে আছে,

कर्म्मवशाद्बद्धो भविष्यतीतीमं तद्दूषयति—

न कर्म्मणान्यधर्म्मत्वादतिप्रसक्तेश्च ॥ १६ ॥

निर्गुणत्वादात्मनः कर्म्मणोऽनात्मधर्म्मत्वम्। ननु अन्यधर्म्मेणापि कर्म्मणा बद्धो भविष्यति। तदयुक्तं, नहि अन्यधर्म्मेण अन्यत्र किञ्चि-

---

माह—सा बाधिता स्यादिति। अयमर्थः—असङ्गत्वञ्चात्र न सम्बन्धसामान्याभाववत्त्वं कालदेश-सम्बन्धेन पूर्व्वोक्तेन सह विरोधात् परन्तु अन्यधर्म्मानाश्रयत्वमेव, एवञ्च पुरुषस्यावस्थाङ्गीकारे तस्य अन्यधर्म्माश्रयत्वरूपसङ्गप्रसक्त्या। असङ्गत्वश्रुतेर्ब्बाधो दुष्परिहर एवेति। तथाच श्रुतिविरोधादेव नावस्थायाः पुरुषधर्म्मत्वमिति भावः ॥ १५ ॥

सूत्रान्तरमवतारयति—कर्म्मवशादिति। सूत्रे कर्म्मणेति कर्म्मजन्यादृष्टेनेत्यर्थः, अचिर-विध्वंसिनः कर्म्मणः अदृष्टद्वारकत्वं विना फलजनकत्वशङ्काया अप्यनुपयुक्तत्वात्। अतएव वृत्तौ कर्म्मणोऽनात्मधर्म्मत्वं प्रति निर्गुणत्वादिति हेतूपन्यासोऽपि यथायथं सङ्गच्छते। नेति, पुरुषस्य बन्ध इति शेषः। अन्यधर्म्मत्वात्—बुद्धिधर्म्मत्वात्।

अतिप्रसक्तेश्चेति हेत्वन्तराभिधानस्य प्रयोजनं दर्शयितुं शङ्कते—नन्विति। स्फुटतर-दोषस्यानभिधानेन सूत्रकारस्य न्यूनत्वं मन्यमानो वृत्तिकारः पूरयति—विश्वस्य वैचित्र्यानु-

---

পুরুষ অসঙ্গ (অন্য ধর্ম্মের অনাশ্রয়) ; যদি পুরুষে অবস্থারূপ অন্য ধর্ম্মের আশ্রয়ত্ব স্বীকার করা যায়, তবে পুরুষের অন্য ধর্ম্মের অনাশ্রয়ত্বরূপ অসঙ্গত্ব থাকে না ; বলিয়াই শ্রুত্যর্থ বাধিত হয় ; সুতরাং শ্রুত্যর্থের অনুরোধেই অবস্থা পুরুষের ধর্ম্ম হইতে পারে না ॥ ১৫ ॥

"কর্ম্মবশতঃ পুরুষ বদ্ধ হইবে" এই মতকে দূষিতেছেন—

"বিহিত নিষিদ্ধ কর্ম্মদ্বারাও পুরুষের বন্ধ হইতে পারে না ; যেহেতু কর্ম্ম অন্যের (বুদ্ধির) ধর্ম্ম ; একের ধর্ম্মে অন্যের বন্ধন স্বীকার করিলে মুক্ত আত্মার বন্ধাপত্তিরূপ অতিব্যাপ্তি দোষও হইতে পারে।"

আত্মার নির্গুণত্বনিবন্ধন কর্ম্ম (কর্ম্মজন্য অদৃষ্ট) আত্মার ধর্ম্ম নহে। কর্ম্ম অন্যের ধর্ম্ম হইলেও তদ্দ্বারা বদ্ধ হয়, একথাও অযুক্ত ; যেহেতু অন্যের ধর্ম্মদ্বারা অন্যত্র কিছুই আহিত হয় না। কারণ তাহা হইলে বিশ্বের বিচিত্রতার অনুপপত্তি হয়। ইহার অভিপ্রায় এই যে, কারণের বিচিত্রতাই কার্য্যের বিচিত্রতার সম্পাদক। অন্য ধর্ম্মদ্বারা যদি অন্যত্র কার্য্য হয়, তবে

दाघीयसी, विश्वस्य वैचित्र्यानुपपत्तेः, अतिप्रसक्तेश्चेति। मुक्तात्मनामपि बन्धप्रसङ्गोऽन्यत्वाविशेषादिति ॥ १६ ॥

दूषणान्तरमाह—

विचित्रभोगानुपपत्तिरन्यधर्मत्वे ॥ १७ ॥

दृश्यते 'केचित् सुखिनः केचित् दुःखिनः। न चानादौ संसारे केनापि सुखहेतु कर्म दुःखहेतु कर्म वा न कृतं, अन्यधर्मेण अन्यत्र कार्य्यजनने सर्वे सुखिनो दुःखिनो वा स्युः ॥ १७ ॥

पपत्तेरिति। तथाहि—अन्यधर्म्मेणापि यद्यन्यत्र कार्य्यमुत्पाद्यते, तदान्यत्वाविशेषेण सर्व्वत्रैव सर्व्वकारणसमवधानप्रसङ्गात् कुत्रापि न्यूनाधिकादिरूपकारणवैचित्र्यं न स्यात्, तदभावे च कार्य्यवैचित्र्यं न घटते, कारणवैचित्र्यनियम्यत्वात् कार्य्यवैचित्र्यस्येति स्फुटतरोऽभिप्रायः। अतिप्रसक्तिं विशदयति—मुक्तात्मनामपीत्यादिना ॥ १६ ॥

दूषणान्तरमिति, अन्यधर्म्मेणान्यत्र कार्य्यजनने इत्यर्थः। सूत्रे अन्यधर्म्मत्व इति कारणत्व-सामानाधिकरण्याङ्गीकार इति शेषः। अथवा अन्यस्मिन् धर्म्मत्वं वृत्तित्वं यस्येति व्युत्पत्त्या अन्यधर्म्म एवान्यधर्म्मत्वशब्दस्यार्थः, एवञ्च अन्यदीयकार्य्यजनकत्वस्याङ्गीकार इति शेषः।

सूत्रतात्पर्य्यं वर्णयति—दृश्यत इत्यादिना। न चेति न कृतमित्यन्वयः, तथा च नञ्‌द्वयस्य

সর্ব্বত্রই সমস্ত কারণের সমাধান হওয়ায় ন্যূনাধিক্যাদিরূপ কারণের বিচিত্রতা কোথাও রক্ষিত হয় না; সুতরাং বিশ্বের বৈচিত্র্যও হইতে পারে না। সূত্রের "অতিপ্রসক্তেশ্চ" ইহার তাৎপর্য্য এই যে, অন্যের কর্ম্মদ্বারা যদি অন্যের বন্ধন হয়, তবে অন্যত্বের কোনও বিশেষ না থাকায় (অর্থাৎ বুদ্ধি অপেক্ষায় অমুক্ত আত্মাতে যেরূপ অন্যত্ব আছে, মুক্ত আত্মাতেও সেইরূপ অন্যত্ব থাকায়) মুক্তাত্মারও বন্ধপ্রসঙ্গ অনিবার্য্য ॥ ১৬ ॥

অন্য ধর্ম্মদ্বারা অন্যত্র কার্য্যোৎপত্তি স্বীকারে দোষান্তর বলিতেছেন—

"অন্য ধর্ম্মে অন্যদীয় কার্য্যের জনকত্ব স্বীকার করিলে বিচিত্র ভোগের অনুপপত্তি হয়।"

জগতে দেখা যায়, কোন কোন লোক সুখী ও কোন কোন লোক দুঃখী। অনাদি সংসারে এমন কেহই নাই যে, যে সুখের হেতু বা দুঃখের হেতু কর্ম্ম না

अन्यधर्मेण अन्यत्र कार्य्यजनने प्रकृतिर्नियामिका भविष्यति. यं पुरुषं प्रति सा प्रवर्तते तस्य बन्धो भविष्यतीत्यत आह—

प्रकृतिनिबन्धना चेन्न तस्या अपि पारतन्त्र्यम् ॥ १८ ॥

प्रकृतेरपि व्यापित्वात् सर्वपुरुषसम्बन्धाविशेषात्कर्म्मणा विना न नियम इति तस्या अपि कर्मपारतन्त्र्यात् । तत्र च उक्तो दोषः ॥ १८ ॥

प्रकृतार्थगमकतया सुखहेतु कर्म्म दुःखहेतु कर्म्म च कल्पनीयमेवेति फलितं एतेन अन्यधर्म्मेणान्यत्र कार्य्यजननमुखदुःखोभयभोगहेत्वभावो दर्शितः । सर्व्वे सुखिनो दुःखिनो वा स्युरिति, सर्व्वत्र तुल्यकारणसद्भावप्रसङ्गादिति भावः । तथा च विचित्रभोगानुपपत्तिरिति सूत्रोक्तमेव फलितमिति मन्तव्यम् ॥ १७ ॥

प्रकृतेर्नियामकत्वमङ्गीकृत्योक्तदोषं निरस्यतो मतं दूषयितुमुपन्यस्य सूत्रान्तरमवतारयति—अन्यधर्म्मेति ।

सूत्रे प्रकृतिनिबन्धना—प्रकृतिनिमित्तिका, बन्धना भवत्विति शेषः । प्रकृतिनिबन्धनादिति पाठे प्रकृतिरूपकारणबलादित्यर्थः । दूषयति—नेति, तत्र हेतुमाह—तस्या इति । यत इत्यादि ।

केवलायाः प्रकृतेर्बन्धहेतुत्वे दोषं प्रकाशयन् तस्याः पारवश्यमेव विवृणोति—प्रकृतेरपीत्या-

---

করিয়াছে; সুতরাং অন্য ধর্ম্মদ্বারা অন্যত্র কার্য্যোৎপত্তি স্বীকার করিলে সকলেই সুখী বা সকলেই দুঃখী হইতে পারে। ইহার তাৎপর্য্য এই যে, অন্য ধর্ম্মদ্বারা অন্যত্র কার্য্যোৎপত্তি স্বীকার করিলে সর্ব্বত্রই তুল্য কারণের সমবধান হইয়া পড়ে, অথচ পূর্ব্বেই বলা হইয়াছে যে, কারণের বৈচিত্র্য না হইলে কার্য্যের বৈচিত্র্য হইতে পারে না; সুতরাং ভোগেরও বৈচিত্র্য অসম্ভব হয় ॥ ১৭ ॥

"অন্য ধর্ম্মদ্বারা অন্যত্র কার্য্যোৎপত্তি স্বীকার করিলেও প্রকৃতিই তাহার নিয়ামিকা হইবে, অর্থাৎ যেই পুরুষের প্রতি প্রকৃতি প্রবর্ত্তা হইবে, তাহারই বন্ধ হইবে" ইহাই অতঃপর বলিতেছেন—

"প্রকৃতিনিমিত্তকই যে বন্ধ হইবে, তাহাও বলা যায় না; যেহেতু সেই প্রকৃতিরও পরাধীনতা আছে অর্থাৎ স্বাধীনতা নাই।"

यदि प्रकृत्यादिनिबन्धन आत्मनो बन्धो नास्ति, स्वभावेनापि नास्ति, तर्हि मोक्षशास्त्रोपदेशो व्यर्थः स्यादित्यत आह—

न नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योगस्तद्योगादृते ॥ १९ ॥

शुद्धेति—गुणासङ्गी। बुद्धेति—स्वच्छः। तद्योगः बन्धयोगः। तद्योगादृते प्रकृतियोगादृते। अविवेकं विना नात्मनः कदापि बन्धः,

---

दिना। भवतु तर्हि कर्म्मणैव बन्ध इति तटस्थाशङ्कां निराकरोति तत्र चोक्तो दोष इति। न कर्म्मणान्यधर्म्मत्वादित्यादिसूत्रद्वयेनोक्त इत्यर्थः ॥ १८ ॥

वह्निसंयोगाज्जलौष्ण्यवत् प्रकृतिसंयोगादौपाधिको बन्ध इति स्वसिद्धान्तस्य प्रदर्शकं सूत्रमुत्थापयितुं भूमिकामारचयति—यदीत्यादिना।

सूत्रे नित्यत्वं—कालानवच्छिन्नत्वं। मुक्तस्वभावत्वं सदापारमार्थिकदुःखायुक्तत्वं। शुद्धो गुणासङ्गी—सदा पापपुण्यादियुतः। स्वच्छः—सर्व्वालुप्तचिद्रूपः। आत्मनो नित्यशुद्धत्वादौ "अयमात्मा सम्भावो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभु"रित्यादिश्रुतिरेव प्रमाणम्। प्रकृतियोगादृत इति। तथा च यथा स्वभावशुद्धस्य स्फटिकस्य रागयोगो जवादिरूपोपाधियोगं विना न घटते, तथैव नित्यशुद्धबुद्धमुक्तस्वभावस्य पुरुषस्य प्रकृतियोगरूपोपाधियोगं विना प्रतिबिम्बात्मकापारमार्थिकदुःखयोगरूपबन्धनं घटत इति सूत्रतात्पर्य्यार्थः, बन्धस्यौपाधिकत्वलाभायैव च सूत्रे नञ्द्वयेन वक्राभिधानं। ननु कालादेरिव प्रकृतिसंयोगस्यापि मुक्तामुक्तसाधारणतया कथं बन्धहेतुत्वमित्याशङ्कायां स्वोक्तप्रकृतिसंयोगपदस्य स्वस्वामिभाव-

---

প্রকৃতির ব্যাপিত্বনিবন্ধন সমস্ত পুরুষের সহিতই তুল্য সম্বন্ধ; সুতরাং কর্ম্ম ভিন্ন (কেবল প্রকৃতিদ্বারা) নিয়ম হইতে পারে না; অতএব প্রকৃতিরও কর্ম্মাধীনত্বনিবন্ধন বন্ধনিয়ামকত্ব অসম্ভব। কর্ম্মের বন্ধনিয়ামকত্বে যে দোষ তাহাত পূর্ব্বেই বলা হইয়াছে ॥ ১৮ ॥

যদি প্রকৃত্যাদিনিবন্ধন আত্মার বন্ধন না হয়, স্বভাবতঃও না হয়, তবে মোক্ষশাস্ত্রোপদেশ ব্যর্থ হউক, এই আশঙ্কায় বলিতেছেন—

"নিত্য-শুদ্ধ-বুদ্ধ-মুক্ত-স্বভাব আত্মার তদ্‌যোগ (বন্ধযোগ) তদ্‌যোগ (প্রকৃতিযোগ) ব্যতীত সম্ভব হয় না।"

किन्तु अविवेकाद्‌बन्धः इत्यभिप्रायः। स च शास्त्रोपदेशात् नाम वेदितव्यः ॥ १८ ॥

अथ अविद्यया तस्य बन्धो भविष्यतीत्यत आह—

नाविद्यातोऽप्यवस्तुना बन्धायोगात् ॥ २० ॥

अविद्या हि विद्याप्रागभावः प्रध्वंसाभावो वा। उभयथापि अवस्तु। न चावस्तुना वस्तुनः आत्मनः सम्भवति बन्धः। तस्मादविद्यया बन्ध इति व्यपदेशमात्रं, न तत्त्वम् ॥ २० ॥

परपर्य्यायकामादिसंस्कारात्मकाविवेकपरत्वं सूत्रतः प्रदर्शयति—अविवेकं विनेत्यादिना। स चाविवेको बुद्धिधर्म्मोऽपि पुरुषे प्रतिबिम्बितस्तस्यौपाधिकं बन्धं सम्पादयति। प्रतिबिम्बग्राहित्वञ्च पुरुषस्य नीरूपस्यापि सांख्यसिद्धान्तसिद्धमित्यग्रे व्यक्तीभविष्यति ॥ १९ ॥

अविद्याया बन्धहेतुत्वस्य निवारकं सूत्रमवतारयति—अथेति। सूत्रे अविद्यातोऽपीत्यपि शब्दः पूर्व्वोक्तकालाद्यपेक्षया, न बन्धयोग इति शेषः।

सूत्रतात्पर्य्यं विवृणोति—अविद्या हीत्यादिना। उभयथा—अविद्यायाः प्रागभावरूपत्वे ध्वंसरूपत्वे वा, अवस्तुस्वरूपेणाव्यवस्थितं। ननु भवत्ववस्तु ततः किमित्यत आह—न चेति। यत् स्वयमेव स्वरूपेण न सिध्यति तस्य बन्धं प्रति हेतुत्वं सर्व्वथैवासम्भवदुक्तिकमिति भावः। तस्मात्—अवस्तुभूताया अविद्याया बन्धहेतुत्वासम्भवात्, व्यपदेशमात्रं—कथनमात्रं, न तत्त्वं—न वास्तवम् ॥ २० ॥

বস্তুতঃ, অবিবেক ভিন্ন কখনও পুরুষের বন্ধ হয় না, কিন্তু অবিবেক হইতেই বন্ধ হয়, ইহাই অভিপ্রেত। তাহাও শাস্ত্রোপদেশ হইতে জ্ঞাতব্য ॥ ১৯ ॥

"অবিদ্যাদ্বারা পুরুষের বন্ধ হইবে" এই প্রশ্নে বলিতেছেন—

"অবিদ্যা হইতেও বন্ধ হইতে পারে না, যে হেতু অবস্তু দ্বারা বন্ধযোগ অসম্ভব।"

বিদ্যার প্রাগভাব অথবা বিদ্যার ধ্বংসকে অবিদ্যা বলা যায়; উভয়থাই অবিদ্যা বস্তুভূত নহে। সুতরাং অবস্তুদ্বারা বস্তুভূত আত্মার বন্ধ সম্ভব হইতে পারে না। অতএব "অবিদ্যা দ্বারা বন্ধ হয়" এইটি কথার কথামাত্র, বাস্তবিক নহে। ২০।

विद्यातोऽन्याऽविद्या वस्तुभूता भविष्यतीत्यत आह—

वस्तुत्वे सिद्धान्तहानिः ॥ २१ ॥

अस्माकं तावदविद्यायाः सद्रूपत्वे नाशाभावात् अनिर्मोक्षः। अद्वैतिनां तु अविद्या न तात्त्विकी। द्वैतवादिनां तु अनादेर्वस्तुभूतस्य नाशाभावात् उपदेशानर्थक्यम् ॥ २१ ॥

अमुरादिपदद्वयञ्जो विरोधार्थकतया विद्याविरोधिनी वस्तुभूतैवाविद्या तया बन्धो भविष्यतीति मतस्य निरासकं सूत्रमवतारयति—विद्यात इत्यादिना। वस्तुत्वे—अविद्यायाः सद्रूपत्वे तथा च बन्धाङ्गीकारे इति शेषः। सिद्धान्तहानिः—सर्व्वेषामेव सिद्धान्तस्यांशिकापलापः। तत्रादौ सांख्यसिद्धान्तहानिं दर्शयति—अस्माकमित्यादिना। अद्वैतवादिसिद्धान्तहानिं दर्शयति—अद्वैतिनामित्यादिना। न तात्त्विकी—न वस्तुभूता, तथात्वे द्वैतापत्तेरिति भावः। स्वमते दोषं प्रदर्श्यान्येषामपि द्वैतवादिनां तत्साम्यं दर्शयति—द्वैतवादिनामित्यादिना। न्यायादिनये वस्तुभूतस्यापि घटादेर्नाशादाह—अनादेरिति। अनादेरपि प्रागभावस्य नाशादाह-वस्तुभूतस्येति। उपदेशानर्थक्यं—मोक्षशास्त्रोपदेशवैयर्थ्यं। सर्व्वदैव बन्धकारणसद्भावेन मोक्षासम्भवादिति भावः ॥ २१ ॥

বিদ্যার বিরোধিনী অবিদ্যা বস্তুভূতাই স্বীকার করিব, এই আশঙ্কায় বলিতেছেন—

"অবিদ্যার বস্তুত্ব স্বীকার করিলে সকল দার্শনিকের সিদ্ধান্তেরই আংশিক অপলাপ হয়।"

অবিদ্যার বস্তুত্ব স্বীকার করিলে সাংখ্যমতে তাহার নাশ হইতে পারে না, সুতরাং মুক্তিরও অসম্ভব হয়। অদ্বৈতবাদীর মতেও অবিদ্যা বস্তুভূত নহে, (তাহা হইলে তাহাদের অদ্বৈত সিদ্ধান্তেরই হানি হয়) অন্য দ্বৈতবাদীদের মতেও অনাদি অথচ বস্তুভূতের নাশ হয় না, সুতরাং অনাদি অবিদ্যার বস্তুত্ব স্বীকার করিলে তাহারও নাশ হইতে পারে না, অতএব (সর্ব্বদাই অবিদ্যারূপ বন্ধের কারণ থাকায়) মোক্ষশাস্ত্রোপদেশ অনর্থক হয় ॥ ২১ ॥

दूषणान्तरमाह—

विजातीयद्वैतापत्तिश्च ॥ २२ ॥

यद्यविद्या वस्तुभूतानादिस्तदा नित्यात्मतुल्या। अनात्मत्वे विजातीयद्वैतत्वम् ॥ २२ ॥

अथान्यपदार्थानामीदृशी गतिः। अविद्या तु वस्तुभूतानादिरपि विनङ्क्ष्यतीत्याह—

दूषणान्तरमिति। अविद्याया वस्तुत्वे इत्यर्थः। सजातीयद्वितीयस्य कथञ्चिदिष्टत्वादाह—विजातीयेति। विजातीयद्वितीयत्वञ्च—आत्मभिन्नत्वे सत्यनादिसद्रूपत्वं। नहि कस्मिन्नपि वस्तुनि आत्मभिन्नत्वं अनादिसद्रूपत्वञ्च मायावादिनामिष्टमित्यविद्यायाः सद्रूपत्वाङ्गीकारे तस्य तदापत्तिः स्यादिति भावः ॥ २२ ॥

पूर्व्वपक्षसूत्रमवतारयति—अथेत्यादिना। अन्यपदार्थानां—अविद्याभिन्नानादिवस्तुभूतानां ईदृशी—नाशप्रतियोगित्वरूपा। विनङ्क्ष्यति, तथा च तादृश्याविद्याया बन्धहेतुत्वेऽपि नानिर्म्मोक्ष इति भावः।

অবিদ্যার বস্তুত্বস্বীকারপক্ষে আরও দোষ বলিতেছেন—

"অবিদ্যার বস্তুত্ব স্বীকার করিলে বিজাতীয় দ্বিতীয়ের আপত্তিরূপও দোষ হয়।"

যদি অবিদ্যা বস্তুভূত ও অনাদি হয়, তবে নিত্য আত্মার তুল্য, সুতরাং অনাদি বস্তুভূত অবিদ্যার অনাত্মত্বে বিজাতীয় দ্বিতীয়ত্ব সম্ভাবিত হয়। ইহার তাৎপর্য্য এই যে, মায়াবাদীরা ঘটপটাদির ব্যবহারিক সত্তা স্বীকার করিলেও আত্মা ভিন্ন আর কাহারও অনাদি সদ্রূপত্ব স্বীকার করে না, এখন যদি অনাদি অবিদ্যার সদ্রূপত্ব স্বীকৃত হয়, তবে "আত্মভিন্নে অনাদি সদ্রূপত্বের আপত্তি"রূপ বিজাতীয় দ্বিতীয়ত্বের আপত্তি হয়। কিন্তু তাহা অভীষ্ট নহে ॥ ২২ ॥

"অবিদ্যাভিন্ন অনাদি বস্তুভূত পদার্থের এইরূপ (নাশাপ্রতিযোগিত্বরূপ) ই গতি, কিন্তু অবিদ্যা বস্তুভূত এবং অনাদি হইয়াও বিনষ্ট হইবে" এই কথাই এই পূর্ব্বপক্ষ সূত্রদ্বারা বলিতেছেন—

विरुद्धोभयरूपा चेत् ॥ २३ ॥

अन्योऽन्यविरुद्धरूपा अनादिरपि नाशात् प्रागभावरूपा ॥ २३ ॥

उत्तरमाह—

न तादृक्पदार्थाप्रतीतेः ॥ २४ ॥

न कुत्रापि केनापि तादृक् पदार्थः प्रतीतः ॥ २४ ॥

यद्येवं, प्रकृत्यादीनां षट्पदार्थवैधर्म्यात् कुत्र प्रवेश इत्यत्राह—

विरुद्धोभयरूपेत्यस्य विवरणं अन्योऽन्यविरुद्धरूपेति । नन्वनादित्वस्य नाशप्रतियोगित्वस्य च कुत्रापीकत्रादर्शनात्तदुभयवद्वस्तुभूताविद्याकल्पनं न कथमपि युक्तिसहमित्याशङ्कायामाह—अनादिरपीति । नाशात्—नाशप्रतियोगित्वात्, प्रागभावरूपा—प्रागभावतुल्या, यथानादिरपि प्रागभावो नाशप्रतियोगी, तथा वस्तुभूताविद्यापि भविष्यतीति भावः ॥ २३ ॥

उत्तरसूत्रमवतारयति—उत्तरमाहेति । तादृक्—अनादिर्विनाशी वस्तुभूतश्चेत्यर्थः । तथाचाभावरूपस्य प्रागभावस्यानादित्वध्वंसप्रतियोगित्वयोः सत्त्वेऽपि वस्तुभूतस्यानादेः कुत्रापि ध्वंसप्रतियोगित्वादर्शनात्तादृक्पदार्थस्वीकारः सर्व्वथैवाप्रामाणिक इति भावः ॥ २४ ॥

অবিদ্যার অনাদিত্ব ও নাশপ্রতিযোগিত্বরূপ অন্যোন্যবিরুদ্ধরূপবত্ব স্বীকার করিব ? অর্থাৎ যেরূপ প্রাগভাব অনাদি হইয়াও বিনাশশীল বস্তুভূত। অবিদ্যাও সেইরূপ অনাদি হইয়াও বিনাশশীল হইবে ॥ ২৩ ॥

পূর্ব্বসূত্রোক্ত পূর্ব্বপক্ষের উত্তর বলিতেছেন—

"ঐ রূপ বলা যাইতে পারে না, যে হেতু তাদৃশ পদার্থের প্রতীতি হয় না।" ইহার অভিপ্রায় এই যে, অনাদি নাশপ্রতিযোগী অথচ বস্তুভূত এরূপ পদার্থ কোথাও কাহারও প্রতীতির বিষয় হয় নাই, সুতরাং অবস্তুভূত প্রাগভাবে অনাদিত্ব ও নাশপ্রতিযোগিত্ব কল্পনা সর্ব্বথাই প্রমাণবিরুদ্ধ ॥ ২৪ ॥

এরূপ হইলে ষট্পদার্থের বৈধর্ম্ম্যনিবন্ধন প্রকৃত্যাদির কোথায় অন্তর্ভাব হইবে এই আশঙ্কায় বলিতেছেন—

ন বয়ং ষট্পদার্থবাদিনো বৈশেষিকাদিবৎ ॥ ২৫ ॥

স্পষ্টম্ ॥ ২৫ ॥

যদ্যনিয়তাঃ পদার্থাঃ, কথং পঞ্চবিংশতিতত্ত্বমিত্যত্রাহ—

অনিয়তত্বেঽপি নাযৌক্তিকস্য সংগ্রহোঽন্যথা বালোন্মত্তাদিসমত্বম্ ॥ ২৬ ॥

ষড়েব পদার্থা ইতি ন ব্রূমো, ন তু যুক্তিবিরুদ্ধমপি নাঙ্গীকুর্মঃ। অন্যথা বালোন্মত্ততুল্যত্বম্। তথা চ—

ন হ্যাপ্তবাদান্নভসো নিপতন্তি মহাসুরাঃ
যুক্তিমদ্বচনং গ্রাহ্যং ময়ান্যৈশ্চ ভবদ্বিধৈঃ ॥ ২৬ ॥

"সাংখ্যমতসিদ্ধপ্রকৃত্যাদীনাং বৈশেষিকোক্তষট্পদার্থান্তর্ভাবাভাবেঽপি নাস্তি ক্ষতি" রিতি প্রসঙ্গাৎ প্রতিপাদয়িতুমুপনিবদ্ধং সূত্রমবতারয়তি—যদ্যেবমিত্যাদিনা। বয়ং—সাংখ্যাঃ, ষট্পদার্থবাদিনঃ—ষট্ ষোড়শাদিনিয়তপদার্থাঙ্গীকারিণঃ, তথাত্ব এব তদন্তর্ভাবে দোষঃ স্যাদিতি ভাবঃ। আদিপদান্নৈয়ায়িকাদিপরিগ্রহঃ ॥ ২৫ ॥

সূত্রান্তরমবতারয়তি—যদীত্যাদিনা। অন্যথা—যুক্তিবিরুদ্ধস্যাপ্যঙ্গীকারে। বালোন্মত্ততুল্যত্বমিতি, তথাচ বালোন্মত্ততুল্যতয়া ন তে শ্রদ্ধেয়বচনাঃ স্যুরিতি ভাবঃ। "নহি বাক্যমাত্রাদ্বস্তুসিদ্ধি" রিত্যত্র প্রাচীনসংবাদং দর্শয়িতুমাহ—তথাচেতি। আপ্তবাদাৎ—প্রমাণত্বেনাভি-

---

"আমরা বৈশেষিকাদির ন্যায় ষড়াদিপদার্থবাদী নহি, অর্থাৎ ষড়াদি নিয়ত পদার্থবাদী হইলেই প্রকৃত্যাদির তদন্তর্ভাব না হইলে দোষ হইতে পারে, নচেৎ নহে ॥ ২৫ ॥

যদি (সাংখ্যমতে) পদার্থ অনিয়ত, তবে পঞ্চবিংশতি তত্ত্ব হয় কিপ্রকারে, এই আশঙ্কায় বলিতেছেন—

"পদার্থ নিয়ত না হইলেও অযৌক্তিক পদার্থের সংগ্রহ হয় না, কারণ অযৌক্তিক পদার্থ স্বীকার করিলে বালকও উন্মত্তের সাদৃশ্য ঘটে।"

আমরা ছয়টি পদার্থ ইহাও বলি না, অথচ যুক্তিবিরুদ্ধ পদার্থও স্বীকার করি না, যুক্তিবিরুদ্ধ পদার্থ স্বীকার করিলে বালকও উন্মত্তের বাক্যের ন্যায়

बौद्धपक्षं निरस्यति—

नानादिविषयोपरागनिमित्तोऽप्यस्य ॥ २७ ॥

अस्यात्मनोऽनादिविषयवासनानिमित्तो बन्धो भविष्यतीति न । अस्माकं तावद्वासनया सह आत्मनः सम्बन्धाभावाद्बन्धाभावः । बौद्धनये स्थिरस्यात्मनोऽसत्त्वाद्वासनाया अपि तावत्कालं स्थित्यभावात् को बन्ध इति ॥ २७ ॥

बाह्यवस्तूपरागाद्वासनासन्तानेनात्मसन्तानस्य बन्धो भविष्यतीत्यत आह—

मताद्वचनमात्रात् नभसः—आकाशात् महासुरा निपतन्तीत्यन्वयः । मत्प्रवादादिति न पाठे तु अप्रवादात्—निर्युक्तिकाद्वचनमात्रादित्यर्थः ॥ २६ ॥

सूत्रान्तरमवतारयति—बौद्धपक्षमिति । बाह्यविषयाणां क्षणिकत्वं तादृशविषयवासनयैव च जीवस्य बन्ध इति वदतो बौद्धविशेषस्य मतमित्यर्थः ।

सूत्रस्योपरागपदस्य वासनापरत्वमङ्गीकृत्य सूत्रार्थं विवृणोति—अस्येत्यादिना । अनादिर्विषयवासना निमित्तं यस्येति विग्रहः । अस्माकं—सांख्यानां, सम्बन्धाभावादिति, सांख्यनये वासनाया बुद्धिधर्मत्वादिति भावः । ननु सांख्यनये विषयवासनया बन्धासम्भवेऽपि दर्शितबौद्धविशेषमते तथाङ्गीकारे को दोष इत्याशङ्कायामाह—बौद्धनय इति ॥ २७ ॥

তাহা অপ্রমাণ হয়। প্রাচীনেরাও বলিয়াছেন—"আপ্তবাক্যানুসারে (কিছু) আকাশ হইতে মহাসুরগণ নিপতিত হয় না। সুতরাং আমারও ভবাদৃশ অন্য সকলেরই যুক্তিযুক্ত বচনই গ্রহণীয়" ॥ ২৬ ॥

বৌদ্ধ পক্ষের নিরাস করিতেছেন—

অনাদি বিষয়বাসনাও এই আত্মার বন্ধের নিমিত্ত হইতে পারে না। কারণ আমাদের মতে বাসনার সহিত আত্মার সম্বন্ধ না থাকায় (বাসনা বন্ধের নিমিত্ত হইলে) বন্ধ হইতে পারে না, বৌদ্ধপক্ষেও স্থির আত্মার সদ্ভাব না থাকায় বাসনারও বন্ধকাল পর্য্যন্ত স্থিতি না থাকায় কি প্রকারে বন্ধ হইবে ? ॥ ২৭ ॥

বাহ্যবস্তুর সম্বন্ধ আনিতে বাসনা সন্তানদ্বারা ক্ষণিক বিজ্ঞানপ্রবাহরূপ আত্মসন্তানের বন্ধ হইবে, এই আশঙ্কায় বলিতেছেন—

न बाह्याभ्यन्तरयोरुपरञ्ज्योपरञ्जकभावोऽपि देश-व्यवधानात् स्रुघ्नस्थपाटलिपुत्रस्थयोरिव ॥ २८ ॥

यद्युच्येत रविजलभाजनयोरपि दृष्ट उपरञ्ज्योपरञ्जकभावः, तत्र रश्मिसम्बन्धादुपरागः, अत्र तत्सम्बन्धो नास्ति । वासनाद्वारेण चेत् ? न, तावत्कालासत्त्वात् कथं सम्बन्धः ? सन्तानस्य चेत् ? यदि सन्तानि-

स्थिरस्यात्मनोऽसत्त्वेऽपि विज्ञानप्रवाहरूपस्यात्मसन्तानस्य वासनासन्तानद्वारेण बाह्यविषयैः सह यः सम्बन्धस्तस्यैवास्तु बन्धहेतुत्वमिति बौद्धविशेषमतं निराकर्त्तुमुपनिबद्धं सूत्रमवतारयति—बाह्येत्यादिना । बाह्यैर्वस्तुभिः सह उपरागात् सम्बन्धात् जनितेनेत्यर्थः, वासनासन्तानेन स्मृतिद्वारकसंस्कारसमूहेन, आत्मसन्तानस्य क्षणिकविज्ञानप्रवाहस्य ।

सूत्रे बाह्याभ्यन्तरयोः—बहिःस्थविषयसन्तानमध्यस्थक्षणिकविज्ञानसन्तानयोः, उपरञ्ज्योपरञ्जकभावोऽपि—भास्यभासकभावोऽपि न, बन्धप्रयोजकः सम्भवतीति शेषः, उपरञ्ज्योपरञ्जकभावासम्भवे हेतुं दर्शयति—देशव्यवधानादिति । शरीररूपदेशान्तरितत्वादित्यर्थः । व्यवहितयोर्भास्यभासकत्वाभावे दृष्टान्तं दर्शयति—स्रुघ्नपाटलिपुत्रौ बहुव्यवहितौ देशविशेषौ ।

व्यवहितयोरपि भास्यभासकभावमाशङ्कते—रवौ यदीत्यादिना । परिहरति—तत्रेति, जले इत्यर्थः, रश्मिसम्बन्धात्—किरणसम्पर्करूपद्वारवशात्, उपरागः—भास्यभासकभावः । अत्र—प्रकृते, तत्सम्बन्धः—द्वारात्मकसम्बन्धः । वासनाद्वारकत्वं शङ्कते—वासनेति—परि-

"বহিঃস্থিত বিষয়সন্তান ও অভ্যন্তরস্থিত ক্ষণিক বিজ্ঞানসন্তানের ভাস্য-ভাসকভাবও বন্ধের প্রয়োজক হইতে পারে না, যে হেতু শরীররূপ দেশ-ব্যবধান বশতঃ ভাস্যভাসকভাবই অসম্ভব, ব্যবহিতের ভাস্যভাসকভাব হয় না, যেমন স্রুঘ্নদেশস্থ ও পাটলিপুত্রদেশস্থের ভাস্যভাসকভাব হয় না।

যদি বল ব্যবহিত সূর্য্য ও জলভাজনের ত ভাস্যভাসকভাব দৃষ্ট হয়; কিন্তু সে স্থলে সূর্য্যকিরণের সম্পর্কবশতঃ ভাস্যভাসকভাব হইয়াছে, এস্থলে সেরূপ কোন সম্বন্ধ নাই। যদি বল বাসনাকে দ্বার করিয়া হইবে, তাহাও হইতে পারে না, কারণ (সমস্ত বস্তুর ক্ষণিকত্বনিবন্ধন) বাসনোৎপত্তির পর-ক্ষণ পর্য্যন্ত বিষয়াদির স্থায়িত্বাভাববশতঃ কি প্রকারে (উপরজ্যোপরঞ্জক-

व्यतिरिक्तः सिद्धान्तहानिः । अथाव्यतिरिक्तस्तथापि तेन तत्र किञ्चिदाधेयम् । आधानमशक्यं क्षणिकत्वात् । अनाधाने किं तेनासत्कल्पेनेति ॥ २८ ॥

मा भूद्वासनया आन्तरोपरागः, आत्मनो व्यापित्वाद्बाह्यैकदेशेन [illegible] सम्बन्धादुपरागो भविष्यतीत्यत आह—

इरति—नेति। तावत्कालासत्त्वात्—वासनोत्पादानन्तरक्षणं यावत् विषयादीनां स्थायित्वादिति भावः। ननु सन्तानिनां क्षणिकत्वेऽपि सन्तानस्यास्थायित्वाभ्युपगमेन सम्भवत्येव तादृशः सम्बन्ध इत्याशङ्कते—सन्तानस्य चेदिति। एतदाशङ्कां निरस्यति—यदीत्यादिना। सन्तानिव्यतिरिक्तः—सन्तानिभ्यो भिन्नः,यदि स्थायी सन्तानः स्यात्तदेति शेषः। सिद्धान्तहानिः—"सर्व्वेषां भावानां क्षणिकत्व"मिति सिद्धान्तस्य व्याघातः। यद्यपि क्षणिकसन्तानिभ्यो सन्तानस्याव्यतिरिक्तत्वपक्षे सन्तानस्य स्थायित्वं न सम्भवदुक्तिकं स्थायित्वाभावे च सम्बन्धासम्भवरूपपूर्व्वोक्तदोषो दुष्परिहर एव, तथापि कथञ्चिदभ्युपगमवादेन तत्स्वीकारेऽपि बौद्धपक्षे न बन्धोपपत्तिरिति तुष्यतुदुर्ज्जनन्यायेन दर्शयति—अथेत्यादिना॥ तेन—तादृशसम्बन्धेन, तत्र—आत्मनि, किञ्चित्—बन्धप्रयोजकसातिशय्यं, आधेयं—उत्पादनीयं, अन्यथा बन्धानुपपत्तेरिति भावः। तु किन्तु आधानं उत्पादनं, अशक्यं—दुःसम्पाद्यं। अशक्यत्वे हेतुमुपन्यस्यति—क्षणिकत्वादिति। सर्व्वेषां क्षणिकत्वे कार्य्यकारणभावस्यैवासम्भवादिति भावः। ननु आधानाशक्यत्वे को दोष इत्याशङ्कायामाह—अनाधान इति। असत्कल्पेन—बन्धप्रयोजकातिशय्याजनकतया अकिञ्चित्करेण, तेन—तादृशसम्बन्धेन, किं—किं प्रयोजनकतया तत्कल्पनं, न युक्तिसहमिति भावः॥ २८ ॥

ভাবাত্মক) সম্বন্ধ. হইবে ? যদি বল সন্তানের (স্থায়িত্বস্বীকার করিয়া) তাদৃশ সম্বন্ধ হইবে, তবে বক্তব্য এই যে, যদি সন্তান সন্তানি হইতে ভিন্ন ও স্থায়ী হয়, তবে, সমস্ত ভাবের ক্ষণিকত্বরূপ সিদ্ধান্তের হানি হয়। যদি সন্তান সন্তানি হইতে অব্যতিরিক্ত হয়, তবেও বৌদ্ধমতে বন্ধ হইতে পারে না, কারণ সেই সম্বন্ধকর্ত্তৃক বন্ধের প্রয়োজক কোন বিশেষ আত্মাতে অবশ্য উৎপাদনীয় কিন্তু সেই উৎপাদন অসম্ভব যে হেতু সমস্তই ক্ষণিক। কোন বিশেষোৎপাদন করিতে না পারিলে সেই অকিঞ্চিৎকর সম্বন্ধকল্পনেই বা কি প্রয়োজন ? ॥২৮॥

द्वयोरेकदेशलब्धोपरागान्न व्यवस्था ॥ २९ ॥

एकात्मवादिनां सर्वदा लब्धविषयोपरागादनिर्मोक्ष इति नास्ति व्यवस्था । नानात्मवादिनान्तु सर्वेषां सर्वार्थैः सम्बन्धात् एकदा तुल्यज्ञानोत्पादान्न व्यवस्था ॥ २९ ॥

अत्र शङ्कते—

आत्मनो व्यापित्वपक्षमनुसृत्य सूत्रान्तरमवतारयति—माभूदित्यादिना । बाह्यैकदेशेन—बाह्यरूपेण एकदेशेनेत्यर्थः ।

नानात्मवादिपक्षे अव्यवस्थाया एव सूत्रस्य "द्वयो"रित्यनेन सूचनादेकात्मपक्षे तदनभिधाने सूत्रकृतो न्यूनत्वं स्यादिति वृत्तिकारः स्वयं तदव्यवस्थां दर्शयति—एकात्मवादिनामित्यादिना । नानात्मवादिपक्षपरतया सूत्रतात्पर्यं दर्शयति नानात्मेत्यादिना । तथाच सूत्रस्यैकपदं तुल्यार्थकं । द्वयोः बद्धमुक्तात्मनोः, एकदेशलब्धोपरागात् तुल्यदेशप्राप्तसम्बन्धात् न व्यवस्था बन्धमोक्षयोः स्यादिति सूत्रार्थः । बाह्यदेशसम्बन्धरूपहेतोरविशेषेण मुक्तस्यापि बन्धापत्तेरिति भावः ॥ २९ ॥

পূর্ব্বদর্শিত যুক্তিবলে বাসনাদ্বারা উপরাগলাভ সম্ভবপর না হয়, না হউক, কিন্তু আত্মার ব্যাপিত্বনিবন্ধন বাহ্য বস্তুর সহিত সম্বন্ধ হইয়া তদ্বশে উপরাগ হইবে, এই আশঙ্কাতেই বলিতেছেন—"বদ্ধ এবং মুক্ত উভয় আত্মারই দেশ-সম্বন্ধের তুল্যতা নিবন্ধন বাহ্যের সহিত আত্মার সম্বন্ধদ্বারা বন্ধমোক্ষের ব্যবস্থা হইতে পারে না।

যাহারা আত্মা এক বলিয়া স্বীকার করেন, তাঁহাদের মতে সর্ব্বদাই আত্মার বিষয়ের সহিত সম্বন্ধ থাকায় মুক্তিই সম্ভব হইয়া পরে, সুতরাং ব্যবস্থা হইতে পারে না। যাহারা আত্মা নানা বলিয়া স্বীকার করেন, তাহাদের মতেও সমস্ত আত্মারই সমস্ত অর্থের সহিত সম্বন্ধ থাকায় এক সময়ে সকলের এক রূপ জ্ঞানেরই উৎপত্তি হইতে পারে, সুতরাং ব্যবস্থা হয় না। কারণ বিষয়সম্বন্ধ-রূপ হেতুর তুল্যতাবশতঃ মুক্ত আত্মার ও বন্ধের আপত্তি হয়॥ ২৯॥

अदृष्टवशाच्चेत् ॥ ३० ॥

यद्यपि सर्वदा सम्बन्धात् सर्वत्र ज्ञानं प्रसज्येत, तथापि यस्य अदृष्टेन यत् ज्ञानं जन्यते, तदेव तस्य कारणमिति न सर्वत्र ज्ञानम् ॥ ३० ॥

दूषणमाह—

न द्वयोरेककालायोगादुपकार्य्योपकारकभावः ॥३१॥

द्वयोः कर्त्तृभोक्त्रोः एककालायोगात् एककालिकासत्त्वेन न उपकार्य्योपकारकभावः सम्भवति ॥ ३१ ॥

शङ्कासूत्रावतारणार्थमाह—शङ्कत इति। पूर्व्वसूत्रोक्तदोषसमाधानपूर्व्वकं सूत्रतात्पर्य्यं विवृणोति—यद्यपीत्यादिना। सम्बन्धात् तुल्यविषयसम्बन्धात्, सर्व्वत्र आत्मनि, ज्ञानं बन्धजनकज्ञानं पूर्व्वोक्तोपराग इति यावत्। तदेव पूर्व्वोक्तोपरागात्मकतज्ज्ञानमेव, तस्य तत्पुरुषीयबन्धस्य, कारणमिति हेतोः अदृष्टस्यैव फलतस्तादृशज्ञानजनकत्वलाभाद्धेतोरित्यर्थः, सर्व्वत्र आत्मनि, ज्ञानं बन्धजनकज्ञानं भवेदिति शेषः। मुक्तात्मनि अदृष्टाभावादिति भावः। तथाच अदृष्टवशादेवोपरागलाभ इति चेदिति सूत्रार्थः फलितः ॥ ३० ॥

दूषणमिति पूर्व्वसूत्रोक्तशङ्कायां दूषणमित्यर्थः। सूत्रार्थं विवृणोति—द्वयोरित्यादिना। एककालिकासत्त्वेन—क्षणिकत्वादेककालानवस्थायित्वेन उपकार्य्योपकारकभावः—भोक्तृ-

---

এস্থানে আশঙ্কা করিতেছেন—"অদৃষ্টবশতঃই উপরাগ লাভ হয়, এই কথা বলিব" ইহার তাৎপর্য্য এই যে, যদিও বিষয় সম্বন্ধরূপ হেতুর তুল্যতা-নিবন্ধন সর্ব্বদা সমস্ত আত্মাতেই বন্ধজনক জ্ঞানের প্রসক্তি হয়, তথাপি যেই আত্মার অদৃষ্ট অনুসারে সেই বন্ধজনক জ্ঞানের উৎপত্তি হইবে, সেই জ্ঞান সেই আত্মারই বন্ধের প্রতি কারণ হইবে, সুতরাং সমস্ত আত্মাতে বন্ধজনক জ্ঞান হইবে না। (কারণ মুক্ত আত্মার অদৃষ্ট থাকে না, অথচ নিয়ম অনুসারে অদৃষ্টেরই ফলে বন্ধজনক জ্ঞানের নিমিত্ততা পাওয়া যায়) ॥ ৩০ ॥

পূর্ব্ব সূত্রের আশঙ্কায় দোষ দিতেছেন—

"অদৃষ্টবশতঃই যে উপরাগ লাভ হয়, তাহা বলা যাইতে পারে না,

आशङ्कते—

पुत्रकर्म्मवदिति चेत् ॥ ३२ ॥

यथा पुत्रेष्ट्यादिनाऽविद्यमानस्य पुत्रस्य संस्कारद्वारोपकारः क्रियते, तथा अत्रापि भविष्यति ॥ ३२ ॥

सिद्धान्तमाह—

नास्ति हि तत्र स्थिर एक आत्मा यो गर्भाधानादिकर्म्मणा संस्क्रियते ॥ १३२ ॥

निष्ठोपरागकर्त्तृनिष्ठादृष्टयोः कार्य्यकारणभावः अतएककालायोगादित्यनेन कर्त्तृत्वं भोक्तृत्वञ्चैकस्मिन्नेवात्मनीत्यङ्गीकरणमपि निराकृतम्। तथाच सामानाधिकरण्याभावादपि न दर्शितोपरागादृष्टयोः कार्य्यकारणभावसम्भव इत्यपि द्रष्टव्यम् ॥ ३१ ॥

आशङ्कत इति,—विभिन्नकालीनयोरपि कर्त्तृभोक्त्रात्मनोरुपकार्य्योपकारकभावे दृष्टान्तं प्रदर्श्य शङ्कत इत्यर्थः। सूत्रतात्पर्य्यं विवृणोति—यथेत्यादिना ॥ ३२ ॥

सिद्धान्तसूत्रमवतारयति—सिद्धान्तमाहेति। पूर्व्वसूत्रोक्ताशङ्कायां दृष्टान्तसिद्धिरूपं सिद्धान्तमित्यर्थः।

यः गर्भाधानादिकर्म्मणा संस्क्रियते जन्मोत्तरमवस्थान्तरमापाद्यते एवम्भूतः स्थिरः—गर्भाधानमारभ्य जन्मोत्तरकालपर्य्यन्तं स्थायी,—एक आत्मा हि यस्मात् अत्र बौद्धमते न

কারণ বৌদ্ধমতে সমস্ত বস্তুরই ক্ষণিকত্বনিবন্ধন কর্ত্তা ও ভোক্তার এককালে অবস্থান সম্ভবপর না হওয়ায় ভোক্তৃনিষ্ঠ উপরাগও কর্ত্তৃনিষ্ঠ অদৃষ্টের কার্য্যকারণভাব হইতে পারে না" ॥ ৩১ ॥

বিভিন্নকালীনের উপকার্য্যোপকরণভাবে দৃষ্টান্ত দেখাইয়া বৌদ্ধগণ আশঙ্কা করিতেছেন—"যেরূপ পুত্রেষ্টি যাগাদি পিতার ক্রিয়াকলাপ অবিদ্যমানপুত্রেরও সংস্কারদ্বারা উপকারক হয়, সেইরূপ কর্ত্তার অদৃষ্টও তৎকালে অবিদ্যমান ভোক্তার উপকারক হইবে" ॥৩২॥

এই আশঙ্কায় সিদ্ধান্ত বলিতেছেন—

"যেহেতু বৌদ্ধমতে স্থির (অর্থাৎ গর্ভাধান হইতে জন্মোত্তরকাল

स्वमते तु आत्मा अनादिर्नित्यशुद्धबुद्धः, तदुद्देशेन इविद्धागादयो युज्यन्त इति ॥ ३३ ॥

आत्माऽस्थिरबोध इत्याह—

स्थिरकार्य्यासिद्धेः क्षणिकत्वम् ॥ ३४ ॥

सत्त्वमर्थक्रियाकारित्वं, तच्च क्रमाक्रमाभ्यां व्याप्तं, तौ च अक्षणिके न सम्भवतः। अतस्तौ क्षणिकत्वमापादयतः ॥ ३४ ॥

अस्ति, अतस्तन्मते पुत्रवदिति दृष्टान्तस्यापि सिद्धिरिति सूत्रार्थः। अवस्थान्तरप्राप्तिरूपस्य संस्कारस्य क्षणिके असम्भवादिति भावः।

सूत्रस्यतत्त्वस्य व्यावृत्तिं स्फुलतः प्रदर्शयति—स्वमते त्वित्यादिना। तदुद्देशेन—तस्मिन् स्थिरे आत्मनि संस्कारसाधनोद्देशेन तथा स्वमते न दृष्टान्तसिद्धिरिति भावः ॥ ३३ ॥

क्षणभङ्गवादिबौद्धमतप्रतिपादकं पूर्व्वपक्षसूत्रमवतारयति—आत्मेत्यादिना। अस्थिरबोधः—क्षणिकविज्ञानस्वरूपः, इति—इममेवार्थं आह—अनन्तरसूत्रेणेत्यर्थः।

स्थिराद्वस्तुनः कार्य्यस्या सिद्धेः भावानां क्षणिकत्वमिति सूत्रार्थः। इममेवार्थं वृत्तिकारो विवृणोति—सत्त्वमित्यादिना। न चात्र सत्त्वमर्थक्रियाकारित्वमित्यर्थोपन्यासो विफलः अर्थक्रियाकारित्वं क्रमाक्रमाभ्यां व्याप्तमेतावन्मात्रस्यैव स्थिरे जनकत्वाभावसाधनस्योपयोगित्वादिति वाच्यं, यद्यत् स तत्तत्क्षणिकं यथा जलधरपटलमितिप्रसिद्धव्याप्त्या सत्त्वेनैव क्षणिकत्वस्य साधनीयतया तत्सत्त्वस्य चार्थक्रियाकारित्वव्यतिरिक्तत्वं स्थिरकार्य्यासिद्धेः परम्परयापि

পর্য্যন্ত স্থায়ী) এমন একটি আত্মা নাই যে, যে জন্মের পরে গর্ভাধানাদি কর্ম্মে সংস্কৃত হইতে পারে" সুতরাং বৌদ্ধমতে "পুত্রকর্ম্মবৎ" এই দৃষ্টান্তই সিদ্ধ হইতে পারে না।

সাংখ্যমতে কিন্তু আত্মা অনাদি, নিত্য ও শুদ্ধ বুদ্ধস্বরূপ, সুতরাং সেই স্থির আত্মার সংস্কার উদ্দেশেই যাগাদি ক্রিয়া সকল হইবে। অতএব দৃষ্টান্তেরও অসিদ্ধি হইবে না ॥ ৩৩ ॥

"আত্মা ক্ষণিক বিজ্ঞানস্বরূপ," ইহার প্রতিপাদক সূত্র বলিতেছেন,—

"স্থির বস্তু হইতে কার্য্যের উৎপাদ সম্ভবপর হয় না বিধায় ভাবপদার্থমাত্রই ক্ষণিক, অর্থাৎ এক ক্ষণের অধিক থাকে না।

क्षणिकत्वसाधकत्वं न स्यादिति तत्सत्त्वस्यार्थक्रियाकारित्वपरत्वप्रदर्शनार्थं तदुपन्यासात्। अर्थक्रियाकारित्वं कार्य्यजनकत्वं, तच्च—अर्थक्रियाकारित्वरूपं सत्त्वञ्च, क्रमाक्रमाभ्यां—क्रमिकाक्रमिककार्य्योत्पादाभ्यां व्याप्तं—नियतं, क्रमाक्रमाभ्यामन्यस्य प्रकारस्यासत्त्वादिति भावः। तौ क्रमाक्रमौ, अक्षणिके स्थिरत्वेनाभिमते भावे, न सम्भवत इति, अत्रायमभिप्रायः—स्थिरतयाभिमताद्यदि क्रमेण कार्य्योत्पादः स्यात्तदा वक्तव्यं वर्त्तमानार्थक्रियाकाले स्थायित्वेनाभिमतस्य तस्यातीतानागतयोरर्थक्रिययोः सामर्थ्यमस्ति न वा? अस्ति चेत्तदानीं तयोरप्युत्पाद-प्रसङ्गो दुष्परिहरः, सति तत्समर्थे कारणे तदनुत्पादस्य विरुद्धत्वात्, अतएव न हि दृश्यते सामग्रीकार्य्यं नार्जयेदिति। नास्ति चेत्तर्हि कदापि तस्वर्त्स्यमाने अर्थक्रिये न कुर्य्यात्, अर्थक्रियाकारित्वस्य सामर्थ्यमात्रानुबन्धित्वात्। तथाच सिद्धं न स्थिरात् क्रमेण कार्य्योत्पादः सम्भवतीति। एवमक्रमेण यदि कार्य्योत्पादः स्यात्तदापि वक्तव्यं सकलकार्य्य-करणसमर्थः स कार्य्योत्तरकालमनुवर्त्तते न वा? अनुवर्त्तते चेत्तत्कालवत्तदुत्तरकालेऽपि सर्व्वं कार्य्यं कुर्य्यात्? अथ नानुवर्त्तते समायातं तर्हि क्षणिकत्वेनेति सिद्धमक्रमेणापि कार्य्योत्पादः स्थिरान्न सम्भवतीति। एवञ्च साधूक्तं तौ चाक्षणिके न सम्भवत इति। अन्यदप्यनल्पजल्पनमत्र न कल्पनपथमारोहदपि विस्तरभयादनुल्लिखितमूहनीयं सूक्ष्मेक्षण-पक्षपातिभिः प्रेक्षावद्भिः। अत इति, अतः स्थिरे क्रमाक्रमयोरसम्भवात्, तौ—क्रमाक्रमौ, क्षणिकत्वं आपादयतः स्थिरत्वेनाभिमताद्व्यावर्त्तमानौ (क्रमाक्रमौ) व्यापकव्यावृत्त्या व्याप्य-व्यावृत्तिन्यायेन अर्थक्रियाकारित्वलक्षणं सत्त्वमपि व्यावर्त्तयन्तौ, सत्त्वेन हेतुना क्षणिकत्वं सम्पादयत इत्यर्थः। यथोक्तं ज्ञानश्रिया—"यत्सत्तत्क्षणिकं यथा जलधरः सन्तश्च भावा अमी" इत्यादि ॥३४॥

স্থির বস্তু হইতে যে কার্য্যের উৎপাদ সম্ভবপর হয় না, তাহার কারণ এই যে, কার্য্যের জনকত্বটি ক্রমিক কার্য্যোৎপাদ ও অক্রমিক কার্য্যোৎপাদদ্বারা ব্যাপ্ত, অর্থাৎ যে স্থানে ক্রমিক কার্য্যোৎপাদ ও অক্রমিক কার্য্যোৎপাদ সে স্থানেই কার্য্যের জনকত্ব থাকে। অথচ সেই ক্রমিক ও অক্রমিক কার্য্যোৎপাদ স্থির বস্তুতে সম্ভবপর নহে, কারণ তাহা হইলে বর্ত্তমান অর্থক্রিয়া কালে অতীত ও ভবিষ্যৎ অর্থ-ক্রিয়া উৎপত্তির আপত্তি প্রভৃতি দোষ হয়। অতএব স্থির বস্তুতে ক্রম ও অক্রম না থাকায় তাহাদের ব্যাপ্য কার্য্যজনকত্বও থাকিতে পারে না। যেমন ব্যাপক বহ্নি যে স্থানে না থাকে, বহ্নির ব্যাপ্য ধূম ও সে স্থানে থাকে না। সুতরাং সেই ক্রম ও অক্রমই ভাবপদার্থের ক্ষণিকত্বও সাধন করিয়া থাকে। (ইহার বিস্তৃত বিবরণ টীকায় দ্রষ্টব্য) ॥ ৩৪ ॥

পরিহরতি—

ন প্রত্যভিজ্ঞাবাধাৎ ॥ ২৫ ॥

যদ্যপি সহকারিসদ্ভাবাসদ্ভাবাভ্যাং করণাকরণন্যায়ৈঃ স্থিরসিদ্ধিঃ সমাধেয়া, তথাপি সর্ব্ববাদ্যবিবাদসিদ্ধত্বাৎ স এবায়ম্ ইতি অবাধিতপ্রত্যভিজ্ঞাবাধ উক্তঃ। এতদন্যত্র প্রপঞ্চিতমিতি নেহ প্রতন্যতে ॥ ২৫ ॥

ক্ষণভঙ্গবাদনিরাসকং সূত্রমবতারয়তি—পরিহরতীতি। সূত্রেণেতি, ভাবানাং ক্ষণিকত্বমিতি শেষঃ। অত্র হেতুং দর্শয়তি—প্রত্যভিজ্ঞাবাধাদিতি। প্রত্যভিজ্ঞয়া—"পূর্ব্বপরিজ্ঞাতস্যেদানীন্তনজ্ঞানবিষয়েণ সহাভেদাধ্যবসায়" ইত্যেবংলক্ষণয়া যদেবাহমদ্রাক্ষং তদেবাহং স্পৃশামীত্যাদ্যাকারিকয়া, বাধাৎ—স্থিরত্বসিদ্ধ্যা ক্ষণিকত্বস্য প্রতিরোধাদিত্যর্থঃ।

ননু স্থিরাৎ ক্রমেণ কার্য্যোৎপাদপক্ষে বর্ত্তমানার্থক্রিয়াকালে উত্তরবর্ত্তিষ্যমাণার্থক্রিয়োৎপাদপ্রসঙ্গরূপং অক্রমেণ কার্য্যোৎপাদপক্ষেঽপি তত্তৎকার্য্যোত্তরকালে তত্তৎকার্য্যোৎপাদপ্রসঙ্গরূপং যদ্দূষণমভিহিতং ক্ষণভঙ্গবাদিভিঃ তদুভয়মপি ন বিচারসহং, তত্তৎপ্রাগভাবকালাদিরূপসহকারিসমবধানাভাবাদেব তত্তদুৎপাদপ্রসঙ্গাসম্ভবাদিতি তদপ্রদর্শনেন সূত্রকৃতো ন্যূনতামাবিষ্করোতি—যদ্যপীত্যাদিনা।

সহকারিণঃ—তত্তৎপ্রাগভাবাদিরূপসহকারিকারণস্য সদ্ভাবাসদ্ভাবাভ্যাং—সমবধানাসমবধানাভ্যাং করণাকরণন্যায়ৈঃ অর্থাৎ সহকারিণঃ সমবধানে কার্য্যং করোতি, অসমবধানে ন করোতীতি নিয়মাবধারণৈঃ, স্থিরসিদ্ধিঃ—স্থিরাৎ ক্রমিকাক্রমিককার্য্যসিদ্ধিঃ সমাধেয়া—

ক্ষণিকত্বের নিরাস করিতেছেন—"বস্তুর ক্ষণিকত্ব স্বীকার করিলে প্রত্যভিজ্ঞার বাধ হয়, অর্থাৎ পূর্ব্বে আমি যাহাকে দেখিয়াছি, তাহাকেই এখন দেখিতেছি, যে আমি দেখিয়াছি, সেই আমিই এখনও দেখিতেছি ইত্যাদিরূপ জ্ঞান হইতে পারে না, অথচ এইরূপ প্রত্যভিজ্ঞা সর্ব্ববাদিসিদ্ধ, সুতরাং প্রত্যভিজ্ঞার বাধ হয় বলিয়াই বস্তুসকল ক্ষণিক হইতে পারে না।"

যদিও প্রাগভাবাদিরূপ সহকারি কারণ থাকিলেই কারণ হইতে কার্য্যের উৎপত্তি হয়, উক্ত সহকারি কারণ না থাকিলে কেবল একটি কারণ হইতে কার্য্যের উৎপত্তি হয় না, এইরূপ নিয়ম অনুসারেই স্থির বস্তু হইতে ক্রমিক ও

दूषणान्तरमाह—

श्रुतिन्यायविरोधाच्च ॥ ३६ ॥

श्रुतिराह "अस्ति जन्मान्तरोपभोग्यभोक्ता पुरुषः" न्यायश्च "को नाम अनुपभोग्ये कर्मणि तत्साधने प्रवर्त्तते"। यद्युच्येत

व्यवस्थापयितुं शक्यत्यर्थः। न्यूनतां परिहरति—तथापीत्यादिना। सहकारिसद्भावासद्भावाभ्यां करणाकरणन्याये वादिनां विवादो वर्त्तते, तथाहि—उक्तसहकारिणः भावस्योपकुर्व्वन्ति न वा? नोपकुर्व्वन्ति चेन्न सम्भवति तदपेक्षा, अकिञ्चित्कुर्व्वतां तेषां तादर्थ्यासम्भवात्। उपकुर्व्वन्ति चेत्तदापि वक्तव्यं सोऽयमुपकारो भावाद्भिद्यते न वा? भिद्यते चेदागन्तुकस्य तस्यैव कारणत्वं स्यान्नतु भावस्याक्षणिकस्य, कार्य्यस्यागन्तुकातिशयान्वयव्यतिरेकित्वानुविधायित्वात्। अथ भावस्तैः सहकारिभिः सहैव कार्य्यं करोतीति स्वभाव इति चेत्तर्हि कदापि सहकारिणो न जह्यात्, स्वभावस्यानपायादिति न सम्भवति सहकारिसद्भावासद्भावाभ्यां करणाकरणन्यायः। एवं सहकारिजन्योऽतिशयः अतिशयान्तरमारभते—न वेति। विकल्प्यापि केचिदनवस्थादोषाद्यादि बहुतरदोषावतारणेन विवदन्ते। प्रत्यभिज्ञायान्तु नास्ति कस्यापि विवाद इति, तथाच प्रत्यभिज्ञाबाधोपन्यासे सूत्रकृदध्यवसायः सर्व्ववादिसिद्धत्वरूपस्वरसमित्त इति स्थितम् ॥ ३५ ॥

दूषणान्तरमिति, क्षणिकत्वपक्षे इत्यर्थः। "श्रुतिन्यायविरोधाच्च न सर्व्वेषां भावानां क्षणिकत्व"मिति सूत्रार्थः। अत्र येन श्रुत्यर्थेन विरोधस्तमर्थं "सदेव सौम्येदमग्र आसीत्" "स एव यज्ञायुधी यजमानोऽञ्जसा सर्व्वं लोकं याती"त्यादि श्रुतिभ्यः सङ्कलय्य दर्शयति—

অক্রমিক কার্য্যসিদ্ধির ব্যবস্থা করা যাইতে পারে, অর্থাৎ স্থির হইতে কার্য্যের উৎপত্তিপক্ষে ক্ষণিকত্ববাদিগণ পূর্ব্বসূত্রদ্বারা যে দোষ দেখাইয়াছেন, তাহার নিরাস হইতে পারে, তথাপি সমস্তবাদিগণ নির্ব্বিবাদে স্বীকার করেন বলিয়া "সেই ব্যক্তিই এই" এইরূপ যে অবাধিত প্রত্যভিজ্ঞা তাহার বাধরূপ দোষই ক্ষণিকত্বপক্ষে দেখান হইল। ক্ষণিকত্বপক্ষে যে প্রত্যভিজ্ঞা হইতে পারে না, ইহা বহুস্থানে বলা হইয়াছে, সুতরাং এস্থানে আর তাহার বিস্তার করা হইল না ॥৩৫॥

ক্ষণিকত্বপক্ষে অপর দোষ দেখাইতেছেন—"শ্রুত্যর্থ ও যুক্তির সহিত বিরোধ হয় বলিয়াও সমস্ত পদার্থের ক্ষণিকত্ব হইতে পারে না।" শ্রুতি

कारुणिकानां विरागात् प्रवृत्तिर्दृश्यते, तन्न, तत्रापि तदुपकारेण स्वधर्म्मलाभात्, धर्म्मानभिसन्धानेऽपि मोक्षसाधनत्वात् ॥ २६ ॥

अस्तीति। येन न्यायेन विरोधस्तं दर्शयति—को हीति। प्रवर्त्तत इति—न कोऽपि प्रवर्त्तत इत्यर्थः। एवञ्च स्वोपभोग्ये कर्म्मणि तत्साधन एव च प्रवर्त्तत इत्येव फलितम्। सर्व्वेषां क्षणिकत्वाभ्युपगमे च दर्शितश्रुतिन्यायविरोधो दुष्परिहरः, स्थायिनः पुरुषस्याभावे तत्र जन्मान्तरभोग्यभोक्तृत्वस्य स्वभोग्ये कर्म्मणि प्रवृत्तेश्चासम्भवादिति भावः। उक्तन्याये व्यभिचारं शङ्कते—यद्यपीत्यादिना। विरागादित्यनेन प्रवृत्तेः स्वफलनिरपेक्षत्वमुक्तं, तथाच—यथा कारुणिकानां योगिप्रमुखाणां स्वफलनिरपेक्षया परदुःखविमोक्षणायैव प्रवृत्तिर्भवति, तथा फलभोगकालपर्य्यन्तास्थायिनोऽपि पुरुषस्य प्रवृत्तिरुपपद्यत एवेति शङ्कार्थः। शङ्कां परिहरति—तन्नेत्यादिना। तत्रापि—विरागात् कारुणिकानां प्रवृत्तावपि, तदुपकारेण—परेषां दुःखविमोचनरूपोपकारेण, धर्म्मलाभात्—कारुणिकानामपि पुण्योपचयात्। ननु ये धर्म्ममपि नाभिसन्धाय प्रवर्त्तन्ते कुतस्तेषां धर्म्मलाभ इत्याशङ्कायामाह—धर्म्मानभिसन्धानेऽपीति। तथाच तेषां कामनाविरहेण—भोगफलकपुण्यानुदयेऽपि दुरितक्षयेण चित्तशुद्ध्यादिद्वारा मोक्षाख्यफललाभात् कुत्रापि निष्फला प्रवृत्तिर्न दृश्यत इति फललाभकालपर्य्यन्तास्थायिनः पुरुषस्य कथमपि प्रवृत्तिर्नोपपद्यत इत्येव स्थितम् ॥ २२ ॥

বলিয়াছেন, "জন্মান্তরোপভোগ্য ফলের ভোক্তা পুরুষ আছে" যদি সমস্ত পদার্থ ক্ষণিক হয়, তবে তাদৃশ পুরুষ থাকিতে পারে না। বলিয়া উক্ত শ্রুত্যর্থের বিরোধ অনিবার্য্য। যুক্তিবলে দেখাযায়, যে কার্য্যের নিজের ফল উপভোগের যোগ্য নহে, কোন ব্যক্তিই সেই কার্য্যে বা সেই কার্য্যের উপায়বিষয়ে প্রবর্ত্ত হয় না, অর্থাৎ যাহার ফল নিজে উপভোগ করিতে পারে, তাহাতেই প্রবর্ত্ত হয়। সমস্ত ক্ষণিক হইলে কর্ম্মকরার পরক্ষণেই পুরুষেরও বিনাশ মানিতে হইবে, সুতরাং ফলভোগের অসম্ভব বিষয়ে পুরুষের প্রবৃত্তিই হইতে পারে না, অতএব যুক্তিবিরোধও ক্ষণিকত্বপক্ষে অনিবার্য্য। যদি বল যেরূপ কারুণিকগণ নিজের ফলাপেক্ষী না হইয়াও কেবল পরদুঃখনিবারণের জন্যই যেমন প্রবৃত্ত হয়, তেমন পুরুষও কেবল পরের উপভোগের জন্যই প্রবৃত্ত হইয়া থাকে, তাহাও ঠিক নহে, কারণ সে স্থলেও পরের উপকারদ্বারা কারুণিকের ধর্ম্মলাভ হইয়া থাকে। ধর্ম্মলাভের অভিসন্ধান না থাকিলেও সেই পরোপকারদ্বারা পাপক্ষয়াদি ক্রমে মুক্তিলাভ হয় ॥৩৬॥

দূষণান্তরমাহ—

দৃষ্টান্তাসিদ্ধেশ্চ ॥ ২৭ ॥

সর্ব্বস্যৈব পক্ষপ্রবেশান্নাস্তি দৃষ্টান্তঃ। অপ্রবেশে স এব স্থিরঃ। অথ তস্যাপি ক্ষণিকত্বমন্যহেতুনা প্রসিধ্যতাম্? তত্রাপি দৃষ্টান্তাসিদ্ধিরিতি ॥ ২৭ ॥

ক্ষণিকত্বসাধকানুমানস্য প্রকারান্তরেণ নিরাসকং সূত্রমবতারয়তি—দূষণেতি। "দৃষ্টান্তাসিদ্ধেশ্চ ন সর্ব্বেষাং ক্ষণিকত্বং সাধয়িতুমল"মিতি সূত্রার্থঃ। দৃষ্টান্তাসিদ্ধিমেব বিশদয়তি—সর্ব্বেত্যাদিনা। পক্ষপ্রবেশাৎ—পক্ষকুক্ষিনিক্ষিপ্তত্বাৎ, নাস্তি দৃষ্টান্ত ইতি, সাধ্যসাধনোভয়প্রকারকসাধ্যাভাবসাধনাভাবোভয়প্রকারকান্যতরনিশ্চয়বিষয়স্যৈব দৃষ্টান্তত্বেন সন্দিগ্ধসাধ্যক পক্ষস্য দৃষ্টান্তত্বাসম্ভবাদিতি ভাবঃ। ননু মাস্তু সর্ব্বেষাং পক্ষকোটৌ প্রবেশ ইত্যাশঙ্কায়ামাহ—অপ্রবেশ ইতি। পক্ষকোটৌ সর্ব্বেষামনিবেশ ইত্যর্থঃ। স এব পক্ষকোটাবপ্রবেশিত এব, স্থিরঃ—অক্ষণিকঃ, অস্ত্বিতি শেষঃ। অত্র ক্ষণিকত্বস্যাসাধিতত্বাদিতি ভাবঃ। তথাচ পক্ষকোটাবপ্রবেশিতস্যাপি ক্ষণিকত্বেনানিশ্চয়াদ্দৃষ্টান্তত্বং ন সম্ভবতীতি ফলিতং। ননু হেত্বন্তরেণ তত্র ক্ষণিকত্বং প্রসাধ্য দৃষ্টান্তত্বং সম্পাদনীয়মিত্যভিপ্রায়েণ শঙ্কতে—অথেতি। তস্যাপি—দৃষ্টান্তসিদ্ধ্যর্থং পক্ষকোটাবপ্রবেশিতস্যাপি। পরিহরতি—তত্রাপীতি, অন্যহেতুনানুমানেঽপীত্যর্থঃ। দৃষ্টান্তাসিদ্ধিরিতি, তথাচ দৃষ্টান্তাসিদ্ধ্যা হেত্বন্তরেণাপি তত্র ক্ষণিকত্বসাধনাসম্ভবাৎ কথমপি ন দৃষ্টান্তসিদ্ধিঃ সম্ভবতীতি স্থিতম্ ॥ ২৭ ॥

ক্ষণিকত্বপক্ষে আরও দোষ দেখাইতেছেন "ক্ষণিকত্বসাধক অনুমানে দৃষ্টান্তসিদ্ধি হইতে পারে না বলিয়াও বস্তুর ক্ষণিকত্ব হইতে পারে না।" সমস্ত বস্তুরই পক্ষে অন্তর্ভাব করিতে হইবে বিধায় দৃষ্টান্তসিদ্ধি হইতে পারে না, কারণ যাহাতে সাধ্যসাধনের বা সাধ্যাভাবসাধনাভাবে নিশ্চয় থাকে, সেই পদার্থই দৃষ্টান্ত হইয়া থাকে, অথচ যাহাতে সাধ্যের সন্দেহ থাকে, তাহাই পক্ষ, সুতরাং পক্ষ দৃষ্টান্ত হইতে পারে না। যদি দৃষ্টান্তসিদ্ধির জন্য কতিপয় পদার্থ পক্ষের অন্তর্ভুক্ত না কর, তবে যাহাকে অন্তর্ভুক্ত না করিবে ক্ষণিকত্বের অসিদ্ধিনিবন্ধন সেই পদার্থেই স্থিরত্ব আপাদিত হইবে এবং ক্ষণিকত্বের অনিশ্চয়নিবন্ধন সেই পদার্থও দৃষ্টান্ত হইতে পারিবে না। যদি বল পক্ষে অপ্রবেশিত পদার্থেরও ক্ষণিকত্ব অন্য হেতুদ্বারা সাধিত করিয়া দৃষ্টান্তসিদ্ধি

क्षणिकपक्षे एवार्थक्रिया न सम्भवतीत्याह-

युगपज्जायमानयोर्न कार्य्यकारणभावः ॥ ३८ ॥

सव्येतरविषाणयोरिव युगपज्जायमानयोः स्वलक्षणार्थक्रिययोः । एतच्चासकृदुक्तम् ॥ ३८ ॥

पूर्वापरकालभावितामात्रात् कार्यकारणभावो भविष्यतीत्यत आह—

पूर्वापाये उत्तरायोगात् ॥ ३९ ॥

भवेदेवं, यदि अतिशयाधायकत्वं स्यात् । तदेव तु अशक्यं क्षणिकत्वादिति ॥ ३९ ॥

प्रकारान्तरेण क्षणिकत्ववादिमतनिरासकं सूत्रान्तरमवतारयति—क्षणिकेत्यादिना । दृष्टान्तप्रदर्शनपुरःसरं सूत्रतात्पर्य्यं विवृणोति—सव्येतरेत्यादिना । युगपज्जायमानयोरित्यस्य विशेष्यपदं निर्द्दिशति—स्वलक्षणार्थक्रिययोरिति । स्वस्य कार्य्यस्य लक्षणं स्वरूपं येन तत् स्वलक्षणं कारणं, अर्थक्रियाकार्य्यं, तयोः कारणत्वेन कार्य्यत्वेन चाभिमतयोरिति यावत् । तथा चायं सूत्रार्थः—यथा युगपज्जायमानयोः सव्येतरविषाणयोः कार्य्यकारणभावः कस्यापि मते न भवति, तथा कारणत्वेन कार्य्यत्वेन चाभिमतयोरपि युगपदुत्पन्नयोर्न कार्य्यकारणभावः सम्भवति । विनिगमकाभावादिति भावः ॥ ३८ ॥

युगपदुत्पन्नयोः कार्य्यकारणभावं निरस्य क्रमिकयोरपि क्षणिकयोः कार्य्यकारणभावस्य निरासकं सूत्रं प्रश्नपूर्व्वकमुत्थापयति—पूर्व्वेत्यादिना । पूर्व्वकालभावित्वेन कारणत्वं

করিব, তাহাও হইতে পারে না, কারণ অন্যহেতুদ্বারা অনুমান করিতেও দৃষ্টান্তের প্রয়োজন হইবে, সেই দৃষ্টান্তেরও সিদ্ধি হইবে না ॥৩৭॥

ক্ষণিকত্বপক্ষে কার্য্যকারণভাবেরই সম্ভাবনা নাই, ইহাই বলিতেছেন—"একক্ষণে উৎপন্ন দক্ষিণ ও বাম শৃঙ্গের যেরূপ কোন মতেই পরস্পর কার্য্য-কারণভাব হয় না, সেইরূপ কারণ ও কার্য্য বলিয়া অভিমত বস্তুরও এক-ক্ষণে উৎপন্ন হইলে তাহাদের কার্য্যকারণভাব হইতে পারে না, কারণ, কে কারণ আর কে কার্য্য হইবে তাহার নির্ণয় করিবার যুক্তি পাওয়া দুষ্কর হইয়া পড়ে ॥৩৮॥

तदुत्तरकालभाविलेन च कार्य्यत्वमित्यर्थः। भावपदात् कारणस्य कार्य्यकालसत्त्वावश्यकत्वव्यवच्छेदः। तथाच क्षणिकस्यापि पूर्व्वकालसत्त्वमात्रेण कारणत्वसम्भवात् क्रमिकयोः क्षणिकयोः कार्य्यकारणभावः सम्भवत्येवेति शङ्काभिप्रायः।

एतदाशङ्कानिवारकसूत्रार्थस्तु—पूर्व्वस्य कारणत्वेनाभिमतस्य क्षणिकस्य, अपाये—विनाशे सति अथवा पूर्व्वस्यापायो यस्मिन् काले तत्र, उभयथापि कारणत्वेनाभिमतस्य ध्वंसाधिकरणकाल इत्यर्थः। उत्तरस्य—कस्य, अयोगात्—उत्पत्त्यसम्भवात्। 'उत्तरयोगा'दिति पाठे तु उत्तरस्य योगात् सम्बन्धादित्यर्थः। न क्रमिकयोरपि क्षणिकयोः कार्य्यकारणभावः सम्भवतीति शेषः। उपादानकारणान्वितत्वयैव कार्य्यस्यानुभवादिति भावः। अन्यथा पूर्व्ववर्त्तितामात्रेणैव कारणताङ्गीकारे मृदादीनामिव घटादिपूर्व्ववर्त्तिपाषाणादीनामपि तत्पूर्व्ववर्त्तित्वाविशेषेण घटादिकारणत्वापत्ते

ननु कार्य्योत्पत्तेः पूर्व्वक्षणवर्त्ति यद् यस्य कश्चिदतिशयं जनयति तदेव तस्य कारणमिति वक्तव्यं, अन्यथा पूर्व्वक्षणावधिकार्य्यकालपर्य्यन्तस्थायिनामुदासीनवस्तूनां कारणत्वापत्तेः कार्य्यकालवृत्तितया कारणत्वमङ्गीकर्त्तृभिरक्षणिकत्ववादिभिरपि वारयितुमशक्यत्वात्। एवञ्च—पूर्व्ववर्त्तित्वाविशेषेऽपि अतिशयाधायकमृदादीनामेव घटादिकारणत्वं नातिशयानाधायकपाषाणादीनामिति नियमोपपत्तेः सम्भवत्येव क्षणिकयोः कार्य्यकारणभाव इत्याशङ्कामपनेतुमाह—भवेदेवमिति। एवं अतिशयाधायकतया पूर्व्वकालमात्रवर्त्तिनः क्षणिकस्य कारणत्वम्, तदेव—अतिशयाधायकत्वमेव। अशक्यं क्षणिकत्वादिति, एकक्षणिकस्य वस्तुनः क्षणान्तरवर्त्ति वस्तुगतातिशयाधायकत्वस्यातिदुष्करत्वादिति भावः॥ १९॥

একক্ষণে উৎপন্ন বস্তুদ্বয়ের কার্য্যকারণভাব সম্ভবপর না হইলেও পূর্ব্বক্ষণে উৎপন্ন বস্তু কার্য্য হইতে পারে, সুতরাং বস্তু ক্ষণিক হইলেও তাহাদের কার্য্যকারণভাব হইতে কোন বাধা দেখা যায় না, এই আশঙ্কায় বলিতেছেন—"কারণের বিনাশ হইলে কার্য্যের উৎপত্তি হইতে পারে না" কারণ সমবায়িকারণবিযুক্ত কার্য্যের উপলব্ধি হইতে দেখা যায় না। অন্যথা মৃদাদির ন্যায় ঘটাদির পূর্ব্ববর্ত্তি পাষাণাদিও ঘটাদির সমবায়ি কারণ হইতে পারে।

এস্থানে আশঙ্কা হইতে পারে যে, "কেবল পূর্ব্ববর্ত্তিতাদ্বারা বা পূর্ব্বক্ষণ হইতে কার্য্যকাল পর্য্যন্ত স্থায়িতাদ্বারা কারণত্ব কল্পনা করা যায় না, কারণ তাহা হইলে কোন মতেই পূর্ব্বক্ষণস্থায়ী বা পূর্ব্বক্ষণ হইতে কার্য্যকাল পর্য্যন্ত স্থায়ী উদাসীন বস্তুর কারণত্বাপত্তি নিবারিত হয় না। সুতরাং "পূর্ব্ববর্ত্তী

एतत् स्पष्टयति—

तद्भावे तदयोगादुभयव्यभिचारादपि न ॥ ४० ॥

हेतुहेतुमद्भावकाले कार्य्याभावादुभयव्यभिचारादपि न कार्य्य-कारणभावः । आस्तां तावदर्थक्रियाकारित्वं, अयं हेतुरिदं कार्य्य-मिति व्यवहारोऽपि न स्यात् ॥ ४० ॥

पुनरुक्तिभिया पूर्व्वापरेत्यादिसूत्रव्याख्यानपरतयापरसूत्रमवतारयति—एतदिति । हेतुमद्भाव-काल इति तद्भाव इत्यस्य कार्य्याभावादिति च तदयोगादित्यस्य विवरणम् । उभयव्यभिचारात्—अन्वयव्यतिरेकव्यभिचारात् । कारणसत्त्वे कार्य्यस्याभावे कारणासत्त्वे कार्य्योत्पादस्याप्यवश्यसम्भव-तया कारणसत्त्वे कार्य्यानुत्पादरूपान्वयव्यभिचारस्य कारणासत्त्वे कार्य्योत्पादरूपव्यतिरेक-व्यभिचारस्य चावश्यम्भावादित्यर्थः । शेषं पूरयति—कार्य्यकारणभाव इति,—कार्य्यकारणभावो न सम्भवतीत्यर्थः, अन्वयव्यतिरेकाभ्यामेव कार्य्यकारणभावस्यानुभविकत्वेन तद्विरोधिनो-रुभयव्यभिचारयोरेव सद्भावादिति भावः । ननु क्षणिकत्ववादिमते वस्तुगत्या नास्त्वर्थक्रिया-कारित्वं, परन्तु व्यावहारिकमेव कार्य्यत्वं कारणत्वञ्च स्यादित्येकदेशिमतमपि दूषितवान्

যে যাহার কোনও বিশেষত্ব সম্পাদন করে, সেই তাহার কারণ হয়” এইকথা বলিলেও ক্ষণিকত্বপক্ষে কারণ মৃদাদি কার্য্যকালবর্ত্তি না হইলেও বিশেষত্ব সম্পাদন করে বলিয়া ঘটাদির উপাদান কারণ হইবে, কিন্তু পাষা-ণাদি পূর্ব্ববর্ত্তি হইলেও ঘটাদির কোনও বিশেষত্ব সম্পাদন করে না বলিয়াই ঘটাদির উপাদান কারণ হইবে না। সুতরাং ক্ষণিকত্বপক্ষেও কার্য্যকারণ-ভাবসম্পন্ন হইতে কোনও বাধা দেখা যায় না।” বস্তুতঃ এ আশঙ্কাও ঠিক নহে, কারণ ক্ষণিক বস্তু যদি বিশেষত্বের সম্পাদক হইতে পারে, তবেই এই কথা বলা যাইতে পারে, কিন্তু ক্ষণিক বস্তু বিশেষত্বের সম্পাদকও হইতে পারে না, যে হেতু একক্ষণমাত্র স্থিত বস্তু যে অপরক্ষণমাত্র স্থিত বস্তুর কোনও বিশেষত্ব সম্পাদন করিয়াছে, ইহা পরিলক্ষিত হয় না ॥৩৯॥

এই সূত্রদ্বারা পূর্ব্বসূত্রের অর্থই স্পষ্ট করিতেছেন—ক্ষণিকত্বপক্ষে কারণসত্ত্বে যদি কার্য্যের উৎপত্তি না হয়, তবে কারণের অসত্ত্বে কার্য্যের উৎপত্তিই ফলতঃ স্বীকার করিতে হয়। সুতরাং “কারণসত্ত্বে কার্য্যের অনুৎপত্তি” রূপ অন্বয়-

अथ हेतोः कार्य्यकाले सत्त्वमप्रयोजकं, पूर्व्वकालभाविमात्रेण भविष्यतीत्यत आह—

पूर्व्वभाविमात्रे न नियमः॥ ४१॥

किं भिन्नसन्तानस्य, एकसन्तानस्य वा? भिन्नसन्तानस्य चेत् अतिप्रसक्तिः। एकसन्तानस्य चेत् निरन्वयध्वंसः। तस्य हि भिन्नसन्तानेन तुल्यत्वान्न नियमः। अन्वयश्च नास्तीत्युक्तम्॥ अथ अविद्यमानस्यापि हेतुता दृश्यते, यथेषुक्षेपकस्य इषुक्षेपानन्तरं मृतस्याहिमरणं, पश्चादिषुविद्धस्य मरणकर्तृत्वम्, तन्न, तत्रापि मरणे व्यापारद्वारेण अन्वयात्॥ ४१॥

निराकरोति—चासामित्यादिना। न स्यादिति अयमत्राभिसन्धिः—कारणत्वकार्य्यत्वव्यवहारं प्रत्यपि यदि पूर्व्वापरक्षणवर्त्तित्वमात्रं नियामकमुच्यते क्षणभङ्गवादिभिस्तदा तत्कार्य्याव्यवहित-पूर्व्वक्षणवर्त्तिनामुदासीनानामपि तत्कारणत्वव्यवहारः, तत्कार्य्यक्षणवर्त्तिनामुदासीनानामपि तत्कार्य्यत्वव्यवहारश्च प्रसज्येत, स च न क्षणभङ्गवादिनामप्यभिलषितः। अन्यच्च नियामकं तैर्दुर्व्वचमेवेति संक्षेपः॥ ४०॥

"पूर्व्ववर्त्तितामात्रेणैवोपादानकारणत्व"मित्यस्य प्रकारान्तरेण दूषकं सूत्रं पुनस्तन्मतोपन्यासपूर्व्वकमुत्थापयति—अथेत्यादिना। भविष्यतीति—उपादानकारणत्वमपीति शेषः।

विकल्प्य सूत्रतात्पर्य्यं विवृणोति—किमित्यादिना। भिन्नसन्तानस्य—भिन्नप्रवाहान्तःपातितयानुभूयमानस्य पूर्व्वक्षणवर्त्तिक्षणिकस्य; एकसन्तानस्य—एकप्रवाहान्तःपातितयानुभूय-

---

ব্যভিচার ও "কারণের অসত্ত্বে কার্য্যের উৎপত্তি"রূপ ব্যতিরেকব্যভিচার অনিবার্য্য হইয়া পড়ে। অতএব এই উভয়বিধ ব্যভিচারবশতঃ ও ক্ষণিকদ্বয়ের কার্য্যকারণভাব হইতে পারে না, কার্য্য জন্মান ত দূরের কথা, একটি কারণ এবং একটি কার্য্য এইরূপ ব্যবহারও হইতে পারে না, যে হেতু কেবল পূর্ব্ববর্ত্তিতা কারণত্ব ব্যবহারের ও কেবল পরবর্ত্তিতা কার্য্যত্বব্যবহারের নিয়ামক হইলে উদাসীনের কারণত্ব ও কার্য্যত্ব ব্যবহার অনিবার্য্য হইয়া পড়ে," অন্য কোনরূপ নিয়ামকও কল্পনা করা যায় না॥৪০॥

"কেবল পূর্ব্ববর্ত্তিত্ব থাকিলেই উপাদান কারণ হইবে, উপাদান কারণের

नानस्य पूर्व्वक्षणवर्त्तित्वविरहस्य, उपादानकारणत्वनियत इति शेषः। अतिप्रसक्तिरिति, सर्व्वेष्वेव भिन्नप्रवाहान्तःपातितयानुभूयमानेषु तत्कार्य्यपूर्व्वक्षणवर्त्तिक्षणिकेषु केषामपि तदुपादानकारणत्वेनाभिमतेषु पूर्व्ववर्त्तित्वाविशेषेण तदुपादानकारणत्वप्रसक्तिरित्यर्थः। निरन्वयध्वंस इति प्रतिलोमपरिणामेनाव्यक्ततयावस्थानादतिरिक्तः ध्वंस इत्यर्थः। न तु भवतु तादृशो ध्वंसस्तेन किमित्याशङ्कायामाह—तस्येति। तादृशध्वंसस्येत्यर्थः, तुल्यत्वात्—अविशेषात्। कारणत्वेनाभिमतस्यैकसन्तानस्येति शेषः। न नियम इति नियमः—एकसन्तानस्यैवोपादानकारणत्वं भवति न भिन्नसन्तानस्येति व्यवस्था, न सम्भवतीति शेषः। इदमत्राकूतम्—परिणामिवादिनो हि कारणे प्रतिलोमपरिणामेनाव्यक्ततयावस्थानमेव कार्य्यस्य ध्वंसं मन्यन्ते यत्र च यत्कार्य्यमव्यक्ततयावतिष्ठते तदेव च तस्योपादानकारणमिति स्वीकुर्व्वन्तीति तेन ध्वंसेनैव तन्मतेऽस्ति व्यवस्था। क्षणभङ्गवादिनां मते तु कार्य्योत्पादक्षण एव कारणस्य विनाशात्तादृशध्वंसाङ्गीकरणासम्भवेनातिरिक्त एव कार्य्यस्य ध्वंसः स्वीकार्य्यः, तस्य च कार्य्यपूर्व्ववर्त्तिषु सर्व्वेषु क्षणिकेष्वविशेषात् भिन्नसन्ताने पूर्व्वक्षणवर्त्तिनि उपादानकारणत्वं न तिष्ठति एकसन्ताने च तादृशे उपादानकारणत्वं तिष्ठतीति नियमः कथमपि तेन निरन्वयध्वंसेन नोपपद्यत इति। ननु माभूत्तादृशध्वंसेनोक्तनियमः सम्बन्धविशेष एव तादृशनियमसम्पादको भविष्यतीत्याशङ्कायामाह—सम्बन्धश्चेति, तादृशनियामकसम्बन्धश्चेत्यर्थः, नासीत्युक्तमिति, नहि पूर्व्वापरक्षणवर्त्तिनोः क्षणिकयोस्तादृशनियामकः कश्चित् सम्बन्धोऽपि कल्पयितुं शक्यत इति भावः। क्षणभङ्गवादी पुनः शङ्कते—यथेत्यादिना। मह्यादिमरणमिति मह्यादिभिः कारणभूतैर्म्मरणमित्यर्थः। तथाच यथेषुविद्धस्य मरणस्य

যে কার্য্যোৎপত্তিকালেও থাকিতে হইবে, ইহার কোন প্রমাণ নাই” এই মতকে প্রকারান্তরে দূষিতেছেন—কেবল পূর্ব্বকালোৎপন্ন হইলেই যে উপাদান কারণ হইবে, এরূপ নিয়ম করা চলে না, কারণ ভিন্ন সন্তানের (বিভিন্নপ্রবাহন্তঃ পাতিরূপে অনুভূয়মান পদার্থের) পূর্ব্ববর্ত্তিত্ব দ্বারা উপাদান কারণত্ব স্বীকার করিলে অতিপ্রসক্তি হয়, অর্থাৎ যাহরা যে কার্য্যের কারণ বলিয়া কাহারও অভিমত নহে, এরূপ পূর্ব্ববর্ত্তি পদার্থেরও সেই কার্য্যের কারণত্ব হইতে পারে। পূর্ব্ববর্ত্তিত্বদ্বারা এক সন্তানের (এক প্রবাহান্তঃপাতিরূপে অনুভূয়মান পদার্থের) উপাদান কারণত্ব স্বীকার করিলেও ক্ষণিকত্ববাদীর মতে নিরন্বয় ধ্বংস (প্রতিলোম পরিণামদ্বারা অব্যক্তরূপে কারণে অবস্থানের অতিরিক্ত ধ্বংস) স্বীকার করিতে হয়, অথচ

अवर्त्तमानस्यापीषुक्षेपकस्य इषुविद्धस्य मरणम् प्रति कारणत्वं सर्व्ववादिसिद्धं, तद्वैव कार्य्यकाले अवर्त्तमानस्यापि क्षणिकस्य पूर्व्वक्षणवर्त्तितामात्रेणैव कारणत्वं स्यादिति शङ्कार्थः। यद्यप्यनेनापि दृष्टान्तेन कार्य्यकाले अवर्त्तमानस्योपादानकारणत्वसम्पादनं नैव सम्भवतीत्युक्तिमात्रेणैव शङ्केयं न पदमादधाति, तथापि वस्तुगतिमनुरुध्य दृष्टान्तत्वाभावमेव प्रदर्शयन् शङ्कामिमां परिहरति—तन्नेत्यादिना। तत्रापि मरणे—इषुक्षेपकस्य मरणानन्तरमपीषुविद्धस्य मरणे इत्यर्थः। व्यापार-वारित्व—इषुक्षेपजन्येषुसंयोगरूपव्यापारवत्त्वेन समन्वयात्—इषुक्षेपकस्य सम्बद्धत्वात्। परिणाम-वादिमते मरणेऽप्यव्यक्तरूपेण वस्तुनोऽवस्थानात् मृतस्यापीषुक्षेपकस्य इषुविद्धस्य मरणक्षणेऽपि स्वकर्त्तृकेषुक्षेपजन्येषु संयोगवत्त्वरूपपरम्परासम्बन्धेन सत्त्वसम्भवादिति भावः। तथा चेषुक्षेपकस्य कार्य्यकाले अविद्यमानत्वाभावाद्दृष्टान्तत्वमेव न सम्भवतीति कुतः शङ्कावसर इति स्थितम् ॥४१॥

সেই ধ্বংস একসন্তান ও ভিন্নসন্তান উভয়ের পক্ষেই তুল্য, সুতরাং তদ্দ্বারা ব্যবস্থা হইতে পারে না। ইহার তাৎপর্য্য এই যে, সৎকার্য্যবাদিগণ প্রতি-লোম পরিণামদ্বারা অব্যক্তরূপে কারণে কার্য্যের অবস্থানকেই কার্য্যের ধ্বংস বলিয়া স্বীকার করেন, এবং কার্য্য যাহাতে অব্যক্তরূপে অবস্থান করে, তাহাকেই উপাদান কারণ বলিয়া স্বীকার করেন, সুতরাং তাহাদের মতে ঐ অব্যক্তরূপে অবস্থানরূপ ধ্বংস দ্বারাই উপাদান কারণের ব্যবস্থা হয়, কিন্তু ক্ষণিকত্বপক্ষে কার্য্যের উৎপত্তিক্ষণেই কারণের বিনাশ হওয়ায় ঐরূপ ধ্বংস স্বীকার করা চলে না বলিয়া অতিরিক্তই ধ্বংস স্বীকার করিতে হয়, সুতরাং ধ্বংসদ্বারা উপাদান কারণের ব্যবস্থা হইতে পারে না। অন্য কোনরূপ সম্বন্ধ যে উপাদান কারণত্বের ব্যবস্থাপক হইতে পারে না, ইহা পূর্ব্বেই বলা হইয়াছে।

এস্থলে কেহ কেহ আপত্তি করিয়া থাকেন যে,কার্য্যকালে বিদ্যমান না থাকি-য়াও ত কারণ হইতে দেখা যায়, যেমন কোন ব্যক্তি বাণনিক্ষেপ করিয়া মহিষী কর্ত্তৃক নিহত হইয়াও নিজের মরণের পর স্বনিক্ষিপ্ত বাণদ্বারা যে হিংস্র জন্তুর মরণ হয়, তাহাতে কারণ হইয়া থাকে। বস্তুতঃ এই আশঙ্কাও ঠিক নহে, যেহেতু ঐ মরণেও ইষুক্ষেপক ব্যক্তি "স্বকর্ত্তৃক বাণনিক্ষেপ জন্য বাণসংযোগ রূপ" ব্যাপারদ্বারা কার্য্যকালে সম্বন্ধ আছে। কেন না, পরিণামবাদীর মতে কারণে অব্যক্তরূপে অবস্থানের নামই মরণ, সুতরাং মরণের পরেও তাহার

बाह्यवस्तूपरागाद्बन्ध इत्युक्तम् । ननु बाह्यं च वस्तु नास्ति, विज्ञानात्मकत्वाज्जगत इति विज्ञानवादिमतं निराकरोति—

न विज्ञानमात्रं बाह्यप्रतीतेः ॥ ४२ ॥

न विज्ञानमात्रं जगत् । तथा सति "अहं घट" इति प्रत्ययः स्यात्, न त्वयं घट" इति । वासनाविशेषादिति चेत् न, बाह्याभावे घटवासनाया अवासत्वात् कथं विशेषः ? किञ्च वासनाया अपि कारणं वासनैव, उत बाह्यवासनापि ? वासनापीति पक्षेऽन्यस्यापि सत्त्वात् स एव बाह्योऽर्थः । ननु नास्त्येव बाह्योऽर्थः, अवयवातिरिक्तस्यावयविनोऽभावात्, तथाहि अवयवावयविनरेकत्वादैकत्व-प्रतीतिः । चलति अवयवेऽवयवी चलति, अल्पावयवे चलति अवयवी ।

चतुर्व्विधाः खलु बौद्धाः योगाचारमाध्यमिकसौत्रान्तिकवैभाषिकसंज्ञाभिः प्रसिद्धा यथाक्रमं बाह्यशून्यत्वसर्व्वशून्यत्वबाह्यार्थानुमेयत्वबाह्यार्थप्रत्यक्षत्ववादानातिष्ठन्ते । तत्र योगाचारमतनिराकरणपरं सूत्रमवतारयितुं भूमिकामारचयति—बाह्येत्यादिना । इत्युक्त-मिति,—"न नित्यशुद्धमुक्तस्वभावस्य तद्योगस्तद्योगादृते" इति सूत्रे प्रकृतिरूपबाह्यवस्तुयोगा-द्बन्ध इत्युक्तमित्यर्थः । अत्र योगाचारमतानुसारेण शङ्कते—ननु बाह्यञ्च वस्तु नास्तीति, नचैतद्वाक्यं सिद्धासिद्धिव्याहतं विज्ञानवादिमते बाह्यस्यासत्त्वे नास्तीत्यस्यासङ्गतेः अवस्त्वे पुनरलीकप्रतियोगिकाभावापत्तश्चेति वाच्यं "वस्तु बाह्यञ्च" नास्तीति योजनया तत्र वस्तुनि तत्तद्विज्ञानभिन्नत्वेनास्तित्वाभावस्य बोधकत्वे तात्पर्य्यात् । विज्ञानात्मकत्वाज्जगत इति,—अत्र योगाचारस्यायमाशयः—स्वव्यतिरिक्तग्राह्यविरहात्तदात्मिका बुद्धिः स्वयमेव स्वात्मरूपं प्रकाशयति प्रकाशवत् । ग्राह्यग्राहकयोरभेदश्चानुमातव्यः । तथाचायं प्रयोगः—उपलभ्यमाना

ঐরূপ পরম্পরাসম্বন্ধ থাকিতে কোনও বাধা নাই, বাস্তবিক ঐ ইষুক্ষেপক ব্যক্তি সমবায়ী কারণও নহে ॥ ৪১ ॥

ঊনবিংশতি সূত্রে বলা হইয়াছে যে, প্রকৃতিরূপ বাহ্য বস্তু "সংযোগে" বদ্ধ হয়, তাহাতে বিজ্ঞানবাদী বৌদ্ধ আশঙ্কা করে এই যে "জগতের সমস্তই বিজ্ঞানস্বরূপ, সুতরাং বাহ্য বস্তুই নাই" অতএব সূত্রকার এই বিজ্ঞানবাদীর মত খণ্ডন করিতেছেন—

न चलतीति विरुद्धधर्माध्यासेन भेदावकल्पनम्। एवं रक्तारक्तावृतानावृतत्वादिदोषा उदाहार्य्याः। मा भूत् अवयवी, तथापि, न बाह्यार्थापलापः, परमाणुपुञ्जस्यैव स्थूलत्वेन ग्रहणात्। न, अवयविना हि कार्य्येण परमाणुः अनुमातव्यः। तदभावे केन अनुमातव्यः? परमाणूनामतीन्द्रियत्वात् पुञ्जेऽपि किञ्चिदतिशयानाधानात् स्थूलोऽयमिति प्रत्ययो भ्रान्त इति विज्ञानमात्रं जगदिति। अत्रोच्यते— अवयवावयविनोर्भेदात्। अपि च द्वयोरन्यत्वान्नावयवकम्पेऽवयवी कम्पते, यत्र तु बहुतरावयवकम्पस्तत्रावयवी कम्पत एव। एवं रक्तारक्तादिविरोधेऽपि सिद्धान्ता वक्तव्याः। तस्मात् सिद्धो बाह्योऽर्थः। वासनैवेति पक्षे सर्वदा ज्ञानोत्पत्तिरिति ॥ ४२ ॥

अर्था न तत्तद्विज्ञानेभ्यो भिद्यन्ते, नियतं तत्तद्विज्ञानेन सहोपलभ्यमानत्वात् यत् येन सह नियतसहोपालम्भनं तत्ततो न भिद्यते, यथैकस्माच्चन्द्रमसो द्वितीयचन्द्रमा इति। तथाच ग्राह्यग्राहकसंवित्तीनां पृथगवभासः एकस्मिन् चन्द्रमसि द्वित्वावभास इव भ्रमः। यथोक्तं—

नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवः परः।
ग्राह्यग्राहकवैधुर्य्यात् स्वयं सैव प्रकाशते ॥ इति।
सहोपालम्भनियमादभेदो नीलतद्धियोः।
भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वये ॥ इति च।

तदेतन्मतं दूषयन् सूत्रार्थं व्याचष्टे नेत्यादिना। विज्ञानमात्रं—विज्ञानातिरिक्तस्याऽसत्त्वे सति विज्ञानात्मकं, तथा सति—जगतो विज्ञानमात्रत्वे, "अहं घट" इत्येव प्रत्ययः स्यादिति, सर्व्वस्यैव विज्ञानात्मकत्वे अहंपदार्थेन घटपदार्थस्याभिन्नत्वे बाधकाभावेन तादृशाभेदावगाहिप्रत्ययस्यैव योग्यताशालित्वादिति भावः। ननु अयं घट इति, प्रत्ययःस्यादिति वक्तव्यः।

বাহ্য বস্তু প্রত্যক্ষসিদ্ধ বলিয়াই জগৎকে কেবল বিজ্ঞানস্বরূপ বলা যাইতে পারে না, জগৎ বিজ্ঞানস্বরূপ হইলে "আমি ঘট" এইরূপই প্রতীতি হইতে পারে, কিন্তু "এই ঘট" এইরূপ প্রতীতি হইতে পারে না, ইহার তাৎপর্য্য এই যে, সমস্তই বিজ্ঞানস্বরূপ হইলে ঘটপদার্থ ও অহংপদার্থ উভয়ই অভিন্ন বলিতে হইবে, সুতরাং অভেদাবগাহী "আমি ঘট" এই কথা বলিবারই যোগ্যতার

प्रत्ययवैचित्र्यसम्पादकाभावादिति शेषः। अत्र विज्ञानवादी स्वमतं समर्थयितुं ब्रवीति—वासना-विशेषादिति, आलयविज्ञानसन्तानपतितमेवासंविदितं ज्ञानं वासना, तद्विशेषात्—तद्वैचित्र्यात् प्रत्ययवैचित्र्यं भविष्यतीति शेषः। अयमत्र विज्ञानवादिनामभिसन्धिः, यथा बाह्यार्थाङ्गीकारेऽपि कस्यचिदेव घटादिक्षणस्य घटादिप्रत्ययजननसामर्थ्यं कस्यचिच्च पटादिक्षणस्य पटादिप्रत्ययजनन-सामर्थ्यमवश्यं वक्तव्यं तथैवालयविज्ञानसन्तानपतितमपि किञ्चिदेव ज्ञानं वासनापरनाम घटाद्याकारं प्रवृत्तिविज्ञानं जनयति न पटाद्याकारं, किञ्चिदेव च पटाद्याकारमेव प्रवृत्ति-विज्ञानं जनयति न घटाद्याकारमिति वासनावैचित्र्यादेव स्वप्रत्ययामादितात् प्रत्ययवैचित्र्यसिद्धे-र्नास्ति तदतिरिक्तार्थसिद्धेः किञ्चित्प्रमाणमिति तदेतन्मतं दूषयति—नेत्यादिना। घटवासनाया एव—घटप्रत्ययजनकनिरुक्तवासनापरपर्य्यायकज्ञानस्यैव, असत्त्वादिति, तस्यापि कारणापेक्षि-त्वेन तत्कारणस्यापि सम्पादयितुमशक्यत्वादिति भावः। कथं विशेषः—कथं तद्वैचित्र्यं। वासनायाः कारणं विकल्प्य दूषणान्तरप्रदर्शनेनोक्तमेवार्थं समर्थयति—किमित्यादिना। वास-नायाः—प्रत्ययवैचित्र्यजनकतयाभिमतस्य निरुक्तविज्ञानस्य, वासनैव—बाह्यानपेक्षितादृशविज्ञान-मेव, उत—अथवा, बाह्यवासनापि—बाह्यार्थविषयकज्ञानजन्यवासनापि कारणमित्यर्थः। अत्र प्रथमे पक्षे वासनाकारणीभूतवासनायाः किं कारणमिति जिज्ञासायामपि तादृशवासनैवेति वक्तव्यं, एवं तत्रतत्रापीत्यनवस्था। तथाच तासां वासनानां वैचित्र्यासम्भवात् प्रत्ययवैचित्र्यं न सम्भवतीत्येव दोषः, तस्य च "घटवासनाया एवासत्त्वा" दित्यनेनैव सूचितत्वात् सुस्पष्टत्वाच्च सम-

समবধান হয়। প্রত্যয়ের বিচিত্রতার সম্পাদক নাই বলিয়াই "এই ঘট" এইরূপ প্রত্যয় হইতে পারে না। বাসনাবিশেষবশতঃ অর্থাৎ আলয়-বিজ্ঞানের বৈচিত্র্য বশতঃই যে প্রত্যয়ের বৈচিত্র্য হইবে, তাহাও বলা যায় না, কারণ বাহ্য বস্তু না থাকিলে ঘটাদি বাসনাই হইতে পারে না, সুতরাং তাহার বৈচিত্র্যের সম্ভাবনা কোথায়? আরও দেখ, বিজ্ঞানবাদীর মতে প্রত্যয়ের বৈচিত্র্য সম্পাদক যে বাসনা তাহারও কি বাহ্যনিরপেক্ষ আলয় বিজ্ঞানরূপ বাসনাই কারণ, অথবা বাহ্য বাসনা অর্থাৎ বাহ্যার্থ বিষয়ক জ্ঞানজন্য বাসনাই কারণ? বাহ্য বাসনা কারণ হইলে সেই বাসনার জনক জ্ঞানের বিষয়রূপে অবশ্যই অন্য পদার্থ স্বীকার করিতে হইবে, তাহা হইলে সেই অন্য পদার্থই বাহ্য পদার্থ হইয়া পড়িল। (সুতরাং জগৎ কেবল বিজ্ঞান স্বরূপ হইতে পারিল না)। বিজ্ঞানবাদীরা আরও বলে এই যে, যাহারা প্রত্যক্ষবলে বাহ্যার্থ সাধন করেন তাঁহাদের মতে অবশ্যই অবয়বের অতিরিক্ত অবয়বী

नभिधायैव द्वितीयपक्षे दोषं दर्शयति—वासनापीति पञ्च इति। बाह्यवासनाकारणमिति पञ्च इत्यर्थः—अन्यस्यापि—विज्ञानव्यतिरिक्तस्यापि वासनाजनकज्ञानविषयतयावश्यमधिकरणत्वात् स एव—अन्य एव, बाह्योऽर्थ इति, तथा च समायातं, विज्ञानातिरिक्त नेति भावः। प्रकारान्तरेण बाह्यार्थमपलपितुं विज्ञानवादी प्रतिजानीते—ननु नास्त्येव बाह्योऽर्थ इति। अत्र हेतुं दर्शयति—अवयवातिरिक्तेत्यादिना इदमाकूतम्—योऽयं बाह्योऽर्थः प्रत्यक्षसिद्धतयाङ्गीक्रियते वैभाषिकैः तेनावश्यमवयवव्यतिरिक्तेनावयविना तन्मते भवितव्यम्, अन्यथा प्रत्यक्षत्वस्यैवानुपपत्तेः, किन्त्ववयवव्यतिरिक्तावयवैव सिध्यतीति कथं बाह्यार्थसिद्धिरिति। अवयवव्यतिरिक्तत्वाभावे हेतुं दर्शयति—अवयवावयविनोरेकत्वादिति, एकत्वे हेतुं दर्शयति—एकत्वप्रतीतेरिति, अभिन्नतयाप्रतीतिविषयत्वादित्यर्थः। तमेवमवयवावयविनोरेकत्ववादं दूषयति—चलतीत्यादिना। अवयवे—बहुतरावयवे चलति सति अवयवी चलति अल्पावयवे अल्पसंख्याकावयवे चलति सति अवयवी न चलति इति विरुद्धधर्माध्यासेन—चलनाचलनरूपविरुद्धधर्मव्यवहारेण, नैकत्वं—अवयवावयविनो न सर्वथाऽभेदः। यद्यवयवावयविनोः सर्वथैवाभेदस्यात्तदा स्वल्पावयवे चलत्यपि अवयवी न चलतीति न स्यात् तदभिन्नस्यावयवस्य चलनेनैव चलनसत्त्वात्तत्र तदभावप्रतीतेरसम्भवादिति भावः। अवयवावयविनोर्भेदसाधनायान्येषामपि विरुद्धधर्माणामध्यासं दर्शयितुमुपदिशति—एवमित्यादिना। उदाहार्य्याः—अवयवावयविनोर्भेदसाधनाय प्रदर्शनीयाः, तथाच रक्तत्वारक्तत्वावृतत्वानावृतत्वतद्देशत्वातद्देशत्वादिरूपविरुद्धधर्मा-

---

স্বীকার করিতে হইবে নচেৎ প্রত্যক্ষই হইতে পারে না; অথচ অবয়বের অতিরিক্ত অবয়বীই সিদ্ধ হইতে পারে না, কারণ একত্ব প্রতীতি হয় বলিয়া অবয়ব ও অবয়বী একই বলিতে হইবে; অতএব বাহ্যার্থ সিদ্ধি হইতে পারে না। বিজ্ঞানবাদীগণের এই কথাও ঠিক নহে, যেহেতু বহুতর অবয়ব চলিলে অবয়বী চলে ও অল্প অবয়ব চলিলে অবয়বী চলে না এইরূপ বিরুদ্ধ ধর্ম্মের ব্যবহার হয় বলিয়াই অবয়ব ও অবয়বী এক হইতে পারে না। অবয়ব ও অবয়বীর একত্ব পক্ষে রক্তত্ব অরক্তত্ব আবৃতত্ব অনাবৃতত্ব তদ্দেশত্ব অতদ্দেশত্বাদি বিরুদ্ধ ধর্ম্মের অধ্যাসরূপ দোষও উদাহরণের যোগ্য। এ স্থলে একদেশীগণ বলে যে পৃথক্ অবয়বী সিদ্ধ না হইলেও বাহ্যার্থের অপলাপ হইতে পারে না, কারণ অবয়ব পরমাণুর সমূহই স্থূলরূপে প্রত্যক্ষের বিষয় হইয়া থাকে, বস্তুতঃ ইহা বল ঠিক নহে, কারণ অবয়ব পরমাণু প্রত্যক্ষ সিদ্ধ

ध्यासदोषादपि नावयावयविनोर्भेद इति भावः। स्वतन्त्रावयविविरहेऽपि केवलावयवैरेव बाह्यार्थापलापाभावं साधयतामेकदेशिनां मतं दूषयितुमुपन्यस्यति—माभूदित्यादिना। ननु व्यतिरिक्तावयविनोऽस्वीकारे कथं वस्तुनि स्थूलत्वादिपरिग्रहः अवयवे परमाणौ स्थूलत्वादेर-भावादित्याशङ्कामपनेतुमाह—परमाणुपुञ्जस्यैवेति। स्थूलत्वेनैत्येकत्वस्याप्युपलक्षकं। अत्र च परमाणूनां विजातीयसंयोग एव स्थूलत्वादिग्रहणं प्रति हेतुरिति पर्य्यवस्यतीति नैकस्मिन् परमा-णावादौ स्थूलत्वादिग्रह इत्याशयः। एतन्मतं दूषयति—नेत्यादिना अयमत्राभिसन्धिः—नहि परमाणवः सूक्ष्मत्वेन प्रत्यक्षतयाऽभ्युपगम्यन्ते सुतरां कार्य्यलिङ्गकानुमानेनैव ते साधनीयाः, तथाच यद्यवयविरूपं तत्कार्य्यं न स्यात्तदानुमानेनापि ते साधयितुं न शक्यन्त इति केवलै-रवयवैर्बाह्यार्थवादस्थापनमव्यवस्थितचित्ततायाः एव परिचायकमिति न कथमपि तद्वचनं प्रमाणभावं भजत इति। प्रकारान्तरेण बाह्यार्थमपलपतामेकदेशिनां मतमपि दूषयितुमुत्था-पयति—परमाणूनामित्यादिना। यत्प्रत्यक्षविषयतया बाह्यार्थवादिनो बाह्यार्थं साधयन्ति तत् प्रत्यक्षं न परमाणुविषयकमिति प्रतिपादयितुमाह—परमाणूनामतीन्द्रियत्वादिति। ननु माभूत् परमाणूनामैकैकशः प्रत्यक्षं तत्समूहस्यैव प्रत्यक्षं भविष्यतीत्याशङ्कां निराकरोति—पुञ्जेऽपि किञ्चिदतिशयानाधानादिति। अतिशयस्य—प्रत्यक्षयोग्यत्वादिरूपविशेषस्य, अनाधानात् —अजननात्, कारणाभावादिति भावः। तथाच परमाणुपुञ्जस्यापि प्रत्यक्षाविषयत्वेन विषया-भावादेव "स्थूलोऽय"मित्यादि बाह्यप्रत्ययो भ्रम इति तद्विषयतया न बाह्यार्थसिद्धिरिति

নহে, সুতরাং অবয়বীরূপ কার্য্যদ্বারা পরমাণুর অনুমান করিতে হয়; যদি অবয়বী রূপ কার্য্য না থাকে তবে কোন্ হেতুদ্বারা পরমাণুর অনুমান হইবে? অতএব অবয়বী পৃথক্ স্বীকার না করিলে পরমাণুই সিদ্ধ হইতে পারে না। অতএব কেবল অবয়ব দ্বারা বাহ্যার্থ সিদ্ধির চেষ্টা বাতুলতা মাত্র। এস্থলে অন্য একদেশীগণ বলেন, পরমাণুর অতীন্দ্রিয়ত্ব নিবন্ধন ও পরমাণুপুঞ্জে প্রত্যক্ষ যোগ্যত্বাদি কোনও বিশেষের অনুৎপত্তি নিবন্ধন "ইহা স্থূল" এই সকল প্রত্যয় গুলি ভ্রান্ত, সুতরাং সেই ভ্রান্ত প্রত্যয় দ্বারা বাহ্যবস্তুর সিদ্ধি হইতে পারে না বলিয়াই জগৎ একমাত্র বিজ্ঞান স্বরূপ। ইহার উত্তরে বক্তব্য এই যে,"অবয়বী অবয়ব হইতে ভিন্ন" অর্থাৎ অবয়বী অবয়ব হইতে ভিন্ন হইলে অবয়বীই "স্থূলোয়ং" ইত্যাদি প্রত্যয়ের বিষয়, সুতরাং তাহা ভ্রান্তি নহে, অতএব ঐসকল অভ্রান্ত প্রত্যয় বলেই বাহ্যার্থ সিদ্ধ হইবে। আরও দেখ, অবয়ব হইতে

সিদ্ধং বিজ্ঞানমাত্রং জগদিতি বিজ্ঞানবাদিনামাশয়ঃ। তদেতন্মতং দূষয়িতুমাহ—অবোচ্যতে অবয়বাবয়বিনোর্ভেদাদিতি, তথাচাবয়বিবিষয়কত্বেনৈব "স্থূলোঽয়"মিত্যাদি প্রত্যয়স্য প্রমাত্বসম্ভবান্ন তদপ্রমাত্বমূলকং বিজ্ঞানমাত্রত্বসাধনং সমীচীনমিতি ভাবঃ। নন্বয়বয়বাবয়বিনোর্ভেদে কার্য্যকারণয়োরভেদরূপঃ স্বসিদ্ধান্ত এব ত্যাজ্যঃ স্যাদিতি চেন্ন ঘটত্বাদিনা কপালত্বাদিনা চ ভিন্নয়োরেব কার্য্যকারণয়োঃ মৃত্তিকাত্বাদিরূপেণাভিন্নত্বস্যৈব স্বসিদ্ধান্তত্বাত্। স্বমতে নিরুক্তচলনাচলনবিরোধো নাস্তীতি বিশদয়ন্নাহ—অপি চেতি। তয়োঃ—অবয়বাবয়বিনোঃ, অন্যত্বাত্—মৃত্তিকাত্বাদিরূপেণাভিন্নত্বেঽপি কপালত্বাদিনা ঘটত্বাদিনা চ ভিন্নত্বাদিত্যর্থঃ। অবয়বকম্পে—অল্পাবয়বকম্পে কম্পতে এবেতি, তথাচ বহুতরাবয়বকম্প এবাবয়বিকম্পং প্রতি কারণমিতি নাল্পাবয়বকম্পে তৎকম্পইতি ভাবঃ। ভেদপক্ষে নিরুক্তরক্তত্বারক্তত্বাদিদোষোঽপি নাস্তীতি স্পষ্টয়তি—এবমিত্যাদিনা। রক্তারক্তাদিবিরোধেঽপি—রক্তত্বারক্তত্বাদিবিরুদ্ধধর্ম্মাধ্যাসবিষয়েঽপি সিদ্ধান্তো বক্তব্য ইতি অবয়বাবয়বিনোর্ভেদে নিরুক্তরক্তত্বারক্তত্বাদিবিরুদ্ধধর্ম্মেষ্বেককোটীনামবয়বিন্যপরকোটীনাঞ্চাবয়বেষু সমাবেশান্নাঽস্ত্যেকত্র বিরুদ্ধধর্ম্মাধ্যাস ইতি সিদ্ধান্তো বক্তব্য ইত্যর্থঃ। প্রকৃতমুপসংহরতি তস্মাদিত্যাদিনা। বাসনৈব জ্ঞানকারণমিতি মতং প্রকারান্তরেণ দূষয়তি—বাসনেত্যাদিনা। সর্ব্বদা জ্ঞানোৎপত্তিরিতি, সর্ব্বদৈব বাসনারূপকারণসদ্ভাবাদিতি ভাবঃ ॥৪২॥

অবয়বী ভিন্ন বলিয়াই অল্প অবয়বের কম্পে অবয়বী কম্পিত হয় না ও বহু অবয়বের কম্পে অবয়বী কম্পিত হয় এই ব্যবহারের উপপত্তি হয়, কারণ বহুতর অবয়বের কম্পকেই অবয়বী-কম্পের কারণ বলা যাইতে পারে, কিন্তু অবয়ব ও অবয়বী এক হইলে তাহা বলা চলে না এবং অল্প অবয়বের কম্পে ও সেই অল্প অবয়বের সহিত ও অবয়বীর অভেদনিবন্ধন অবয়বীর কম্প স্বীকার করিতে হয়। এবং অবয়বী ভিন্ন হইলে দর্শিত রক্তত্ব অরক্তত্বাদি বিরোধ বিষয়েও সিদ্ধান্ত বলা যাইতে পারে, অর্থাৎ উক্ত বিরুদ্ধ ধর্ম্মগুলির একটিকে অবয়বীর ও একটিকে অবয়বের ধর্ম্ম স্বীকার করিলেই বিরোধের পরিহার হইতে পারে। অতএব অবয়বী ভিন্ন বলিয়াই উক্ত প্রত্যক্ষ মূলে বাহ্য অর্থ সিদ্ধ হইবে। বাসনাই জ্ঞানের কারণ এই পক্ষে সর্ব্বদাই বাসনারূপ কারণের সমবধান বশতঃ সর্ব্বদাই জ্ঞানের উৎপত্তি হইতে পারে, সুতরাং কেবল বাসনাই জ্ঞানের কারণ নহে ॥৪২॥

निर्विषयस्य ज्ञानस्यादर्शनात् विषयाभावात् ज्ञानमपि नास्तीति शून्यवादी आह—

तदभावे तदभावाच्छून्यं तर्हि ॥ ४३ ॥

विषयाभावे ज्ञानाभावाच्छून्यम्। स्वविषयत्वे कर्तृकर्मविरोध इति ॥ ४३ ॥

शून्यं तत्त्वं, भावो विनश्यति, वस्तुधर्मत्वाद्विनाशस्य ॥ ४४ ॥

यदि भावरूपं तत्त्वं स्यात् भावस्य नाशात् तत्त्वनाशेऽनिर्मोक्षः, वस्तुधर्मत्वात् विनाशस्य वस्तुनोऽवश्यं विनाशात् ॥ ४४ ॥

शून्यवादिमतप्रदर्शकं सूत्रमवतारयति—निर्विषयस्येत्यादिना। विषयभाव इति तदभाव इत्यस्य ज्ञानाभावादिति च तदभावादित्यस्य विवरणम्। अयमत्राभिसन्धिः—यदि प्रत्यक्षत-उपलब्धस्यापि विषयस्यापलापः स्यात्तर्हि ज्ञानेच्छादीनां सविषयकत्वनियमाद्विषयाभावे ज्ञान-मपि न सिध्येदिति सर्व्वशून्यता स्यात्, नहि निर्व्विषयकं ज्ञानं कस्याप्यनुभवगम्यमिति। ननु वाह्याभावेऽपि न विषयाभावः विज्ञानमेव विषयो भविष्यतीत्याशङ्कायामाह—स्वविषयत्व-इति, ज्ञानस्यैव ज्ञानविषयत्व इत्यर्थः। कर्म्मकर्तृविरोध इति एकत्रैव विरुद्धं कर्तृत्वं कर्म्म-त्वञ्चापाद्यत इत्यर्थः। न हि कर्तृत्वं कर्म्मत्वञ्चैकत्र स्यातुमर्हति उभयोर्व्विरुद्धत्वादिति भावः ॥ ४३ ॥

पूर्व्वसूत्रेण विज्ञानवादिमतनिरासप्रसङ्गतः शून्यतावादप्रसङ्गं दर्शयित्वा स्वाभिप्रेतमेव तं शून्यतावादं द्रढयितुं शून्यवादी सूत्रान्तरमाह—शून्यमिति। भाव इति, यत इत्यादिः,

---

এইটি শূন্যবাদীর মতপ্রদর্শক সূত্র। শূন্যবাদীরা বলেন, যদি প্রত্যক্ষ সত্ত্বেও বাহ্যার্থের অপলাপ হয় তবে বিষয়ের অভাবে জ্ঞানেরও সিদ্ধি হইতে পারে না সুতরাং জগৎ শূন্য। বাহ্যবস্তুর অপলাপ হইলেও জ্ঞানই জ্ঞানের বিষয় হইবে ইহাও বলা যায় না; কারণ তাহা হইলে কর্ম্মকর্তৃবিরোধ হয় অর্থাৎ এক বিজ্ঞানেই কর্তৃত্ব ও কর্ম্মত্ব স্বীকার করিতে হয় (কিন্তু একে কর্তৃত্ব ও কর্ম্মত্ব প্রত্যক্ষ সিদ্ধ নহে) ॥৪৩॥

বিনাশ হওয়াই বস্তুর স্বভাব, অতএব ভাবপদার্থ মাত্রেরই বিনাশ হয়,

समाधानमाह—

अपवादमात्रमबुद्धानाम्॥ ४५॥

अभावो न नश्यतीति वाङ्मात्रं, न तु तत्त्वम्। अबुद्धानां अज्ञातशास्त्राणाम्। प्रागभावस्य विनाशदर्शनात्, सत्कार्य्यसिद्धौ भावस्य अविनाशात्। तिरोभावे नाशशब्दप्रयोगेऽपि प्रकृतिपुरुषयोरनाशात्। ननु अभाव एव नास्ति कुतस्तस्य नाशानाशचिन्ता? कथं तर्हि अघटं भूतलमितिज्ञानम्? भूतलालम्बनं चेत्, घटवत्यपि

यतो भावो विनश्यति अतः शून्यं तत्त्वमित्यर्थः। भावो विनश्यतीत्यत्र हेतुं दर्शयति—वस्तुधर्म्मत्वाद्विनाशस्येति, विनाशस्य वस्तुस्वभावत्वादित्यर्थः। तथाच नहि स्वभावं विहाय पदार्थस्तिष्ठतीति सर्व्वेषां पदार्थानां विनाशावश्यम्भावात् शून्यं तत्त्वमायातमिति भावः।

भावानां तत्त्वत्वपक्षेऽप्यनिर्म्मोक्षरूपं दूषणं वृत्तिकारः पूरयति—यदीत्यादिना। अनिर्म्मोक्ष इत्यत्र हेतुं दर्शयति – वस्तुधर्म्मत्वाद्विनाशस्य वस्तुनोऽवश्यं विनाशादिति। तथाच वस्तुन एवाभावात् कस्य मुक्तिः स्यादिति भावः॥४४॥

तदेतत् शून्यवादिमतनिरासकं सिद्धान्तसूत्रमवतारयति—समाधानमाहेति। "भावो विनश्यती"त्यनेन अभावो न विनश्यतीति सम्भाव्यमानं शून्यवादिनोऽभिमानं निरसितुं तत्परतया सूत्रं व्याचष्टे—अभावो न नश्यतीत्यादिना। वाङ्मात्रमिति अपवादमात्रमित्यस्य विवरणम्। वाङ्मात्रत्वे हेतुं दर्शयति प्रागभावस्येत्यादिना। एवं पराभिमानं

সুতরাং শূন্যই তত্ত্ব অর্থাৎ সার। যদি ভাবরূপই তত্ত্ব হয় তবে ভাব পদার্থের নাশ হয় বিধায় তত্ত্বনাশে মোক্ষের অভাব হইয়া পড়ে। কারণ বিনাশই যখন বস্তুর ধর্ম্ম তখন বস্তুর অবশ্যই বিনাশ হইবে, সুতরাং বস্তুর অভাবে কাহার মুক্তি হইবে? ॥৪৪॥

এই শূন্য বাদের নিবারক সিদ্ধান্ত বলিতেছেন—অভাবের যে বিনাশ হয় না ইহা অজ্ঞাতশাস্ত্র (মূর্খ) দিগের কথার কথা মাত্র, যে হেতু প্রাগভাবের বিনাশ দেখা যায়। পরন্তু কার্য্য মাত্রই সৎ ইহা সিদ্ধ হইয়াছে বিধায় ভাবপদার্থেরই বিনাশ হয় না। পূর্ব্বসূত্রের নাশ শব্দের অর্থ তিরোভাব বলিলেও ভাব মাত্রের বিনাশ হইতে পারে না, যে হেতু প্রকৃতি ও পুরুষের তিরোভাবও হয় না। এস্থলে উদাসীন ব্যক্তি আশঙ্কা করিতেছেন

ভূতলে তদভাবজ্ঞানপ্রসঙ্গঃ, ভূতলস্য তাদবস্থ্যাৎ। কেবলভূতলালম্বনম্ অভাবজ্ঞানং, ঘটে সতি কৈবল্যং নাস্তীতি চেৎ, কিং ভূতলস্বরূপমাত্রং, কৈবল্যং তদতিরিক্তং বা? যদি স্বরূপমাত্রং, ঘটে সত্যপি তস্য সদ্ভাবাদভাবজ্ঞানং স্যাৎ? অতিরিক্তপক্ষে স এব অভাবঃ। অথ ভূতলস্য একাকিত্বেঽভাবব্যবহারঃ, ঘটে সতি একাকিত্বং নাস্তীতি ন অভাবব্যবহারহেতুঃ? তন্ন। একাকিত্বমেকত্বসংখ্যা বা অন্যদ্বা? একত্বসংখ্যা চ ঘটবত্যপি ভূতলেঽস্তি। অন্য-

---

খণ্ডয়িত্বা সিদ্ধান্তপক্ষং সমর্থয়তি—সৎকার্য্যসিদ্ধান্তাদিত্যাদিনা। ননু পূর্ব্বসূত্রে নাশপদং তিরোভাবপরং, তথাচ সৎকার্য্যসিদ্ধান্তেঽপি সর্ব্বেষাং ভাবানাং তিরোভাবরূপনাশঃ সম্ভবত্যেবেতি শঙ্কামপাকর্ত্তুমাহ—তিরোভাব ইত্যাদি। প্রকৃতপুরুষয়োরনাশাদিতি, তয়োস্তিরোভাবস্যাপ্যভাবাদিতি ভাবঃ।

তটস্থঃ শঙ্কতে—নন্বিতি। তদৈতদভাবো নাস্তীতি মতং তদনুকূলযুক্ত্যুদ্ভাবনতৎখণ্ডনাভ্যাং শঙ্কাপূর্ব্বকং সিদ্ধান্তী দূষয়তি—কথমিত্যাদিনা নিশ্চানবৈলক্ষণ্যাভাবাদিত্যন্তেন

—অভাব নামক একটি পদার্থই নাই সুতরাং তাহার বিনাশ বা অবিনাশের চিন্তা হইতে পারে কি প্রকারে? উত্তর—যদি অভাব না থাকে তবে কাহাকে অবলম্বন করিয়া "ভূতলে ঘট নাই" এইরূপ প্রতীতি হয়? যদি বল ভূতলই তাহার আলম্বন তবে ঘট থাকিলেও ভূতলে ঘট নাই এইরূপ প্রতীতি হইতে পারে; যেহেতু তখনও ভূতল আছে। যদি বল, কেবল ভূতলই অভাব জ্ঞানের আলম্বন, ঘট থাকিলে সেই কৈবল্য থাকে না, তবে জিজ্ঞাস্য এই যে, সেই কৈবল্য কি ভূতলেরই স্বরূপ, অথবা ভূতল হইতে অতিরিক্ত? যদি ভূতল স্বরূপ হয় তবে ঘট থাকিলেও কেবল ভূতলের সদ্ভাব নিবন্ধন অভাব জ্ঞান হইতে পারে। যদি অতিরিক্ত হয় তবে সেই কৈবল্যই অভাব পদার্থ। যদি বল, ভূতলের একাকিত্ব থাকিলেই অভাব ব্যবহার হয়, ঘট থাকিলে সেই একাকিত্ব থাকে না সুতরাং অভাব ব্যবহারের হেতুর সদ্ভাব কোথায়? তাহাও ঠিক নহে, কারণ সেই একাকিত্ব একত্ব

দিতি পক্ষে স এব অভাবঃ। বিষয়াবৈলক্ষণ্যে বিজ্ঞানবৈলক্ষণ্যা-ভাবাৎ। ননু ভাবাভাবয়োঃ সম্বন্ধাভাবাৎ কথমভাবজ্ঞানমিতি ? যথা ঘটোঽয়মিতীন্দ্রিয়ান্বয়ব্যতিরেকাজ্জ্ঞানং, তথা অভাবজ্ঞানমপি সকারণম্। কার্য্যদর্শনাদ্ধি কারণং পরিকল্প্যতে, ন তু দৃষ্টকার্য্যা-পলাপঃ শক্যতে বক্তুম্। কিঞ্চ অনিয়তপদার্থবাদিত্বাৎ অস্মাকং যথোপপন্নঃ সম্বন্ধোঽপি কশ্চিদ্ভবিষ্যতীতি কা নো হানিঃ। তস্মাৎ সিদ্ধোঽভাব ইতি ॥ ৪৫ ॥

পুনঃ শঙ্কতে—নন্বিতি। পরিহরতি—যথেত্যাদিনা। সার্ব্বজনীনাভাবজ্ঞানান্যথানুপপত্ত্যা তৎকারণতয়া ভাবাভাবয়োরপি কশ্চিৎ সম্বন্ধঃ কল্পনীয় ইতি নোক্তাশঙ্কাসম্ভবতীতি ভাবঃ। নন্বেবমতিরিক্তপদার্থকল্পনাপত্তিরিত্যাশঙ্কায়ামাহ—কিঞ্চেতি। উপসংহরতি—তস্মাৎ সিদ্ধ ইতি, ধর্ম্মিব্যতিরিক্ততয়া সিদ্ধ ইত্যর্থঃ। নচাভাবামতিরিক্তত্বে প্রাগভাবরূপস্যাভাবস্য বিনাশিত্বে চ স্বীকৃতে সাংখ্যসিদ্ধান্তহানিরিতি বাচ্যং, সাংখ্যনয়ে ভাবরূপস্য কস্যচিদ্বিনাশী নাস্তীত্যঙ্গীকারেণৈব সর্ব্বসামঞ্জস্যাদিতি ॥ ৪৫ ॥

সংখ্যা, কি অন্য ? যদি একত্ব সংখ্যা হয় তবে ঘটবদ্ ভূতলেও সেই একাকিত্ব থাকে, আর যদি অতিরিক্ত হয় তবে সেই একাকিত্বই অভাব পদার্থ। বিষয়ের বৈলক্ষণ্য ভিন্ন প্রতীতির বৈলক্ষণ্য হয় না বিধায় অঘট ইত্যাদি প্রতীতির উপপত্তির জন্য অতিরিক্ত একটি পদার্থ স্বীকার করিতেই হইবে। এস্থানে প্রশ্ন এই যে, অভাব পদার্থ স্বীকার করিলেও ভাব ও অভাব পদার্থের সম্বন্ধের অভাব নিবন্ধন অভাব জ্ঞান হয় কিরূপে ? উত্তর—যেমন ইন্দ্রিয়ের অন্বয়ব্যতিরেক বশতঃ অর্থাৎ ইন্দ্রিয়ের সত্তায় ঘটজ্ঞান হয় ইন্দ্রিয়ের অসত্তায় ঘটজ্ঞান হয় না বিধায় ইন্দ্রিয় হইতেই ঘটজ্ঞান হয় সেইরূপ অভাব জ্ঞানেরও অবশ্যই একটি কারণ কল্পনা করিতে হইবে, যেহেতু কার্য্যদর্শন অনুসারেই কারণ কল্পনা করিতে হয়। দৃষ্টকার্য্যের অপলাপ কখনও বলা চলে না। বিশেষতঃ সাংখ্যমতাবলম্বিদিগের অনিয়ত পদার্থবাদিত্ব নিবন্ধন যুক্তিদ্বারা কোনও সম্বন্ধ সিদ্ধ হইলে কিছুই ক্ষতি নাই। অতএব অভাব যে ধর্ম্মি হইতে ভিন্ন তাহাই সিদ্ধ হইল ॥৪৫॥

समाधानान्तरमाह—

उभयपक्षसमानक्षेमत्वादयमपि ॥ ४६ ॥

अयमपि शून्यवादः क्षणिकपक्षविज्ञानपक्षतुल्यक्षेमत्वात् निराकार्य्यः। यथा प्रत्यक्षप्रत्यभिज्ञया क्षणिकनिराकरणं, बाह्यवस्तुप्रत्यक्षात् विज्ञाननिराकरणं, तथा अयमपि प्रत्यक्षेणैव समस्तविश्वदर्शनात् शून्यवादो निराकार्य्यः ॥ ४६ ॥

दूषणान्तरमाह—

अपुरुषार्थत्वमुभयथा ॥ ४७ ॥

यदि शून्यमभावः, को हि स्वस्थात्मा अभावाय यतेत, मोक्षः पुरुषार्थ इति भावशब्दप्रयोगश्चानर्थकः। अथ भावाभावव्यतिरिक्तं शून्यम्। एवम्भूतस्य वस्तुनोऽदर्शनादपि अपुरुषार्थत्वम् ॥ ४७ ॥

सूत्रान्तरमवतारयति—समाधानान्तरमिति। शून्यवादनिरासकं समाधानान्तरमित्यर्थः। सूत्रार्थं विवृणोति—अयमपीत्यादिना। तुल्यक्षेमत्वमेव विशदयति—यथेत्यादिना। क्षणिकनिराकरणं—सर्व्वेषां भावानां क्षणिकत्वमिति मतस्य खण्डनं, विज्ञाननिराकरणं—सर्व्वेषां विज्ञानस्वरूपत्वमिति मतस्य खण्डनं ॥ ४६ ॥

सूत्रान्तरमवतारयितुमाह—दूषणान्तरमिति। शून्यवादे दूषणान्तरमित्यर्थः। सूत्रीयोभयथेत्यस्य शून्यस्याभावत्वे भावाभावव्यतिरिक्तत्वे वा इत्यर्थः। तत्र प्रथमार्थपक्षे अपुरुषार्थत्वं

শূন্যবাদের নিরাসক সমাধানান্তর বলিতেছেন—এই শূন্যবাদ ও ক্ষণিক পক্ষ এবং বিজ্ঞান পক্ষের ন্যায় তুল্য যুক্তিতর্কদ্বারাই নিবারণীয়। অর্থাৎ প্রত্যক্ষ প্রত্যভিজ্ঞাদ্বারা যেমন ক্ষণিক মত খণ্ডিত হইয়াছে এবং বাহ্যবস্তুর প্রত্যক্ষ বশতঃ যেমন বিজ্ঞানবাদীর মত খণ্ডিত হইয়াছে, সেইরূপ এই শূন্যবাদও সমস্ত বিশ্বের প্রত্যক্ষ দর্শনবলেই নিবারণীয় ॥৪৬॥

শূন্যবাদে অন্য দোষও দেখাইতেছেন—শূন্যের ভাবত্ব এবং ভাবাভাব-ব্যতিরিক্তত্ব উভয়থাই পুরুষার্থতা হইতে পারে না। কারণ শূন্য যদি অভাব হয়, তবে কোন্ সুস্থ পুরুষ অভাবের জন্য যত্ন করিবে? এবং মোক্ষ পুরুষার্থ এই ভাবশব্দ প্রয়োগও তাহা হইলে অনর্থক হয়। আর শূন্য যদি ভাবাভাব-

শূন্যবাদিনং নিরাকর্তুং দেহপরিমাণ আত্মেতি ক্ষপণকমতমাহ—

ন, গতিবিশেষাৎ॥ ৪৮॥

ন শূন্যং তত্ত্বং, শূন্যস্য গত্যভাবাৎ। দৃশ্যতে চ গতিঃ। যথা চ শ্রুতিঃ—"অঙ্গুষ্ঠমাত্রং পুরুষং নিশ্চকর্ষ বলাদ্ যমঃ" "পাপেন নরকং যাতি, পুণ্যেন স্বর্যাতি, জ্ঞানেন ব্রহ্মলোকং যাতি" ইতি॥ ৪৮॥

তদ্ দূষয়তি—

নিষ্ক্রিয়স্য তদসম্ভবাৎ॥ ৪৯॥

ক্রিয়াশূন্যস্য পুরুষস্য গমনাসম্ভবাৎ॥ ৪৯॥

বিবৃণোতি—যদীত্যাদিনা। মোক্ষঃ—আত্যন্তিকস্বরূপাবস্থানম্। দ্বিতীয়ার্থপক্ষে অপুরুষার্থত্বং বিবৃণোতি—অর্থেত্যাদিনা। তথা চাপুরুষার্থত্বাদেব ন শূন্যং তত্ত্বমিতি ভাবঃ॥ ৪৭॥

সূত্রান্তরমবতারয়তি—শূন্যবাদিনমিত্যাদিনা। দেহপরিমাণ ইতি অদৃষ্টানুসারেণ সমাশ্রয়ণীয়স্য দেহস্য তুল্যপরিমাণ ইত্যর্থঃ। অদৃষ্টানুসারেণ সমাশ্রয়ণীয়স্য হস্তিকীটাদিদেহস্য পরিমাণং যথাযথং সঙ্কোচবিকাশাভ্যাং লব্ধৈবাত্মা তং দেহমাশ্রয়তীতি ক্ষপণকা মন্যন্তে, তস্মাদযুক্তং তন্মতে দেহপরিমাণ আত্মেতি। স্পষ্টমন্যৎ॥ ৪৮॥

তদিতি, ক্ষপণকমতমিত্যর্থঃ। সূত্রং ব্যাচষ্টে ক্রিয়েত্যাদিনা। গতিশ্রুতের্গতিস্তু ৫১ সূত্রে বক্ষ্যতে॥ ৪৯॥

ব্যতিরিক্ত হয়, তবেও পুরুষার্থ হইতে পারে না, কারণ যাহা ভাবও নহে, অভাবও নহে, এমন বস্তু কোথাও পরিদৃষ্ট হয় না॥৪৭॥

শূন্যবাদ খণ্ডন করিবার জন্য আত্মার দেহপরিমাণবাদী ক্ষপণকের মত বলিতেছেন—শূন্য তত্ত্ব হইতে পারে না যেহেতু শূন্যের গতি নাই, অথচ গতি পরিদৃষ্ট হয়; যথা—শ্রুতিতে আছে—

"যম বলপূর্ব্বক অঙ্গুষ্ঠমাত্র পুরুষকে নির্গত করে", "(পুরুষ) পাপদ্বারা নরকে যায়, পুণ্যদ্বারা স্বর্গে যায় ও জ্ঞানদ্বারা ব্রহ্ম লোকে যায়"॥ ৪৮॥

এই ক্ষপণকমত দূষিতেছেন—

নিষ্ক্রিয় আত্মার গতি সম্ভব হইতে পারে না বিধায় দর্শিত ক্ষপণকমত ঠিক নহে।॥ ৪৯॥

निष्क्रियत्वमवाह

मूर्त्तत्वाद्घटादिवत्समानधर्मापत्तावपसिद्धान्तः ॥५०

मूर्त्ता घटादयः क्रियावन्तः, तत्तुल्यधर्मत्वे विनाशात् अयमपि सिद्धान्तः। किञ्च जन्मान्तर...रे हस्तिकृमिदेहपरिमाणत्वात् सङ्कोचविकासित्वे...त्वात् अनित्यत्वमिति ॥ ५० ॥

एवं चाङ्गुष्ठमात्रमित्यादिश्रुतिविरोध इत्यत आह—

गतिश्रुतिरप्युपाधियोगादाकाशवत् ॥ ५१ ॥

यथा घटाद्युपाधिभेदात् घटे गच्छति घटाकाशं गच्छतीति भानं, तथा शरीराद्यवच्छेदात् आत्मा गच्छतीति प्रतीतिः ॥ ५१ ॥

सक्रियस्य मूर्त्तत्वाव्यभिचारेण पुरुषस्य सक्रियत्वे मूर्त्तत्वमप्यङ्गीकरणीयम्, परिच्छिन्नपरिमाणवत्त्वरूपं तच्च मूर्त्तत्वञ्च देहपरिमाणरूपमध्यमपरिमाणवत्त्वं नैवात्मनः क्षपणकैरुपपादनीयम्। एवञ्च परमाणुभिन्नमूर्त्तमात्रस्यैव विनाशधौव्ये नात्मनोऽपि विनाशप्रसङ्गे सिद्धान्तहानिः स्यादिति युक्त्या पुरुषस्य निष्क्रियत्वसाधकं सूत्रमवतारयति—निष्क्रियत्वमेवाहेति। सूत्रतात्पर्यं विवृणोति—मूर्त्ता इत्यादिना। आत्मनो देहपरिमाणित्ववादिनां क्षपणकानां मते पुरुषस्यानित्यत्वप्रसङ्गः सर्व्वथैव दुष्परिहर इति दर्शयति—किञ्चेत्यादिना ॥ ५० ॥

सूत्रान्तरमवतारयति—एवञ्चेति। पुरुषस्य निष्क्रियत्वे चेत्यर्थः। दृष्टान्तं विशदय सूत्रं व्याचष्टे—यथेत्यादिना। तथाच निरुक्ताश्रुतिर्न तात्त्विकगतिपरेति भावः। तथाच प्रमाणम्—

"घटसंवृतमाकाशं नीयमाने घटे यथा।
घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः॥" इति ॥ ५१ ॥

আত্মা যে নিষ্ক্রিয় তাহাই বলিতেছেন—

মূর্ত্ত ঘটাদিই ক্রিয়াশালী, আত্মাতে তাহার তুল্যধর্ম্মত্ব স্বীকার করিলে বিনাশ হইতে পারে বিধায় ইহা অপসিদ্ধান্ত। পরন্তু জন্মান্তরসঞ্চারে হস্তি কৃমি প্রভৃতির বিসদৃশ দেহ পরিমাণ লাভ করিতে হইলে আত্মার সঙ্কোচ ও বিকাশ আবশ্যক, সুতরাং সাবয়বত্ব হইলে অনিত্যত্ব অপরিহার্য্য ॥ ৫০ ॥

আত্মা যদি নিষ্ক্রিয় হয়, তবে পূর্ব্বদর্শিত "অঙ্গুষ্ঠমাত্র" ইত্যাদি গতি-প্রতিপাদক শ্রুতিতে বিরোধ হয়, এই আশঙ্কায় সমাধান বলিতেছেন—

किमुपाधिना, कर्मवैचित्र्यात् विशेषो भविष्यतीत्यत आह-

न कर्मणाप्यतद्धर्मत्वात् ॥ ५२ ॥

भवेदेव, यदि कर्मात्मधर्मः स्यात् । न तु आत्मनः कश्चित् धर्मोऽस्ति, निर्गुणत्वात् ॥ ५२ ॥

तद्धर्म एव कर्म भविष्यति, को वि...

निर्गुणादिश्रुतिविरोधश्चेति ॥ ५३ ॥

'असङ्गो ह्ययं पुरुषः' इति श्रुतिर्विरुद्धा स्यात् ॥ ५३ ॥

मा भूत् आत्मधर्मोऽन्यधर्मेणापि क्रियाविशेषो भविष्यति आत्मनो

सूत्रान्तरमवतारयितुं शङ्कते—किमिति । विशेषः—गत्यादिमत्त्वरूपविशेषः । सूत्रतात्पर्यं विवृणोति—भवेदित्यादिना । एवं—कर्मणा गत्यादिमत्त्वं । तथाच कर्मणा न आत्मनो गत्यादिमत्त्वमिति शेषः । अत्र हेतुमाह—अतद्धर्मत्वादिति । कर्मणश्चित्तधर्मत्वेनात्मधर्मत्वाभावादिति सूत्रार्थः ॥ ५२ ॥

कर्मण आत्मधर्मत्वप्रतिषेधकं सूत्रमवतारयति—तद्धर्म इत्यादिना । मते कर्मण आत्मधर्मत्व इत्यादिः । आत्मनो निर्गुणत्वश्रुतिं दर्शयति—असङ्ग इत्यादिना । एतच्छ्रुत्यर्थमविरोधी "असङ्गोऽयं पुरुष" इति सूत्रव्याख्यानावसर एव प्रपञ्चितो ॥ ५३ ॥

যেইরূপ বিভু আকাশ গতিশূন্য হইলেও ঘটাদি উপাধিভেদে গতিমৎ বলিয়া বিবেচিত হয়, অর্থাৎ ঘটের সঞ্চালনে ঘটাকাশের গমন প্রতীত হয়, সেইরূপ শরীরাদি উপাধিভেদে আত্মারও গতি প্রতীতি হয়, কিন্তু বস্তুগত্যা আত্মা গতিশীল নহে ॥ ৫১ ॥

উপাধি স্বীকার করিয়া দরকার কি ? কর্ম্মের বৈচিত্র্যনিবন্ধনই আত্মার গতিমত্ত্বাদিরূপ বিশেষ হয় বলিব, এই আশঙ্কায় সমাধান করিতেছেন—

কর্ম্ম যদি আত্মার ধর্ম্ম হইত, তবেই কর্ম্মদ্বারা আত্মার গতিমত্ত্বাদি বলা চলিত, কিন্তু নির্গুণত্ব নিবন্ধন কর্ম্ম আত্মার ধর্ম্ম নহে (চিত্তের ধর্ম্ম) ; সুতরাং কর্ম্মদ্বারাও আত্মার সক্রিয়ত্ব বলা যায় না ॥ ৫২ ॥

কর্ম্মও আত্মারই ধর্ম্ম হইবে, তাহাতে বিরোধ কি, এই আশঙ্কায় বলিতেছেন—

व्यापित्वेन सर्वसम्बन्धादित्यत आह—

अतिप्रसक्तिरन्यधर्मत्वे ॥ ५४ ॥

सर्वसम्बन्धाविशेषात् मुक्तात्मनामपि बन्धप्रसक्तिः ॥ ५४ ॥

ननु तवापि धर्माधर्मव्यवस्था अस्ति, बद्धस्य मुक्त्यर्थं प्रवृत्तिर्दृश्यते। तत्र यस्तव सिद्धान्तः, सोऽस्माकं भविष्यतीति समानमित्यत आह—

तद्योगेऽप्यविवेकान्न समानत्वम् ॥ ५५ ॥

धर्माधर्मयोगेऽपि न समानधर्मत्वं अविवेकात्। यदि तात्त्विको धर्माधर्मयोग आत्मनः स्यात्, तदा तुल्यत्वम्। किन्तु अविवेकादात्मनो धर्माधर्मयोगाभिमान इति न समानत्वम् ॥ ५५ ॥

कार्यकारणयोः समानाधिकरण्याभावे दोषमप्याह—अतिप्रसक्तिरित्यादि। मते अन्यधर्मत्व इति कारणस्य कार्याधिकरणान्यधर्मत्व इत्यर्थः। अतिप्रसक्तिं विवृणोति—सर्वेत्यादिना ॥ ५४ ॥

सूत्रान्तरमवतारयितुं शङ्कते—नन्विति। तवापि, सिद्धान्तिनोऽपि, तत्र धर्माधर्माभ्यां निर्गुणत्वश्रुतिविरोधे अस्माकं—कर्मणः पुरुषधर्मत्ववादिनां। सूत्रार्थं विवृणोति—धर्माधर्मेत्यादिना ॥ ५५ ॥

কর্ম্ম আত্মার ধর্ম্ম হইলে “পুরুষ সঙ্গরহিত” ইত্যাদি নির্গুণাদি শ্রুতির বিরোধ হয় ॥ ৫৩ ॥

কর্ম্ম আত্মার ধর্ম্ম না হউক, অন্য ধর্ম্মদ্বারাই আত্মার ক্রিয়াবিশেষ হয় বলিব, যেহেতু আত্মার ব্যাপিত্বনিবন্ধন সকলের সহিতই সম্বন্ধ আছে, এই আশঙ্কায় বলিতেছেন—

কর্ম্মের অন্যধর্ম্মত্ব হইলেও যদি তদ্দ্বারা আত্মার গতিশ্রুত্যাদি স্বীকার করা হয়, তবে সম্বন্ধের অবিশেষনিবন্ধন তদ্দ্বারা মুক্তাত্মাও বদ্ধ হইতে পারে ॥ ৫৪ ॥

তথাপিও ত আত্মার ধর্ম্মাধর্ম্ম ব্যবস্থা আছে, যেহেতু বদ্ধ আত্মার মুক্তির জন্য প্রবৃত্তি দেখা যায়। সুতরাং সেই বিষয়ে অর্থাৎ ধর্ম্মাধর্ম্মদ্বারা নির্গুণাদি

भवतु अविवेकात् बन्धः, तथापि अविवेकनाशार्थं धर्माङ्गीकरण-तुल्यत्वम्। अन्यथा सर्वदा बन्धः स्यादित्यत आह—

नियतकारणात् तदुच्छित्तिर्ध्वान्तवत् ॥ ५६ ॥

अन्वयव्यतिरेकाभ्यां यस्य यत्कारणमवगतं तद्व्यभिचारे सर्वतोऽनाश्वासः। यथा ध्वान्तनाशाय प्रकाशः, तथा अत्रापि विवेकात् अविवेकनाशः। विवेकार्थञ्च धर्मस्वीकारे का क्षतिः? प्राकृतेनापि धर्मेणोपपत्तेः। किमिदं ध्वान्तं नाम? अभावस्तम इति केचित्। तन्न, विधिमुखप्रतीतेः। अभावत्वे किमालोकप्रागभावः प्रध्वंसाभावो

सूत्रान्तरमवतारयति—भवत्वित्यादिना। तुल्यत्वमिति निर्गुणत्वादिश्रुतिविरोधस्योभयमतयोः समानत्वमित्यर्थः। "नियतकारणात्—अन्वयव्यतिरेकसिद्धक्लृप्तकारणात्, विवेकात् तदुच्छित्तिः—तस्याविवेकस्य विनाशः, अत्र दृष्टान्तमाह—ध्वान्तवदिति, यथा प्रकाशात्मक-नियत-कारणाद्ध्वान्तस्यान्धकारस्य विनाशस्तद्व"दिति सूत्रार्थः। इममेवार्थं वृत्तिकारः स्पष्टयति—अन्वयव्यतिरेकाभ्यामित्यादिना। ननु भवतु विवेकादविवेकस्य नाशस्तथापि विवेकोत्पत्तये धर्म्मस्वीकार आवश्यक एवेत्यत आह—विवेकार्थमिति। ननु विवेकार्थं धर्म्मस्वीकारेऽपि निर्गुणत्वादि-श्रुतिविरोध एव क्षतिरित्याशङ्कामपनेतुमाह—प्राकृतेनापीति। प्राकृतेनैवेत्यर्थः। अयमत्राभिप्रायः—स्वस्वामिभावापरपर्य्यायकाविवेको वस्तुगत्या सांख्यनये चित्तधर्म्म एवेति तद्विनाशकविवेकोऽपि चित्त एवाङ्गीकर्त्तव्यः, कार्य्यकारणयोः सामानाधिकरण्यनियमात्तदुत्पादक-

---

শ্রুতিবিরোধ বিষয়ে তোমাদের যেরূপ সিদ্ধান্ত কর্ম্মাদি দ্বারা নিগুর্ণাদি শ্রুতি বিরোধও আমাদের সমান সিদ্ধান্তই হইবে, এই আশঙ্কায় বলিতেছেন—

ধর্ম্মাধর্ম্ম যোগ থাকিলেও অবিবেক নিবন্ধন সমান হইতে পারে না। অর্থাৎ আত্মার ধর্ম্মাধর্ম্ম যোগ যদি যথার্থ হইত, তবে সমান হইতে পারিত, কিন্তু অবিবেকনিবন্ধন আত্মার ধর্ম্মাধর্ম্মাভিমান মাত্র বস্তুগত্যা, আত্মার ধর্ম্ম বা অধর্ম্ম নাই, সুতরাং সমান হইবে কি প্রকারে? ॥ ৫৫ ॥

অবিবেকনিবন্ধনই আত্মার বন্ধ হউক, তথাপি অবিবেকনাশের জন্য ধর্ম্ম স্বীকার করিলে নিগুর্ণাদি শ্রুতি বিরোধের উভয় মতেই তুল্যতা। অবিবেক নাশের জন্য ধর্ম্ম স্বীকার না করিলেও সর্ব্বদাই আত্মার বন্ধ হইতে পারে, এই আশঙ্কায় বলিতেছেন—

वा? यदि प्रागभावः, तर्हि यथा घटे उत्पन्ने घटप्रागभावो नष्टः, तथा आलोके सति आलोकप्रागभावो नष्ट इति प्रत्ययः स्यात्। भविष्यदालोकप्रागभावसत्त्वे वर्त्तमानालोके सति अन्धकारोऽविनष्टः स्यात्। अथ प्रध्वंसाभावः? तथापि अनश्वरत्वात् आलोकान्तरे सति अन्धकारप्रतीतिप्रसङ्गः, यथा घटान्तरे उत्पन्ने नष्टघटप्रध्वंसोऽस्त्येव। अन्योऽन्याभावस्तु वस्तुनोरपि अस्ति। अत्यन्ताभावस्तु दुष्टत्वात् नाशङ्कनीयः। तदुक्तम्—

धर्म्मोऽपि सुतराम्। प्रकृतिकाविवेकनाशादेव च पुरुषस्याताात्त्विकस्याबन्धस्य विनाश इति नास्ति सांख्यनये काचिदनुपपत्तिरिति।

सूत्रे दृष्टान्तविधयोपन्यस्तस्य ध्वान्तस्य कस्मिन् पदार्थेऽन्तर्भाव इति प्रसङ्गान्निरूपयितुं पृच्छति—किमिदमिति। अवश्यक्लृप्ततेजोभावेनैवोपपत्तौ तमसो वस्त्वन्तरत्वकल्पनमनुचितमिति वदतां वैशेषिकादीनां मतं दूषयितुमुपन्यस्यति—अभाव इत्यादिना। तदेतन्मतं दूषयितुमाह—तन्नेति। विधिमुखप्रतीतेः—तमश्चलतीत्यादि भावावगाहिप्रतीतिविषयत्वात् नाभावरूपत्वं ध्वान्तस्येत्यर्थः। ननूक्तभावावगाहिप्रतीतेर्भ्रमरूपत्वमेवास्त्वित्याशङ्कायां पुनर्विकल्प्य दूषयति—अभाव इत्यादिना। आद्यपक्षं दूषयति—यदीत्यादिना। प्रत्ययः स्यादिति, तदानीमप्यन्धकारो नष्ट इति प्रत्ययस्य सार्व्वजनीनत्वादिति भावः। तन्नेष्टापत्तौ तमसो यत्किञ्चिदालोकप्रागभावस्वरूपत्वपक्षे दोषं दर्शयति—भविष्यदित्यादिना। अविनष्टः स्यादिति,—तदानीमपि यत्किञ्चिदालोकप्रागभावरूपान्धकारस्य विद्यमानत्वादिति भावः। तमसो यावदालोकप्रागभावस्वरूपत्वे तु आलोकनाशदशायामपि विनष्टालोकप्रागभावस्यासत्त्वेनान्धकारप्रतीतिर्न स्यादिति

অন্বয়ব্যতিরেক দ্বারা যাহা যাহার কারণ বলিয়া জানা যায়, তাহাতে ব্যভিচার হইলে কার্য্যকারণভাবমাত্রেই অনাশ্বাস হইতে পারে। যেরূপ অন্বয়ব্যতিরেকঅনুসারে অন্ধকার-নাশের কারণ আলোক, সেইরূপ এই স্থলেও বিবেক হইতেই অবিবেকের নাশ হয়। সেই বিবেকের জন্য ধর্ম্ম স্বীকার করিলেও কোন ক্ষতি নাই, যেহেতু প্রকৃতির ধর্ম্মদ্বারাই তাহার উপপত্তি হইতে পারে। ইহার তাৎপর্য্য এই যে, সাংখ্যমতে অবিবেক চিত্তের ধর্ম্ম, অতএব তাহার বিনাশক বিবেকও চিত্তের ধর্ম্মই বলিতে হইবে, সুতরাং সেই বিবেকের উৎপাদক ধর্ম্মও চিত্তেই স্বীকার্য্য। এস্থলে প্রশ্ন হইতে পারে

न च भासामभावस्य तमस्त्वं वृद्धसम्मतम्।
छायायाः कार्ष्ण्यमित्येवं पुराणेषु गुणश्रुतेः॥
दूरासन्नप्रकाशादि-सम्बन्धस्या चलाचला।
देहानुवर्तिनी छाया न वस्तुत्वाद्विना भवेत्॥

अभावस्तम इति तु व्यपदेशोऽभावे सति प्रतीयमानत्वादिति। आलोके सति वस्तुग्रहणं, तदभावे सति कथं ग्रहणमिति वैधर्म्य-

स्फुटतरो दोषः। ननु आत्मनो ध्वंसं प्रध्वंसाभावं दूषयितुं शङ्कते—नवेति। अनन्तत्वात्—ध्वंसस्याविनाशित्वात् अन्धकारप्रतीतिप्रसङ्ग इति आलोकाभावे यदि विनष्टालोक-ध्वंसरूपान्धकारस्य नाशः स्यादिति भावः। अत्र दोषमसमर्थां यत्किञ्चिदालोकध्वंसस्वरूपत्वपक्ष एव बोध्यः, यावदालोकध्वंसस्वरूपत्वपक्षे तु तादृशालोकस्यानुत्पादशायामपि भविष्यदालोकध्वंस-स्याभावे नान्धकारप्रतीत्यभावापत्तिरूपः स्फुटतर एव दोषः। अन्धकारस्यालोकात्यन्ताभाव-स्वरूपत्वपक्षं दूषयति—अन्योऽन्येत्यादिना। वर्तमानेति, सतीति शेषः। तथाचालोके सत्यपि तदधिकरणे तदन्यालोकाभावसत्त्वादन्धकारप्रतीत्यापत्तिरिति भावः। अत्यन्ताभावस्वरूपत्व-पक्षं दूषयति—अत्यन्तेत्यादिना। दृष्टत्वादिति, कृष्णत्वादिप्रतीतिविरोध एवात्र दोषः, नच तादृशप्रतीतिर्भ्रमात्मिकाऽपि युक्ता: दूरागतापि कृष्णत्वश्रुतेः। तमसो भावस्वरूपत्वे वृद्ध-सम्मतिमपि दर्शयति—तदुक्तमित्यादिना। नचेति भासां तेजसां अभावस्य तमस्त्वं अन्धकारपदार्थत्वं

এই যে, তাহা হইলে আত্মার বন্ধ যায় কিসে? তাহার উত্তর এই যে, সাংখ্য-মতে বস্তুগত্যা আত্মার কোন বন্ধ নাই, তবে প্রাকৃতিক অবিবেকনিবন্ধনই আত্মাতে বন্ধের অভিমান হয়, সুতরাং সেই প্রাকৃতিক অবিবেকনাশেই সেই অভিমান চলিয়া যায়।

এস্থলে প্রসঙ্গক্রমে বিচার্য্য এই যে, দৃষ্টান্ত বিধায় উপন্যস্ত অন্ধকার কোন্ পদার্থের অন্তর্গত? বৈশেষিক এবং নৈয়ায়িকগণ বলেন, অবশ্য স্বীকার্য্য আলোকের অভাবদ্বারাই উপপত্তি হইতে পারে বিধায় অন্ধকার আলোকের অভাব, অতিরিক্ত কোন পদার্থ নহে। বস্তুতঃ এমত ঠিক নহে, যেহেতু "অন্ধকার যাইতেছে" ইত্যাদি রূপে অন্ধকার ভাব পদার্থ বলিয়াই প্রতীয়মান হয়। পরন্তু অন্ধকার যদি আলোকের অভাবরূপ হয়, তবে আলোকের প্রাগভাবস্বরূপ হইবে, কি আলোকের ধ্বংসাভাবস্বরূপ হইবে? যদি প্রাগ-

मातम्। यथा कौशिको भानिरपेक्ष एव गृह्णाति, तथा आलोकानपेक्षमेव तमोग्रहणं वैचित्र्यात् पदार्थस्य। तस्मात् रूपविशेषोऽयं यत्नावरकमस्ति तत्रारोप्य गृह्यते। द्रव्यान्तरमिति केचित्। तदुक्तम्—

वृद्धानां सम्मतं नच, अत्र हेतुमाह—छायेत्यादि। छायायाः—तमसः, कार्ष्ण्यं कृष्णरूपत्वं। दूरेति, प्रदीपस्य दूरत्वं आसन्नत्वञ्च यथाक्रमं तमसो महत्त्वे अल्पत्वे च हेतुः। चलाचलेति, प्रदीपे चलति चल अचले च तस्मिन्न चलेत्यर्थः; छायावस्तुत्वाद्विना—भावरूपत्वं विना देहानुवर्त्तिनी—शरीरानुगामिनी न भवेत्—भवितुं न शक्नुयात्, अभावस्य गमनासम्भवादिति भावः।

नन्वेवं कथमभावस्तम इति लोकप्रवाद इत्याशङ्कायामाह—अभाव इत्यादि। अभावे सतीति, आलोकाभावे सत्येवेत्यर्थः। प्रतीयमानत्वात्—तमसः प्रतीतिविषयत्वात्, तथाचान्वयव्यतिरेकनिबन्धन एव तमसि आलोकाभावत्वव्यपदेशो न तु वस्तुगत्या आलोकाभावत्वमिति। चाक्षुषप्रत्यक्षसामान्ये आलोकसंयोगस्य कारणत्वं मनसिकृत्य शङ्कते—आलोक इत्यादि। वस्तुग्रहणं—वस्तुनश्चाक्षुषप्रत्यक्षं, ग्रहणं—तमसश्चाक्षुषप्रत्यक्षं। शङ्कां परिहर्त्तुमाह—वैधर्म्म्यमावमिति। आलोकनिरपेक्षचाक्षुषप्रत्यक्षविषयत्वरूपं वस्त्वन्तरेभ्यस्तमसो वैलक्षण्यमित्यर्थः, दृष्टान्तप्रदर्शनपूर्व्वकं वैलक्षण्यं स्पष्टयति—यथेत्यादिना। तथाच तमोभिन्नवस्तुविषयकचाक्षुषप्रत्यक्षं प्रत्येवालोकसंयोगस्य कारणत्वं फलबलात् कल्पनीयमिति भावः। प्रकृतमुपसंहरति—

ভাবস্বরূপ হয়, তবে ঘট উৎপন্ন হইলে যেমন ঘটপ্রাগভাব বিনষ্ট বলিয়া প্রতীত হয়, সেইরূপ আলোকসত্ত্বদশাতেও আলোকপ্রাগভাব বিনষ্ট এইরূপ প্রতীতি হইতে পারে, কারণ তখনও অন্ধকার বিনষ্ট এইরূপ প্রতীতি সর্ব্বজনপ্রসিদ্ধ; এবং আলোকসত্ত্বদশাতেই ভবিষ্যদালোকের প্রাগভাব থাকায় অন্ধকার অবিনষ্ট এইরূপ প্রতীতি হইতে পারে। আর যদি আলোকের ধ্বংসস্বরূপ হয়, তবে ধ্বংসের অবিনাশিত্বনিবন্ধন আলোকান্তর সত্ত্বেও আলোকান্তরের ধ্বংস থাকায় অন্ধকার প্রতীতি হইতে পারে। যেমন ঘটান্তর উৎপন্ন হইলেও নষ্ট ঘটের প্রধ্বংস থাকে। সদ্বস্তুর অন্যোন্যাভাব থাকে, অর্থাৎ আলোক সত্ত্বেও আলোকাধিকরণে আলোকের অন্যোন্যাভাব থাকে বিধায় "অন্ধকার আলোকের অন্যোন্যাভাব" ইহা বলাই চলে না। গুণশ্রুতি প্রভৃতি দোষ নিবন্ধন "অন্ধকার আলোকের

तमः खलु चलश्नील' परापरविभागवत्।
प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हति॥

अथ भवतु गुणो वा द्रव्यं वा, नास्माकं सिद्धान्तक्षतिः? अनियत-पदार्थवादित्वात्। अभावस्तु न भवतीति ब्रूमः॥ ५६॥

तस्मादिति। अभावस्वरूपत्वे वाधप्रदर्शनात् न च भासामित्यादिश्लोकेन छायारूपतमसः कृष्णत्वाभिधाना-च्चेत्यर्थः। रूपविशेषः—कृष्णरूपः,—मय'— अन्धकारः। नन्वेवं कथमालोके सति नान्ध-कारस्य प्रत्यक्षमित्याशङ्कायामाह—यत इति। आवरक'—आलोकावरकं, आरोप्य'—तमः गृह्यत इति। तथाच तमःप्रत्यक्ष' प्रत्यालोकाभावस्य कारणत्वमपि कल्पनीयमिति सूचितम्। न च यथा "न च भासा"मित्यादि श्लोकेनान्धकारस्य कृष्णरूपत्वं तथा दूरासन्नेत्यादि श्लोकप्रति-पाद्येन परिमाणवत्त्वादिना द्रव्यत्वमपि प्रतिपादयितुं शक्यत इति वाच्यं, कृष्णत्वश्रुतिविरोधेन परिमाणवत्त्वादिप्रतीतेर्भ्रमत्वात् न चैवं "दूरासन्ने"त्यादेरुपन्यासो वृत्तिकृतो विरुद्ध इति वाच्यं, सर्व्वमत एवान्धकारस्य भावत्वमिति प्रतिपादनार्थमेव तदुपन्यासात्; केचिदित्यनेन द्रव्यत्व-पक्षस्याङ्गीक्रियमाणत्वाच्च। तमसो रूपविशेषत्वमसहमानानां वेदान्तिप्रभृतीनां मतमुत्थापयति—द्रव्यान्तरमित्यादिना। तमसो द्रव्यान्तरत्वसाधिकां प्राचीनकारिकां दर्शयितुमाह—तदुक्तमिति।

অত্যন্তাভাব" এই আশঙ্কাই হইতে পারে না। উক্তও আছে—"আলোকের অভাব যে অন্ধকার ইহা বৃদ্ধদিগের মত নহে, যে হেতু পুরাণে ছায়ার কৃষ্ণস্বরূপ গুণশ্রুতি আছে। প্রদীপের দূরত্ব ও সন্নিধানদ্বারা ছায়ার মহৎ পরিমাণবত্ব ও অল্প পরিমাণবত্ব হইয়া থাকে, এবং প্রদীপ চলিলে ছায়া চলে ও প্রদীপ স্থির হইলে ছায়া স্থির হয়, এবং ছায়া দেহের অনুবর্ত্তিনী হইয়া থাকে, ছায়া কোন বস্তু না হইলে ইহা সম্ভবপর নহে।"

আলোকের অভাব সত্ত্বেই অন্ধকারের প্রতীতি হয় বলিয়া অন্ধকারের আলোকাভাবের ব্যপদেশ হয়, বস্তুতঃ অন্ধকার আলোকাভাব নহে। এইস্থানে প্রশ্ন,—'চাক্ষুষ প্রত্যক্ষমাত্রেই দেখা যায়, আলোক কারণ, তদভাবে কিরূপ অন্ধকারের প্রত্যক্ষ হয়? উত্তর ইহা বৈধর্ম্ম্যমাত্র, অর্থাৎ অন্যদ্রব্য প্রত্যক্ষে আলোক কারণ হইলেও অন্ধকার প্রত্যক্ষে আলোক কারণ নহে, যেমন কৌশিক (পেচক) আলোকের অপেক্ষা না করিয়াই রাত্রিতে বস্তুর প্রত্যক্ষ করিয়া থাকে, সেইরূপ বস্তুর বৈচিত্র্যনিবন্ধন আলোক

বিবেকান্মুক্তিরিত্যুক্তম্। ঘটপটাদীনাং বিবেকোঽস্মদাদীনামপ্যস্তীতি সর্ব্বমুক্তিপ্রসঙ্গ ইত্যত আহ—

প্রধানাবিবেকাদন্যাবিবেকস্য তদ্ধানে হানম্ ॥ ৫৭ ॥

সর্ব্বেষাং মূলং প্রধানম্। তস্য অবিবেকাৎ অন্যাবিবেকস্য সম্ভবঃ।

তম ইতি পূর্ব্বাৰ্দ্ধেন গুণক্রিয়াবত্ত্বলক্ষণং দ্রব্যসাধর্ম্ম্যমুক্তং। নন্বেবং প্রসিদ্ধদ্রব্যাণামেব কস্মিংশ্চিদন্তর্ভবতু তম ইত্যাশঙ্কায়ামাহ—প্রসিদ্ধদ্রব্যবৈধর্ম্ম্যাদিতি। প্রসিদ্ধানি যানি দ্রব্যাণি নবানি ক্ষিত্যাদীনি তদ্বৈধর্ম্ম্যাৎ তদ্বিরুদ্ধধর্ম্মবত্ত্বাদিত্যর্থঃ। তথাহি গন্ধশূন্যত্বান্ন পৃথিবী, নীলরূপবত্ত্বাচ্চ ন জলাদিকমিতি সিদ্ধং নবভ্যঃ ক্ষিত্যাদিভ্যো ভিন্নং দশমং দ্রব্যং তম ইতি। উক্তঞ্চ—

তমস্তমালবর্ণাভং চলতীতি প্রতীয়তে।

রূপবত্ত্বাৎ ক্রিয়াবত্ত্বাদ্দ্রব্যন্তু দশমং তমঃ ॥ ইতি।

সাংখ্যমতং দর্শয়তি—অথেত্যাদিনা ॥ ৫৬ ॥

মুক্তিকারণীভূতবিবেকস্বরূপকসূত্রমবতারয়িতুং ভূমিকামারচয়তি—বিবেকাদিত্যাদিনা। প্রধানাবিবেকাদিত্যাদিভাগং ব্যাখ্যায়ান্বয়সমাপ্ত্যর্থং পূরয়তি—সম্ভব ইতি। সর্ব্বাবিবেকহান-

ব্যতিরেকেই অন্ধকারের প্রত্যক্ষ হইয়া থাকে। সুতরাং অন্ধকার একটি রূপবিশেষ অর্থাৎ কৃষ্ণরূপ। যে স্থানে আলোকের আবরক থাকে, সে স্থানেই আরোপ্য অন্ধকারের প্রত্যক্ষ হইয়া থাকে, (সুতরাং আলোক সত্ত্বে অন্ধকারের প্রত্যক্ষ হয় না)।

কেহ বলেন, অন্ধকার একটি অতিরিক্ত দ্রব্য পদার্থ, তাহার প্রমাণও উক্ত আছে, যথা—"অন্ধকার চল নীলবর্ণ ও পরত্ব অপরত্ব এবং বিভাগশালী, সুতরাং প্রসিদ্ধ দ্রব্যসকলের বিপরীত ধর্ম্ম আছে বিধায় অন্ধকার ক্ষিত্যাদি নয়টি দ্রব্য হইতে ভিন্ন হওয়ার যোগ্য।"

এইস্থলে সাংখ্যের কথা এই যে, অন্ধকার গুণ হউক বা দ্রব্য হউক, তাহাতে আমাদের কোনও সিদ্ধান্তের ব্যাঘাত নাই। যেহেতু আমরা অনিয়ত পদার্থবাদী। তবে অন্ধকার যে আলোকাভাব নহে, ইহাই আমরা বলিতেছি ॥ ৫৬ ॥

বিবেক হইতে মুক্তি হয়, এই কথা বলা হইয়াছে। অস্মদাদিরও ত

পদার্থানামন্যোঽন্যং ভবতু অবিবেকো বিবেকো বা, ন তেন বন্ধমোক্ষৌ, কিন্তু প্রধানবিবেকাবিবেকাভ্যাম্। অতস্তদ্ধানে প্রধানাবিবেকহানে সর্ব্বাবিবেকহানম্ ॥ ৫৭ ॥

ভবতু বিবেকান্মুক্তিঃ। স কিমাত্মসম্বন্ধী ন বা? আত্মসম্বন্ধী চেত? আত্মনঃ কূটস্থত্বব্যাঘাতঃ। অসম্বন্ধী চেৎ? অতিপ্রসক্তিরিত্যত আহ—

বাঙ্মাত্রং তু, ন তত্ত্বং, চিত্তস্থিতেঃ ॥ ৫৮ ॥

আত্মসম্বন্ধীতি বাঙ্মাত্রং তু, ন তাত্ত্বিকঃ সম্বন্ধঃ। অসম্বন্ধেঽপি চিত্তে বিবেকস্থিতেঃ চিত্তসন্নিধানাৎ আত্মনি বিবেকাভিমান ইতি নিবেদয়িষ্যামঃ ॥ ৫৮ ॥

নিতি হানমিত্যস্য বিবরণম্। তথাচ যাদৃশবিবেকেন সর্ব্বাবিবেকহানং ভবতি, তস্য প্রধানপুরুষবিবেকস্যৈব মোক্ষহেতুত্বং ন ত্বতাদৃশস্য ঘটাদিবিবেকস্যেতি স্থিতম্ ॥৫৭॥

সূত্রান্তরমবতারয়তি—ভবত্বিত্যাদিনা। স—বিবেকঃ, আত্মসম্বন্ধী—আত্মবৃত্তিঃ, কূটস্থত্বং—অপরিণামিত্বং। অতিপ্রসক্তিরিতি অন্যধর্ম্মেণাপ্যন্যস্য মুক্তৌ বদ্ধস্যাপি মোক্ষপ্রসক্তিরিত্যর্থঃ। সূত্রং ব্যাখ্যাতুং বাঙ্মাত্রমিত্যস্য বিশেষ্যপদং পূরয়তি—আত্মসম্বন্ধীতি, মাত্রশব্দ

ঘটপটাদির বিবেক আছে, সুতরাং সকলেরই ত মুক্তি হইতে পারে, এই আশঙ্কায় বলিতেছেন—

সকল পদার্থেরই মূল প্রধান, সুতরাং তাহার অবিবেকেই অন্য আর সকল পদার্থের অবিবেক সম্ভব। অন্য পদার্থের পরস্পর বিবেক বা অবিবেক হউক, তদ্দ্বারা বন্ধ বা মোক্ষ হয় না, কিন্তু প্রধানের অবিবেকে বন্ধ ও প্রধানের বিবেকেই মুক্তি হয়; অতএব প্রধানের অবিবেকের বিনাশেই সমস্ত অবিবেকের বিনাশ হয়। সুতরাং ঘটাদির বিবেক মুক্তির কারণ নহে ॥ ৫৭ ॥

বিবেকদ্বারাই মুক্তি হউক, সেই বিবেক আত্মাতে থাকে কি না? আত্মাতে থাকিলে আত্মার অপরিনামিত্বের ব্যাঘাত হয়। যদি আত্মাতে না থাকে, তবে অন্যের ধর্ম্মদ্বারা অন্যের মুক্তি স্বীকার করিলে বদ্ধেরও মুক্তি প্রসঙ্গ হয়। এই আশঙ্কায় বলিতেছেন—

भवतु श्रवणादेव विवेकज्ञानम्। अनेकजन्मायाससाध्येन अपरोक्ष-ज्ञानेन किमित्यत आह—

युक्तितोऽपि न बाध्यते दिङ्मूढवदपरोक्षादृते ॥ ५९ ॥

व्यक्तम् ॥ ५८ ॥

प्रकृत्यादयः सन्ति, ते च महदादिक्रमेण परिणमन्त इति न दृष्ट-मित्यत आह—

अचाक्षुषाणामनुमानेन बोधः, धूमादिभिरिव वह्नेः ॥ ६० ॥

व्यवच्छेद्यमाह न नित्यादिना। अत्र हेतुप्रतिपादकं "चित्तस्थिते" रिति पदं व्याचष्टे—असम्बन्धेऽपीत्यादिना। नन्वेवं विवेकस्यात्मधर्मत्वव्यवहारः सार्व्वजनीनः कथमुपपद्यत इत्याह—चित्तसन्निधानादिति। तज्ज्ञातिप्रसक्तिपरिहारस्तु मोक्षस्यापि वस्तुगत्या चित्तधर्म्मत्वादिति मन्तव्यम् ॥ ५८ ॥

कीदृशविवेकज्ञानस्य मोक्षोपयोगित्वमित्यस्य प्रतिपादकं सूत्रमवतारयति—भवत्वित्या-दिना। सूत्रे युक्तिर्म्मननं, अपिशब्दः श्रवणसमुच्चयार्थः। बाध्यत इत्यस्याविवेक इति शेषः, दिङ्मूढवदिति दृष्टान्तकथनम्। तथाचायं सूत्रार्थः—यथा दिङ्मूढस्य जनस्य वाङ्मात्र-मपि दिग्वैपरीत्यं अपरोक्षादृते—(विवेकसाक्षात्कारं विना) श्रवणमननाभ्यां न बाध्यते (नोच्छिद्यते) तथा अविवेकोऽपि विवेकसाक्षात्कारं विना युक्तितः श्रवणतश्च न बाध्यते इति ॥ ५९ ॥

বিবেক আত্মসম্বন্ধী এটি কথার কথামাত্র, যথার্থতঃ আত্মার কোনও সম্বন্ধ নাই। সম্বন্ধ না থাকিলেও বিবেক চিত্তে থাকে বিধায় চিত্তের সন্নিধান বশতঃ আত্মাতে বিবেকের অভিমান হয়, একথা বিশেষভাবে বলা হইবে ॥৫৮॥

শ্রবণদ্বারাই বিবেকজ্ঞান হউক, অনেক জন্মায়াসসাধ্য সাক্ষাৎকারের প্রয়োজন কি ? এই আশঙ্কায় বলিতেছেন—

যেমন দিঙ্মূঢ় ব্যক্তির দিগ্‌ভুল বিবেকসাক্ষাৎকার না হওয়া পর্য্যন্ত যুক্তি বা শ্রবণদ্বারা বিদূরিত হয় না, সেইরূপ অবিবেকও বিবেক সাক্ষাৎকার না হইলে শ্রবণ বা যুক্তিদ্বারা কখনও বাধিত হয় না ॥ ৫৯ ॥

भवेदेवं, यदि प्रत्यक्षमेव प्रमाणं, नानुमानादिकमिति । प्रकृत्यादीनामदर्शनेऽपि सामान्यतो दृष्टानुमानात् सिद्धेः ॥ ६० ॥

प्रकृत्यादीनां सृष्टिक्रममाह—

सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, प्रकृतेर्महान्-महतोऽहङ्कारोऽहङ्कारात्पञ्च तन्मात्राणि, उभयमिन्द्रियम्, तन्मात्रेभ्यः स्थूलभूतानि, पुरुष इति पञ्चविंशतिर्गणः ॥ ६१ ॥

विवेकज्ञानविषयाणां प्रकृत्यादीनां प्रामाणिकत्वप्रतिपादकं सूत्रमवतारयति—प्रकृत्यादय इत्यादिना । न दृष्टमिति, तथाच प्रत्यक्षानुपलब्ध्या प्रकृत्यादीनामपि खपुष्पादिपथानुसारित्वं स्यादिति भावः । सूत्रतात्पर्य्यं विवृणोति—भवेदेवमित्यादिना । अनुमानं त्रिविधं, पूर्व्ववत्, शेषवत्, सामान्यतो दृष्टञ्च, तत्राद्दृष्टस्वलक्षणसामान्यविषयात्मकेन सामान्यतो दृष्टानुमानेनैव प्रायोऽतीन्द्रियाणां प्रतीत्या सूत्रीयानुमानपदं तत्परतया व्याचष्टे—सामान्यतो दृष्टानुमानादिति । वस्तुतस्तूपलक्षणमेतत् शेषवदनुमाने नागागमेन चातीन्द्रियाणां प्रतीतेः । तथाचोक्तं कारिकया—

सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात् ।
तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धं ॥

"उपलक्षणञ्चैतत् शेषवत इत्यपि द्रष्टव्य" मिति तद्व्याख्यानावसरे मिश्रः । सूत्रे अक्षाग्रुणाणामित्यपि प्रत्यक्षाविषयाणामित्यर्थकं, अन्यथा गन्धादेरप्यक्षाग्रुणत्वेन नित्यानुमेयत्वापत्तेः । धूमादिभिरित्यादिदृष्टान्तविधयोक्तम् । तथाच—"यथा धूमादिभिरनुमानेन वह्नेर्बोधस्तथा प्रत्यक्षाविषयाणामप्यनुमानादिभिर्ब्बोध इति सूत्रार्थः ॥ ६० ॥

প্রকৃত্যাদি আছে এবং মহদাদি ক্রমে তাহার পরিণাম হয়, ইহা প্রত্যক্ষ-সিদ্ধ নহে, সুতরাং তাহাতে প্রমাণ কি ? এই আশঙ্কায় বলিতেছেন—

অনুমানাদি প্রমাণ না হইয়া যদি কেবল প্রত্যক্ষই প্রমাণ হইত, তবেই এই আশঙ্কা হইতে পারিত, কিন্তু তাহা নহে, সুতরাং প্রকৃত্যাদির প্রত্যক্ষ না হইলেও সামান্যতো দৃষ্ট অনুমানদ্বারাই তাহাদের সিদ্ধি হইবে। যেমন ধূমাদিদ্বারা বহ্নির সিদ্ধি হয়।। ৬০ ॥

যদ্যপি ত্রয়াণাং সাম্যাবস্থা প্রকৃতিঃ, তথাপি একৈকস্মিন্নপি প্রকৃতিশব্দপ্রয়োগঃ সাঙ্কেতিকঃ। মহানিতি বুদ্ধিতত্ত্বম্। অহঙ্কার ইতি অভিমানঃ। পঞ্চ তন্মাত্রাণীতি শব্দস্পর্শরূপরসগন্ধাঃ। উভয়মিন্দ্রিয়ং, বাহ্যং পঞ্চ কর্ম্মেন্দ্রিয়াণি বাক্পাণিপাদপায়ূপস্থাখ্যানি, পঞ্চ বুদ্ধীন্দ্রিয়াণি শ্রোত্রত্বক্চক্ষুর্জিহ্বাঘ্রাণাখ্যানি, আন্তরং মনঃ। স্থূলভূতানি আকাশবায়ুতেজোজলভূময়ঃ। তেষাং চ পঞ্চতন্মাত্রেভ্য উৎপত্তিরিতি বোদ্ধব্যম্। স্থূল ইত্যুপলক্ষণং—সূক্ষ্ম-

---

সূত্রান্তরমবতারয়তি—প্রকৃত্যাদীনামিত্যাদিনা। সাম্যাবস্থা—অকার্য্যাবস্থা, তথাচাকার্য্যাবস্থোপলক্ষিতং ত্রিগুণম্ প্রকৃতিরিত্যর্থঃ। যদ্যেবং কথং সত্ত্বে রজসি তমসি বা প্রকৃতিশব্দপ্রয়োগ ইত্যাশঙ্কামপাকর্ত্তুমাহ—যদ্যপীতি। সাঙ্কেতিকঃ—শাস্ত্রকারীয়পরিভাষাসিদ্ধঃ। অবৈতদবধেয়ম্—সংযোগবিভাগাদিমত্ত্বাৎ বক্ষ্যমাণচলত্বাদিধর্ম্মকত্বাচ্চ সত্ত্বরজস্তমাংসি সাংখ্যমতে দ্রব্যাণ্যেব ন তু বৈশেষিকা গুণাঃ। তত্র গুণশব্দপ্রয়োগস্তু পুরুষপশুবন্ধনসাধনত্রিগুণাত্মকমহদাদিরজ্জুসম্পাদকত্বাদ্বোধ্য ইতি। অভিমান ইতি, অভিমানবৃত্তিকান্তঃকরণমিত্যর্থঃ। পঞ্চতন্মাত্রশব্দপ্রতিপাদ্যানিদর্শয়তি—শব্দেত্যাদিনা, বহিরিন্দ্রিয়জন্যপ্রত্যক্ষস্যাবিষয়া এব সূক্ষ্মাঃ শব্দস্পর্শরূপরসগন্ধাঃ পঞ্চতন্মাত্রশব্দবাচ্যা ইত্যর্থঃ। উভয়মিতি, বাহ্যং আভ্যন্তরঞ্চেত্যর্থঃ। বাহ্যেন্দ্রিয়াণি চ দশ, তেষাং পুনঃ কর্ম্মেন্দ্রিয়ত্বজ্ঞানেন্দ্রিয়ত্বভেদেন দ্বৈবিধ্যং প্রদর্শ্য স্বরূপং দর্শয়তি—বাহ্যেত্যাদিনা। তেষাং—স্থূলভূতানাং। নন্বত্র সৃষ্টিক্রমপ্রকরণে নিত্যস্য পুরুষস্যোপাদানমনুচিতমিত্যত আহ—পুরুষ ইতি। সংখ্যা-

---

প্রকৃত্যাদির সৃষ্টিক্রমে বলিতেছেন—

যদিও সত্ত্ব, রজঃ ও তমঃ এই গুণত্রয়ের সাম্যাবস্থা (অকার্য্যাবস্থা) ঐ প্রকৃতি, তথাপি সত্ত্ব, রজঃ ও তমঃ ইহার এক একটিতে প্রকৃতিশব্দ প্রয়োগও শাস্ত্রকারীয় সঙ্কেতসিদ্ধ। প্রকৃতির প্রথম পরিণাম মহান্‌ই বুদ্ধিতত্ত্ব, সেই বুদ্ধিতত্ত্বের পরিণাম অহঙ্কার অর্থাৎ অভিমানবৃত্তিক অন্তঃকরণতত্ত্ব। সেই অহঙ্কারের পরিণাম শব্দ, স্পর্শ, রূপ, রস ও গন্ধরূপ পঞ্চতন্মাত্র এবং বাহ্য ও আভ্যন্তর-ভেদে দ্বিবিধ ইন্দ্রিয়। সেই বাহ্যেন্দ্রিয়, কর্ম্মেন্দ্রিয় এবং জ্ঞানেন্দ্রিয় ভেদে দ্বিবিধ। বাক্, পাণি, পাদ, পায়ু ও উপস্থ এই পাঁচটি কর্ম্মেন্দ্রিয়, এবং শ্রোত্র, ত্বক্, চক্ষু, জিহ্বা ও ঘ্রাণ এই পাঁচটি জ্ঞানেন্দ্রিয়।

ভূতানামপি গ্রহণম্। পুরুষ ইতি সংখ্যাপূরণার্থং, ন তু সৃষ্টিক্রমার্থং, নিত্যত্বাৎ আত্মনঃ ॥ ৬১ ॥

কার্য্যাৎ কারণানুমানার্থং প্রাতিলোম্যমাহ—

স্থূলাৎ পঞ্চতন্মাত্রস্য ॥ ৬২ ॥

স্থূলাৎ পঞ্চভূতাৎ কার্য্যাৎ সত্ত্বরজস্তমোভেদেন শান্তঘোরমূঢ়রূপাৎ পঞ্চতন্মাত্রস্য জ্ঞানম্ ॥ ৬২ ॥

पुरणार्थं—पञ्चत्रिंशतिसंख्यापूरणार्थं नित्यत्वादिति, अपरिणामित्वादित्यर्थः। ननु यदि दर्शित-पञ्चविंशतिरेव पदार्थास्तदा गुणकर्म्मसामान्यदिक्कालादीनां सर्व्वसिद्धानामपरिगणनान्न्यूनत्वमिति चेन्न धर्म्मधर्म्म्यभेदेन गुणकर्म्मसामान्यादीनामत्रैवान्तर्भावात् "दिक्कालावाकाशादिभ्य" इत्यागामि-सूत्रेण दिक्कालयोराकाशस्वरूपत्वाच्च। एतेषां पदार्थानामागमासिद्धत्वमपि नाशङ्कनीयं "अष्ट प्रकृतयः षोडश विकाराः" इत्यनेन गर्भोपनिषदि, "पृथिवी च पृथिवीमात्रा चे"त्यादिना प्रश्नोपनिषदि एवं मैत्रेयोपनिषदादिष्वपि परिगणनात् ॥ ६१ ॥

सूत्रान्तरावतरणिकामाह—कार्य्यादित्यादिना। सूत्रतात्पर्य्यं विवृणोति—स्थूलादित्यादिना। स्थूलत्वमत्र न बहिरिन्द्रियग्राह्यत्वं आकाशस्यासंग्रहापत्तेः, किन्तु बहिरिन्द्रिय-ग्राह्यगुणकत्वम्। ज्ञानमिति अनुमानमित्यर्थः, तथाचायं प्रयोगः—अपकर्षकाष्ठापन्नानि स्थूलभूतानि स्वविशेषगुणवद्द्रव्योपादानकानि स्थूलत्वात् घटादिवदिति ॥ ६२ ॥

আভ্যন্তর ইন্দ্রিয় একমাত্র মন। তন্মাত্রপরিণাম স্থূল মহাভূত, তাহাও আকাশ, বায়ু, তেজ, জল ও ক্ষিতিভেদে পাঁচ প্রকার। স্থূল এইটি উপলক্ষণ সূক্ষ্ম ভূতও তন্মাত্রেরই পরিণাম, এই চতুর্বিংশতি প্রকার পরিণামি পদার্থ ও অপরিণামি পুরুষ এই সমুদায়ে পঁচিশ প্রকার তত্ত্ব। এই স্থানে যে যে পুরুষের নির্দ্দেশ করা হইয়াছে, তাহা কেবল পঞ্চবিংশতি সংখ্যা পূরণার্থ সৃষ্টিক্রমার্থ নহে, যেহেতু আত্মা নিত্য পদার্থ ॥ ৬১ ॥

কার্য্যদ্বারা কারণের অনুমানার্থ প্রতিলোম পরিণাম দেখাইতেছেন—

সত্ত্ব, রজঃ, তমোভেদে শান্ত, ঘোর ও মূঢ়রূপ স্থূল পঞ্চভূতাত্মক কার্য্য হইতে পঞ্চ তন্মাত্রের অনুমান করিতে হইবে ॥ ৬২ ॥

बाह्याभ्यन्तराभ्यां तैश्चाहङ्कारस्य ॥ ६२ ॥

बाह्याभ्यन्तराभ्यामिन्द्रियाभ्यां तैः पञ्चतन्मात्रैश्च कार्य्यैरहङ्कारस्य ज्ञानम् ॥ ६२ ॥

तेनान्तःकरणस्य ॥ ६४ ॥

तेनाहङ्कारेण कार्य्येणान्तःकरणस्य बुद्धेर्ज्ञानम् ॥ ६४ ॥

ततः प्रकृतेः ॥ ६५ ॥

ततो महत्तत्त्वात् कार्य्यात् प्रकृतेर्ज्ञानम् ॥ ६५ ॥

अहङ्कारानुमानप्रकारप्रदर्शकं सूत्रं व्याचष्टे—बाह्येत्यादिना । अहङ्कारस्य—अभिमानवृत्तिकान्तःकरणद्रव्यस्य, ज्ञानं—अनुमानेन बोधः, तथाच प्रयोगः—तन्मात्रेन्द्रियाणि साभिमानकद्रव्योपादानकानि अभिमानकार्य्यद्रव्यत्वात्, यन्नैवं तन्नैवं यथा पुरुषादिरिति ॥ ६२ ॥

महत्तत्त्वापरपर्य्यायकबुद्ध्यान्तःकरणस्यानुमानप्रकारप्रदर्शनपरं सूत्रं व्याचष्टे—तेनेत्यादिना । तत्रापि ज्ञानं—अनुमानेन बोधः, तथाच प्रयोगः—अहङ्कारद्रव्यं निश्चयवृत्तिकद्रव्योपादानकं निश्चयकार्य्यद्रव्यत्वात्; यन्नैवं तन्नैवं यथा पुरुषादिरिति ॥ ६४ ॥

प्रधानकानुमानप्रकारप्रदर्शनपरं सूत्रं व्याचष्टे—तत इत्यादिना । अत्रापि ज्ञानं—अनुमानेन बोध एव, प्रयोगश्चेत्थम्—सुखदुःखमोहधर्म्मकं महत्तत्त्वं सुखदुःखमोहधर्म्मक-

---

অন্তরিন্দ্রিয়, বহিরিন্দ্রিয় ও তন্মাত্রসকল কার্য্যদ্বারা তাহাদের কারণস্বরূপ অহঙ্কারতত্ত্বের অস্তিত্ব নির্ণয় হয় ॥ ৬৩ ॥

সেই অহঙ্কাররূপ কার্য্যদ্বারা তাহার কারণরূপ বুদ্ধির (মহত্তত্ত্বের) অস্তিত্ব নির্ণয় হয় ॥ ৬৪ ॥

संहतपरार्थत्वात् पुरुषस्य ॥ ६६ ॥

न प्रकृतेः कार्य्यत्वात् पुरुषस्य ज्ञानं, प्रकृतेर्नित्यत्वात् पुरुषस्य अकारणत्वात्। किन्तु प्रकृतेः संहतत्वात् त्रिगुणात्मकत्वात्

द्रव्योपादानकं कार्य्यत्वं सति सुखदुःखमोहात्मकत्वात्, कान्तादिवदिति। महत्तत्वादीनां सुख-दुःखमोहात्मकत्वञ्च साधयिष्यत इति न स्वरूपासिद्धिदृष्टान्तासिद्ध्यादिदोष इत्यवधेयम् ॥ ६५ ॥

पुरुषानुमानप्रकारप्रदर्शनपरं सूत्रमाह—संहतेति। संहतानां—त्रिगुणात्मकानां प्रकृतितत्कार्य्यमहदादीनामित्यर्थः, परार्थत्वात्—स्वेतरस्य भोगापवर्गफलकत्वात् अनुमानेन पुरुषस्य बोध इति सूत्रार्थः। अनुमानप्रकारश्च प्रकृतिमहदादिकं परार्थं संहतत्वात् शय्यासनादिवदिति। तथाचासंहतः स पर एव पुरुष इति भावः।

प्रकृतिकारणतया पुरुषं साधयतां मतं निराकरोति नेत्यादिना। पुरुषस्येति, तत्कारण-तयेत्यादिः, तथाच प्रकृतेः कार्य्यत्वात् तत्कारणतया पुरुषस्य ज्ञानं न सम्भवतीत्यर्थः। अत्र हेतु-माह—प्रकृतेर्नित्यत्वात् पुरुषस्य च अकारणत्वादिति। सूत्रतात्पर्य्यं विवृण्वन्नुपसंहरति—किन्त्वित्यादिना। ननु पुरुषोऽपि संहत एव स्यादित्याशङ्कामपाकरोति—स चेत्यादिना। पुरुष-

---

সেই মহত্তত্ত্বরূপ কার্য্য হইতে তাহার কারণরূপে প্রকৃতির অস্তিত্ব নির্ণয় হয়। ৬৫।

প্রকৃতির কারণরূপে পুরুষের অস্তিত্ব নির্ণয় হইতে পারে না, যে হেতু প্রকৃতি নিত্য ও পুরুষ অকারণ। কিন্তু প্রকৃতি ও তাহার কার্য্য সমস্তই সংহত অর্থাৎ ত্রিগুণাত্মক, সুতরাং পরার্থ, (পরের প্রয়োজনীয়) কারণ জগতে শয্যাসনাদি যত ত্রিগুণাত্ম বস্তু পরিদৃষ্ট হয়, তৎসমুদয়ই পরের প্রয়োজনীয় দেখা যায়। অতএব সেই পুরুষ অর্থাৎ সেই পর-

परार्थत्वम्। परश्च पुरुषः। अतः तस्य ज्ञानम्। स च असंहतो वक्तव्यः, अनवस्थाभयात्॥ ६६॥

अथ किं प्रकृतेः कारणं भविष्यतीत्यत आह—

मूले मूलाभावादमूलं मूलम्॥ ६७॥

मूलप्रकृतेर्मूलाभावात् कारणाभावात् अमूलं यत् कारणं तन्मूलम्, सैव प्रकृतिः॥ ६८॥

स्यासंहतत्वे हेतुमाह—अनवस्थाभयादिति। पुरुषस्य संहतत्वे—तस्यापि परार्थत्वापत्त्या अन्योऽपि परः स्वीकर्त्तव्यः, एवं तस्य तस्यापि संहतत्वे परार्थत्वादन्योऽन्योऽपि परः स्वीकर्त्तव्य इत्यनवस्था स्यादित्यर्थः॥ ६६॥

"प्रकृतेरन्यत् कारणं नास्ती"त्यस्य व्यवस्थापकं सूत्रं प्रश्नपूर्व्वकमुत्थापयति—अथे- त्यादिना। षष्ठीसप्तम्योरभेदार्थकत्वमनुसृत्य सूत्रीयं "मूले" इतिपदं व्याचष्टे—मूलप्रकृतेरिति। अमूलमिति, न विद्यते मूलं कारणं यस्येति व्युत्पत्त्या कारणरहितमित्यर्थः॥ ६७॥

রূপেই (প্রকৃতি মহদাদির ভোক্তারূপেই) পুরুষের অস্তিত্ব নির্ণয় করিতে হইবে। সেই পুরুষকে অসংহতই (অন্যের অভোগ্যই) বলিতে হইবে, নচেৎ পুরুষেরও ভোক্তা স্বীকার করিলে সেই ভোক্তার ও ভোক্তা স্বীকার করিতে হইবে, আবার তাহারও ভোক্তা স্বীকার করিতে হইবে, এইরূপে অনবস্থা হইয়া পড়ে॥ ৬৬॥

প্রকৃতির কারণ কে হইবে? এই আশঙ্কায় বলিতেছেন—মূল প্রকৃতির কারণ নাই বিধায় যে কারণ কারণরহিত, সেই মূল কারণ, তাহারই নাম প্রকৃতি॥ ৬৭॥

अत्र युक्तिमाह—

पारम्पर्य्येऽप्येकत्र परिनिष्ठेति संज्ञामात्रम् ॥६८॥

प्रकृतेः अन्यत् कारणं, तस्यापि अन्यत् कारणमिति अनवस्था-दोषादन्ततोऽकारणं मूलं वक्तव्यम्। सैव प्रकृतिरिति। पञ्चविंशति-तत्त्वात् अधिकाङ्गीकारे च गौरवं स्यात् ॥ ६८ ॥

अत्रेति, मूले मूलाभाव इत्यर्थः। "पारम्पर्य्येऽपि सकारणत्वस्य परम्परया प्राप्तत्वेऽपि, एकत्र—यत्र कुत्रापि परिनिष्ठा—सकारणत्वस्य विश्रामः वाच्य इति शेषः, अन्यथा अनवस्थापातात्। भवत्वेवं भवतु किञ्चिदकारणं नाम, तथापि न प्रकृतेः सिद्धिः इत्याशङ्कायामाह—संज्ञा-मात्रमिति, अस्य मूलकारणस्यैव प्रकृतिरिति संज्ञामात्रं, नतु तदतिरिक्तं प्रकृतिसमाख्य-किञ्चिदस्तीति सूत्रार्थः।" तमिममेवार्थमनवस्थोद्घाटनेन प्रकटयति—प्रकृतेरित्यादिना। नन्वनवस्थाभयात् सकारणत्वविश्रामाय क्वचिदङ्गीकार्य्यत्वेऽपि प्रकृतेः कारण एव विश्रामः स्यादिति शङ्कामपाकरोति—पञ्चेत्यादिना ॥ ६८ ॥

মূল কারণপ্রকৃতির যে কারণ নাই, তাহাতে যুক্তি বলিতেছেন—প্রকৃতির অন্য কারণ স্বীকার করিলে, সেই কারণেরও অন্য কারণ স্বীকার করিতে হয় এবং তাহারও আবার অন্য কারণ স্বীকার করিতে হয়, এরূপ ভাবে অনবস্থা হইয়া পড়ে, সুতরাং কোনও একটি নিত্য বস্তুতে অবশ্যই সকারণত্বের বিশ্রাম স্বীকার করিতে হইবে, যে স্থানে বিশ্রাম স্বীকার করিবে, প্রকৃতি সেই মূল কারণের একটি সংজ্ঞামাত্র, প্রকৃতির কারণ স্বীকার করিয়া তাহাতে বিশ্রাম স্বীকার-

प्रकृतेरप्रत्यक्षत्वात् कथं कारणत्वावगम इत्यत आह—

समानः प्रकृतेर्द्वयोः ॥ ६९ ॥

द्वयोर्वादिप्रतिवादिनोः तुल्यत्वम् । यथा परमाणोः अप्रत्यक्षत्वेऽपि घटादौ तद्‌गुणदर्शनात् परमाण्वनुमानं, तथा अत्रापि जगतस्त्रैगुण्य-दर्शनात् कारणं प्रकृतिस्त्रिगुणात्मिकेति अनुमीयते । तथा हि, कामिनी भर्त्तुः सुखदा इति सात्त्विकी, अविनयात् दुःखदेति राजसी, विरहात् मोहदा इति तामसी । एवं सर्व्वे भावा द्रष्टव्याः ॥ ६९ ॥

नन्वप्रत्यक्षायाः प्रकृतेः कारणत्वं केन प्रमाणेनावधारणीयमित्याशङ्कायां निरासकं सूत्रं प्रश्नपूर्व्वकमवतारयति—प्रकृतेरित्यादिना । सूत्रार्थं व्याचष्टे—द्वयोरित्यादिना । वादि-प्रतिवादिनोः—नैयायिकसांख्याचार्य्ययोः तुल्यत्वं प्रतिपादयति—यथेत्यादिना । पुरुष-व्यतिरिक्ते महदादिसांख्यसिद्धपदार्थजाते सर्व्वत्रैव त्रिगुणात्मकत्वं व्यवस्थापयितुमेकत्रै-व वस्तुन्यादौ त्रिगुणात्मकत्वं दर्शयति—तथाहीत्यादिना । एवं—अनेन कामिनीदृष्टान्तेन, सर्व्वे भावाः, पुरुषव्यतिरिक्ताः सर्व्वे पदार्थाः द्रष्टव्याः—त्रिगुणात्मकतया मन्तव्याः ॥ ६९ ॥

করিলে পঞ্চবিংশতি তত্ত্বের অতিরিক্ত পদার্থ স্বীকাররূপ গৌরব হয়, সুতরাং প্রকৃতিই মূল কারণ তাহার আর কারণও নাই ॥ ৬৮ ॥

অপ্রত্যক্ষ প্রকৃতিতে যে কারণত্ব আছে, তাহার জ্ঞান হয় কিরূপে? এই আশঙ্কায় বলিতেছেন—বাদী প্রতিবাদী নৈয়ায়িক ও সাংখ্যাচার্য্য উভয়ের মতেই এই অনুযোগ সমান। অর্থাৎ নৈয়ায়িকমতে যেমন পরমাণু অপ্রত্যক্ষ হইলেও ঘটাদিতে পরমাণুর গুণ দর্শন করত

যদি বিবেকদর্শনান্মুক্তিঃ, তদা শাস্ত্রশ্রবণাদেব মুক্তিঃ স্যাৎ? ন চৈবং, কস্যাপি ক্ষিপ্রং কস্যাপি চিরেণেতি দর্শনাদিত্যত

অধিকারিত্রৈবিধ্যান্ন নিয়মঃ ॥ ৭০ ॥

অধিকারিণঃ ত্রিবিধা ভবন্তি, উত্তমমধ্যমাধমভেদাৎ। তদ্ভেদঃ সহকারিণোঽবিদ্যাদের্ভেদাৎ। তদ্ভেদশ্চ অদৃষ্টভেদাৎ। তেন শ্রবণমাত্রাদিতি ন নিয়মঃ ॥ ৭০ ॥

“বিবেকদর্শনান্মুক্তি”রিতি যদুক্তং তৎ প্রতিকূলতর্কনিরাসকং সূত্রমবতারয়তি— যদীত্যাদিনা। শাস্ত্রশ্রবণাদেবেত্যেবকারো মননাদ্যপেক্ষাব্যবচ্ছেদকঃ, মুক্তিঃ স্যাদিতি সর্ব্বেষামিত্যাদিঃ, নাতঃ শাস্ত্রশ্রবণমাত্রেণৈব কস্যচিদুত্তমাধিকারিণো মুক্তাবপি “নচৈব”-

ঘটাদির কারণরূপে পরমাণুর অনুমান হয়, সেই রূপ সাংখ্যমতেও জাগতিক পদার্থের ত্রৈগুণ্য দর্শন বশতঃ তাহার কারণরূপে ত্রিগুণাত্মিকা প্রকৃতির অনুমান হইবে। জাগতিক পদার্থসকল যে ত্রিগুণ, তাহার প্রমাণ এই যে, এক কামিনীই স্বামীর সুখ জন্মায় বলিয়া সত্ত্বগুণাস্পদা, অবিনয়ে দুঃখ উৎপাদন করে বলিয়া রজোগুণাস্পদা ও বিরহে মোহ জন্মায় বলিয়া তমোগুণাস্পদা। এই কামিনীদৃষ্টান্তদ্বারাই পুরুষ-ব্যতিরিক্ত সমস্ত পদার্থের ত্রিগুণাত্মকত্ব বুঝিতে হইবে ॥ ৬৯ ॥

“বিবেক দর্শন হইতেই যদি মুক্তি হয়, তবে শাস্ত্রশ্রবণমাত্রেই সকলের মুক্তি হউক, কিন্তু তাহা ত হইতে দেখা যায় না, যে হেতু

पूर्वं 'प्रकृतेर्महान्' इति (६१) सूत्रे कार्य्यकारणभावः प्रतिपादितः, न तु क्रमः इति भ्रमं निराकरोति—

महदाख्यमाद्यं कार्य्यं, तन्मनः ॥ ७१ ॥

प्रकृतेः आद्यं कार्य्यं, तच्चान्तःकरणं बुद्धिः, मननात् मन इति ॥७१॥

नित्यधिमाशाशङ्कतिः। न चैवमिति, एवं—शास्त्रश्रवणादेव सर्व्वेषां मुक्तिः, नच दृश्यत इति शेषः। अत्र हेतुं दर्शयति—कस्यापीत्यादिना। नियमाभावे हेतुभूतं सूत्रोक्तम् अधिकारित्रैविध्यं सहेतुकं विशदयति—अधिकारिष्व इत्यादिना। सूत्रार्थमुपसंहरति—तेने-त्यादिना ॥ ७० ॥

पुनरुक्ताशङ्कामपाकुर्व्वन् सूत्रान्तरमवतारयति—पूर्व्वमित्यादिना। सूत्रे महदाख्यमाद्यं कार्य्यमिति यदुक्तं तत् कस्येत्याकाङ्क्षायामाह—प्रकृतेरिति। तृतीयतत्त्वस्य

কাহারও তড়াতাড়ি এবং কাহারও বিলম্বে মুক্তি হইতে দেখা যায়" এই আশঙ্কায় বলিতেছেন—

উত্তম, মধ্যম ও অধমভেদে অধিকারী তিন প্রকার হইয়া থাকে। সহকারি কারণ অবিদ্যাদির ভেদেই অধিকারীর ভেদ হয়, অবিদ্যাদির ভেদও অদৃষ্টের ভেদ বশতঃই হইয়া থাকে। সুতরাং (কদাচিৎ কোন উত্তমাধিকারীর শ্রবণমাত্র মুক্তি হইলেও) শ্রবণমাত্রেই যে সকলের মুক্তি হইবে, এরূপ নিয়ম নাই। ৭০।

পূর্ব্বে "প্রকৃতের্মহান্" ইত্যাদি সূত্রে কার্য্যকারণ ভাব প্রতিপাদিত হইয়াছে, কিন্তু ক্রমপ্রতিপাদিত হয় নাই, এই ভ্রম নিবারণ করিতে-

चरमोऽहङ्कारः ॥ ৭২ ॥

अनन्तरं बुद्धेः कार्य्यम् अहङ्कारः ॥ ৭২ ॥

तत्कार्य्यत्वमुत्तरेषाम् ॥ ৭৩ ॥

अहङ्कारकार्य्यत्वम् उत्तरेषां एकादशेन्द्रियाणां पञ्चतन्मात्राणाञ्च । पारम्पर्य्येण च तन्मात्रकार्य्याणामपि भूतानां तत्कार्य्यत्वमित्यर्थः ॥ ৭৩ ॥

ननु यद्येवं, प्रधानकार्य्यं कथमिति [illegible] आह—

[illegible] दर्शयति—महत्तत्त्वमिति, तस्यैव संज्ञान्तरं कथयति—बुद्धिरिति । सूत्रस्थितचिति महत्तत्त्वस्य मनोरूपत्वे हेतुं पूरयति—मननादिति, मननवृत्तिमत्त्वादित्यर्थः ॥ ৭১ ॥

इत्यनन्तरपदं साक्षादर्थकं सूत्रे चरमपदञ्च महत्तत्त्वानन्तरार्थकं, तथाच—बुद्धेः साक्षात् कार्य्यं अहङ्कारः, महत्तत्त्वानन्तर इति सूत्रार्थः ॥ ৭২ ॥

तन्मात्रेन्द्रियाणामहङ्कारानन्तरत्वप्रतिपादकं सूत्रं व्याचष्टे—अहङ्कारेत्यादिना । महाभूत-तन्मात्रानन्तरकार्य्याणि तेषामहङ्कारिकत्वञ्च दर्शयति—पारम्पर्य्येणेत्यादिना ॥ ৭৩ ॥

অর্থ—মহত্তত্ত্বই প্রকৃতির আদ্য কার্য্য, সেই মহত্তত্ত্বই বুদ্ধি, এবং মনন-কারী বুদ্ধিবৃত্তিনিবন্ধন মন বলিয়া অভিহিত হয় ॥ ৭১ ॥

বুদ্ধির সাক্ষাৎ কার্য্য অহঙ্কার মহত্তত্ত্বের অনন্তর কার্য্য ॥ ৭২ ॥

একাদশ ইন্দ্রিয় ও পঞ্চতন্মাত্র অহঙ্কারের কার্য্য । তন্মাত্রের সাক্ষাৎ কার্য্য, ভূতগণের ও পরম্পরায় অহঙ্কারের কার্য্যত্ব আছে, ইহা বলা হইয়াছে ॥ ৭৩ ॥

आद्यहेतुता तद्द्वारा पारम्पर्य्येऽप्यणुवत् ॥ ७४ ॥

यथा मृत्पिण्डकार्य्यस्य घटस्य पारम्पर्य्येऽपि परमाणुकारणता, तथा प्रकृतेरपि मूलकारणता ॥ ८४ ॥

प्रकृतिपुरुषयोर्नित्यत्वात् सृष्ट्यादौ कस्य कारणत्वमित्यत्राह—

पूर्व्वभावित्वे द्वयोरेकतरस्य हानेऽन्यतरयोगः ॥ ७५

न पूर्वभावित्वमात्रेण कारणत्वं, किन्तु अन्वयव्यतिरेकाभ्याम्। द्वयोर्मध्ये एकतरस्य पुरुषस्य कारणत्वयोग्यताहानिः अविकारित्वश्रुतेः। अतोऽन्यतरस्य प्रधानस्य कारणत्वयोगः ॥ ॥ ७५ ॥

सूत्रान्तरमवतारयितुं शङ्कते—नन्विति। एवं—अहङ्कारादीनां बुद्ध्यादिकार्य्यत्वे। सूत्रं व्याचष्टे—यथेत्यादिना। पारम्पर्य्येऽपि—साक्षादहेतुत्वेऽपि, परमाणुकारणता—द्व्यणुकादि द्वारा परमाणूनां घटकारणत्वं। मूलकारणतेति आद्यहेतुतेत्यस्य विवरणम्, अकार्य्यत्वे सति कारणत्वमिति तदर्थः। सूत्रे तद्द्वारेति महदादिद्वारेत्यर्थकम् ॥ ७४ ॥

प्रकृतिपुरुषयोरुभयोः सृष्ट्यादौ वर्त्तमानत्वाविशेषेऽपि प्रकृतेरेव जगत्कारणत्वमिति सिद्धान्तस्य प्रतिपादकं सूत्रमवतारयति—प्रकृतिपुरुषयोरित्यादिना। नित्यत्वादित्यनेन कारणत्वघटकनियतपूर्व्ववर्त्तित्वसत्त्वं सूचितम्। सूत्रतात्पर्य्यं विवृणोति—नेत्यादिना। अन्वयव्यतिरेकाभ्यामिति अन्यथासिद्धिशून्यनिष्ठनियतपूर्व्ववर्त्तित्वप्रतिपादकं, तथाचान्यथासिद्धिशून्यनिष्ठनियतपूर्व्ववर्त्तित्वेन कारणत्वमित्यर्थः। सूत्रप्रतीकव्याख्यानेन पुरुषे तदभाव-

অহঙ্কারাদি যদি বুদ্ধ্যাদির কার্য্য হয়, তবে "জগৎ প্রধানের কার্য্য" এই সিদ্ধান্তের হানি হয়, এই আশঙ্কায় বলিতেছেন—যেমন পরমাণু—মৃত্তিকাপিণ্ডের কার্য্য ঘটের সাক্ষাৎ কারণ না হইয়াও দ্ব্যণুকাদিদ্বারা পরম্পরায় কারণ হয়, সেইরূপ প্রকৃতিও বুদ্ধ্যাদির কার্য্য অহঙ্কারাদির সাক্ষাৎ কারণ না হইলেও বুদ্ধ্যাদিদ্বারা পরম্পরায় মূল কারণ হইয়া থাকে। (সুতরাং "জগৎ যে প্রধানের কার্য্য" এই সিদ্ধান্তের কোনই ক্ষতি নাই) ॥ ৭৪ ॥

প্রকৃতি এবং পুরুষ উভয়েই নিত্য, সুতরাং সৃষ্টির আদিতে বর্ত্তমান, অতএব এই উভয়ের মধ্যে কে কারণ হইবে? এই আশঙ্কায় বলিতেছেন—কেবল পূর্ব্ববর্ত্তী হইলেই কারণ হয় না, কিন্তু অন্যথাসিদ্ধত্বাদি দোষরহিত

অবিবাদাৎ পরমাণূনামেব কারণত্বমস্তু ইত্যত আহ—

পরিচ্ছিন্নত্বান্ন সর্ব্বোপাদানম্ ॥ ৭৬ ॥

যৎ পরিচ্ছিন্নং, ন তৎ সর্বোপাদানং, যথা ন তন্তুর্ঘটস্য কারণম্। তস্মাৎ পদার্থানাং পৃথক্ পৃথক্ কারণং বক্তব্যম্। এককারণত্বে চ লাঘবং স্যাদিতি ॥ ৬ ॥

আবেদয়তি—দ্বয়োরিত্যাদিনা, দ্বয়োঃ—প্রকৃতিপুরুষয়োঃ। অবিকারিত্বশ্রুতেরিতি কারণত্বযোগ্যতারাহিত্যে হেতুঃ পরিণামিন এব কারণত্বদর্শনাৎ। অপরিণামিত্বঞ্চ পুরুষস্য "সদা জ্ঞাতাশ্চিত্তবৃত্তয়স্তৎপ্রভোঃ পুরুষস্যাপরিণামিত্বা"দিতিযোগসূত্রে ব্যাখ্যাতম্। "অন্যতরয়োগ" ইত্যংশব্যাখ্যানেন প্রকৃতমুপসংহরতি—অত ইত্যাদিনা ॥ ৭৫ ॥

পরমাণূনাং জগদুপাদানত্বনিষেধকং সূত্রমবতারয়তি—অবিবাদাদিত্যাদিনা। পরিচ্ছিন্নত্বাৎ অব্যাপকত্বাৎ পরমাণুর্ন সর্ব্বেষামুপাদানকারণং ভবিতুমর্হতীতি সূত্রার্থঃ। ইমমেবার্থং দৃষ্টান্তেন দ্রঢ়য়তি—যদিত্যাদিনা। তস্মাৎ—পরিচ্ছিন্নস্য কস্যাপি সর্ব্বোপাদানত্বাসম্ভবাৎ, পৃথক্ পৃথগিতি,—পদার্থবিশেষং প্রতি পরমাণুবিশেষাঃ কারণমিত্যর্থঃ, বক্তব্যমিতি পরমাণুকারণত্ববাদিভিরিতি শেষঃ। নন্বস্তু পৃথক্ পৃথগেব কারণমিত্যাশঙ্কায়ামাহ—এককারণত্ব ইতি। একস্য প্রধানস্য কারণত্ব ইত্যর্থঃ, লাঘবমিতি বহূনাং পরমাণূনাং পৃথক্ পৃথক্ কারণত্বাপেক্ষয়েত্যাদিঃ। প্রকৃতেরেকত্বঞ্চ সাধর্ম্ম্যবৈধর্ম্ম্যসূত্রে প্রতিপাদয়িষ্যতে ॥ ৭৬ ॥

হইয়া নিয়ত পূর্ব্ববর্ত্তী হইলেই কারণ হয়। এস্থলে প্রকৃতি ও পুরুষ উভয়ের মধ্যে পুরুষে কারণত্বের যোগ্যতা নাই, যে হেতু পুরুষের অপরিণামিত্বশ্রুতি আছে, (যে পরিণামী নহে, তাহাকে কখনও কারণ হইতে দেখা যায় না) অতএব প্রধানই জগতের উপাদান কারণ ॥ ৭৫ ॥

পরমাণুর উপাদানকারণত্বেত কোনই বিবাদ নাই, সুতরাং পরমাণুই জগতের উপাদান কারণ হউক, এই আশঙ্কায় বলিতেছেন—যে বস্তু পরিচ্ছিন্ন অর্থাৎ কোন স্থানে থাকে ও কোন স্থানে থাকে না, সে সকলের কারণ হইতে পারে না, যেমন তন্তু (পটের কারণ হইলেও) ঘটের কারণ হয় না, অতএব পরমাণুকারণত্ববাদীদের একবিধ কার্য্যের প্রতি একবিধ পরমাণুর পৃথক্ পৃথক্ ভাবে কারণত্ব স্বীকার করিতে হইবে; তদপেক্ষা এক প্রকৃতিকে

अत्र श्रुतिं दर्शयति—

तदुत्पत्तिश्रुतेश्च ॥ ७७ ॥

युक्तिस्तावत् प्रोक्ता । श्रुतिरपि प्रधानस्य जगत्कारणतामाह 'प्रधानाज्जगज्जायते' इति ॥ ७७ ॥

प्रागसतो घटस्य भवनं दृश्यते । नियतपूर्वभावित्वात् प्रागभावः कारणमस्तु इत्यत आह—

नावस्तुनो वस्तुसिद्धिः ॥ ७८ ॥

नाभावात् भावोत्पत्तिः । कारणरूपं कार्य्यं दृश्यत इति जगतोऽपि अवस्तुत्वम् ॥ ७८ ॥

सूत्रान्तरमवतारयति—अत्रेति । प्रधानस्य जगत्कारणत्व इत्यर्थः । न केवलं पूर्व्वोक्तयुक्तेः—अपितु प्रधानात् उत्पत्तेः जगत उत्पादस्य श्रुतेश्च प्रधानस्यैव जगत्कारणत्वमिति सूत्रार्थः ॥७७॥

प्रकृतेरेव जगदुपादानत्वमिति सिद्धान्तसमर्थनाय प्रागभावकारणकत्ववादस्य दूषकं सूत्रमवतारयति—प्रागसत इत्यादिना । प्रागसत इति सावधारणं, तथाच प्रागसतः—प्रागभावप्रतियोगिन एवेत्यर्थः । भवनं उत्पत्तिः । एवञ्च दृश्यत इत्यन्तांश, प्रागभावस्य नियतपूर्व्वभावित्वसूचनार्थः । नाभावादिति नावस्तुन इत्यस्य विवरणम्, न प्रागभावादित्यर्थकं, भावोत्पत्तिरिति वस्तुसिद्धिरित्यस्य विवरणम्, अत्र हेतुं पूरयति—कारणेत्यादिना । अवस्तुत्वमिति स्यादिति शेषः, तथाच जगतामवस्तुत्वापत्त्यैव नावस्तुनः प्रागभावस्य जगदुपादानत्वं सम्भवतीति प्रधानकारणत्ववादिनामाशयः ॥ ७८ ॥

সকল বস্তুর কারণ স্বীকার করিলেই লাঘব হয়, (সুতরাং প্রকৃতিই জগতের উপাদানকারণ, পরমাণু নহে) ॥ ৭৬ ॥

প্রধান যে জগতের কারণ, এ বিষয়ে যুক্তি বলা হইয়াছে—"প্রধান হইতে জগৎ উৎপন্ন হয়" এতদর্থক শ্রুতিও প্রধানের জগৎকারণত্ব বলিতেছেন ॥ ৭৭ ॥

উৎপত্তির পূর্ব্বে যে ঘট থাকে না, তাহারই উৎপত্তি হইতে দেখা যায়, সুতরাং নিয়ত পূর্ব্ববর্ত্তী প্রাগভাবই জগতের কারণ হউক, এই আশঙ্কায় বলিতেছেন,—অবস্তু প্রাগভাব হইতে বস্তুর উৎপত্তি হইতে পারে না, কারণ

ভবতু জগদপি অবস্তু, কা নো হানিঃ? ইত্যত আহ—

অবাধাদদুষ্টকারণজন্যত্বাচ্চ নাবস্তুত্বম্ ॥ ৭৯ ॥

শুক্তৌ রজতজ্ঞানে 'নেদং রজতম্' ইতি জ্ঞানাৎ রজতবাধঃ। ন চাত্র 'নেদং ভাবরূপং জগৎ' ইতি কস্যাপি জ্ঞানমিতি, যেন ভাবরূপবাধঃ স্যাৎ। দুষ্টকারণজন্যত্বাচ্চ মিথ্যেতি অবগম্যতে, যথা কামলাদিদোষাৎ পীতশঙ্খজ্ঞানং কস্যচিৎ। অত্র চ জগজ্জ্ঞানস্য সর্বেষাং সর্বদা সত্যত্বাচ্চ ন দোষোঽস্তি। তস্মাৎ নাবস্তু জগদিতি ॥ ৭৯ ॥

জগতামবস্তুত্বপ্রতিষেধকং সূত্রং প্রশ্নপূর্ব্বকমবতারয়তি—ভবত্বিত্যাদিনা। অবাধাদিতি হেতুং ব্যতিরেকদৃষ্টান্তপ্রদর্শনেন বিশদয়তি—শুক্তাবিত্যাদিনা। রজতজ্ঞান ইতি দোষবশাজ্জাত ইত্যর্থঃ। ননু সত্ত্বেন প্রতীয়মানস্যাপি শঙ্খে পীতত্বস্য যথাঽসত্যত্বং, তথৈব সত্ত্বেন প্রতীয়মানস্যাপি জগতি বস্তুত্বস্যাসত্যত্বং স্যাদিতি শঙ্কানিবারকং সূত্রীয়ং হেত্বন্তরং বিশদয়তি—দুষ্টে-দিনা। সত্যত্বাৎ—অবাধিতত্বাৎ। প্রকৃতমুপসংহরতি—তস্মাদিতি,—"ভাবরূপং জগদিতি" জ্ঞানস্য কদাপ্যবাধিতত্বেন দোষাজন্যত্বাদিত্যর্থঃ। ন চ "বাচারম্ভণং বিকারো নামধেয়ং মৃত্তিকেত্যেব সত্য"মিত্যাদি শ্রুতিভিরেব "ভাবরূপং জগদিতি জ্ঞানস্য বাধসম্ভবাদ্দোষজন্যত্বমিতি বচনীয়ম্, তাদৃশশ্রুতীনাং কার্য্যস্য স্বকারণাপেক্ষকাস্থৈর্য্যরূপাসত্ত্বস্যৈব প্রতিপাদকত্বাৎ, অন্যথা "মৃত্তিকেত্যেব সত্য" মিত্যংশাসিদ্ধেঃ সৃষ্ট্যাদিবাক্যবিরোধাচ্চ। "নেতি নেতী"ত্যাদিবাক্যান্যপি বিবেকপরাণ্যেব, ন তু প্রপঞ্চনিষেধপরাণীতি—মন্তব্যম্ ॥ ৭৯ ॥

কারণের অনুরূপই কার্য্য হইতে দেখা যায় বিধায় প্রাগভাব যদি জগতের কারণ হয়, তবে জগতেরও অবস্তুত্ব হইতে পারে ॥ ৭৮ ॥

হউক বা জগতই অবস্তু, আমাদের হানি কি? এই আশঙ্কায় বলিতেছেন —কোন দোষবশতঃ যদি শুক্তিতে রজতজ্ঞান হয়, তবে সেই দোষের নিবারণে "ইহা রজত না" এইরূপ জ্ঞান হইলেই রজতের বাধ হয়, কিন্তু এস্থলে কাহারও "এইজগৎ ভাবরূপ নহে" এইরূপ জ্ঞান হয় না, যেজন্য জগতের ভাবস্বরূপত্বের বাধ হইবে। দুষ্ট কারণজন্য হইলেও জ্ঞান মিথ্যা বলিয়া প্রতিপন্ন হয়, যেমন কামলাদি দোষ বশতঃ কাহারও শঙ্খে পীতত্ব জ্ঞান, কিন্তু এস্থলে কোনরূপ দোষ নাই, যে হেতু সকলেরই বস্তুরূপে জগৎজ্ঞান

नन्वभावः कारणमस्तु, तथापि अभावत्वं न जगतो भविष्यति, तत्राह—

भावे तद्योगेन तत्सिद्धिरभावे तदभावात् कुतस्तरां तत्सिद्धिः ॥ ८० ॥

भावे उपादानकारणे 'कारणगुणाः कार्य्यम्' इति तद्योगेन भावयोगेन तत्सिद्धिः कार्य्यस्य वस्तुत्वसिद्धिः । अभावे उपादानकारणे तदभावात् जगदभावस्य अवश्यम्भावात् कुतस्तत्सिद्धिरिति, अभावकारणतास्य अभावरूपत्वात् ॥ ८० ॥

कर्म्मैव जगत्कारणमस्तु, किं प्रधानकल्पनया ? इत्यत आह—

न कर्म्मण उपादानत्वायोगात् ॥ ८१ ॥

निमित्तकारणमदृष्टमस्तु, धर्माधर्मयोस्तु उपादानकारणत्वं न क्वचित् दृष्टम् । प्रकृतिपुरुषविवेकदर्शनात् मुक्तिरिति प्रकृतिस्वीकारः ॥ ८१ ॥

सूत्रान्तरमवतारयितुं शङ्कते—नन्वित्यादिना । जगदभावस्य—जगतोऽभावत्वस्य, तत्सिद्धिः, वस्तुत्वसिद्धिः, अभावरूपत्वात्—अभावरूपत्वौचित्यात्, तथाच जगतो भावत्वादेव नाभावोपादानकत्वमिति भावः ॥ ८० ॥

कर्म्मण उपादानत्वप्रतिषेधकं सूत्रं प्रश्नपूर्व्वकमवतारयति—कर्म्मैवेत्यादिना । सूत्रे येति

সর্ব্বদা অবাধিত। অতএব বস্তুরূপে জগৎ জ্ঞানের অবাধিতত্বনিবন্ধন জগৎ অবস্তু নহে ॥ ৭৯ ॥

অভাবই জগতের কারণ হউক, তথাপিও জগৎ অভাবস্বরূপ হইবে না, এই আশঙ্কায় বলিতেছেন—ভাব যদি উপাদান কারণ হয়, তবেই "কারণগুণ কার্য্যসংক্রান্ত হয়" এই নিয়ম অনুসারে ভাবযোগে কার্য্যের বস্তুত্ব সিদ্ধি হইতে পারে। কিন্তু অভাব যদি উপাদান কারণ হয়, তবে উক্ত নিয়মানুসারে জগতের অভাবরূপত্ব হওয়ায় অবশ্যম্ভাবনিবন্ধন কি প্রকারে জগতের বস্তুত্ব সিদ্ধি হইবে? যে হেতু যাহার কারণ অভাব, তাহার অভাবস্বরূপ হওয়াই উচিত ॥ ৮০ ॥

বেদোক্তার্থানুষ্ঠানাদেব মুক্তিসম্ভবাৎ কিং প্রকৃত্যা ইত্যত আহ—

নানুশ্রবিকাদপি তৎসিদ্ধিঃ, সাধ্যত্বেনাবৃত্তিযোগাদপুরুষার্থত্বম্ ॥ ৮২ ॥

বেদাদনুশ্রূয়তে ইতি আনুশ্রবিকো যাগাদিঃ। তস্মাদপি ন মোক্ষসিদ্ধিঃ, সাধ্যত্বেনাবৃত্তিযোগাৎ—কার্য্যত্বেন অনিত্যত্বাৎ মুক্তস্য পুনঃসংসারানুবৃত্তিযোগঃ। তস্মাৎ অপুরুষার্থত্বম্ ॥ ৮২ ॥

কর্ম্মণোঽপি বস্তুসিদ্ধিরিতি শেষঃ। তত্র হেতুমাহ—কর্ম্মণ উপাদানত্বাযোগাদিতি,—উপাদানত্বাযোগমেব বিশদয়তি,—নিমিত্তেত্যাদিনা। ন দৃষ্টমিতি, তথাচ দৃষ্টানুসারিত্বাৎ কল্পনায়াঃ কুত্রাপ্যুপাদানত্বেনাদৃষ্টচরে কর্ম্মণি জগদুপাদানত্বকল্পনং সর্ব্বথৈবাসমীচীনমিতি ভাবঃ। ননু প্রকৃতেরেবাভাবাৎ কথং তস্যা জগদুপাদানত্বমিত্যাশঙ্কায়াং প্রকৃতিং সাধয়তি—প্রকৃতীত্যাদিনা ॥৮১॥

সূত্রান্তরমবতারয়তি—বেদেত্যাদিনা। সূত্রং ব্যাচষ্টে—বেদাদিত্যাদিনা। তস্মাদপীত্যপি-শব্দেন দৃষ্টসমুচ্চয়ঃ, তথা চ—দৃষ্টাদানুশ্রবিকাদপি ন মোক্ষসিদ্ধিরিত্যর্থঃ। অত্র হেতুমাহ—সাধ্যত্বেনেত্যাদিনা। উপসংহরতি—তস্মাদিতি। যাগাদিসাধ্যস্যানিত্যত্বাদিত্যর্থঃ, অপুরুষার্থত্বমিতি আত্যন্তিকপুরুষার্থত্বাভাব ইতি ভাবঃ, অন্যথা যাগাদিসাধ্যস্য কথঞ্চিদপি পুরুষার্থত্বাভাবে পুরুষার্থাসাধকত্বেন যাগাদীনামননুষ্ঠানাপত্তেঃ ॥ ৮২ ॥

কর্ম্মই জগতের কারণ হউক, প্রধান কল্পনার প্রয়োজন কি? এই আশঙ্কায় বলিতেছেন—ধর্ম্মাধর্ম্মরূপকর্ম্ম নিমিত্ত কারণ হইয়া থাকে, কিন্তু তাহাদের উপাদানকারণত্ব কোথাও পরিদৃষ্ট হয় নাই, (সুতরাং উপাদানরূপে অপরিদৃষ্ট অদৃষ্টের জগদুপাদানত্বকল্পনা কখনও সমীচীন নহে, যে হেতু দৃষ্টানুসারেই কল্পনা হইয়া থাকে।) প্রকৃতিই নাই, কিরূপে তাহার উপাদান-কারণত্ব হইবে? এই আশঙ্কাও হইতে পারে না, কারণ প্রকৃতি পুরুষের ভেদ দর্শন হইতে মুক্তির বিধানদ্বারাই প্রকৃতি স্বীকার আবশ্যক ॥ ৮১ ॥

বেদোক্ত যাগাদি অনুষ্ঠান হইতেই ত মুক্তির সম্ভব হইতে পারে, অযথা প্রকৃতিস্বীকারে প্রয়োজন কি। এই আশঙ্কায় বলিতেছেন—যে সব যাগাদি-কার্য্য বেদে শ্রুত আছে, তাহার নাম আনুশ্রবিক, সেই আনুশ্রবিক কার্য্য হইতেও মোক্ষসিদ্ধি হইতে পারে না, কারণ মোক্ষ যাগাদিসাধ্য হইলে

पुरुषार्थत्वं दर्शयति—

तत्र प्राप्तविवेकस्यानावृत्तिश्रुतिः ॥ ८३ ॥

तत्र—प्रकृतिपुरुषयोः प्राप्तविवेकस्य विवेकज्ञानात् अनावृत्ति-श्रुतिः । 'न स पुनरावर्त्तते' इति श्रुतिः ॥ ८३ ॥

विपक्षे दोषमाह—

दुःखाद् दुःखं, जलाभिषेकवन्न जाड्यविमोकः ॥८४

यदि कर्मसाध्यो मोक्षो भवेत्, कर्मणो दुःखबहुलत्वात् तत् कार्य्यो मोक्षोऽपि दुःखबहुलः स्यात् । अन्ततः क्षयित्वेनापि दुःखं स्यात्

सूत्रान्तरमवतारयितुमाह—पुरुषार्थत्वमिति । आत्यन्तिकपुरुषार्थत्वमित्यर्थः, प्रकृतिपुरुष-विवेकदर्शनसाध्याया मुक्तेरिति शेषः । सूत्रीयं तत्रेतिपदं व्याचष्टे—प्रकृतिपुरुषयोरिति । प्राप्तविवेकस्य—लब्धभेदज्ञानस्य । अनावृत्तौ छान्दोग्याष्टमाध्यायश्रुतिमुदाहरति—नेती-त्यादिना ॥ ८३ ॥

सूत्रान्तरमवतारयति—विपक्ष इत्यादिना । विपक्षे—मोक्षस्य दुःखप्रबलकर्म्मसाध्यत्वे । "दुःखादुःख" मित्यंशस्य तात्पर्य्यं विवृणोति—यदीत्यादिना । कार्य्यकारणयोस्तुल्यरूपत्वे विप्र-तिपन्नं प्रत्याह—अन्तत इति । कर्म्मसाध्यत्वेन दुःखरूपत्वाभावेऽपीत्यर्थः । जलेत्याद्यंशस्य तात्पर्य्यं विवृणोति—नहीत्यादिना । तथाच—"दुःखात्—दुःखबहुलकर्म्मणः, यदि मोक्षोऽपी

কার্য্যত্ব নিবন্ধন অনিত্য হইয়া পড়ে, অনিত্যত্ব হইলে মুক্ত পুরুষেরও পুনরায় সংসারানুসরণপ্রসক্তি হয়। অতএব যাগাদি সাধ্যের আত্যন্তিক পুরুষার্থত্ব হইতে পারে না ॥ ৮২ ॥

প্রকৃতিপুরুষের বিবেকদর্শনজন্য মোক্ষের আত্যন্তিক পুরুষার্থত্ব দেখা-ইতেছেন—যে প্রকৃতিপুরুষের ভেদদর্শন করিয়াছে, তাহার যে আর সংসারে আসিতে হইবে না, তদ্বিষয়ে শ্রুতি আছে যথা—"যে বিবেক লাভ করিয়াছে সে আর সংসারে আসে না" (অতএব প্রকৃতিপুরুষের বিবেক হইতেই মুক্তি হয় এবং তাহাই আত্যন্তিক পুরুষার্থ) ॥ ৮৩ ॥

মোক্ষের কর্ম্মসাধ্যত্বপক্ষে দোষ দেখাইতেছেন—মোক্ষ যদি কর্ম্মসাধ্য হয়, তবে কর্ম্মের দুঃখবহুলত্বনিবন্ধন তৎকার্য্য মোক্ষ ও দুঃখবহুল হইতে পারে।

नहि जाड्यार्त्तस्य जाड्यविमोक्षो जलाभिषेकात् प्रत्युत जाड्य-मेवेति ॥ ८४ ॥

दुःखस्य कर्मसाध्यत्वमप्रयोजकं, किन्तु काम्यकर्मसाध्यत्वं हेतुः, निष्कामकर्मणो मोक्षसाधनत्वात्। तथा च श्रुतिः—

कर्मभिर्मृत्युमृषयो निषेदुः प्रजावन्तो द्रविणमीहमानाः। अथापरे ऋषयो मनीषिणः परं कर्मभ्योऽमृतत्वमानशुरित्यत आह—

काम्याकाम्येऽपि साध्यत्वाविशेषात् ॥ ८५ ॥

मा भूत् निष्कामकर्मसाध्यं दुःखं, तथापि काम्यात् निष्कामकर्म-विशेषेऽपि मोक्षस्य कर्मसाध्यत्वमविशिष्टम्। साध्यत्वात् क्षयित्वेन

म्रियेत तदेति शेषः। दुःखं—मोक्षोऽपि दुःखबहुल एव स्यादिति शेषः, ननु दुःखनिवृत्तिरिति भावः जलाभिषेकवत्—जाड्यार्त्तस्य जलाभिषेकादयथा—(जाड्यमेव) न जाड्यविमोकः—न जाड्यनिवृत्ति"रिति सूत्रार्थः ॥ ८४ ॥

रागद्वेषादिदोषवशादनुष्ठितानां काम्यकर्म्मणां दुःखजनकत्वेऽपि निष्कामकर्म्मणां तदभावा-न्मोक्षजनकत्वं स्यादित्याशङ्काया निरासकं सूत्रमवतारयति—दुःखस्येत्यादिना। "द्रविणं धनं ईहमानाः प्रार्थयमानाः प्रजावन्तः सन्तानिनः (आभ्यां विशेषणाभ्यां काम्यकर्म्मकारित्वं सूचितम्) ऋषयः केचिन्मुनयः कर्म्मभिः काम्यकर्म्मभिः मृत्युं मरणं निषेदुः प्रापुः। अथ अपरे मनीषिणः सद्विवेका ऋषयः कर्म्मभ्यः निष्कामकर्म्मभ्यः परं मुख्यं अमृतत्वं मरणाभावं मोक्षमिति यावत्, आनशुः लेभिरे।" इति श्रुत्यर्थः।

सूत्रतात्पर्यं विवृणोति—माभूदित्यादिना। निष्कामकर्म्मविशेषेऽपि निष्कामकर्म्मणो

অন্ততঃ বিনাশী বলিয়া ও দুঃখ হইতে পারে। যেমন জাড্যপীড়িত ব্যক্তিকে জলাভিষেক করিলে তাহার জাড্যনিবৃত্তি হয় না, পরন্তু জাড্যই বৃদ্ধি পায়, সেইরূপ মোক্ষ হইতেও দুঃখের নিবৃত্তি না হইয়া বরং বৃদ্ধিই হইতে পারে ॥ ৮৪ ॥

কর্ম্মসাধ্যত্বই যে দুঃখের প্রযোজক, তাহা নহে, পরন্তু কাম্যকর্ম্মসাধ্যত্বই দুঃখের হেতু, যে হেতু নিষ্কাম কর্ম্ম হইতে মোক্ষশ্রুতি আছে, যথা—"সন্তান শালী ধনার্থী ঋষিগণ কাম্যকর্ম্ম দ্বারা মৃত্যুলাভ করিয়াছেন। অপর সদ্বিবেচক ঋষি সকল নিষ্কাম কর্ম্ম হইতে পরম অমৃতত্ব অর্থাৎ মুক্তিলাভ করিয়াছেন।"

पुनरपि दुःखं स्यात् । निष्कामकर्मणो मोक्षसाधनत्वश्रुतिश्च ज्ञानार्था, ज्ञानाच्च मोक्ष इति पारम्पर्येण मोक्षसाधनत्वम् ॥ ८५ ॥

यदि प्रकृतिपुरुषविवेकज्ञानात् मोक्षो भवेत्, तथापि क्षयित्वात् पुनरपि संसार इति वादिप्रतिवादिनोः तुल्यत्वमिति, तत्राह—

निजमुक्तस्य बन्धध्वंसमात्रं परं, न समानत्वम् ॥ ८६ ॥

निजमुक्तस्य स्वभावमुक्तस्य बन्धध्वंसः—बन्धोऽविवेकः, तद्वि-

दुःखाजनकत्वरूपविशेषेऽपि, "कर्मसाध्यत्वमविशिष्ट"मित्यस्य प्रतिपाद्यं दर्शयति—साध्यत्वादित्यादिना, क्षयित्वेन—निष्कामकर्मसाध्यस्यापि मोक्षस्य विनाशित्वेन, पुनरपि दुःखं स्यादिति निष्कामकर्मसाध्यत्वेन मोक्षस्य दुःखरूपत्वाभावेऽपि जन्यत्वेन तद्विनाशे पुनर्दुःखोत्पत्तिर्दुष्परिहरैव स्यादिति भावः । नन्वेवं निष्कामत्वश्रुतेः का गतिरित्यत आह—निष्कामेत्यादि, ज्ञानार्था—ज्ञानप्रयोजनिका ज्ञानद्वारा मुक्तिप्रतिपादिकेति यावत् । स्पष्टयति—ज्ञानादित्यादिना ॥ ८५ ॥

सूत्रान्तरमवतारयति—यदीत्यादिना । वादिप्रतिवादिनोरिति, मोक्षस्य प्रकृतिपुरुषविवेकजन्यत्ववादिनिष्कामकर्मजन्यत्ववादिनोरित्यर्थः । सूत्रं व्याचष्टे—निजेत्यादिना । बन्धध्वंसपदार्थं व्याख्यातुं बन्धपदार्थं व्याचष्टे—बन्धोऽविवेक इति । तद्विरोधेन—अविवेका-

এই আশঙ্কায় বলিতেছেন—নিষ্কাম কর্ম্মসাধ্য বলিয়া মোক্ষ দুঃখবহুল না হইলেও কাম্য কর্ম্ম হইতে নিষ্কামকর্ম্মের দুঃখের অজনকত্বরূপ বিশেষ থাকিলেও মোক্ষে যে কর্ম্মসাধ্যত্ব থাকিবে, তাহাতে কোনও বিশেষত্ব নাই. মোক্ষসাধ্য হইলেই তাহার বিনাশ হইবে, বিনাশ হইলেই পুনরায় দুঃখ অবশ্যম্ভাবী। পূর্ব্বে যে নিষ্কাম কর্ম্মের মোক্ষসাধনত্বশ্রুতি প্রদর্শিত হইয়াছে, তদ্দ্বারাও নিষ্কাম কর্ম্মের পরম্পরামুক্তিসাধকত্বই প্রতিপাদিত হইয়াছে, অর্থাৎ নিষ্কাম কর্ম্ম হইতে তত্ত্বজ্ঞান হয় ও তত্ত্বজ্ঞান হইতে মুক্তি হয়। সুতরাং নিষ্কাম কর্ম্মও সাক্ষাৎ মুক্তির সাধক নহে ॥ ৮৫ ॥

যদি প্রকৃতি পুরুষের বিবেক হইতে মুক্তি হয়, তাহা হইলেও মুক্তির বিনাশিত্বনিবন্ধন পুনরায় সংসারের আপত্তি হইতে পারে, সুতরাং এই আপত্তিবাদী ও প্রতিবাদী (অর্থাৎ মোক্ষের নিষ্কাম কর্ম্মসাধ্যত্ববাদী ও প্রকৃতিপুরুষবিবেকসাধ্যত্ববাদী) উভয়ের পক্ষই সমান, এই আশঙ্কা

रोधेन अविवेकध्वंसो नाशः। अविवेकनाशस्य च प्रध्वंसत्वात् कुतः संसारस्य पुनरावर्त्तनमिति न समानत्वम् ॥ ८६ ॥

पञ्चविंशतिर्गण इत्युक्तं, तत्सिद्धिश्च न प्रमाणेन विनेति। तद्दर्शयति—

द्वयोरेकतरस्य वाप्यसन्निकृष्टार्थपरिच्छित्तिः प्रमा। तत्साधकतमं यत् तत् ॥ ८७ ॥

द्वयोरिति इन्द्रियार्थयोर्विद्यमानयोः प्रत्यक्षे। 'एकतरस्य वापि' इति विद्यमानस्य लिङ्गस्य शब्दस्य वानुमाने शब्दे च। असन्नि·

विरोधेन विवेकेनेति यावत्, अत्राविवेकविरोधितया विवेकस्योपन्यासस्तदविरोधिना कर्म्मादिना अविवेकविनाशासम्भवद्योतनार्थः, प्रध्वंसरूपत्वादिति च विवेकजन्यस्याप्यविनाशरूपमोक्षस्याविनाशित्वसूचनार्थं, तथाच मोक्षस्य निष्कामकर्म्मजन्यत्ववादिभिस्ताहृशध्वंसस्वरूपत्वा... सम्भवादविनाशित्वप्रतिपादनमशक्यमिति न समानत्वमुभयोरिति मन्तव्यम्। सूत्रे मात्रपदेन बन्धध्वंसातिरिक्तव्यवच्छेदः, तथाच बन्धध्वंस एव परं—आत्यन्तिकं फलं विवेकज्ञानस्येत्यर्थः ॥ ८६ ॥

प्रमाणलक्षणप्रतिपादकं सूत्रमवतारयति—पञ्चेत्यादिना। गणः—समुदायः, तत्सिद्धिः—प्रकृत्यादिपञ्चविंशतितत्त्वसिद्धिः, तत—प्रमाणम्। सूत्रे द्वयोरेकतरस्य वापीत्यनन्तरं "प्रमायां उपयोग" इति पूरणीयम्, तत्र कस्यां प्रमायां द्वयोः, कस्यां वा एकतरस्योपयोग इत्याकाङ्क्षायां व्याख्यानतो वृत्तौ विशिष्य दर्शयति—द्वयोरित्यादिना। इन्द्रियार्थयोरपि प्रत्यक्षकाले विद्यमानयोरेवोपयोगित्वात् पूरयति—विद्यमानयोरिति, प्रत्यक्षे—लौकिकप्रत्यक्षप्रमायां।

বলিতেছেন—পুরুষ স্বভাবতঃই মুক্ত, তবে প্রকৃতি পুরুষের বিবেক হইতে অবিবেকের নাশ হয় মাত্র। সেই নাশও প্রধ্বংসস্বরূপ বিধেয়, তাহার বিনাশ নাই, সুতরাং কিরূপে পুনরায় সংসারের আপত্তি হইবে? অতএব উভয় পক্ষের তুল্যতা হইতে পারে না। এ স্থলে ইহাও জ্ঞাতব্য যে নিষ্কাম কর্ম্ম হইতে অবিবেকের ধ্বংস স্বীকার করা যায় না, কারণ তাহাদের ...নও বিরোধিতা নাই ॥ ৮৬ ॥

প্রকৃতি পুরুষ প্রভৃতি পঞ্চবিংশতি তত্ত্বের কথা বলা হইয়াছে, কিন্তু

न्नष्टार्थपरिच्छित्तिः, इति अपरिच्छिन्नार्थपरिच्छित्तिः प्रमा प्रमितिः फलम् । एतेनानधिगतार्थगन्तृ प्रमाणमित्युक्तम् । प्रमासाधकतमं यत् तत् प्रमाणमिति प्रमाणसामान्यलक्षणम् ॥ ८७ ॥

अतीतानागतविषययोरप्यनुमितिशाब्दबोधोदयादनुमितिकाले शाब्दबोधकाले च विषयसत्त्वं नापेक्षितमिति तत्रैकतरस्योपयोगमाह—एकतरस्य वापीतीत्यादिना। लिङ्गस्येति ज्ञायमानलिङ्गस्य करणत्वमताभिप्रायेणोक्तं, वस्तुतस्तु लिङ्गज्ञानस्यैव वक्तव्यं, अन्यथा—अतीतानागत लिङ्गाभ्यामनुमित्यनुदयापत्तेः। अनुमाने—अनुमितौ, शब्दे—शाब्दबोधे। तथाच प्रत्यक्षप्रमायां विद्यमानयोरिन्द्रियार्थयोः अनुमितौ विद्यमानस्य लिङ्गज्ञानस्य शाब्दबोधे च विद्यमानस्य शब्दस्योपयोगित्वमिति निर्गलितार्थः। एतच्च वस्तुगतिमनुरुध्योक्तं, न तु प्रमाणस्वरूपनिरूपकत्वेन वैयर्थ्यादिति मन्तव्यम्।

प्रमास्वरूपे निरूपित एव तत्करणतया प्रमाणनिरूपणं सुघटमित्यादौ प्रमास्वरूपमेव सूत्रे निरूपयति—असन्निकृष्टार्थपरिच्छित्तिरिति। एतदेव वृत्तिकारः स्पष्टयति—अपरिच्छिन्नार्थ-प[illegible]त्तिरिति। अपरिच्छिन्नस्य—अनधिगतस्य अर्थस्य—वस्तुनः परिच्छित्तिः—अवधारणमिति तदर्थः, तथाचापरिच्छिन्नेत्यनेन स्मृतेः, अर्थेत्यनेन भ्रमस्य, परिच्छित्तिरित्यनेन च संशयस्य व्युदासः। नन्वेवं "घटो घट" इत्यादिधारावाहिकप्रत्यक्षस्थले द्वितीयादिप्रत्यक्षाणामधिगतार्थविषयकत्वेन प्रमात्वानुपपत्तिरिति चेन्न धारावाहिकघटादिप्रत्यक्षस्थले यावद्विरुद्धपटादिविषयाकारा चित्तवृत्तिर्नोदेति, तावद्घटादिविषयकं प्रत्यक्षमेकमेवेति द्वितीयादिप्रत्यक्षाभावेन तत्राव्याप्तेराशङ्काया अयोगात्। तथाचोक्तं वेदान्तपरिभाषाकारेण—"सिद्धान्ते धारावाहिकबुद्धिस्थले न ज्ञानभेदः, किन्तु यावद्घटस्फुरणं तावद्घटाकारान्तःकरणवृत्तिरेकैव, नतु नाना वृत्तेः स्वविरोधिवृत्त्युत्पत्तिपर्यन्तं स्थायित्वाभ्युपगमादिति। शब्दशक्तिप्रकाशिकाकारस्तु—"यज्जातीयविशिष्टज्ञानत्वावच्छेदेन समानाकारकनिश्चयोत्तरत्वं तत्त्वं तज्जातीयान्यथार्थज्ञानस्यैवागृहीतग्राहित्वेन प्रमात्वमङ्गीकृत्य धारावाहिकप्रत्यक्षस्थले द्वितीयादिप्रत्यक्षे समानाकारकनिश्चयोत्तरत्वस्य सत्त्वेऽपि प्रत्यक्षसामान्ये तदसत्त्वात् स्मृतिसामान्ये तत्सत्त्वाच्चानिरुक्तद्वितीयादिप्रत्यक्षेऽव्याप्तिं स्मृतावतिव्याप्तिञ्च निवारितवानित्यनुसन्धेयम्।

[illegible] ব্যতিরেকে তাহাদের সিদ্ধি হইতে পারে না অতএব প্রমাণ বলিতেছেন—

প্রত্যক্ষে বিদ্যমান ইন্দ্রিয় ও অর্থের অনুমিতিতে বিদ্যমান লিঙ্গজ্ঞানের এবং শাব্দবোধে বিদ্যমান শব্দের আবশ্যকতা আছে, অর্থাৎ ইহারা বিদ্যমান

कति प्रमाणानीत्यत आह—

त्रिविधं प्रमाणम्। तत्सिद्धौ सर्वसिद्धेर्नाधिक्यसिद्धिः॥ ৮৮॥

प्रत्यक्षानुमानशब्दाः प्रमाणानीति। किमुपमानार्थापत्त्यभावसम्भवैतिह्यानि न स्युरिति? अत्रोक्तं 'तत्सिद्धौ' इत्यादि। प्रमेय-

फलितमाह—एतेनेत्यादिना। एतेन—अनधिगतवस्तुनिश्चयस्य प्रमात्वेन, अननुभूतार्थगन्तृ—अननुभूतस्य वस्तुनो निश्चायकं, प्रमाणं—प्रमाणपदप्रतिपाद्यं, उक्तं—सूत्रकारेण सूचितम्। तथाच स्मृतिभ्रान्तिसंशयगमकानि न प्रमाणपदप्रतिपाद्यानीति भावः। सूत्रीयं तत्साधकतममिति पदं प्रमाणलक्षणपरतया व्याचष्टे—प्रमेत्यादिना। प्रमाणसामान्यलक्षणमिति तादात्म्येन प्रमाणसामान्यस्य लक्षणमित्यर्थः। तथाच न लक्षणस्य लक्ष्यासत्त्वमिति विभावनीयम्॥ ৮৭॥

सन्ति प्रमाणे संख्याविप्रतिपत्तयः, यथा—

"प्रत्यक्षमेकं चार्व्वाकाः कणादसुगतौ पुनः।
अनुमानञ्च तच्चापि सांख्याः शब्दञ्च ते उभे॥
न्यायैकदेशिनोऽप्येवमुपमानञ्च केचन।
अर्थापत्त्या सहितानि चत्वार्य्याहुः प्रभाकराः॥
अभावषष्ठान्येतानि भाट्टा वेदान्तिनस्तथा।
सम्भवैतिह्ययुक्तानि तानि पौराणिका जगुः॥" इति,

तस्मात् संख्याविप्रतिपत्तिनिरासकं सूत्रांशमवतारयति—कतीत्यादिना। तिस्रो विधाः प्रकारा यस्य तत् त्रिविधं प्रमाणं, न न्यूनं नाप्यधिकमित्यर्थः। विज्ञानभिक्षुस्तु त्रिविधं प्रमाणमित्यंशं पूर्व्वसूत्रघटकमङ्गीकृत्य व्याख्यातवान्। तत्त्रैविध्यमेव नामनिर्द्देशेन विशदयति—प्रत्यक्षेत्यादिना। आधिक्यप्रतिषेधहेतुभूतस्योपमानादीनां प्रत्यक्षादन्तर्भावस्य प्रदर्शकं सूत्रोत्तरांशमवतारयितुं

না থাকিলে প্রত্যক্ষাদি প্রমার উৎপত্তি হয় না। পূর্ব্বানুভূত বস্তুর নির্ণয়ের নাম প্রমাণরূপ ফল, সুতরাং পূর্ব্বানুভূত বস্তুর নিশ্চয় প্রমাণ পদের প্রতিপাদ্য যে প্রমার প্রকৃষ্টসাধক অর্থাৎ করণ, সেই প্রমাণ, ইহাই প্রমাণসামান্যের লক্ষণ॥ ৮৭॥

প্রমাণ কত প্রকার? এই প্রশ্নে বলিতেছেন—প্রত্যক্ষ, অনুমান ও শাব্দ এই তিন প্রকার প্রমাণ। উপমান, অর্থাপত্তি, অভাব, সম্ভব ও ঐতিহ্য কি

व्यवस्थार्थं प्रमाणस्वीकारः, त्रिविधप्रमाणसिद्धौ सर्वप्रमाणानां प्रमेयव्यवस्थासिद्धेर्नाधिक्यसिद्धिः पृथक्प्रमाणत्वेन, त्रिविधप्रमाणेषु एषामन्तर्भावादिति । इन्द्रियार्थसन्निकर्षान्वयव्यतिरेकादिना यथायथं प्रत्यक्षादिषु सूरिभिरन्तर्भावितत्वात् केवलमधिकः संज्ञाभेदः कृत इति नाधिकत्वेन प्रमाणसिद्धिः ॥ ८८ ॥

पृच्छति—किमित्यादिना । उपमानार्थापत्त्यभावसम्भवैतिह्यानीतिवादिभिः पृथक्प्रमाणत्वेनाभ्युपगतानीत्यर्थः, न स्युरिति प्रमाणानानीत्यादिः । त्रिविधप्रमाणसिद्धाविति तत्सिद्धावित्यस्य विवरणम्, त्रिविधानां प्रत्यक्षानुमानशब्दानां प्रमाणानां सिद्धावित्यर्थकं सर्व्वप्रमाणानां प्रमेयव्यवस्थासिद्धिरिति च । सर्व्वसिद्धेरित्यस्य विवरणं, निरुक्तैस्त्रिविधैरेव प्रमाणैरिति भावः । आधिक्येन सिद्धिराधिक्यसिद्धिरिति तृतीयातत्पुरुषमधिकृत्य तद्घटकाधिक्यपदस्यार्थमाह—पृथक्प्रमाणत्वेनेति । तथाच पृथक्प्रमाणत्वेन न वाद्यभिमतानामुपमानादीनां सिद्धिरित्यर्थः । अत्र हेतुं दर्शयति—त्रिविधेत्यादिना । एषां—उपमानादीनां, अन्तर्भावात्—अन्तर्गतत्वात् । अत्र आर्षसम्मतिं दर्शयति—इन्द्रियार्थेत्यादिना । अन्तर्भावितत्वात्—अन्तर्गतीकृतत्वात्, तथाहि—वैदान्तिकैः सादृश्यज्ञानकरणमुपमानमङ्गीक्रियते—तत् सादृश्यज्ञानं यदि "यथा गौस्तथा गवय" इत्यादिवाक्यजन्यं तदा शाब्दबोध एवेति तत्कारणं शब्द एवान्तर्भवति, यत्र चक्षुःसन्निकृष्टे गवये गोसादृश्यज्ञानं तत् प्रत्यक्षमेवेति तत्करणं प्रत्यक्ष एवान्तर्भवति । अत एव स्मर्य्यमाणायां गवि यत् गवयसादृश्यज्ञानं तदपि तथा, गवि गवयसादृश्यस्य गवयवृत्तिगोसादृश्याव्यतिरिक्तत्वात्, तथाच तत्करणमपि प्रत्यक्ष एवान्तर्भवति । नैयायिकास्तु गवयादिपदशक्तिज्ञानमुपमितिस्तत्करणं गवादिसादृश्यज्ञानमुपमानं प्रमाणमिति मन्यन्ते, तच्छक्तिज्ञानमपि गवयशब्दो गोसदृशस्य वाचकः, असति वृत्त्यन्तरे वृद्धैस्तत्र प्रयोज्यमानत्वादित्यादिप्रयोगसाध्यानुमितिरेवेति तत्करण मप्यनुमान एवान्तर्भवति । तथाचोपमानस्य नास्ति तथा प्रमेयान्तरं, यत्रोपमानं प्रमाणान्तरं भवेदिति सिद्धं नोपमानं प्रत्यक्षाद्यतिरिक्तं प्रमाणमिति ।

তবে প্রমাণ নহে? এই আশঙ্কায় সূত্রকার "তৎসিদ্ধৌ" ইত্যাদি সূত্রাংশ বলিয়াছেন, ইহার তাৎপর্য্য এই যে, প্রমেয় ব্যবহার জন্যই প্রমাণ স্বীকার করিতে হয়। প্রত্যক্ষাদি ত্রিবিধ প্রমাণের সিদ্ধি থাকিলেই বাদিদিগের অভিমত উপমান অর্থাপত্তি প্রভৃতি প্রমাণের প্রতিপাদ্য বিষয়ের সিদ্ধি হয় বিধায় পৃথক্‌রূপে উপমান অর্থাপত্তি প্রভৃতি প্রমাণ স্বীকারের

विशेषलक्षणमाह—

यत्सम्बन्धसिद्धं तदाकारोल्लेखि विज्ञानं तत्प्रत्यक्षम् ॥ ८९ ॥

'यत्सम्बन्धसिद्धम्' इत्यनुमानशब्दौ व्यवच्छिनत्ति । तदाकारो-

प्रभाकरादिभिश्च अनुपपत्तिधीमूलकार्थान्तरकल्पनं अर्थापत्तिः प्रमितिः, तत्करणञ्चानुपपत्तिधीः अर्थापत्तिः प्रमाणान्तरमिति मन्यते, यथा जीविनो देवदत्तस्य गृहासत्त्वदर्शने जीवित्वान्यथानुपपत्त्या बहिःसत्त्वकल्पनमर्थापत्तिस्तत्करणञ्चार्थापत्तिः :प्रमाणान्तरमिति । अर्थापत्तिशब्दस्य अर्थस्यापत्तिरिति व्युत्पत्त्या प्रमितेः अर्थस्यापत्तिर्यस्मादिति व्युत्पत्त्या प्रमाणस्य च प्रतिपादकः । तदस्या अर्थापत्तेः सांख्यादिमते अनुमान एवान्तर्भावः, गृहासत्त्वबहिःसत्त्वान्यतरव्याप्य जीवित्वज्ञानेन तदन्यतरसिद्धौ जायमानायां गृहसत्त्वस्य बाधाद्बहिःसत्त्वस्यैवानुमितौ भासमानत्वात् ।

भट्टादिभिरभावग्रहणार्थं प्रति योग्यानुपलब्धिरूपाभावो हि पृथक् प्रमाणतयाङ्गीक्रियते, सोऽपि न युक्तिसहः, यस्मादधिकरणस्य कैवल्यलक्षणपरिणामविशेषादतिरिक्तोऽभाव एव न सिध्येत्, तत्परिणामभेदस्य च ऐन्द्रियकत्वान्नास्ति तद्ग्रहणाय प्रमाणान्तरापेक्षेति । तथाच सिद्धमभावोऽपि न प्रमाणान्तरमिति ।

तद्घटिते तस्यावश्यं सम्भवात् तद्घटितज्ञानेन तज्ज्ञानार्थं सम्भवोऽपि प्रमाणान्तरतया पौराणिकैरङ्गीक्रियते, यथा दिनादिघटितमासादिज्ञानेन तद्घटकदिनादिज्ञानं सम्भवाद्भवति । स सम्भवोऽप्यनुमान एवान्तर्भवति, दिनादिव्याप्यमासत्वादिज्ञानेनैव दिनादिज्ञानात् तद्दिनादिज्ञानस्यानुमित्यव्यतिरिक्तत्वात् ।

यद्यपि प्रवादपारम्पर्यमात्रं "इति होचुर्वृद्धा" इत्यैतिह्यं नाम प्रमाणान्तरं पौराणिकैरङ्गीक्रियते, यथेह वटे यक्षः प्रतिवसतीत्यादि तदपि न युक्तिसहं तस्यानिर्द्दिष्टप्रवक्तृकत्वे सांशयिकत्वेनाप्रमाणत्वात्, आप्तप्रवक्तृकत्वनिश्चये तु आगम एवान्तर्भावात् । तथाच सिद्धं प्रमाणे निरुक्तत्रिविधातिरिक्तत्वं नास्तीति ॥ ८८ ॥

কোনও প্রয়োজন নাই, যেহেতু প্রত্যক্ষাদি ত্রিবিধ প্রমাণই তাহাদের অন্তর্ভাব হইতে পারে। প্রাচীন পণ্ডিতেরাও ইন্দ্রিয় অবিষয়ের সন্নিকর্ষাদির অন্বয়-ব্যতিরেকাদি অনুসারে উপমানাদিকে যথাযথরূপে প্রত্যক্ষাদিরই অন্তর্গত করিয়াছেন। অতএব উপমানাদিরূপে কেবল অধিক নাম ভেদ করা হইয়াছে। সুতরাং প্রত্যক্ষাদির অতিরিক্ত প্রমাণ যুক্তিতর্কসিদ্ধ নহে ॥ ৮৮ ॥

ल्लेखि—घटाकारोल्लेखि । तत्प्रत्यक्षम् सविकल्पकमपि प्रत्यक्षं संगृहीतम् । बौद्धास्तु निर्विकल्पकमेव प्रत्यक्षमिति वर्णयन्ति, कल्पनापोढ़मभ्रान्तं प्रत्यक्षमिति । नामजात्यादियोजनात्मिका प्रतीतिः कल्पना, सा च सविकल्पकेऽप्यस्तीति न प्रत्यक्षं प्रमाणम् । तन्न । अदुष्टसाक्षात्कारिप्रमाजनकसामग्रीजनितं प्रत्यक्षम् । तदुभयं, निर्वि-

प्रत्यक्षस्य सर्व्वप्रमाणोपजीव्यत्वात्, तदेवादौ निरूपणीयमिति तन्निरूपकं सूत्रमवतारयति—विशेषेत्यादिना । यदित्यादि सूत्रन्तु—सम्बन्धाय—घटादिविषयेणेन्द्रियाणां सन्निकर्षाय सिद्धं—प्रसिद्धं तदाकारोल्लेखि—घटादिविषयाकारतापन्नं यद्विज्ञानं—बुद्धिवृत्तिस्तत्प्रत्यक्षं—प्रत्यक्षप्रमाणमित्यर्थकं न तु येन विषयेण सह सम्बन्धात्—इन्द्रियसन्निकर्षात् सिद्धं—ज्ञातमित्यर्थकं तथा सति वृत्तिः सम्बन्धार्थं सर्पतीति पञ्चमाध्यायसूत्रेण वृत्तेः सन्निकर्षजन्यत्वाभावसूचकेन विरोधापत्तेः । तथाच इन्द्रियार्थसन्निकर्षार्थकेन्द्रियसम्बन्धविषयाकारतापन्नवृत्तित्वं प्रत्यक्ष माणलक्षणं फलितम् । भाष्यकारस्तु "यत् सम्बन्धं भवे" दिति पाठान्तरं परिकल्प्य "स्वार्थसन्निकर्षजन्याकारस्वाश्रयी वृत्तिः" प्रत्यक्षं प्रमाणमिति निष्कर्षं दर्शितवान् ।

इन्द्रियार्थसम्बन्धसिद्धमित्यस्य व्यावृत्तिं दर्शयितुमाह—अनुमानशब्दौ व्यवच्छिन्नाविति । व्यवच्छिन्नौ—निराकृतौ, अनुमानशब्दयोरिन्द्रियार्थसन्निकर्षार्थकत्वाभावादिति भावः । तदाकारोल्लेखीति विशेषणन्तु स्वरूपयोग्यव्यावर्त्तनायेति ध्येयम् ।

नन्वेवं सविकल्पकस्यापि निरुक्तप्रत्यक्षप्रमितित्वापत्तिरित्याशङ्कामिष्टापत्त्यापरिहर्त्तुमाह—तत्प्रत्यक्षमिति, ; तत्प्रत्यक्षं—निरुक्तप्रत्यक्षप्रमाणजन्यं सविकल्पकमपि—न केवलं निर्विकल्पकमित्यपेरर्थः, प्रत्यक्षं संगृहीतं—प्रत्यक्षप्रमितित्वेनाङ्गीकृतं, तथाच सविकल्पकस्यापि प्रत्यक्ष-

---

প্রত্যক্ষ প্রমাণের লক্ষণ বলিতেছেন—বিষয় ও ইন্দ্রিয়ের সন্নিকর্ষসাধক বিষয়াকারতাপন্ন বুদ্ধিবৃত্তিকে প্রত্যক্ষ প্রমাণ বলে। "সম্বন্ধসিদ্ধ" (বিষয় ও ইন্দ্রিয়ের সন্নিকর্ষসাধক) এই বিশেষণ দেওয়ায় অনুমান ও শব্দে অতিব্যাপ্তি হইল না। সূত্রের তদাকারোল্লেখি শব্দের অর্থই "বিষয়াকারতাপন্ন" এই বিশেষণ দেওয়াতে প্রত্যক্ষের স্বরূপ যোগ্যে অতিব্যাপ্তি হইল না, কারণ যে স্থলে প্রত্যক্ষপ্রমিতি জন্মে, সে স্থলেই বুদ্ধিবৃত্তি বিষয়াকারে পরিণত হয়, নচেৎ নহে। এই প্রত্যক্ষ প্রমাণ জন্য সকল্পক জ্ঞানও প্রত্যক্ষপ্রমিতিরূপে পরিগৃহীত হইবে। বৌদ্ধগণ কেবল নির্ব্বিকল্পকেই প্রত্যক্ষপ্রমিতি বলিয়া

कल्पकं सविकल्पकं च। किन्तु सादृश्यात्संस्कारोद्बोधद्वारेण स्मृत्या नामजात्यादिसंविदुत्पद्यते। अत एवाधिकप्रामया सविकल्पकमिति विशेषसंज्ञा। न च स्मृत्या कश्चिद्दोषः सामग्रीप्रत्यवायो वा जनितः॥ अथ स्मृत्या सहितत्वान्न प्रमाणम्। अहो नैपुण्यं, वत्सहकारि प्रामाण्यं बाधते। तथा च—

प्रमितित्वस्वीकारान्नास्त्युक्तशङ्कावसर इति भावः। सविकल्पकस्य प्रत्यक्षप्रमितित्वमनङ्गी-कुर्व्वतां बौद्धानां मतं दूषयितुमुपन्यस्यति—बौद्धस्त्वित्यादिना। निर्व्विकल्पकं—वैशिष्टसंसर्गा-नवगाहिज्ञानं, एतत्कारेण सविकल्पकव्यवच्छेदः। बौद्धमतमिदं प्रत्यक्षप्रमितिलक्षणं दर्शयति—कल्पनेत्यादिना। कल्पनायाः वक्ष्यमाणलक्षणायाः अपोढं—भिन्नं अभ्रान्तं—भ्रमभिन्नं तदभाववति तदप्रकारकमिति यावत्, ज्ञानमिति शेषः, प्रत्यक्षप्रमितिरित्यर्थः। लक्षणघटक-कल्पनापदार्थं दर्शयति—नामेत्यादिना, नामजात्यादिभिः विशेषणं योजनं सम्बन्धावगाहनं आत्मा स्वरूपं यस्याः तादृशी, सांसर्गिकविषयतावगाहिनीति यावत् प्रतीति ज्ञानं कल्पना उच्यत इति शेषः। सविकल्पके एतत्प्रत्यक्षलक्षणासत्त्वं समर्थयितुमाह—सा चेति, निरुक्तकल्पना चेत्यर्थः। सविकल्पकेऽपीत्यपि शब्दो निश्चयार्थः, न तु निर्व्विकल्पकसमुच्चायकः निर्व्विकल्पकस्य सांसर्गिकविषयत्वाभावेन निरुक्तकल्पनाभिन्नत्वात्। अस्तीति तादात्म्यसम्बन्धेनेत्यादि इति—हेतोः न प्रत्यक्षं प्रमाणं—न प्रत्यक्षप्रमितिः सविकल्पकमिति शेषः। तथाच सविकल्पकस्य कल्पनाभिन्नत्वाभावेन न निरुक्तप्रत्यक्षप्रमितिलक्षणलक्ष्यत्वमिति बौद्धमतनिर्गलितार्थः। तदेतन्मतं दूषयति—तन्नेत्यादिना। सविकल्पकेऽपि प्रत्यक्षप्रमितित्वसत्त्वं व्यवस्थापयितुं स्वमतसिद्धं

থাকেন, "কল্পনাতিরিক্ত অভ্রান্ত জ্ঞানই" তাহাদের মতে প্রত্যক্ষপ্রমিতি. "নামজাত্যাদির সংসর্গাবগাহি প্রতীতির" নাম কল্পনা, সবিকল্পক এই কল্পনা হইতে ভিন্ন নহে, সুতরাং প্রত্যক্ষপ্রমিতিও নহে। বৌদ্ধদিগের এই সিদ্ধান্ত ঠিক নহে, কারণ "নির্দ্দোষ সাক্ষাৎকারাত্মক প্রমার জনক কারণসমষ্টি হইতে উৎপন্ন" জ্ঞানই প্রতক্ষ্যপ্রমিত, সুতরাং নির্ব্বিকল্পক ও সবিকল্পক উভয়েই প্রত্যক্ষপ্রমিত। পরন্তু সাদৃশ্য সংস্কারের উদ্বোধবশতঃ স্মৃতিদ্বারাই সবিকল্পকে নামজাত্যাদির ভাণ হইয়া থাকে। অতএব নামজাত্যাদিরূপ অবিবেকের ভাণ হয় বলিয়াই (সবিকল্পক) এই বিশেষ সংজ্ঞা দেওয়া হইয়াছে। স্মৃতি কোনরূপ দোষ বা করণের বিফলতা জন্মায় নাই যে, তন্নিবন্ধন সবিকল্পক

संज्ञा हि स्मर्य्यमाणापि प्रत्यक्षत्वं न बाधते ।
संज्ञिनः सा तटस्था हि न रूपाच्छादनक्षमा ॥
ततः परं पुनर्वस्तु धर्म्मैर्जात्यादिभिर्यया ।
बुद्ध्यावसीयते सापि प्रत्यक्षत्वेन संमता ॥ ८८ ॥

प्रत्यक्षप्रमितिलक्षणं निर्व्वक्ति—अदुष्टेत्यादिना । नन्वेवं सविकल्पके इन्द्रियसन्निकृष्टतत्तद्विषयेषु नामजात्यादिभानं कथमुपपद्यते इत्याह—सादृश्यादिति । सविकल्पकसंज्ञाकारणं स्फुटयति—अत एवेत्यादिना । ननु दोषाद्युत्पादनद्वारैव स्मृत्या सविकल्पके नामजात्यादिभाण-साधनात्तस्य प्रमात्वं न स्यादित्याशङ्कायामाह—न चेति । सामग्रीप्रत्यवायः—करणादि-वैकल्यम् । तथाच दोषाद्यजन्यत्वेन सविकल्पकस्य प्रमात्वे नास्ति बाधकमिति भावः । ननु मास्तु स्मृतिर्द्दोषादिजनिका, किन्तु तथापि स्वसहकारितयैव प्रमात्वव्याघातिका स्यादिति शङ्कते—अथेत्यादिना । तदेतत्सौत्प्रासकोक्त्या दूषयितुमाह—अहो इति । यत् प्रमाणस्य सहकारि तदेव यदि प्रमाणजन्यज्ञानस्य प्रामाण्यं बाधेत, तदा सहकारिणामालोकादीनामपि प्रामाण्यबाध-कत्वं स्यात्? न चैवम्, तथाच स्मृतेः सहकारित्वेन सविकल्पकप्रामाण्यव्याघातकत्वकथनं सर्व्वथैवासमीचीनमिति भावः ।

स्मृत्या नामजात्यादिभाणे सविकल्पकस्य प्रत्यक्षप्रमात्वे च प्राचीनसम्मतिं दर्शयितुं श्लोकद्वय-मुपन्यस्यति—तथाचेत्यादिना । संज्ञेति जात्याद्युपलक्षकं, स्मर्य्यमाणापि—धर्म्मांशे स्मृत्या भासमानापि संज्ञा—नामजात्यादिप्रत्यक्षत्वं—धर्म्मांशे लौकिकसन्निकर्षादुत्पन्नस्य सविकल्पकस्य

প্রত্যক্ষপ্রমিতি হইতে পারিবে না। স্মৃতির সহকারিত্বনিবন্ধনই সবিকল্পকের প্রামাণ্য হইবে না, (ইহাও ঠিক নহে) যে হেতু "সহকারি প্রামাণ্যের বাধক হয়" এই কথা বলা নিতান্তই নিপুণতার অর্থাৎ মূর্খতার পরিচায়ক, কারণ যে সহকারি, সেই যদি প্রামাণ্যের বাধক হয় তবে আলোকাদিরূপ সহকারিও প্রামাণ্যের বাধক হইতে পারে। কিন্তু তাহা কাহারও সম্মত নহে। সবিকল্পকে যে স্মৃতিদ্বারাই নামজাত্যাদির ভাণ হয় এবং তাহার যে প্রত্যক্ষপ্রমিতিত্ব আছে, এ বিষয়ে প্রাচীনদিগেরও সুস্মতি আছে। যথা—

স্মৃতিদ্বারা ধর্ম্মাংশে ভাসমান নামজাত্যাদি সবিকল্পকের প্রত্যক্ষপ্রমিতি-ত্বের বাধক হইতে পারে না, যে হেতু উদাসীন নামজাত্যাদি ধর্ম্মীর স্বরূপা-চ্ছাদনে অসমর্থ। ইহার তাৎপর্য্য এই যে, ইন্দ্রিয়সম্বদ্ধ শুক্তি প্রভৃতিতে

ननु योगिप्रत्यक्षाव्यापकत्वान्नेदं प्रत्यक्षलक्षणमित्यत आह—

योगिनामबाह्यप्रत्यक्षत्वान्न दोषः ॥ ৫০ ॥

बाह्यप्रत्यक्षलक्षणमिदं लौकिकं, योगिप्रत्यक्षं तु अबाह्यमलौकिकञ्च। अतो नाव्याप्तकत्वदोषः ॥ ৫০ ॥

प्रत्यक्षप्रमितित्वं न बाधते—न प्रतिबध्नाति। अत्र हेतुमाह—संज्ञिन इति। हि—यस्मात् तटस्था—उदासीना सा संज्ञा संज्ञिनः—धर्म्मिणः रूपाच्छादने—स्वरूपावरणे क्षमा—समर्था न भवति। अयमभिप्रायः—इन्द्रियसम्बन्धगतदोषादारोप्यमाणं रजतत्वादिकं शुक्त्यादेः स्वरूपं प्रच्छादयदेव तज्ज्ञानस्य प्रामाण्यं बाधते, इह तु नामजात्यादिकं धर्म्मिविधया भासमानस्य वस्तुनः स्वरूपमप्रच्छादयदेव कथं तज्ज्ञानस्य प्रामाण्यं बाधितुं प्रभवेदिति। ततःपरं—स्मृत्यात्मकसहकारिसमवधानानन्तरं वस्तुनिर्विकल्पे भासमानं वस्तुगत्या विशेष्यीभूतं पदार्थजातम् पुनर्यया बुद्ध्या जात्यादिभिर्धर्म्मैरुपनीयते जात्यादिप्रकारतानिरूपितविशेष्यतया विषयीक्रियते, सापि बुद्धिः प्रत्यक्षत्वेन—प्रत्यक्षप्रमितित्वेन सम्मता—स्वीकृता। तथाच सा बुद्धिरेव सविकल्पकज्ञानमिति तस्य प्रत्यक्षप्रमितित्वं प्राचीनसम्मतमिति स्पष्टमायातम् ॥ ৮৯ ॥

ननु यत्सम्बन्धसिद्धमित्यादिसूत्रानुसारेण इन्द्रियार्थसन्निकर्षस्यापि अदुष्टसाक्षात्कारिप्रमाजनकसामग्रीघटकतया अतीतानागतव्यवहितादिविषयकयोगिप्रत्यक्षे विषयाणां तत्कालासत्त्वादिनेन्द्रियसन्निकर्षासम्भवात्तज्जनितत्वघटितनिरुक्तप्रत्यक्षप्रमितिलक्षणस्याव्याप्तिरिति शङ्कायां

আরোপ্যমাণ রজতত্ব প্রভৃতি ধর্ম্ম ধর্ম্মী শুক্তি প্রভৃতির স্বরূপ আচ্ছাদিত করিয়াই তত্তদ্বিষয়ক জ্ঞানের ভ্রমত্ব সম্পাদন করিয়া থাকে, সুতরাং এস্থানে নামজাত্যাদি ধর্ম্মীর স্বরূপাবরণে অসমর্থ হইয়া কিরূপে তদ্বিষয়ক জ্ঞানের ভ্রমত্ব সম্পাদন করিবে ?

নির্ব্বিকল্পে ভাসমান ঘটাদি বস্তুসকল স্মৃতিরূপ সহকারিসমবধানের অনন্তর যেই বুদ্ধিদ্বারা নাম জাত্যাদি ধর্ম্মবিশিষ্টরূপে প্রতিভাত হইয়া থাকে, সেই সবিকল্পক জ্ঞানও প্রত্যক্ষ বলিয়াই সম্মত ॥ ৮৯ ॥

এই স্থানে আশঙ্কা এই যে, পূর্ব্বোক্ত "অদুষ্টসাক্ষাৎকারিপ্রমাজনকসামাগ্রীজনিতং প্রত্যক্ষং" এইরূপ প্রত্যক্ষপ্রমিতির লক্ষণ হইতে পারে না। যে হেতু অতীতভবিষ্যৎ ব্যবহিত ও দূরবর্ত্তি বস্তুবিষয়ক যোগিদিগের প্রত্যক্ষে অব্যাপ্তি হয়, কারণ সূত্রোপাত্ত প্রত্যক্ষ প্রমাণের লক্ষণ অনুসারে দেখা যায়,

अथवा अनेन लक्षणेन योगिप्रत्यक्षस्यापि संग्रह इति पक्षान्तर-माह—

लीनवस्तुलब्धातिशयसम्बन्धान्न दोषः ॥ ८१ ॥

सत्कार्य्यस्थितेर्नष्टमपि स्वकारणे लीनं भूतत्वेन अस्ति, भविष्यदपि स्वकारणेऽनागतत्वेन अस्ति। योगजधर्मानुग्रहात् लब्धातिशयस्य

निरासकतया सूत्रान्तरमवतारयितुं शङ्कते—नन्विति। सततानुपर्य्यवर्णनव्यपदेशेनो-क्ताशङ्कापरिहारं दर्शयितुमाह—बाह्यप्रत्यक्षलक्षणमिदमिति। ततः किमित्यत आह—लौकिकमिति, तल्लक्षणमपीत्यादिः। अथास्य पदस्यार्थमाह—अलौकिकञ्चेति। चकार एवार्थे। उपसंहरति—अत इति, योगिप्रत्यक्षस्यालौकिकत्वेनैतत्प्रत्यक्षलक्षणालक्ष्यत्वादित्यर्थः। नाव्या-पकत्वदोष इति,—लक्ष्ये लक्षणागमनस्यैव तद्दोषत्वादिति भावः ॥ ८० ॥

सूत्रान्तरमवतारयति—अथवेत्यादिना। असत्कार्य्यवादिमते कारणलयासम्भवादाह—सत्कार्य्यस्थितेरिति, सत्कार्य्यस्य सिद्धान्तसिद्धत्वादित्यर्थः। नष्टमपि—नाशप्रतियोगित्वेन व्यवह्रियमाणमपि (वस्तु) भूतत्वेन—अतीतत्वेन स्वकारणे अव्यक्तं लीनं—अव्यक्ततापन्नं अस्तीत्यर्थः। भविष्यदपि—अनागतमपि प्रागभावप्रतियोगित्वेन व्यवह्रियमाणमपीति यावत्; अनागतत्वेन स्वकारणे लीनं अस्तीति सम्बन्धः। सत्कार्य्यवादिमते अतीतत्वेन कारणे अवस्था-

---

বিষয়ের সহিত ইন্দ্রিয়ের সন্নিকর্ষ ও উক্ত সামগ্রীর অন্তর্গত অথচ অতীতাদি-বিষয়ক যোগিদিগের প্রত্যক্ষে বিষয় ও ইন্দ্রিয়ের সন্নিকর্ষজন্যত্ব সম্পূর্ণ অসম্ভব, যেহেতু বিষয়ের সত্তাদি কারণই অবিদ্যমান। অতএব ইহার উত্তরে বলি-তেছেন—উক্ত লক্ষণটি বাহ্য, অর্থাৎ লৌকিক প্রত্যক্ষপ্রমিতির লক্ষণ, সুতরাং তাহার লক্ষণও লৌকিক প্রত্যক্ষপ্রমিতি। অথচ যোগিদিগের অতীতাদি বিষয়ক প্রত্যক্ষ অবাহ্য অর্থাৎ অলৌকিক, অতএব উক্ত অব্যাপ্তিদোষ হইতে পারে না, কারণ লক্ষ্যে লক্ষণের অগমনেই অব্যাপ্তি-দোষ হইয়া থাকে ॥ ৯০ ॥

অথবা পক্ষান্তরে ইহাও বলা যায় যে, উক্ত লক্ষণদ্বারা যোগিদিগের প্রত্যক্ষও সংগৃহীত হইবে। কারণ কার্য্যমাত্রই সৎ ইহাই সাংখ্যাচার্য্যের সিদ্ধান্ত, সুতরাং এই মতে বস্তু বিনষ্ট হইলেও অতীতাবস্থাপন্ন হইয়া স্বকারণ প্রকৃতিতে লীন হইয়া থাকে, ভবিষ্যৎ বস্তুও অনাগতাবস্থাপন্ন হইয়া প্রকৃতিতেই

योगिन एव प्रधानसम्बन्धात् सर्वदेशकालादिसम्बन्ध इति नाव्यापकत्वदोषः ॥ ९१ ॥

ईश्वरप्रत्यक्षस्यालक्षणमित्यत आह —

ईश्वरासिद्धेः ॥ ९२ ॥

यदीश्वरसिद्धौ प्रमाणमस्ति, तदा तत्प्रत्यक्षचिन्ता उपपद्यते। तदेव तु नास्ति। क्षित्यादि सकर्तृकं कार्य्यत्वादिति प्रमाणमस्तीति

नातिरिक्तस्य ध्वंसस्य अनागतत्वेन, कारणे अवस्थानातिरिक्तस्य प्रागभावस्य च अनभ्युपगमादिति भावः। नन्वेवं कारणे सत्त्वेऽपि अतीतत्वादिना प्रतिबन्धादेव सम्बन्धस्यासम्भवः, अप्रतिबन्धे च मादृशामपि सम्बन्धः स्यादिति शङ्कां निराकर्त्तुमाह—योगिन इत्यादि। योगिनामेवेत्येवकारो मादृश-व्यवच्छेदार्थः। तथाच प्रधानसम्बन्धं प्रति योगजधर्म्मस्य सहकारित्वं कल्पनीयमित्याशयः। सर्व्वदेशकालसम्बन्ध इति देशकालादीनां सर्व्वेषामेव प्रधानात्यतिरिक्तत्वादिति भावः। नाव्यापकत्वदोष इति, योगिनां प्रधानसम्बन्धेन सर्व्वसम्बन्धादतीतानागतव्यवहितादिविषयेष्व-पीन्द्रियसम्बन्धसम्भवात्तद्विषयेन्द्रियसम्बन्धजन्यत्वासम्भवनिबन्धनो निरुक्ताव्याप्तिदोष इत्यर्थः। एवञ्च सूत्रे लीनपदं व्यवहितादेरप्युपलक्षकमिति मन्तव्यम् ॥ ९१ ॥

अथैवं योगिप्रत्यक्षाव्याप्तिपरिहारेऽपि ईश्वरप्रत्यक्षस्यानित्यत्वाज्जन्यताघटितनिरुक्तप्रत्यक्षप्रमिति-लक्षणस्य तदव्याप्तिर्दुष्परिहरैवेति शङ्काया निरासकं सूत्रान्तरमवतारयितुमाह—ईश्वरेत्यादि। सूत्रतात्पर्य्यं विवृणोति—यदीत्यादिना। तत्प्रत्यक्षचिन्ता—ईश्वरप्रत्यक्षे लक्षणागमनचिन्ता, तदेव—ईश्वरे प्रमाणमेव नास्तीति, तथाच ईश्वरस्यैवासिद्ध्या तत्प्रत्यक्षाव्याप्तिशङ्का कथमपि न

লীন থাকে, ইহার অতিরিক্ত ধ্বংস বা প্রাগভাব সৎকার্য্যবাদীর মতে অসিদ্ধ, অতএব যোগজ ধর্ম্মানুগ্রহবশতঃ যোগিগণ আমাদিগের অপেক্ষা সমধিক সামর্থ্য লাভ করায় তাহাদেরই প্রকৃতির সহিত সম্বন্ধ হইয়া থাকে এবং তাহার ফলে ভূত, ভবিষ্যৎ, বর্ত্তমান, ব্যবহিত দূরবর্ত্তী প্রভৃতি সমস্ত বস্তুর সহিতই তাহাদের সন্নিকর্ষ সম্ভবপর হয়, সুতরাং উক্ত অব্যাপ্তিদোষ হইতে পারে না ॥ ৯১ ॥

উক্তরূপে যোগিদিগের অতীতাদিবিষয়ক প্রত্যক্ষের সংগ্রহ হইলেও ঈশ্বর প্রত্যক্ষে উক্ত লক্ষণের অব্যাপ্তি অপরিহার্য্য, যেহেতু ঈশ্বরপ্রত্যক্ষ অজন্য, এই আশঙ্কায় বলিতেছেন—যদি ঈশ্বরসিদ্ধিতে প্রমাণ থাকিত, তবেই

चेत्, स किं शरीरी अशरीरी वा इत्युभयथापि कर्तृत्वासम्भवात्, विशेषवादिनां कार्य्यत्वस्याभासत्वात्। एतदन्यत्र बहु प्रपञ्चितम् ॥९२॥

युक्त्यन्तरमाह—

मुक्तबद्धयोरन्यतराभावान्न तत्सिद्धिः ॥ ९३ ॥

स किं बद्धो वा मुक्तो वा। बद्धस्य धर्माधर्मयोगात् नेश्वरत्वम्।

त्वस्यास्पदेति भावः। ईश्वरे प्रमाणमभ्युपगच्छतां वैशेषिकादीनां मतं दूषयितुमुत्थापयति—चित्यादीत्यादिना। उभयथापि—शरीरित्वे अशरीरित्वेऽपि, कर्त्तृत्वासम्भवात्—जगत्कर्त्तृत्वासम्भवात्, तथाहि—शरीरित्वे मादृशवदसर्व्वज्ञत्वाज्जगत्कर्त्तृत्वानुपपत्तेः, अशरीरित्वे च मुक्तात्मवत्कर्त्तृत्वाभावेन जगत्कर्त्तृत्वानुपपत्तिरिति भावः। विशेषवादिनां—वैशेषिकादीनां कार्य्यत्वस्य—सकर्त्तृकत्वसाधकत्वेनाभिमतस्य हेतोः आभासत्वात्—सकर्त्तृकत्वव्याप्यशरीराजन्यत्वरूपं प्रति हेतुमद्भावेन सत्प्रतिपक्षितत्वात्। तथाच तेन हेतुना सकर्त्तृकत्वसाधनासम्भवान्न चित्यादिकर्त्तृत्वेनेश्वरसिद्धिरिति भावः ॥ ९२ ॥

सूत्रान्तरमवतारयितुमाह—युक्त्यन्तरमिति, ईश्वरासिद्धौ युक्त्यन्तरमित्यर्थः। मुक्तबद्धयोरन्यतरस्मिन्निश्वरत्वसम्भवरूपं सूत्रोक्तं हेतुं समर्थयितुं विकल्पयति—स किमित्यादिना। नेश्वरत्व-

---

তাহার প্রত্যক্ষে অব্যাপ্তির আশঙ্কা উপপন্ন হইত, কিন্তু ঈশ্বরসিদ্ধিতেই কোন প্রমাণ নাই, সুতরাং ঐ আশঙ্কাই ভিত্তিশূন্য। এস্থলে বৈশেষিক প্রভৃতি দার্শনিকগণ বলেন যে, কার্য্যমাত্রেরই একজন কর্ত্তা আছে, যেমন ঘটাদি কার্য্যের কর্ত্তা কুম্ভকার প্রভৃতি, সুতরাং কার্য্য ক্ষিতি অঙ্কুর প্রভৃতিরও একজন কর্ত্তা অবশ্যই স্বীকার্য্য, অথচ সেই কর্ত্তৃত্ব আমাদিগের মধ্যে কাহারও সম্ভবপর নহে, অতএব কার্য্যত্বহেতুক অনুমানই কর্ত্তৃত্বরূপে ঈশ্বরসিদ্ধির প্রমাণ। তদুত্তরে বক্তব্য এই যে, সেই কর্ত্তা ঈশ্বর শরীরী কি অশরীরী? উভয়থাই তাঁহার জগৎকর্ত্তৃত্ব সম্ভবপর নহে, কারণ শরীরী হইলে তিনিও আমাদের ন্যায় অসর্ব্বজ্ঞ হইয়া থাকেন, সুতরাং তাঁহার জগৎকর্ত্তৃত্ব অসম্ভব, অশরীরী হইলেও মুক্তাত্মার কর্ত্তৃত্বাভাববশতঃ তিনি জগৎকর্ত্তা হইতে পারেন না। সুতরাং বৈশেষিকাদির এই কার্য্যত্ব হেতুটি দুষ্ট হেতু, অর্থাৎ ঈশ্বরসাধক প্রকৃত হেতু নহে ॥ ৯২ ॥

ঈশ্বরের অসিদ্ধিবিষয়ে অন্য যুক্তিতে বলিতেছেন, বাদিদিগের স্বীকার্য্য ঈশ্বর

मुक्तस्य ज्ञानचिकीर्षाप्रयत्नाभावात् न कर्त्तृत्वमिति नेश्वरसिद्धिः। अथ अन्य एवासौ जीवन्मुक्त इति। एवं, तर्हि दृष्टान्ताभावात् असाधारणत्वम् ॥ ९३ ॥

एतदेवाह—

उभयथाप्यसत्करत्वम् ॥ ९४ ॥

‘उक्तव्याख्यानमेतत्सूत्रम् ॥ ९४ ॥

मिति धर्माधर्मयोगे सत्यस्मदादिभ्यो विशेषासम्भवादिति भावः। ज्ञानचिकीर्षाप्रयत्नाभावादिति अदृष्टद्वारकशरीराभावेनेत्यादिः। न कर्त्तृत्वमिति, कर्त्तृत्वस्य चिकीर्षादिमत्त्वव्याप्यत्वादित्यर्थः। तथाच कर्त्तृत्वेनैव मुक्तात्मनो नेश्वरत्वसम्भव इत्याशयः। इति—हेतोः, सूत्रीयं तत्सिद्धिपदं व्याचष्टे—नेश्वरसिद्धिरिति। ननु मास्तु बद्धमुक्तयोरन्यतरस्मिन्नीश्वरत्वं तयोरन्य एव जीवन्मुक्ताख्यः कश्चिदात्मविशेष ईश्वरो भविष्यतीति शङ्कते—अथेत्यादिना। तामिमां शङ्कां परिहर्त्तुमाह—एवं तर्हीति, तादृशस्येश्वरत्व इत्यर्थः, दृष्टान्तासम्भवात्—तादृशेश्वरानुमाने व्याप्तिग्राहकदृष्टान्तासद्भावात्, असाधारणत्वं—निश्चितसाध्यवदवृत्तित्वरूपहेत्वाभासविशेषत्वं हेतोरित्यर्थः। तथाच सिद्धं नानुमानमपीश्वरे प्रमाणमिति भावः ॥ ९३ ॥

एतदेवेति—ईश्वरासिद्धत्वमेवेत्यर्थः। पूर्व्वसूत्रव्याख्यानेनैवैतत्सूत्रस्यापि व्याख्यानस्य कृत-प्रायत्वादाह—उक्तव्याख्यानमिति, उक्तं कथितं व्याख्यानं यस्य तदिति विग्रहः। तथाहि—उभयथापि—त्वदभिमतस्येश्वरस्य मुक्तत्वे बद्धत्वे वापि, असत्करत्वं—असम्भवज्जगत्सृष्ट्यादि-

বদ্ধ কি মুক্ত? যদি তিনি বদ্ধ হন, তবে তাঁহার ধর্ম্মাধর্ম্মও আছে বলিতে হইবে, তাহা হইলেই সাধারণ হইতে বিশেষত্ব থাকে না বলিয়া তিনি ঈশ্বর হইতে পারেন না। আর যদি তিনি মুক্ত হন, তবে মুক্তের জ্ঞানচিকীর্ষা ও প্রযত্নের অভাবনিবন্ধন কর্ত্তৃত্ব থাকিতে পারে না, সুতরাং পূর্ব্বোক্ত কর্ত্তৃত্ব হেতুদ্বারা ঈশ্বরত্ব সিদ্ধি হইতে পারে না। যদি বল, বদ্ধ ও মুক্ত হইতে অতিরিক্ত জীবন্মুক্তই ঈশ্বর, তাহা হইলে তাদৃশ ঈশ্বরানুমানের, ব্যাপ্তিগ্রাহক দৃষ্টান্তের অভাবনিবন্ধন ঈশ্বরানুমাপক হেতুতে অসাধারণত্ব (নিশ্চিত সাধ্যবদ-বৃত্তিত্ব) রূপ হেতুর দোষ থাকিয়া যায়, সুতরাং অনুমানও ঈশ্বরসাধক প্রমাণ হইতে পারে না ॥ ৯৩ ॥

एवं, तर्हि 'स हि सर्ववित् सर्वस्य कर्त्ता' इत्यादिश्रुतिबाधः स्यादित्यत आह—

मुक्तात्मनः प्रशंसा, उपासासिद्धस्य वा ॥ ९५ ॥

रागाद्यभावात् मुक्तात्मन इव मुक्तात्मनः, न तु मुक्तस्य, तस्य सङ्कल्पकर्त्तृत्वाद्यभावात्। तत्प्रशंसा विधिवाक्योत्तम्भनाय। 'उपासासिद्धस्य वा' इति उपासनया लब्धातिशयस्य योगिनोऽणिमादिसिद्धस्य, प्रशंसाभ्यासोत्तम्भनायेति ॥ ९५ ॥

कर्त्तृत्वं, तस्येति शेषः। मुक्तत्वे सृष्टिप्रयोजकाभिमानाद्यभावेन कर्त्तृत्वासम्भवात् बद्धत्वे च मादृशाद्यविशेषादिति भावः ॥ ९४ ॥

"नन्वेवमीश्वरप्रमापिकायाः श्रुतेः का गति" रित्याशङ्कायाः समाधानपरं सूत्रमवतारयितुमाह—एवं तर्हीति। ईश्वरस्यासिद्धत्व इत्यर्थः। प्रतिपाद्यस्याभाव एव तादृशश्रुतिबाधे हेतुः। सूत्रीयं मुक्तात्मपदमिव पदप्रक्षेपेण व्याख्यातुं सादृश्ये हेतुमाह—रागाद्यभावादिति। यथाश्रुतार्थकत्वे बाधकं दर्शयति—न त्वित्यादिना, तस्य—मुक्तस्य, सङ्कल्पकर्त्तृत्वाद्यभावादिति, तथाच कुतः सर्व्वकर्त्तृत्वेन मुक्तस्य प्रशंसा सम्भवेत्? यत्र यन्नास्ति तस्य तेन प्रशंसायाः सर्व्वथैवासम्भवादिति भावः। नन्वेतादृशप्रशंसायां को लाभ इत्यत आह—विधिवाक्योत्तम्भनायेति, विध्यर्थानुष्ठानप्ररोचनायेत्यर्थः। अणिमादिसिद्धस्येति, अणिमादीनामष्टैश्वर्याणां सिद्धं—सिद्धिर्यस्येति विग्रहः। प्रशंसेत्यनेनैवान्वय इति दर्शयितुमाह—प्रशंसेति। सापि किमर्थेत्यत आह—अभ्यासोत्तम्भनायेति, योगाभ्यासे दृढ़तासम्पादनायेति तदर्थः ॥ ९५ ॥

ইহাই বলিতেছেন—ঈশ্বর মুক্ত বা বদ্ধ হউন, কোনরূপেই জগৎ সৃষ্টি প্রভৃতির কর্ত্তা হইতে পারেন না ॥ ৯৪ ॥

যদি ঈশ্বর না থাকেন, তবে "তিনি সমস্ত জানেন ও সকলের সৃষ্টি করেন" ইত্যাদি শ্রুতিবাক্যগুলি বাধিত হইয়া পরে, এই জন্য বলিতেছেন (মুক্ত আত্মার সম্বন্ধেও কর্ত্তৃত্ব নাই বিধায় সূত্রের মুক্তাত্ম পদের অর্থ বলিতে হইবে মুক্ত আত্মার সদৃশ) যাহারা রাগ দ্বেষ প্রভৃতির অভাবনিবন্ধন মুক্ত আত্মার তুল্য, উক্ত শ্রুতিদ্বারা তাহাদের প্রশংসা করা হইয়াছে। সেই প্রশংসার প্রয়োজন বিধিবাক্যার্থানুষ্ঠানে লোকের রুচি বৃদ্ধি করা। অথবা যাহারা উপাসনাদিদ্বারা অণিমাদি ঐশ্বর্য্যসম্পন্ন হইয়াছেন, উক্তশ্রুতিদ্বারা সেই লব্ধা-

चेतनाधिष्ठानं विना नाचेतनं प्रवर्त्तत इत्यतोऽपि नेश्वरसिद्धिरित्याह—

तत्सन्निधानादधिष्ठातृत्वं मणिवत् ॥ ९६ ॥

यथा प्रतिबिम्बितशरीरे मणौ चलति अचलति शरीरे 'शरीरं चलति' इत्यभिमानः, तथा तत्सन्निधानात् प्रकृतिप्रतिबिम्बितत्वात् आत्मनः प्रकृतेः कर्त्तृत्वं भोक्तृत्वमधिष्ठातृत्वञ्चात्मनोऽभिमन्यते। तस्माच्चेतनोऽधिष्ठातेति भ्रान्तिरिति। तथा च—

प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्वशः।
अहङ्कारविमूढात्मा 'कर्त्ताहमिति' मन्यते ॥ ९६ ॥

ननु चेतनाधिष्ठानमन्तरेणाचेतनस्य प्रवृत्त्यदर्शनात् प्रधानाधिष्ठातृतयैव साङ्ख्याचार्य्यैरपीश्वरोऽवश्यमङ्गीकर्त्तव्य इत्याशङ्कायाः समाधानपरतया सूत्रान्तरमवतारयति—चेतनेत्यादिना। मणिवदिति दृष्टान्तं विशदीकृत्य सूत्रतात्पर्य्यं विवृणोति—यथेत्यादिना। प्रकृतिप्रतिबिम्बितत्वादात्मन इति तत्सन्निधानादित्यस्य विवरणम्। उपसंहरति—तस्मादित्यादिना। अत्र गीतातृतीयाध्यायसप्तविंशश्लोकं प्रमाणीकर्त्तुमाह—तथाचेति। श्लोके कर्त्तृपदमधिष्ठातृत्वादेरप्युपपादकं। तथाचाभिमानिकमधिष्ठातृत्वं पुरुष एव सम्भवतीति नास्ति तद्विलक्षणेश्वराङ्गीकारे प्रमाणमिति भावः ॥ ९६ ॥

তিশয় যোগের প্রশংসা করা হইয়াছে, তাহাদের প্রশংসা করার প্রয়োজন যোগাভ্যাসে লোকের দৃঢ়তাসম্পাদন ॥ ৯৫ ॥

চেতনের অধিষ্ঠান ভিন্ন অচেতন প্রবৃত্ত হয় না, এই জন্যও যে ঈশ্বর মানিতে হইবে না, ইহাই বলিতেছেন—যেমন শরীর মণিতে প্রতিবিম্বিত হইলে শরীর না চলিলেও মণি চলিলেই শরীর চলিতেছে বলিয়া মনে হয়, সেইরূপ আত্মা প্রকৃতিতে প্রতিবিম্বিত হইয়া প্রকৃতির কর্ত্তৃত্বভোক্তৃত্ব ও অধিষ্ঠাতৃত্ব নিজের বলিয়া মনে করেন (বস্তুতঃ কর্ত্তৃত্বাদি আত্মার ধর্ম্ম নহে) সুতরাং চেতন অধিষ্ঠাতা ইহা ভ্রান্তিমাত্র, গীতায়ও বলিয়াছেন—"কর্ম্মসকল প্রকৃতির গুণেই করিয়া থাকে, কিন্তু আত্মা অহঙ্কারবিমূঢ় হইয়া "আমিই কর্ত্তা" বলিয়া মনে করেন" ॥ ৯৬ ॥

यदि न चेतनाधिष्ठातृत्वं, मृतशरीरस्य आहारादिक्रियास्यादित्यत आह—

विशेषकार्येऽपि जीवानाम् ॥ ९७ ॥

वायुयुक्तो बुद्ध्यादिर्जीवः, न तु आत्मा जीवः । आहारादिविशेष-कार्य्येऽपि जीवानामेव कर्त्तृत्वं, आत्मनोऽपरिणामित्वात् ॥ ९७ ॥

आत्मनि चेज्ज्ञानं नास्ति, कथं ज्ञानाय उपदेश इत्यत्राह—

सिद्धरूपबोद्धृत्वाद्वाक्यार्थोपदेशः ॥ ९८ ॥

उत्तरसूत्रस्थान्तःकरणस्येति पदमनुषञ्जनीयम् । वाक्यार्थोपदेशो-ऽन्तःकरणस्येत्यन्तमेकं सूत्रं वा । तेनायमर्थः । सिद्धरूपबोद्धृत्वात्

सूत्रान्तरमवतारयति—यदीत्यादिना । चेतनाधिष्ठातृत्वं—चेतने पारमार्थिकमधिष्ठातृत्वं । आहारादिक्रिया स्यादिति, निरुक्ताभिमानिकाधिष्ठातृत्वस्य तत्रापि सम्भवादिति भावः । सूत्रो-पात्तस्य जीवपदस्यार्थमाह—वायुरित्यादिना । वायुयुक्तः—प्राणादियुक्तः, बुद्ध्यादिरित्यादिना अहङ्कारपरिग्रहः । षष्ठाध्यायवक्ष्यमाणे विशिष्टात्मरूपजीवेऽपि वस्तुगत्या कर्त्तृत्वाभावात्मस्य-तज्जीवशब्दप्रतिपाद्यत्वं निषेधति—न त्वित्यादिना । जीवः एतत्सूत्रोपात्तजीवशब्दप्रतिपाद्यः, अतएव (विशिष्टस्य जीवत्व) मित्यादिषष्ठाध्यायसूत्रेण न विरोधः, जीवानामेव कर्त्तृत्वमिति, तथाच प्राणादिविशिष्टबुद्ध्यादेरभावादेव मृतशरीरे नाहारादिक्रियेति भावः ॥ ९७ ॥

सूत्रान्तरमवतारयितुं शङ्कते—आत्मनीत्यादिना । सूत्रं व्याख्यातुं सम्बन्धिपदाकर्षणं दर्शयति —उत्तरेत्यादिना । अनुषञ्जनीयं—सिंहावलोकितन्यायेन विवर्त्तनीयम । सूत्रनिर्गलितार्थं—

চেতনে যদি বস্তুতঃ অধিষ্ঠাতৃত্ব না থাকে, তবে মৃত শরীরেরও আহারাদি ক্রিয়া হউক, এই আশঙ্কায় বলিতেছেন—প্রাণাদি বায়ুযুক্ত বুদ্ধ্যাদিই এই সূত্রের জীবশব্দবাচ্য, আত্মা নহে, আত্মার অপরিণামিত্বনিবন্ধন আহারাদি কার্য্যেও সেই জীবেরই কর্তৃত্ব, সুতরাং প্রাণাদি বায়ুবিশিষ্ট বুদ্ধ্যাদিরূপ কর্ত্তা নাই বলিয়াই মৃত শরীরে আহারাদি ক্রিয়া হইবে না ॥ ৯৭ ॥

আত্মাতে যদি বস্তুতঃ জ্ঞান না থাকে, তবে জ্ঞানের জন্য উপদেশ করিয়া-ছেন কেন? এই আশঙ্কায় বলিতেছেন—পরসূত্রের "অন্তঃকরণস্য" এই পদটির এই সূত্রে সিংহাবলোকিতন্যায় ক্রমে অধিকার করিতে হইবে, অথবা

तात्त्विकरूपबोद्धृत्वान्महतोऽन्तःकरणस्य वाक्यार्थोपदेशः । तत्प्रतिबिम्बितत्वाच्च पुरुषस्य बोद्धृत्वाभिमानः ॥ ९८ ॥

एतदेव स्पष्टयति—

अन्तःकरणस्य तदुज्ज्वलितत्वाल्लोहवदधिष्ठातृत्वम् ॥ ९९ ॥

अन्तःकरणस्य बुद्धौ पुरुषच्छायापत्त्या तच्चैतन्येनोज्ज्वलितस्य चेतनत्वाभिमानात् अधिष्ठातृत्वम् । 'लोहवत्' इति यथा आकर्षको लोहो निष्क्रियोऽपि सन्निधिमात्रेण आकर्षति ॥ ९९ ॥

अन्तःकरणस्य महत्त्वाभिधानन्तु कार्य्यकारणयोरभेदेन महदन्तःकरणयोरभेदप्रदर्शनार्थं । बोद्धृत्वाभिमान इति, तथाच वस्तुगत्या पुरुषस्य ज्ञानाभावेऽपि अन्तःकरणधर्म्मतया सिद्धस्य ज्ञानस्य अन्यतया तदर्थं शास्त्रोपदेशः सफल इति भावः ॥ ९८ ॥

सूत्रान्तरमवतारयितुमाह—एतदेवेति, पुरुषाधिष्ठातृत्वस्याभिमानिकत्वे पारमार्थिकाधिष्ठातृत्वं कस्य तदेवेत्यर्थः । सूत्रार्थं विवृणोति—अन्तःकरणस्येत्यादिना । चेतनत्वाभिमानादित्यन्तं तदुज्ज्वलितत्वादित्यस्य विवरणम् । तदभिधानञ्चान्तःकरणस्य घटाद्यचेतनान्तरेभ्यो वैलक्षण्यप्रदर्शनाय । अत्रैव दृष्टान्तं दर्शयति—लोहवदिति । न चाधिष्ठातृत्वस्यान्तःकरणधर्म्मत्वे प्रकृतिधर्म्मत्वपरेण पूर्व्वोक्तवस्तुग्रन्थेन विरोध इति शङ्कनीयं कार्य्यकारणयोरभेदेन प्रकृतेरन्तःकरणाव्यतिरिक्तत्वादिति ॥ ९९ ॥

"বাক্যার্থোপদেশে" অন্তঃকরণস্য এই পর্য্যন্তই এক সূত্র, অতএব সূত্রার্থ হইবে এই যে, "জ্ঞান প্রকৃত অন্তঃকরণেরই ধর্ম্ম, তাহার জন্যই বাক্যার্থের উপদেশ" সেই অন্তঃকরণে প্রতিবিম্বিত হয় বলিয়াই জ্ঞানবান্ বলিয়া আত্মার অভিমান হয় ॥ ৯৮ ॥

প্রকৃত অধিষ্ঠাতৃত্ব যদি আত্মাতে না থাকে, তবে কোথায় থাকিবে? তাহাই স্পষ্ট করিতেছেন—পুরুষ বুদ্ধিতে প্রতিবিম্বিত হয় বলিয়া পুরুষের চৈতন্যদ্বারা উজ্জ্বলিত অন্তঃকরণের চৈতন্যাভিমান হয়, সুতরাং অচেতন হইলেও সেই চেতনায়মান অন্তঃকরণেরই প্রকৃত অধিষ্ঠাতৃত্ব। যেমন আকর্ষক লৌহ নিষ্ক্রিয় হইয়াও সন্নিধিমাত্রেই আকর্ষণ করিয়া থাকে ॥ ৯৯ ॥

अनुमानलक्षणमाह—

प्रतिबन्धदृश: प्रतिबद्धज्ञानमनुमानम् ॥ १०० ॥

अविनाभावदर्शिनो व्याप्यज्ञानात् अनु व्यापकज्ञानमनुमानम् । अनेन अन्वयिव्यतिरेकि अन्वयव्यतिरेकि पूर्ववच्छेषवत्सामान्यतो दृष्टं चेति संगृहीतम् । वादिनामपि लक्षणानि अत्रैव अन्तर्हितानीति । तथा च—

क्रमप्राप्तमनुमानलक्षणप्रतिपादकं सूत्रमवतारयति—अनुमानेत्यादिना । अविनाभावदर्शिन इति प्रतिबन्धदृश इत्यस्य विवरणम्, व्याप्तिदर्शिन इति तदर्थ: । अतिव्याप्तिवारकलक्षणमभिधातुं पूरयति—व्याप्यज्ञानादिति, तत्रापि पक्षे इत्यादि:, तथाच पक्षधर्म्मिकव्याप्यज्ञानादित्यर्थ: । व्याप्यो व्याप्तिविशिष्ट:, व्याप्तिश्च स्वाधिकरणवृत्त्यत्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं यथा-धूमसमानाधिकरणात्यन्ताभावाप्रतियोगिवह्निसामानाधिकरण्यं धूमे वह्निव्याप्तिस्तद्वान् धूमो वह्निव्याप्य: । व्यापकज्ञानमिति प्रतिबद्धज्ञानमित्यस्य विवरणम्, व्यापकश्च स्वाधिकरणवृत्त्यत्यन्ताभावाप्रतियोगी, यथा धूमाधिकरणवृत्त्यत्यन्ताभावाप्रतियोगी वह्निर्धूमव्यापक: । तथाच पक्षे पर्व्वतादौ वह्न्यादिव्याप्यधूमादिज्ञानानन्तरं यत् धूमादिव्यापकवह्न्यादिज्ञानं (तदाकारा बुद्धिवृत्ति:) उत्पद्यते तदनुमानं प्रमाणमिति फलितम् । अनुमितिस्तु तज्जन्य: पौरुषेयो बोध इति । अव्याप्तिशङ्कां निरसितुमाह—अनेनेति, एतल्लक्षणेनेत्यर्थ: । अन्वयि—केवलान्वयि अत्यन्ताभावाप्रतियोगिसाध्यकानुमितिकरणमिति यावत्, यथा सर्व्वं अभिधेयं प्रमेयत्वादित्यादिस्थलीयानुमानं । व्यतिरेकि—केवलव्यतिरेकि अन्वयसहचारग्रहाजन्यव्यतिरेकि साध्यकानुमितिकरणमिति यावत्, यथा पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादित्यादिस्थलीयानुमानम् । अन्वयव्यतिरेकि—अन्वयसहचारग्रहजन्यव्यतिरेकिसाध्यकानुमितिकारणं, यथा वह्निमान् धूमादित्यादिस्थलीयानुमानं । पूर्व्ववत्—कारणलिङ्गकं यथा मेघोन्नतिदर्शनेन वृष्ट्यनुमानं ।

যে যাহার অভাবে থাকে না, সে তাহার ব্যাপ্য ও সেই না থাকার নামই ব্যাপ্তি, এবং যাহার ব্যাপ্য হয়, সেই ব্যাপক, যেমন বহ্নি না থাকিলে ধূম থাকে না, বিধায় ধূম বহ্নির ব্যাপ্য ও বহ্নির অভাবে না থাকার নামই ধূমে বহ্নির ব্যাপ্তি এবং ধূম বহ্নির ব্যাপ্য হয় বলিয়া বহ্নি ধূমের ব্যাপক, ঐরূপ ব্যাপ্তিজ্ঞানবিশিষ্ট ব্যক্তিদ্বয় পর্ব্বতাদিরূপ পক্ষে ব্যাপ্য ধূমাদির জ্ঞান হইলে পরে যে ব্যাপক বহ্ন্যাদির জ্ঞান অর্থাৎ বুদ্ধিবৃত্তি হয়, তাহাকে অনুমানরূপ প্রমাণ

अनुमेयेन सम्बद्धं प्रसिद्धञ्च तदन्विते ।
तदभावे च नास्त्येव तल्लिङ्गमनुमापकम् ॥ १०० ॥

शब्दं लक्षयति—

आप्तोपदेशः शब्दः ॥ १०१ ॥

आप्तोपदेशः शब्दः, न तु आप्तेन कृतः, अपौरुषेयत्वाद्वेदस्य । अपौरुषेयत्वञ्च पञ्चमाध्याये 'न पौरुषेयत्वम्' इति सूत्रे प्रतिपादयिष्यामः ।

शेषवत्—कार्य्यलिङ्गकं यथा—नदीवृद्ध्या वृष्ट्यनुमानं । सामान्यतो दृष्टं कार्य्यकारणभिन्न-लिङ्गकं यथा—पृथिवीत्वेन द्रव्यत्वानुमानं । संगृहीतमिति, सर्व्वेषामेवैतेषां व्याप्यज्ञानजन्य-व्यापकज्ञानत्वानपायादिति विभावनीयम् ।

वादिनामनुमानलक्षणमुदाहर्त्तुमाह—तथाचेति । अनुमेयेन—साध्येन सम्बद्धं—समानाधिकरणं तदन्विते—साध्यान्विते सपक्षे इति यावत, प्रसिद्धं—वृत्तिमत् तदभावे—तस्य साध्यस्याभावो यत्रेति व्युत्पत्त्या साध्याभाववति यन्नास्ति—यत् न वर्त्तते (तथाच तेन व्याप्यत्वं लब्धं) तत् लिङ्गं अनुमापकं—अनुमितिजनकमिति यथाश्रुतार्थः । वस्तुतस्तु तादृशलिङ्गज्ञानमनुमापकमित्येव वाच्यं, अन्यथा अतीतानागतादिहेतुकस्थले अनुमित्यपलापापत्तेः । तथाच तन्मतेऽपि व्याप्यज्ञानजन्यज्ञानत्वमेव लक्षणं फलितमित्यभिप्रायः । नन्वेवं लक्षणे फलितेऽपि तन्मते अनुमितेरेवैतल्लक्षणं, तथाच सांख्यमतेऽप्यस्यानुमितिलक्षणपरत्वमेवोचितमिति चेन्न, सांख्यमते बुद्धिवृत्तेरेव सर्व्वत्र प्रमाणत्वात् वाद्यभिमतव्याप्यज्ञानजन्यव्यापकज्ञानात्मकानुमितेर्ब्बुद्धिवृत्त्यपरनामिकायाः प्रमाणरूपताया एव सांख्याचार्य्यसम्मतत्वात्, तज्जन्यपौरुषेयबोधस्यैवानुमितिरूपत्वाच्च । अतएव भाष्यकारेणाप्यनुमानलक्षणपरतयैव सूत्रमिदं व्याख्यातमित्यनुसन्धेयम् ॥ १०० ॥

বলে। এই অনুমানের লক্ষণদ্বারা কেবলান্বয়ি, কেবল ব্যতিরেকি, অন্বয়-ব্যতিরেকি, পূর্ব্ববৎ, শেষবৎ ও সামান্যতো দৃষ্ট—এই সকল অনুমানই সংগৃহীত হইল। এবং বাদিদিগের লক্ষণও ইহাতেই অন্তর্ভূত! তাহাদের লক্ষণ এই, যেই হেতু সাধ্যাধিকরণে ও নিশ্চিত সাধ্যবৎ পক্ষে থাকে এবং সাধ্যাভাবের অধিকরণে না থাকে, এইরূপ হেতুর জ্ঞানই অনুমিতির জনক। সুতরাং তাহাদের মতেও তাদৃশ অর্থাৎ ব্যাপ্য হেতুর জ্ঞানজন্য জ্ঞানের নামই অনুমিতি ॥ ১০০ ॥

शब्द इति कारणकथनं, फलं तु शब्दजन्यं ज्ञानं, शब्दः कार्य्ये कारणोपचारात्। शाक्यादिवाक्यानां वेदविरोधेन अयुक्तत्वात् आभासत्वम् ॥ १०१ ॥

शब्दप्रमाणप्रतिपादकं सूत्रमवतारयति—शब्दमित्यादिना। सूत्रे "शब्द" इति लक्ष्यनिर्द्देशः, शिष्टं लक्षणं, आप्तः—प्राप्तः युक्त इति यावत्, य उपदेशः—वाक्यार्थज्ञानं बुद्धिवृत्तिरिति यावत्, स शब्दः—शब्दाख्यं प्रमाणमिति सूत्रार्थः। आप्तेन कृत उपदेश इति मध्यपदलोपिसमासाशङ्कां निरस्यति—नत्वित्यादिना। आप्तेन—"स्वकर्म्मण्यभियुक्तो यः सङ्गद्वेषविवर्जितः। पूजितस्तद्विधैर्नित्यमाप्तो ज्ञेयः स तादृश" इत्युक्तलक्षणेन, कृतः—सम्पादितः। अत्र हेतुमाह—अपौरुषेयत्वाद् वेदस्येति। तथाहि—"आप्तेन कृत" इत्यर्थकत्वे अपौरुषेयवेदार्थज्ञानस्याप्तसम्पादितत्वाभावात् प्रमाणत्वं न स्यादिति भावः। ननु वेदस्यापौरुषेयत्वमेवासिद्धमित्याशङ्कायामाह—अपौरुषेयत्वमित्यादि। सूत्रस्य प्रमितिलक्षणपरत्वशङ्कां निरसितुमाह—शब्द इतीति। कारणकथनं प्रमाणरूपलक्ष्यकथनं। तर्हि का प्रमितिरित्याकाङ्क्षायामाह—फलन्त्विति, शब्दजन्यं—निरुक्तबुद्धिवृत्तिरूपशब्दप्रमाणजन्यं, ज्ञानं—पौरुषेयो बोधः फलं—प्रमितिरित्यर्थः। नन्वेवं शब्दे कथं प्रमाणव्यवहार इत्यत आह—शब्दः कार्य्ये कारणोपचारादिति, प्रमाणशब्देन व्यवह्रियत इति शेषः। तथाहि "आयुर्घृत"मितिवत् प्रमाणशब्दस्य प्रमाणजनकपरतां स्वीकृत्य "प्रमाणं शब्द" इति व्यवह्रियत इति भावः। आप्तविशेषणस्य फलं दर्शयति—शाक्यादीत्यादिना। आदिपदेन श्वेतपटादीनां परिग्रहः। वाक्यानां—तज्जन्यज्ञानानां, आभासत्वं—प्रमाणाभासत्वं नतु प्रमाणत्वमित्यर्थः ॥ १०१ ॥

শব্দপ্রমাণের লক্ষণ বলিতেছেন,—যুক্ত যে উপদেশ অর্থাৎ বাক্যার্থ জ্ঞানরূপ বুদ্ধিবৃত্তি তাহাকে শব্দপ্রমাণ বলে। আপ্তের কৃত উপদেশ শব্দের লক্ষণ হইতে পারে না, কারণ তাহা হইলে বেদের অপৌরুষেয়ত্ব-নিবন্ধন বেদার্থজ্ঞানে অব্যাপ্তি হয়, বেদের অপৌরুষেয়ত্ব পঞ্চমাধ্যায়ে "ন পৌরুষেয়ত্বম্" এই সূত্রে প্রতিপাদিত হইবে। শব্দ ইহাদ্বারা প্রমাণই বলা হইল, এই শব্দপ্রমাণজন্য পুরুষের বোধের নাম শব্দপ্রমিতি। শব্দে যে প্রমাণ ব্যবহার হয়, তাহা কেবল কার্য্যে কারণের উপচার করিয়া অর্থাৎ 'আয়ুর্ঘৃতং' এইস্থানে যেমন কার্য্য আয়ুতে কারণের উপচার করিয়া আয়ুর জনক অর্থে আয়ুঃশব্দ প্রযুক্ত হয়, সেইরূপ শব্দপ্রমাণ এইস্থলেও প্রমাণ শব্দটি প্রমাণ-জনক অর্থে প্রযুক্ত হয়। শাক্যাদি বাক্যার্থজ্ঞান বেদবিরুদ্ধবিষয়ক, সুতরাং অযুক্ত, অতএব প্রমাণাভাস বস্তুগত্যা প্রমাণ নহে ॥ ১০১ ॥

प्रकृतिपुरुषविवेकार्थं शास्त्रारम्भः । न च तयोः सिद्धौ प्रमाणमस्तीत्यत आह—

उभयसिद्धिः प्रमाणात्तदुपदेशः ॥ १०२ ॥

वक्ष्यमाणात् प्रमाणात् प्रकृतिपुरुषयोः सिद्धिर्ज्ञानम् । तस्मात्तद्विवेकार्थमुपदेशो युक्त इति ॥ १०२ ॥

किं तत् प्रमाणमित्यत्राह—

सामान्यतो दृष्टादुभयसिद्धिः ॥ १०३ ॥

प्रकृतेरप्रत्यक्षत्वात् यत्कार्य्यं तत् कारणगुणपूर्वकं, कार्य्यं च त्रिगुणात्मकमिति सामान्येन प्रकृतिसिद्धिः । आत्मनोऽप्रत्यक्षत्वेऽपि यत् संहतं, तत्परार्थमित्यसंहतः परः सिद्धः । वक्ष्यति च 'संहतपरार्थत्वात्' ॥ १०३ ॥

सूत्रान्तरमवतारयितुं भूमिकामारचयति—प्रकृतीत्यादिना । पूरयित्वा "तदुपदेश" इत्यस्य तात्पर्य्यमाह—तस्मादित्यादिना । अन्यत् स्पष्टम् ॥ १०२ ॥

सूत्रान्तरमवतारयितुमाह—किन्तत् प्रमाणमिति, येन प्रमाणेनोभयसिद्धिस्तादृशं प्रमाणं किमित्यर्थः । सामान्यतो दृष्टात्—पूर्व्वोक्तलक्षणादनुमानाख्यप्रमाणात् उभययोः प्रकृतिपुरुषयोः सिद्धिरिति सूत्रार्थः । तत्र प्रकृतिसाधकानुमानप्रकारं दर्शयति—यत्कार्य्यमित्यादिना । सामान्येन—सामान्यतो दृष्टानुमानेन, तथाचायं प्रयोगः—महत्तत्त्वं सुखदुःखमोहात्मकद्रव्योपादानकं कार्य्यत्वे सति सुखदुःखमोहात्मकत्वात् घटादिवत्, उपादानीभूतं तादृशं द्रव्यमेव प्रधान-

প্রকৃতিপুরুষের ভেদজ্ঞানের জন্যই এই শাস্ত্রের আরম্ভ, কিন্তু সেই সিদ্ধি বিষয়েইত প্রমাণ নাই, এই আশঙ্কায় বলিতেছেন,—বক্ষ্যমাণ প্রমাণ হইতেই প্রকৃতি ও পুরুষের সিদ্ধি আছে—সুতরাং তাহাদের জ্ঞানের জন্য উপদেশ অযুক্ত নহে ॥ ১০২ ॥

কোন্ প্রমাণের দ্বারা প্রকৃতি ও পুরুষের সিদ্ধি হইবে, তাহাই বলিতেছেন—যেহেতু প্রকৃতির প্রত্যক্ষ হয় না, অতএব "যে কার্য্য সেই কারণগুণপূর্ব্বক অর্থাৎ কারণের গুণ হইতেই কার্য্যের গুণ উৎপন্ন হয়, অথচ কার্য্যমাত্রই ত্রিগুণ, সুতরাং অবশ্যই ত্রিগুণ একটি কারণ আছে" এই সামান্যতোদৃষ্ট অনু-

प्रकृतेर्नित्यत्वात् प्रवृत्तिशीलत्वाच्च सर्व्वदा भोग इत्यनिर्मोक्षः स्यादित्यत आह—

चिदवसानो भोगः ॥ १०४ ॥

चित् आत्मा, तद्विवेकावसानो भोगः। यथा अनादिरपि प्रागभावो नश्यति, तथा नित्यायाः प्रकृतेर्विवेकज्ञानपर्य्यन्तः प्रसवः ॥

मिति भावः। पुरुषानुमानप्रकारं दर्शयति—यत् संहतमित्यादिना। अत्रायं प्रयोगः—प्रकृतिमहदादिकं परार्थं संहतत्वात्—(संहत्यकारित्वात्) शय्यासनादिवत्। अथैवमनुमानेन परार्थत्वस्य सिद्धत्वेऽपि कथं पुरुषसिद्धिरित्यत आह—असंहतः परः सिद्ध इति, परस्याभावेन परार्थत्वस्यासम्भवादिति भावः। अनुमानसिद्धपरस्य संहतत्वे च नाभिप्रेतसिद्धिः, पुरुषस्यासंहतत्वादत आह—असंहत इति। ननु दर्शितानुमानेन परस्य सिद्धत्वेऽपि तस्यासंहतत्वे किं बीजमिति चेन्न तस्यापि संहतत्वे परार्थत्वापातात् एवमुत्तरोत्तरस्यापि संहतत्वे परार्थत्वापाते चानवस्थाप्रसङ्गात्। तथाच दर्शितानुमानेन योऽयमसंहतः परः सिद्धः स एव पुरुष इति भावः ॥ १०३ ॥

सूत्रान्तरावतरणिकामाह—प्रकृतेरित्यादिना। अविवेकमूलकस्य भोगस्य विवेकनाश्यताया एव युक्ततया चित्पदस्य विवेकपरतया सूत्रं व्याचष्टे—चिदित्यादिना। तस्य आत्मनः विवेकेन प्रधानाद्व्यतिरिक्ततया ज्ञानेन अवसानं समापनं यस्येति विग्रहः। ननु भोगस्यानादित्वेऽपि कथं नाश इत्याशङ्का दृष्टान्तप्रदर्शनेन निराकरोति यथेत्यादिना। शङ्कते—अथेति एवं—अनादिरपि सावसानः, ननु भाव इति, एवमिति सम्बन्धः, तथाचाभावत्वस्यैवानादेर्नाशे प्रयोजकत्वात् अनादेः प्रागभावस्य नाशेऽपि भावभूतस्यानादेर्भोगस्य नाशासम्भव इति शङ्कार्थः।

মানদ্বারাই প্রকৃতির সিদ্ধি হইবে। এবং আত্মার প্রত্যক্ষ না হইলেও "যে সংহত সেই পরার্থ, সুতরাং সংহত প্রধান ও অবশ্যই পরার্থ—" এই সামান্যতো দৃষ্ট অনুমান হইতেই অসংহত পর অর্থাৎ পুরুষসিদ্ধ হইবে। ইহা "সংহত-পরার্থত্বাৎ" এই সূত্রে বিশেষরূপে বলা হইবে ॥ ১০৩ ॥

প্রকৃতি নিত্য ও প্রবৃত্তিশীল, সুতরাং সর্ব্বদাই ভোগ হইতে থাকিবে, অতএব মুক্তি অসম্ভব এই আশঙ্কায় বলিতেছেন,—আত্মজ্ঞান হইলেই ভোগের অবসান হয়। যেরূপ প্রাগভাব অনাদি হইলেও বিনষ্ট হয়, সেইরূপ বিবেকজ্ঞান পর্য্যন্তই প্রকৃতি ভোগের সাধন করে, অর্থাৎ বিবেক জ্ঞান হইলেই অনাদি ভোগেরও নাশ হয়। অনাদি অভাব পদার্থের নাশ হইলেও অনাদিভাব

অথ অভাব এবং, ন তু ভাব ইতি ন, অত্রাভাবত্বং ন প্রয়োজকং, অপ্রধ্বংসাভাবেঽতথাদর্শনাৎ। অথ যথাদর্শনং ব্যবস্থা, অত্রাপ্যেবম্ ॥ ১০৪ ॥

যদি কর্ত্তৃ প্রধানং ভোক্তা পুরুষঃ, অন্যকৃতকর্মণোঽন্যো ভোক্তেতি স্যাদিত্যত আহ—

অকর্ত্তুরপি ফলোপভোগোঽন্নাদ্যবৎ ॥ ১০৫ ॥

যথা সূপকারস্য অন্নাদিকর্ত্তৃত্বমকর্ত্তুরীশ্বরস্য ফলোপভোক্তৃত্বং, তথা অত্রাপি। অর্থোদ্দেশ্যত্বেন কর্ত্তৃত্বমীশ্বরস্য। অত্রাপি আত্মোদ্দেশ্যত্বেন প্রকৃতেঃ প্রসব ইতি ॥ ১০৫ ॥

পরিহরতি—নেত্যাদিনা, অত্র—অনাদের্নাশে, অপ্রধ্বংসাভাবে—ন বিদ্যতে ধ্বংসো যস্য তাদৃশাভাবে অত্যন্তাভাবাদাবিতি যাবৎ, অতথাদর্শনাৎ—সত্যপি অভাবত্বে নাশাদর্শনাৎ। অত্র প্রধ্বংসাভাবাদিতি নঞ্‌রহিতঃ পাঠঃ প্রামাদিক এব, তস্য সাদিত্বেন তত্র ব্যভিচারদর্শনস্য প্রকৃতানুপযোগিত্বাৎ। পুনঃ শঙ্কতে—অথেত্যাদিনা, যথাদর্শনং—যথানুভবং ব্যবস্থাকল্পনং। তথাচ অভাবত্বসত্ত্বেঽপি যস্যানাদের্নাশো নানুভবসিদ্ধস্তত্রাভাবত্বস্য প্রতিযোগিতাসম্বন্ধেন নাশং প্রতি প্রযোজকত্বং ন কল্পতে ইত্যর্থঃ। পরিহর্ত্তুমাহ—অত্রেতি, ভোগনাশেঽপীত্যর্থঃ, এবং—যথাদর্শনং ব্যবস্থা। তথাচ প্রতিযোগিতাসম্বন্ধেনানাদের্নাশং প্রতি ভাবত্বং অভাবত্বং বা ন তন্ত্রং, পরন্তু যস্য যদা নাশোঽনুভবসিদ্ধস্তদনুগুণং কিমপি প্রযোজকং কল্পনীয়মিতি ন কাচিদনুপপত্তিরিতি ভাবঃ ॥ ১০৪ ॥

কর্ত্তৃত্বভোক্তৃত্বয়োঃ সামানাধিকরণ্যাবশ্যম্ভাবস্য নিরাসকং সূত্রমবতারয়তি—যদীত্যাদিনা। সূত্রতাৎপর্য্যং বিবৃণোতি—যথেত্যাদিনা, সূপকারস্য—পাচকস্য, ঈশ্বরস্য—সূপকারপ্রভোঃ। অত্রাপি

পদার্থের নাশ হয় না, ইহাও বলা চলে না, যেহেতু অনাদির নাশে প্রতিযোগিতে অভাবত্বের প্রয়োজকতা স্বীকার করা যায় না, কারণ অত্যন্তাভাবাদিতে অভাবত্ব সত্ত্বেও তাহাদের ধ্বংস হয় না। যদি অনুভব অনুসারে ব্যবস্থা হয়, তবে ভোগের নাশেও সেইরূপ ব্যবস্থা হইতে পারে ॥ ১০৪ ॥

যদি প্রকৃতিতে কর্ত্তৃত্ব ও পুরুষে ভোক্তৃত্ব থাকে, তবে অন্যকৃত কর্ম্মের ভোক্তা অন্য হইয়া পড়ে, এই আশঙ্কায় বলিতেছেন,—যেরূপ পাচকে পাক করে, পাচকের স্বামী পাক না করিয়াও সেই অন্ন ভোগ করে, সেইরূপ

ব্যবহারসিদ্ধান্তমুক্ত্বা স্বসিদ্ধান্তমাহ—

অবিবেকাদ্বা তৎসিদ্ধেঃ কর্ত্তুঃ ফলাবগমঃ ॥১০৬॥

ন পুরুষঃ কর্ত্তা ন ভোক্তা, কিন্তু মহত্তত্ত্বপ্রতিবিম্বিতত্বাৎ কর্ত্তৃত্বাভিমানঃ। 'অবিবেকাদ্বা' ইতি প্রকৃতিপুরুষয়োর্বিবেকাগ্রহাৎ। তৎসিদ্ধেঃ কর্ত্তুঃ ফলোপভোগাভিমানসিদ্ধেরিতি ॥ ১০৬ ॥

প্রকৃতিপুরুষয়োঃ কর্ত্তৃভোক্তৃভাবেঽপি, তথা প্রকৃতেঃ কর্তৃত্বং অকর্ত্তুরপি পুরুষস্য ভোক্তৃত্বম্। অথ মাস্তু সমবায়সম্বন্ধেন কৃতের্ভোগস্য সামানাধিকরণ্যনিয়মঃ, কিন্তু উদ্দেশ্যতাসম্বন্ধেন ভোগসামানাধিকরণ্যনিয়মাঙ্গীকারে নাস্তি বিরোধ ইতি শঙ্কতে—অথেত্যাদিনা। প্রকৃতেঽপি তদবৈষম্যং দর্শয়িত্বা শঙ্কাং নিরসিতুমাহ—অত্রাপীতি। তথাচ পুরুষেঽপি উদ্দেশ্যত্বসম্বন্ধেন প্রকৃতেঃ কর্তৃত্বস্য সত্ত্বাদ্ভোক্তৃনিয়মভঙ্গ ইতি ভাবঃ ॥ ১১৫ ॥

সূত্রান্তরমবতারয়তি—ব্যবহারেত্যাদিনা। সূত্রং ব্যাখ্যাতুং প্রথমং সাংখ্যসিদ্ধান্তং দর্শয়তি—ন পুরুষ ইত্যাদিনা। সূত্রং ব্যাচষ্টে অবিবেকাদ্বা—ইতীত্যাদিনা। কর্ত্তুঃ—কর্তৃত্বাভিমানবতঃ পুরুষস্য। সূত্রে কর্ত্তুঃ ফলাবগম ইতি, কর্ত্তুঃ—প্রধানস্য ফলাবগমঃ—ভোগাদিরূপফলসিদ্ধিরিত্যর্থঃ। তথাচ সাংখ্যমতে বাস্তবভোগস্যাপি প্রধানধর্ম্মতয়া কৃতিভোগয়োর্ব্যধিকরণ্যমেব নাস্তীতি তন্নিবন্ধনদোষাশঙ্কা ন লব্ধাস্পদেতি ভাবঃ ॥ ১০৬ ॥

কর্ত্তা না হইয়াও প্রকৃতির কার্য্যের ভোগ করিয়া থাকে। যদি বল উদ্দেশ্যতা সম্বন্ধে পাচকের স্বামীতেও কর্তৃত্ব আছে, তবে এস্থলেও পুরুষ উদ্দেশ্যেই প্রকৃতি কার্য্য করেন বলিয়া পুরুষের উদ্দেশ্যতা সম্বন্ধে কর্তৃত্ব আছে, (অতএব পুরুষের ভোগে কোনও বাধা নাই) ॥ ১০৫ ॥

পূর্ব্ব সূত্রদ্বারা যে সিদ্ধান্ত বলিয়াছেন, তাহা ব্যবহারিক সিদ্ধান্ত, এই সূত্রদ্বারাই সাংখ্যাচার্য্যের নিজের সিদ্ধান্ত বলিতেছেন—পুরুষ কর্ত্তাও নহে, ভোক্তাও নহে, কিন্তু মহত্তত্ত্বে প্রতিবিম্বিত হয় বলিয়া পুরুষে কর্তৃত্বের অভিমান হইয়া থাকে। প্রকৃতিপুরুষের ভেদজ্ঞান থাকে না বলিয়াই কর্তৃত্বাভিমানি পুরুষের ভোগাভিমানও হইয়া থাকে, সুতরাং প্রকৃতিতেই বাস্তবিক ভোগের সিদ্ধি হইল। ফলে এখন ইহাই সিদ্ধান্ত হইল যে, বাস্তবিক কর্তৃত্ব ও ভোক্তৃত্ব উভয়ই যখন প্রকৃতির ধর্ম্ম, তখন কর্তৃত্বরহিত পুরুষে ভোগ হয় কিরূপে? এই আশঙ্কাই হইতে পারে না ॥ ১০৬ ॥

एतद्व्यतिरेकमाह—

नोभयं च तत्त्वाख्याने ॥ १०७ ॥

विवेकात्तत्त्वज्ञाने नोभयं न कर्त्तृत्वं न भोक्तृत्वमिति ॥ १०७ ॥

प्रमाणमुक्त्वा प्रमेयव्यवस्थामाह—

विषयोऽविषयोऽप्यतिदूरादेर्हानोपादानाभ्यामिन्द्रियस्य ॥ १०८ ॥

इन्द्रियस्य उपादानात् सम्बन्धात् विषयः। इन्द्रियस्य हानात् सम्बन्धाभावात् अविषयः। असम्बन्धश्च अतिदूरादेरयोग्यत्वात्। अतिदूरात् वियति पक्षी नोपलभ्यते, अतिसामीप्यात् लोचनस्था-

---

निरुक्तसिद्धान्तस्य दृढ़ीकरणपरं सूत्रमवतारयति—एतद्व्यतिरेकमित्यादिना। एतयोः—वास्तवकर्त्तृत्वभोक्तृत्वयोः व्यतिरेकं—पुरुषे अभावम्। यावत्तत्त्वज्ञानं नोदेति तावदेवाभिमानिकं कर्त्तृत्वं भोक्तृत्वञ्च पुरुषे व्यवह्रियते, न तु वस्तुगत्या कर्त्तृत्वं भोक्तृत्वं वा पुरुषे तिष्ठतीति सूत्रतात्पर्य्यम् ॥ १०७ ॥

प्रमेयव्यवस्थाप्रदर्शनपरं सूत्रमवतारयितुमाह—प्रमाणमित्यादि। वस्तुगतिमनुरुध्य हानोपादानाभ्यामिति पदषट्कपदार्थं व्युत्क्रमेण विभज्य सूत्रं व्याचष्टे—इन्द्रियस्येत्यादिना। विषयः—प्रत्यक्षविषयः, अविषयः—प्रत्यक्षाविषयः, पदार्थो भवतीति शेषः। अतिदूरादेरित्यस्य प्रयोज्यमध्याहार्य्य दर्शयति—असम्बन्धश्चेति। इन्द्रियासम्बन्धश्चेत्यर्थः, अतिदूरादेरिति, अतिदूरत्वादेरित्यर्थः। अतिदूरत्वात् आदिपदेन येषां दोषाणामुपादानं तेभ्यश्च इन्द्रियासम्बन्धात् येषां अनुपलब्धिः तानि विशिष्य दर्शयति—अतिदूरादित्यादिना। शब्दध्वनिरित्यादिना समानाभिहारादिपरिग्रहः, यथोक्तं कारिकया—

বাস্তব কর্তৃত্ব ও ভোক্তৃত্ব যে পুরুষে নাই, তাহাই বলিতেছেন—বিবেকবশতঃ প্রকৃত তত্ত্বজ্ঞান হইলে কর্তৃত্ব বা ভোক্তৃত্ব কিছুই পুরুষে থাকে না, যে পর্য্যন্ত তত্ত্বজ্ঞান না হয়, সে পর্য্যন্ত কর্তৃত্ব ও ভোক্তৃত্বের অভিমান থাকে মাত্র ॥ ১০৭ ॥

প্রমাণ বলিয়া এখন প্রমেয়ের ব্যবস্থা বলিতেছেন—ইন্দ্রিয়ের সম্বন্ধ হইলেই পদার্থ প্রত্যক্ষের বিষয় হয় এবং ইন্দ্রিয়ের সম্বন্ধ না হইলেই প্রত্যক্ষের বিষয়

ज्जनं, व्यवधानात् कुड्यस्थं वस्तु, मनोऽनवस्थानात् शोकादिग्रस्तस्य पार्श्वस्थवस्त्वग्रहणं, सौक्ष्म्यादणोः, अभिभवात् मार्दलध्वनिना शङ्खध्वनिरित्यादिः ॥ १०८ ॥

प्रकृतेः कथमनुपलब्धिरित्यत आह—

सौक्ष्म्यादनुपलब्धिः ॥ १०९ ॥

दुरूहत्वं सौक्ष्म्यं न तु अणुत्वं, प्रकृतेर्विभुत्वात् ॥ १०९ ॥

अतिदूरात् सामीप्यादिन्द्रियघातान्मनसोऽनवस्थानात्।
सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्च ॥ इति।

तथाच वस्तुनः सत्त्वेऽपि दोषवशादनुपलब्धेः सिद्धत्वान्नानुपलब्धिः प्रकृत्यादीनामभावसाधिकेति भावः ॥ १०८ ॥

सूत्रान्तरमवतारयति—प्रकृतेरित्यादिना। दुरूहत्वञ्च प्रत्यक्षप्रयोजकशान्ताद्यवस्थाराहित्यं निरवयवद्रव्यत्वं वेति मन्तव्यम ॥ १०९ ॥

হয় না। অতি দূরত্বাদি দোষে অযোগ্য হইলেই তাহাতে ইন্দ্রিয়ের সম্বন্ধ হয় না, যেমন পক্ষী আকাশে উঠিলে অতি দূরত্বনিবন্ধন প্রত্যক্ষের বিষয় হয় না, অতি সামীপ্যনিবন্ধন নেত্রের কজ্জল প্রত্যক্ষের বিষয় হয় না, ব্যবধানবশতঃ গৃহের বস্তু প্রত্যক্ষের বিষয় হয় না, মনের ব্যস্ততানিবন্ধন সমীপস্থিত বস্তুও শোকাভিভূত ব্যক্তির প্রত্যক্ষের বিষয় হয় না, সূক্ষ্মতাবশতঃ পরমাণু প্রত্যক্ষের বিষয় হয় না, এবং মৃদঙ্গধ্বনি দ্বারা অভিভূত শঙ্খধ্বনি প্রত্যক্ষের বিষয় হয় না। আদি পদদ্বারা সমানাভিহার অর্থাৎ তুল্যরূপ বস্তুর সংমিশ্রণাদির পরিগ্রহ করিতে হইবে, যেমন জলাশয়ে বৃষ্টির জল পড়িলে মিশ্রিত হয় বলিয়া প্রত্যক্ষের বিষয় হয় না ইত্যাদি ॥ ১০৮ ॥

প্রকৃতির প্রত্যক্ষ হয় না কেন? তাহাই অতঃপর বলিতেছেন—সূক্ষ্মতাবশতঃই প্রকৃতির প্রত্যক্ষ হয় না, কিন্তু এই সূক্ষ্মত্ব দুরূহত্ব অর্থাৎ নিরবয়ব দ্রব্যত্ব অণুত্ব নহে, যে হেতু প্রকৃতি বিভু পদার্থ ॥ ১০৯ ॥

কথং তর্হি প্রকৃতিব্যবস্থা ইত্যত আহ—

কার্য্যদর্শনাত্তদুপলব্ধেঃ ॥ ১১০ ॥

যথা ঘটদর্শনাৎপরমাণুজ্ঞানং, তথা ত্রিগুণকার্য্যদর্শনাৎ প্রকৃতিজ্ঞানম্ ॥ ১১০ ॥

ব্রহ্মকারণং জগদিতি কেচিৎ, পরমাণুকারণমিত্যন্যে, প্রকৃতিকারণমিতি বৃদ্ধা ইতি সংশয়মাহ—

বাদিবিপ্রতিপত্তেস্তদসিদ্ধিরিতি চেৎ ॥ ১১১ ॥

তদসিদ্ধিঃ প্রধানাসিদ্ধিঃ ॥ ১১১ ॥

ননু অভাবাদপি নরশৃঙ্গাদীনামনুপলব্ধির্ভবেদিতি প্রকৃতেরপ্যনুপলব্ধিরভাবাদেব কথং ন কল্প্যতামিত্যাশঙ্কায়াঃ সমাধানপরং সূত্রমবতারয়িতুং পৃচ্ছতি—কথমিত্যাদিনা। প্রকৃতিজ্ঞানং প্রকৃতেরনুমানম্, অনুমানপ্রকারস্তু পূর্ব্বমেব প্রদর্শিতঃ ॥ ১১০ ॥

প্রকৃতিপরীক্ষণায় পূর্ব্বপক্ষসূত্রমবতারয়তি—ব্রহ্মকারণমিত্যাদিনা। ব্রহ্ম কারণং যস্যেতি বিগ্রহঃ, এবমন্যেঽপি। কেচিৎ—বৈদান্তিকাঃ। অপরে—বৈশেষিকাদয়ঃ। সূত্রে বাদিবিপ্রতিপত্তেরিতি, বাদিনাং বৈশেষিকাদীনাং বিপ্রতিপত্তেঃ—বিরুদ্ধাপ্রতিপত্তির্জ্ঞানং যেন তস্মাদিতি ব্যুৎপত্ত্যা বিরুদ্ধকোট্যুপস্থাপকশব্দাদিত্যর্থঃ ॥ ১১১ ॥

প্রকৃতির যে হেতু প্রত্যক্ষ হয় না, অতএব তাঁহার সিদ্ধি হয় কিরূপে? কারণ অভাববশতঃ তাহার উপলব্ধি হয় না, ইহাও বলা যায়, এই আশঙ্কায় বলিতেছেন—যেরূপ ঘটদর্শনে পরমাণুর অনুমান হয়, সেইরূপ ত্রিগুণকার্য্যদর্শনে ত্রিগুণ প্রকৃতিরও অনুমান হইবে ॥ ১১০ ॥

বৈদান্তিকগণ বলেন, ব্রহ্মই জগতের উপাদান কারণ, বৈশেষিক প্রভৃতিরা বলেন, পরমাণুই জগতের উপাদান কারণ, সাংখ্যাচার্য্য বলেন, প্রকৃতিই জগতের উপাদান কারণ, সুতরাং কারণরূপে প্রধানের সিদ্ধি হইতে পারে না, এই সংশয়ই বলিতেছেন—বাদিদিগের বিপরীত কোটির উপস্থাপক শব্দ আছে বলিয়াই প্রধানের সিদ্ধি হইবে না ॥ ১১১ ॥

सिद्धान्तमाह-

तथाप्येकतरदृष्ट्यान्यतरसिद्धेर्नापलापः ॥ ११२ ॥

यदि वादिविप्रतिपत्तिमात्रेण पक्षासिद्धत्वं, विपक्षेऽपि विप्रतिपत्तिरस्तीति कथं तत्सिद्धिः। यदि व्याप्यज्ञानात् व्यापकज्ञानस्य अविनाभावित्वात् पक्षसिद्धिः, ममापीयमिति न कार्य्यात् अनुमानापलापः ॥ ११२ ॥

कार्य्यात् कारणमस्तु, तच्च प्रकृतिरिति कथमित्यत आह—

त्रिविधविरोधापत्तेः ॥ ११३ ॥

त्रिविधो गुणः, सत्त्वरजस्तमांसि। तद्विरोधः तच्छून्यं जगत् भवेत्। न चैवं दृश्यत इति ॥ ११३ ॥

सिद्धान्तमिति, उक्तशङ्कायाः सिद्धान्तमित्यर्थः। सूत्रतात्पर्य्यं विवृणोति—यदीत्यादिना। वादिविप्रतिपत्तिमात्रेणेति एकतरदृष्ट्येत्यस्य विवरणम्। पक्षासिद्धत्वमिति, पक्षस्य—जगतः प्रकृत्युपादानकत्वरूपाभ्युपगतसिद्धान्तस्य असिद्धत्वं—प्रमाज्ञानविषयत्वाभावः, विपक्षेऽपीति तदित्यादिः, तत्सिद्धिः—तस्य विपक्षस्य वादिनां जगतः ब्रह्मोपादानकत्वादिसिद्धान्तस्येति यावत्सिद्धिः प्रमाज्ञानविषयत्वम्। तथाच विप्रतिपत्तिसद्भावमात्रेण न कस्यापि पक्षस्यासिद्धिर्भवितुमर्हतीति भावः। परैः स्वपक्षसिद्धये यत्प्रयोजकमभिधीयते तदस्माकमपि समानमिति दर्शयति—यदीत्यादिना ॥ १२ ॥

प्रकृतिकारणत्वसमर्थनपरं सूत्रान्तरमवतारयति—कार्य्यादित्यादिना। सूत्रं व्याचष्टे—त्रिविध इत्यादिना। तच्छून्यं जगद्भवेदिति, यदि त्रिगुणं प्रधानं कारणं न स्यादिति शेषः।

ইহার সিদ্ধান্ত বলিতেছেন—যদি বাদিদিগের বিপ্রতিপত্তিদ্বারাই জগতের প্রকৃত্যুপাদান পক্ষের অসিদ্ধি হয়, তবে ব্রহ্মোপাদানাদি পক্ষেরও বিরুদ্ধ প্রতিপত্তি আছে বলিয়া কিরূপে সিদ্ধি হইবে? সুতরাং কেবল বিরুদ্ধ প্রতিপত্তিদ্বারা কোন পক্ষেরই অসিদ্ধি হইতে পারে না। ব্যাপ্যজ্ঞান হইতে ব্যাপকজ্ঞানের অব্যভিচারিত্বনিবন্ধন যদি পক্ষসিদ্ধি হয়, তবে সাংখ্যমতেও দর্শিত কার্য্য দর্শনজনিত অনুমানের অপলাপ হইবে না ॥ ১১২ ॥

কার্য্য হইতে কারণের সিদ্ধি হইলেও সেই কারণ যে প্রকৃতি, তাহার নিশ্চয়

कार्य्यस्य किं सत उत्पत्तिः असतो वेति संशयं निरस्यति—

नासदुत्पादो नृशृङ्गवत् ॥ ११४ ॥

असदेकस्वभावं नृशृङ्गादि, सदेकस्वभावमाकाशादि, सदसत्-स्वभावा घटादय इति कथं नृशृङ्गतुल्यत्वम्। तत् न, घटादीनां प्रागभावसमयेऽसत्त्वम्, नृशृङ्गादीनां सर्वदाऽसत्त्वमिति द्वयोः को विशेषः। घटादीनां जन्मदर्शनं विशेष इति चेत्, एतदेव चिन्त्यते, एतदेवोत्तरमित्यहो नैपुण्यम् ॥ ११४ ॥

अत्रायमभिप्रायः—कारणे ये ये गुणा वर्त्तन्ते, कार्य्येऽपि ते ते गुणा एव दृश्यन्ते, यथा मृदादि गुणास्तज्जन्यघटादौ अत एवोक्तं "कारणगुणाः कार्य्यगुणानारभन्ते" इति। एवञ्च त्रिगुण-रहितं ब्रह्म यदि जगदुपादानं स्यात्तदा जगदपि त्रिगुणरहितं स्यात्। तस्माज्जगतस्त्रिगुणत्वा-देव सिद्धं त्रिगुणं प्रधानं जगत्कारणमिति ॥ ११३ ॥

सत्कार्य्यवादसमर्थनपरं सूत्रमवतारयितुमाह—कार्य्यस्येत्यादि, सतः—उत्पत्तेः प्रागपि विद्यमानस्य, उत्पत्तिः—अभिव्यक्तिः, असतः—उत्पत्तेः प्रागविद्यमानस्य। "नृशृङ्गवत्—नरशृङ्गतुल्यस्यासत उत्पादो न सम्भवतीति" सूत्रार्थः। अत्र नैयायिकादीनामारम्भवादिना-माशङ्कां दूषयितुमुपन्यस्यति—असदित्यादिना। असदेकस्वभावम्—असत्त्वेनैव प्रतीतिविषयता-वत्, सदेकस्वभावं सत्त्वेनैव प्रतीतिविषयतावत् सदसत्स्वभावाः—उत्पत्तेः प्राक् सत्त्वेन उत्पत्तेः पश्चादसत्त्वेन च प्रतीतिविषयाः। कथं नृशृङ्गतुल्यत्वमिति, घटादीनामुत्पत्तेः प्रागसत्त्वेऽपि असदेकस्वभावत्वाभावेन सादृश्यासम्भवादिति भावः। परिहरति—तन्नेत्यादिना। प्रागभावसमये—उत्पत्तेः प्राक्। को विशेष इति, तथाच असत्त्वेन सादृश्ये नास्ति

কি? এই আশঙ্কায় বলিতেছেন, প্রকৃতি যদি জগতের উপাদান কারণ না হয়, তবে জগতে সত্ত্ব, রজঃ ও তমঃ এই তিনটি গুণ থাকিতে পারে না, অথচ জগৎ ত্রিগুণপরিশূন্য বলিয়া প্রতীত নহে ॥ ১১৩ ॥

উৎপত্তির পূর্ব্বেও যে সৎ এরূপ কার্য্যেরই উৎপত্তি হয় অথবা উৎপত্তির পূর্ব্বে যে থাকে না এরূপ কার্য্যেরই উৎপত্তি হয়, এই সংশয়ের নিরাস করিতেছেন—"মনুষ্যশৃঙ্গের ন্যায় অসতের উৎপত্তি হইতে পারে না।" মনুষ্য শৃঙ্গাদি সর্ব্বদাই অসৎ, আকাশাদি সর্ব্বদাই সৎ, এবং ঘটাদি উৎপত্তির পূর্ব্বে অসৎ ও উৎপত্তির পরে সৎ, সুতরাং ঘটাদি নৃশৃঙ্গের তুল্য হয় কি প্রকারে?

सत्कार्य्ये न्यायमाह—

उपादाननियमात् ॥ ११५ ॥

कारणसम्बन्धात् कार्य्यस्य। सम्बन्धश्च विद्यमानयोरेव। अन्यथा सर्वदा सर्वत्र कार्य्योत्पत्तिः स्यात् ॥ २१५ ॥

विरोध इति भावः। पुनरारम्भवादिनां शङ्कां दर्शयितुमाह—घटादीनामिति जन्मदर्शनं—प्रागसतामपि तेषामुत्पत्तिदर्शनं विशेषः नृशृङ्गसत्त्वाद घटादीनामसत्त्वस्य वैलक्षण्यसम्पादकम्। परिहरति—एतदेवेत्यादिना। एतदेव—घटादीनामसतां जन्मदर्शनमेव, चिन्त्यते—असताम् उत्पत्तिः सती वा अभिव्यक्तिरिहेष्यत इति सन्दिह्यते। अहो नैपुण्यमिति.सौल्लुण्ठनोक्तिरियं। सन्दिग्धमुत्तरं भवितुं नार्हतीति भावः ॥ ११४ ॥

सत्कार्य इति, उत्पत्तेः प्रागपि कार्य्यस्य सत्त्वे इत्यर्थः। न्यायं—युक्तिम्। कारण-सम्बन्धात् कार्य्यस्येति उपादाननियमादित्यस्य विवरणम्, कारणे कार्य्यसम्बन्धस्य नियतत्वादिति तदर्थः, नासदुत्पाद इति पूर्व्वेण सम्बन्धः। कारणे कार्य्यसम्बन्धस्य नियतत्वेऽपि कथं नास-दुत्पाद इष्यत आह—सम्बन्धश्च विद्यमानयोरेवेति, तथाच उत्पत्तेः प्राक् कार्य्यस्यासत्त्वे समवायिकारणे तस्य सम्बन्धासम्भवात्तदुत्पादो न भवितुमर्हतीति भावः। कारणे कार्य्य-सम्बन्धनियतत्वस्यानङ्गीकारे दोषं दर्शयितुमाह—अन्यथेति। उपादानकारणे कार्य्यसम्बन्धं विनापि कार्य्योत्पादस्वीकारे इत्यर्थः। कार्य्योत्पत्तिः स्यात् सर्व्वकार्य्योत्पत्तिः स्यात्, इदं कार्य्यमत्र भवति, इदं न भवति तस्य नियामकाभावादिति भावः। नियतसम्बन्धस्वीकारे तु यत्कार्य्यस्य यत्कारणे यदा सम्बन्धः स्यात् तत्कार्य्यमेव तत् 'कारणसत्त्वे तदा समुत्पद्यते नान्यदिति न सर्व्वदा सर्व्वत्र सर्व्वकार्य्योत्पत्तिप्रसङ्ग इति ध्येयम् ॥ ११५ ॥

এই আশঙ্কাও এস্থলে হইতে পারে না, কারণ ঘট উৎপত্তির পূর্ব্বে অসৎ আর নৃশৃঙ্গাদি সর্ব্বদা অসৎ হইলেও উভয়ের অসত্ত্বের কোনও বৈলক্ষণ্য নাই, ঘটাদির জন্ম দেখা যায়, আর নৃশৃঙ্গাদির জন্ম দেখা যায় না, ইহাই বিশেষ একথা বলাও নিতান্তই নিপুণতা অর্থাৎ মূর্খতা, কারণ অসৎ ঘটাদির জন্ম হয় কি না ইহাই বিচার্য্য বিষয়, ইহাকেই সিদ্ধান্ত বলিয়া গ্রহণ করিলে মূর্খতা ভিন্ন আর কি বলা যায় ॥ ১১৪ ॥

কার্য্য যে উৎপত্তির পূর্ব্বেও সৎ এ বিষয়ে যুক্তি বলিতেছেন—উপাদান কারণে অবশ্যই কার্য্যের নিয়ত সম্বন্ধ স্বীকার করিতে হইবে, নচেৎ সর্ব্বদাই

एतदेवाह—

सर्व्वत्र सर्व्वदा सर्वासम्भवात् ॥ ११६ ॥

व्यक्तम् ॥ ११६ ॥

ननु उपादानकारणत्वाविशेषेऽपि यस्य यत् शक्यं, तदेव तत् करोति। नहि तन्तुर्घटस्य कारणं भवति, कुतः सर्वसम्भव इत्यत आह—

शक्तस्य शक्यकरणात् ॥ ११७ ॥

शक्तस्य शक्तिः शक्यविषया वा न वा? शक्यविषया चेत्, शक्यस्य सत्त्वं वाच्यम्। नेति पक्षे तन्तुतो घटोत्पत्तिस्तदवस्था ॥ ११७ ॥

एतदेवेति—उपादाननियतत्वमेवेत्यर्थः। व्यक्तमिति, सर्व्वत्र सर्व्वदा सर्व्वासम्भवादुपादाननियम आवश्यक इति तात्पर्यं स्पष्टमित्यर्थः। उपादानानियमे च सर्व्वत्र सर्व्वदा सर्व्वं सम्भवेदिति भावः ॥ ११६ ॥

सूत्रान्तरमवतारयति—नन्वित्यादिना। सूत्रतात्पर्य्यमाख्यातुं विकल्पयति—शक्तस्येत्यादिना। शक्तस्य—शक्तिमत्तया अनुमतस्य, शक्तिः—कार्य्यजननयोग्यं विजातीयं सामर्थ्यम्, शक्यविषया—कार्य्यसम्बद्धा, शक्यस्य—कार्य्यस्य, सत्त्वम्—उत्पत्तेः प्रागपि वर्त्तमानत्वम्, वाच्यमिति,

সর্ব্বত্র সমস্ত কার্য্যের উৎপত্তি হইতে পারে, অথচ উভয় বস্তু বিদ্যমান থাকিলেই সম্বন্ধ হইতে পারে, নচেৎ নহে, সুতরাং সেই সম্বন্ধের অনুরোধেই উৎপত্তির পূর্ব্বেও কার্য্যকে সৎ বলিতে হইবে ॥ ১১৫ ॥

উপাদানে কার্য্যের সম্বন্ধ নিয়ম যে স্বীকার করিতে হইবে তাহাই বলিতেছেন—সর্ব্বত্র সর্ব্বদা সমস্ত বস্তু হয় না বলিয়াই উক্ত উপাদান নিয়ম স্বীকার করিতে হইবে ॥ ১১৬ ॥

আচ্ছা উপাদান কারণত্বদ্বারা কোন বিশেষ না থাকিলেও যে কার্য্য যাহার নিষ্পাদন-যোগ্য, সেই তাহা করিয়া থাকে, সুতরাং তন্তু ঘটের কারণ হইবে না, অতএব সর্ব্বদা সর্ব্বসম্ভবই বা হইবে কি প্রকারে? এই আশঙ্কায়

अपरं न्यायमाह—

कारणभावाच्च ॥ ११८ ॥

कार्य्यकारणयोरैकत्वात्। घटाकारेण परिणतोऽपि मृद्रूपतां न जहाति। न च सदसतोरैकत्वम्। यदि द्वयोरैकत्वं, मृत्पिण्डे-

---

अन्यथा असता सम्बन्धासम्भवेन उत्पत्तेः प्राक् शक्तेः कार्य्यसम्बन्धत्वं न सम्भवेदिति भावः। नेति पक्षे—शक्तेः कार्य्यसम्बन्धत्वाभावपक्षे, तदवस्थेति तन्तुतः पट एवोत्पद्यते न घट इत्यस्य नियामकाभावादिति भावः। तथाच शक्तस्य शक्यकरणादपि शक्तेः सम्बन्धान्यथानुपपत्त्या कार्य्यं उत्पत्तेः प्रागपि सदिति सूत्रार्थः फलितः ॥ ११७ ॥

अपरमिति—सत्कार्य्यवाद इत्यादिः, न्यायं—युक्तिं। "कारणभावा" दित्यस्यार्थमाह—कार्य्यकारणयोरैकत्वादिति, तथा च सूत्रे कार्य्यस्येति पूरणीयमित्यभिप्रायः। कार्य्यकारणयोरैकत्वमेव विशदय्य दर्शयितुमाह—घटेत्यादि। ननु कार्य्यकारणयोरैकत्वेऽपि कथं सत्कार्य्यसिद्धिरित्याशङ्कायामाह—न च सदसतोरैकत्वमिति, तथाच सतः कारणस्याभेदानुरोधेनाप्यवश्यं कार्य्येण सता भवितव्यमिति भावः। अत्रारम्भवादी शङ्कते—यदीत्यादिना, द्वयोः—कार्य्यतदुपादानकारणयोः मृत्पिण्डेनापि—घटरूपेणापरिणतेनापीत्यर्थः, जलाहरणं—मृत्पिण्डकार्य्यघट-

---

বলিতেছেন—শক্তিশালী বলিয়া অভিমত কারণের শক্তি কার্য্যে সম্বন্ধ কি না ? যদি কার্য্যে সম্বন্ধ হয়, তবে উৎপত্তির পূর্ব্বেও কার্য্যের বর্ত্তমানতা অবশ্যই স্বীকার করিতে হইবে, অন্যথা সৎ ও অসতের সম্বন্ধ না হওয়ায় উৎপত্তির পূর্ব্বে কার্য্যে শক্তির সম্বন্ধ সর্ব্বথাই অসম্ভব হইয়া পড়ে, আর যদি শক্তি কার্য্যে সম্বন্ধ না হইয়াই কার্য্য উৎপাদন করে, তবে তন্তু হইতে ঘটোৎপত্তির আপত্তি পূর্ব্ববৎই থাকিয়া যায়, কারণ তন্তুর শক্তি পটই জন্মাইবে, ঘট জন্মাইবে না, এরূপ নির্দ্ধারণের কোনও যুক্তি থাকে না। অতএব শক্তিমৎকারণ কার্য্য করে বলিয়াও উৎপত্তির পূর্ব্বে কার্য্য সৎ বলিতে হইবে ॥ ১১৭ ॥

সৎকার্য্যবাদে আরও যুক্তি বলিতেছেন—মৃত্তিকা ঘটরূপে পরিণত হইলেও নিজের মৃত্তিকাত্ব পরিত্যাগ করে না, সুতরাং কার্য্য ও কারণের অভিন্নত্বই প্রতিপন্ন হইতেছে, এই কার্য্য কারণের অভিন্নত্ববলেও সৎকার্য্যবাদ স্বীকার করিতে হইবে, কারণ,—কার্য্য সৎ না হইলে কোনরূপেই সৎ কারণের অভিন্ন হইতে পারে না, সৎ ও অসতের একত্ব সর্ব্বথাই যুক্তিপ্রমাণবিরুদ্ধ। এস্থলে

नापि जलाहरणं कर्त्तव्यम्। भवेदेवं, यदि अत्यन्ताभेदः स्यात्, भेदाभेदपक्षे तु न कश्चिद्दोष इति। तथा च—

असत्त्वान्नास्ति सम्बन्धः कारणैः सत्त्वसङ्गिभिः।
असंबद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः॥

कार्य्यं जलाहरणमित्यर्थः, कर्त्तव्यमिति, किन्तु न क्रियत इति शेषः। तथाच क्रियाविशेषनिष्पादनशक्तिसद्भावासद्भावाभ्यामेव कार्य्यकारणयोर्नाभिन्नत्वं भवितुमर्हतीति भङ्गार्थः। परिहरति—भवेदेवमित्यादिना। एवं—घटरूपकार्य्यादभिन्ने मृत्पिण्डे घटादिवाद्यजलाहरणक्रियानिष्पादनप्रसक्तिः, अत्यन्ताभेदः—कार्य्योत्पादनकारणयोः सर्व्वथैवाभिन्नत्वं।

भेदाभेदपक्षे—कारणे अव्यक्तरूपेण कार्य्यस्याभिन्नत्वं व्यक्तरूपेण च भिन्नत्वं इत्यां मते, न कश्चिद्दोष इति, एकस्मिन्नपि अवस्थाभेदेन भावाभावयोः समावेशस्य सिद्धत्वाद् येन रूपेण कारणे कार्य्यस्याभिन्नत्वं, तेन रूपेण कार्य्येऽपि जलाहरणशक्तेरभावेनोक्तदोषस्यानवकाशादिति भावः। तथाच सत्कार्य्यवादिसांख्याचार्य्यैरपि निरुक्तभावाभावपक्षस्यैव लक्षीकृतत्वात्तन्मतेऽपि न कश्चिद्दोष इति तात्पर्य्यम्।

सत्कार्य्यवादे वृद्धसम्मतिं दर्शयितुं कारिकामुत्थापयन्नाह—तथाचेति। असत्त्वादिति कार्य्याणामनुत्पत्तेः प्रागिति शेषः, सत्त्वसङ्गिभिः—सत्त्वसंसर्गवद्भिः सत्त्वाश्रयैरिति यावत् कारणैः सम्बन्धः—असतः कार्य्यस्य संसर्गः न अस्ति—न सम्भवति, सम्बन्धे उभयोर्व्विद्यमानत्वस्यैव तन्त्र-

অসৎ কার্য্যবাদীর আশঙ্কা এই যে, কার্য্য এবং কারণ যদি এক হয়, তবে ঘট-দ্বারা যেমন জলাহরণক্রিয়া নিষ্পন্ন হয়, মৃৎপিণ্ডদ্বারাও তেমন তাহা নিষ্পন্ন হইতে পারে, কিন্তু তাহাতে দেখা যায় না, সুতরাং ক্রিয়াবিশেষ সম্পাদন-শক্তির বৈলক্ষণ্য বশতঃই কার্য্য কারণ এক হইতে পারে না। ইহার উত্তরে বক্তব্য এই যে, যদি কার্য্য এবং কারণ সর্ব্বথাই অভিন্ন হইত, তবে ঐরূপ আশঙ্কা হইতে পারিত সত্য, কিন্তু পরিণামবাদিগণও কার্য্য কারণের সর্ব্বথা অভিন্নত্ব স্বীকার করেন না, পরন্তু তাঁহারাও ভেদাভেদবাদী, অর্থাৎ কারণে অব্যক্তাবস্থাপন্ন কার্য্যের অভেদ ও ব্যক্তাবস্থাপন্ন কার্য্যের ভেদ স্বীকার করেন। এই ভেদাভেদ পক্ষে কোনই দোষ নাই, কারণ এক বস্তুতেও অবস্থাভেদে ক্রিয়াবিশেষনিষ্পাদন-শক্তির বৈলক্ষণ্য সর্ব্ববাদিসিদ্ধ। যে অবস্থায় কার্য্য কারণের অভিন্ন, সে অবস্থায় কার্য্যেও ঐ বিশেষ শক্তি তিরোহিত হইয়া থাকে।

নাসতো বিদ্যতে ভাবো নাভাবো বিদ্যতে সতঃ।
উভয়োরপি দৃষ্টোঽন্তস্ত্বনয়োস্তত্ত্বদর্শিভিঃ ॥ ১১৮ ॥

শঙ্কতে—

ভাবে ভাবযোগশ্চেন্ন বাচ্যম্ ॥ ১১৯ ॥

যদি ভাবে কারণে ভাবস্য কার্য্যস্য বিদ্যমানস্য যোগ উৎপত্তিঃ, তদা 'ভবিষ্যতি ঘটঃ, উৎপদ্যতে, নষ্টঃ' ইতি ব্যপদেশো ন স্যাৎ ॥১১৯॥

ত্বাদিতি ভাবঃ। ননু মাস্তু সম্বন্ধস্ততঃ কিমিত্যাশঙ্ক্যামাহ—অসম্বন্ধস্যেত্যাদি, অসম্বন্ধস্য—উপাদানকারণেন সংসর্গরহিতস্য উৎপত্তিম্ ইচ্ছতঃ অসৎকার্য্যবাদিন ইতি শেষঃ, ন ব্যবস্থিতিঃ—তন্ত্বাদিভ্যঃ পটাদয় এবোৎপদ্যন্তে ন ঘটাদয় ইত্যেবংরূপা ব্যবস্থা ন স্যাদিতি। বিনিগমকাভাবাদিতি ভাবঃ।

অত্র গীতাদ্বিতীয়াধ্যায়ষোড়শশ্লোকমপি প্রমাণীকর্ত্তুমাহ—নাসত ইতি। অসতঃ—উৎপত্তেঃ প্রাগবিদ্যমানস্য অলীকস্য খপুষ্পাদিবদ্বিকল্পিতস্যেতি যাবৎ, ভাবঃ—উৎপত্তিঃ ন অস্তীতি শেষঃ। সতঃ—বিদ্যমানস্য ঘটাদেঃ অভাবঃ—বিনাশঃ ন অস্তি, (কেবলং তিরোভাব এব ভবতীতি ভাবঃ) অনয়োঃ উভয়োঃ সদসতোঃ, অন্তঃ—তত্ত্বং, তত্ত্বদর্শিভিঃ—বিবেকিভিঃ দৃষ্টঃ—নির্ণীতঃ সৎসত্ত্বেন অসদসত্ত্বেন চ নির্দ্ধারিতমিত্যর্থঃ ॥ ১১৮ ॥

সৎকার্য্যবাদে পূর্ব্বপক্ষসূত্রমবতারয়িতুমাহ—শঙ্কত ইতি। ভাবে ভাবযোগশ্চেদিত্যংশং বিভ-

---

সৎকার্য্যবাদে বৃদ্ধদিগেরও সম্মতি আছে যথা—কার্য্য যদি উৎপত্তির পূর্ব্বে অসৎ হয়, তবে অসত্ত্বনিবন্ধন সৎকারণের সহিত সম্বন্ধ হইতে পারে না, কারণ সম্বন্ধে উভয়ের বিদ্যমানতাই অপেক্ষিত। আর যাহারা অসম্বদ্ধ কার্য্যের উৎপত্তি ইচ্ছা করেন, তাহাদের মতে তন্তু হইতে পটই উৎপন্ন হইবে, ঘট উৎপন্ন হইবে না, এইরূপ ব্যবস্থা হইতে পারে না।

ভগবদ্গীতায়ও বলিয়াছেন—উৎপত্তির পূর্ব্বে যে বস্তু অসৎ অর্থাৎ আকাশকুসুমের ন্যায় যাহা অলীক, তাহার উৎপত্তি ও সৎ বস্তুর বিনাশ নাই, (পরন্তু সতেরই আবির্ভাব ও তিরোভাব হইয়া থাকে) তত্ত্বদর্শী ব্যক্তিরাই এই সৎ ও অসতের তত্ত্ব নির্দ্ধারণ করিয়াছেন ॥ ১১৮ ॥

এইস্থানে অসৎকার্য্যবাদিগণ পূর্ব্বপক্ষ করেন এই যে, যদি সৎকারণে

सिद्धान्तमाह—

न अभिव्यक्तिनिबन्धनौ व्यवहाराव्यवहारौ ॥ १२०

यथा शुक्लपटस्य मलिनस्य क्षालनादिना शुक्लत्वमभिव्यज्यते, तथा कुलालव्यापारात् घटोऽभिव्यज्यते, मुद्गराभिघातात् तिरोभूयते इष्टश्च, अभिव्यक्तिः पीड़नेन तिलेषु तैलस्य, दोहनेन गवि पयसः, अवघातेन धान्ये तण्डुलानामित्यादि। तस्मादभिव्यक्तिनिबन्धनौ शब्दप्रयोगार्थक्रियाभेदाविति ॥ १२० ॥

चीति—यदीत्यादिना। न वाच्यमित्यंशं विवृणोति तदेत्यादिना। उत्पद्यते नष्ट इत्यनयोर्घट इत्यनेन सम्बन्धः। न स्यादिति, सतः प्रागभावोत्पादविनाशासम्भवादिति भावः। अत्र सूत्रस्य "न भावे भावयोग" श्चेदित्येतावन्मात्रः भाष्यसम्मतः पाठः ॥ ११९ ॥

सिद्धान्तमिति, पूर्व्वसूत्रोक्तपूर्व्वपक्षस्य सिद्धान्तमित्यर्थः। सूत्रं व्याख्यातुमादौ दृष्टान्तप्रदर्शनपूर्व्वकमभिव्यक्तिं विशदयति—यथेत्यादिना। तत्र "मुद्गराभिघातात्तिरोभूयते" इत्यंशः प्रसङ्गादुक्त इति मन्तव्यम्, तत्सिद्धान्तस्य परसूत्रेणैव वक्ष्यमाणत्वात्। प्रत्यक्षतोऽप्यभिव्यक्तिं दर्शयितुमाह—दृष्टश्चेति, अस्य च इत्यादीत्यनेनान्वयः। सूत्रार्थमुपसंहरति—तस्मादित्यादिना। अभिव्यक्तिः—आविर्भावः वर्त्तमानावस्थेति यावत्, तन्निबन्धनौ—तत्प्रयोज्यौ शब्दप्रयोगार्थक्रियाभेदाविति व्यवहाराव्यवहारावित्यस्य विवरणम्। तथाच यदा घटादेरभिव्यक्तिर्भवति तदैव घट उत्पद्यते पट उत्पद्यत इत्यादि शाब्दव्यवहारो भवति जलाहरणादिरूपक्रियाभेदश्च घटादिना क्रियते, कारणव्यापारस्तु वर्त्तमानावस्थालक्षणपरिणाममेव कार्य्यस्य जनयति न तु सदतिरिक्ता काचिदुत्पत्तिरस्तीति भावः ॥ १२० ॥

সৎকার্য্যের উৎপত্তি স্বীকার করা হয়, তবে "ঘট হইবে" "ঘট হইতেছে" ও "ঘট বিনষ্ট হইয়াছে" ইত্যাদি ব্যবহার হইতে পারে না, কারণ সদ্বস্তুর প্রাগভাব উৎপত্তি বা বিনাশ অসম্ভব ॥ ১১৯ ॥

উক্ত পূর্ব্বপক্ষে সিদ্ধান্ত বলিতেছেন—যেমন ক্ষালনাদিদ্বারা মলিন শুভ্র বস্ত্রের শুক্লত্বের অভিব্যক্তি হয়, সেইরূপ কুলালব্যাপারদ্বারাও ঘটের অভিব্যক্তি হয় এবং মুদ্গরাঘাতে তিরোভাব হয়। দেখাও যায়, পীড়নদ্বারা তিলে তৈলের, দোহনদ্বারা ধেনুতে দুগ্ধের ও অবঘাতদ্বারা ধান্যে তণ্ডুলের অভিব্যক্তি হয়। অতএব ঘটাদির উৎপত্তি ব্যবহার ও জলাহরণাদিক্রিয়াকারিত্ব

अभिव्यक्तिनिबन्धनोत्पत्तिः, किंनिबन्धनो विनाश इत्यत आह—

नाशः कारणलयः ॥ १२१ ॥

मुद्गराभिघातात् घटस्य कारणे लयः, तन्निबन्धनो नाश इति शब्दार्थक्रियाभेदौ। यदि लयः, पुनरुद्भवो दृश्येत, न च दृश्यत इति चेत्? मूढ़ैर्न दृश्यते, विवेचकैर्दृश्यत एव। तथा हि, तन्तौ नष्टे मृद्रूपेण परिणामः, मृदस्य कार्पासवृक्षरूपेण परिणामः, तस्य पुष्पफल-तन्तुरूपेण परिणामः। एवं सर्व्वे भावाः ॥ १२१ ॥

सूत्रान्तरमवतारयति—अभिव्यक्तीत्यादिना। उत्पत्तिः—उत्पत्तिव्यवहारः। विनाशः—विनाशादिव्यवहारः। सूत्रतात्पर्य्यं विवृणोति—मुद्गरेत्यादिना। तथाच यदा कारणे लीयते तदैव नश्यतीत्यादिव्यवहारभाग्भवतीत्यर्थः। अत्र शङ्कते—यदीत्यादिना। परिहरति—मूढ़ैरित्यादिना। मूढ़ैः—अविवेकिभिः। लीनकार्य्यस्यापि पुनरुद्भवो दृश्यत इति यदुक्तं तदेव विशदयति—तथाहीत्यादिना।

योगदर्शनकृता च लीनकार्य्याव्यक्तेः पुनरभिव्यक्तिः प्रत्यभिज्ञापत्त्या न स्वीक्रियते, परेषां प्रागभावावस्थे वानागतावस्थायाः अभिव्यक्तिहेतुत्वकल्पनाच्च तन्मते नाभिव्यक्तेरापत्तिरपि,

রূপ বৈলক্ষণ্যের প্রতি অভিব্যক্তিই কারণ, অভিব্যক্তির অতিরিক্ত কোনও উৎপত্তি নাই, যাহা সতের হইতে পারিবে না ॥ ১২০ ॥

আচ্ছা উৎপত্তি ব্যবহার অভিব্যক্তিদ্বারা হইলেও বিনাশাদি ব্যবহারের প্রতি কি কারণ হইবে? এই আশঙ্কায় বলিতেছেন—মুদ্গরাভিঘাতে ঘটের স্বীয় কারণে লয় অর্থাৎ তিরোভাব হয়, সেই লয় বশতঃই বিনাশাদি ব্যবহার হইয়া থাকে। "আচ্ছা যদি লয়ই হয় (বিনাশ হয় না) তবে সেই লীন বস্তুর পুনরায় উৎপাদ হইতে দেখা উচিত ছিল, কিন্তু তাহাত দেখা যায় না" এই আশঙ্কাও ঠিক নহে, কারণ মূর্খ ব্যক্তিরাই লীন বস্তুর পুনরুৎপাদ নিরীক্ষণ করে না, কিন্তু সূক্ষ্মদর্শিগণ নিরীক্ষণ করিয়াই থাকেন। সূক্ষ্মরূপে অনুসন্ধান করিলেই দেখা যায়, তন্তু বিনষ্ট হইয়া মৃত্তিকারূপে পরিণত হয়, সেই মৃত্তিকা কার্পাসবৃক্ষরূপে, সেই কার্পাস বৃক্ষ পুষ্পরূপে, সেই পুষ্প ফলরূপে, ও সেই ফল পুনরায় তন্তুরূপে পরিণত হয়। (সুতরাং লীন বস্তুর যে পুনরায়

किमभिव्यक्तिः सती असती वा। सती चेत्, नित्यं कार्य्योपलब्धिः स्यात्। असती चेत्, सत्कार्य्यहानिः। तस्या अपि अभिव्यक्तिरन्या तस्या अप्यन्या इत्यनवस्था इत्यत आह—

पारम्पर्य्यतोऽन्वेषणा बीजाङ्कुरवत् ॥ १२२ ॥

भवतु अभिव्यक्तिसहस्रं, तथापि न दोषोऽनादित्वात् बीजाङ्कुरवदिति ॥ १२२ ॥

एतन्नाश्यकारस्यापि तत्रैव सम्मतिरित्यनुसन्धेयम्। प्रागभावव्यवहारस्तु कार्य्यस्यानागतावस्थयेति मन्तव्यम् ॥ १२१ ॥

सूत्रान्तरमवतारयितुं विकल्पयति—किमित्यादिना। सत्कार्य्यहानिः स्यादिति, तथात्वे अभिव्यक्तेरेवासत्कार्य्यत्वापत्तेरिति भावः। ननु अभिव्यक्तेरपि अभिव्यक्तिः कल्पनीया, तत एव च न सर्व्वदा कार्य्योपलब्धिः स्यादित्याशङ्कायां तत्राप्यनवस्थारूपं दोषान्तरं दर्शयति—तस्या अपीत्यादिना। "पारम्पर्य्यतः—परम्परारूपेण अन्वेषणा—अभिव्यक्तेरनुधावनं न दोषायेति शेषः" इति सूत्रार्थं हृदि कृत्वा तात्पर्य्यं वर्णयति—भवत्वित्यादिना। दोषाभावे हेतुमाह—अनादित्वादिति। तथा च अनाद्यनवस्थायाः प्रामाणिकत्वादेव न दोष इति भावः। अत्र दृष्टान्तमाह—बीजाङ्कुरवदिति, यदि च बीजाङ्कुरस्थलीयक्रमिक-परम्परानवस्थातोऽभिव्यक्तिस्थलीयैककालीनपरम्परानवस्थाया वैजात्यमस्ति—तथापि यथा बीजाङ्कुरस्थलीयानवस्था प्रामाणिकी तथैवाभिव्यक्तिस्थलीयेयमनवस्थापि प्रामाणिकीति प्रामा-

---

উৎপত্তি দেখা যায় না ইহা ঠিক নহে) অন্যান্য ভাব পদার্থের উৎপত্তি-বিনাশাদি ব্যবহারও এই দৃষ্টান্তেই নির্দ্ধারিত হইবে ॥ ১২১ ॥

যাহা হউক, উৎপত্তি ব্যবহারের হেতু যে অভিব্যক্তি তাহা সৎ কি অসৎ? যদি সৎ হয়, তবে সর্ব্বদাই কার্য্যের উপলব্ধি হইতে পারে, আর যদি অসৎ হয়, তবে সৎকার্য্যের অর্থাৎ কার্য্যমাত্রই যে সৎ এই সিদ্ধান্তের হানি হইয়া পড়ে, কারণ অভিব্যক্তিরূপ অসৎকার্য্য স্বীকার করিলেই সেই সিদ্ধান্ত রক্ষা পায় না। যদি অভিব্যক্তিকে সৎ স্বীকার করিয়া সর্ব্বদা কার্য্যের উপলব্ধি বারণের জন্য সেই অভিব্যক্তির অভিব্যক্তি স্বীকার করা যায়, তবে সেই অভিব্যক্তিরও অভিব্যক্তি স্বীকার করিতে হয়, আবার সেই অভিব্যক্তির ও অভিব্যক্তি স্বীকার করিতে হয়। এরূপ ভাবে অনবস্থা হইয়া পড়ে, এই

युक्त्यन्तरमाह—

उत्पत्तिवद्वाऽदोषः ॥ १२३ ॥

किमुत्पत्तिरुत्पद्यते न वा । उत्पद्यते चेत्, तस्या अप्युत्पत्तिरिति अनवस्था । नोत्पद्यते चेत्, किमसत्त्वात् नित्यत्वाद्वा । यदि असत्त्वात्, कदाचिदप्युत्पत्तिर्नास्तीति सर्वदानुपलम्भः स्यात् । अथ नित्यत्वात्, सर्वदा कार्य्योत्पत्तिः स्यात् । अथोत्पत्तेः स्वयमेवोत्पत्तिरूपत्वात् किमुत्पत्त्यन्तरकल्पनयेति, तर्हि अभिव्यक्तेरपि अभिव्यक्तिरूपत्वात् किमभिव्यक्त्यन्तरकल्पनयेति तुल्यम् । तत्र यस्तव सिद्धान्तः सोऽस्माकमपि ॥ १२३ ॥

वीजात् प्रभवन्ति वीजान्यन्यानि वै तत" इति विष्णुपुराणवचनात् वीजाङ्कुरप्रवाहस्यादिसर्गावधिकत्वेन तत्रानवस्थैव नास्तीति दृष्टान्तासम्भव इति वाच्यं तावतापि जन्मकर्म्माद्यनवस्थाया दृष्टान्तसम्भवादिति ॥ १२२ ॥

युक्त्यन्तरमिति पूर्व्वसूत्रावतारकविकल्पोत्तरे इत्यर्थः । सूत्रतात्पर्य्यन्तु निगदव्याख्यानेन वृत्तिग्रन्थे नोपवर्णितम् । तथाच "यश्चोभयोः समो दोषः परिहारश्च यः समः । नैकस्तत्रानुयोज्यः स्यात्तादृगर्थविनिर्णये" इति स्थितम् ॥ १२३ ॥

আশঙ্কায় বলিতেছেন—পরম্পরাক্রমে সহস্র সহস্র অভিব্যক্তি স্বীকার করিতে হয় বলিয়া অনবস্থা হইলেও অনাদিত্বনিবন্ধন সেই অনবস্থা দোষাবহ নহে, যেরূপ বীজ হইতে অঙ্কুর কি অঙ্কুর হইতে বীজ? এই অনাদি অনবস্থা সকলেরই স্বীকার্য্য ॥ ১২২ ॥

অভিব্যক্তির অভিব্যক্তি স্বীকারাদিতে যে দোষ নাই, এ বিষয়ে অন্যপ্রকার যুক্তিও দেখাইতেছেন—আরম্ভবাদীদিগের উৎপত্তির উৎপত্তি আছে কি না? যদি থাকে, তবে সেই উৎপত্তির এবং তদুৎপত্তির উৎপত্তির ও উৎপত্তি স্বীকার করিতে হয় বলিয়া তাহাদের মতেও অনবস্থা। আর যদি উৎপত্তির উৎপত্তি না হয়, তবে সেই অনুৎপত্তি উৎপত্তির অসত্ত্বনিবন্ধন কি নিত্যত্বনিবন্ধন? যদি অসত্ত্বনিবন্ধন হয়, তবে কদাচিৎও উৎপত্তি থাকিতে পারে না বলিয়া সর্ব্বদাই বস্তুর অনুপলব্ধি হইতে পারে। আর যদি নিত্যত্বনিবন্ধন উৎপত্তির

प्रकृतिकार्य्याणामन्योऽन्यं साधर्म्यमाह—

हेतुमदनित्यं सक्रियमनेकमाश्रितं लिङ्गम् ॥१२४॥

हेतुमत्—कारणवत्। अनित्यं—विनाशि। सक्रियं—उपात्तं देहं त्यजत्, पृथिवी शरीरादयश्च स्पन्दन्ते। अनेकं—पुरुषभेदात्। आश्रितं—स्वकारणे। लिङ्गं—स्वकारणे लयं गच्छतीति ॥ १२४ ॥

सूत्रान्तरमवतारयति—प्रकृतीत्यादिना। सूत्रघटकं पदं व्याचष्टे—हेतुमदित्यादिना। विनाशि—नाशप्रतियोगि तिरोभावीति यावत्। आविर्भावित्वस्य तु हेतुमदित्यनेनैव लाभ इति मन्तव्यम्। तृतीयं सक्रियपदं परिस्पन्दवदित्यर्थकं बुद्ध्यादीनां तत् सक्रियत्वं कथमित्याकाङ्क्षायामाह—उपात्तं देहं त्यजदिति, त्यजदित्यन्तं हेतुगर्भविशेषणं देहान्तरमाददानमित्यादेरप्युपलक्षकं, बुद्ध्यादिकमिति शेषः, तथाच गृहीतं देहं त्यजत् देहान्तरञ्चाददानं बुद्ध्यादिकं सक्रियमित्यर्थः। दृष्टकार्य्ये परिस्पन्दवत्त्वं दर्शयितुमाह—पृथिवीत्यादि, परिस्पन्दन्त इति, प्रत्यक्षसिद्धमिति शेषः। एवञ्च प्रधाने परिणामलक्षणक्रियासत्त्वेऽपि परिस्पन्दाभावान्न तत्र सक्रियत्वमतिव्याप्तम्। अनेकत्वमत्र न स्वजातीयानेकव्यक्तिकत्वं प्रकृतावतिव्याप्तेः, किन्तु पुरुषादिभेदेन भिन्नत्वं, तदेव दर्शयितुमाह—अनेकं पुरुषभेदादिति, तथाच महदादिकं सर्व्वमेव प्रतिपुरुषं भिन्नमित्यर्थः। स्वकारणे—अवयवादौ, आश्रितं वृत्तिमत्। अत्रच कार्य्यकारणयोरभेदेऽपि "इह वने तिलकाः" इतिवत् कथञ्चिद्भेदविवक्षया आश्रयाश्रयिभावः स्वीकार्य्य इति मन्तव्यम्। लिङ्गपदस्यानुमापकत्वार्थकत्वे प्रकृतेरपि पुरुषानुमापकत्वात्तत्रातिव्याप्तिः स्यादतोऽर्थान्तरमाह—स्वकारण इत्यादिना। तथाच सूत्रे कार्य्यमित्यध्याहार्य्य कार्य्यं हेतुमदनित्यमित्यादिरूपः सूत्रार्थः कार्य्यः। ततश्च हेतुमत्त्वादिकं कार्य्याणामन्योन्यं साधर्म्य-

উৎপত্তি না হয় তবে সর্ব্বদাই কার্য্যের উৎপত্তি থাকিতে পারে। যদি বল উৎপত্তি স্বয়ংই উৎপত্তিস্বরূপ, সুতরাং তাহার আবার উৎপত্তি কল্পনার প্রয়োজন কি? তবে অভিব্যক্তিও স্বয়ং অভিব্যক্তিস্বরূপ তাহারই বা অভিব্যক্তি কল্পনার প্রয়োজন কি? সুতরাং উভয় মতেই এই অনুযোগের তুল্যতানিবন্ধন আরম্ভবাদীদিগের উৎপত্তিবিষয়ে যেরূপ সিদ্ধান্ত পরিণামবাদীদিগের অভিব্যক্তি বিষয়েও সেইরূপ সিদ্ধান্ত ॥ ১২৩॥

প্রকৃতিকার্য্য মহদাদির পরস্পর সাধর্ম্য বলিতেছেন—সকারণত্ব বিনাশ পরিস্পন্দনরূপ ক্রিয়া পুরুষভেদে ভিন্নত্ব স্বকারণে আশ্রিতত্ব ও স্বকারণে লয় এই

यदि पञ्चविंशतितत्त्वं, किं ज्ञानसुखादीनां सामान्यकर्मणामभाव एव । तथा च दृष्टपरित्याग इत्यत आह—

आज्ञस्यादभेदतो वा गुणसामान्यादेस्तत्सिद्धिः प्रधानव्यपदेशाद्वा ॥ १२५ ॥

आज्ञस्यात् स्वरूपतः चतुर्विंशतितत्त्वात् अभेदतस्तल्लक्षणयोगात् गुणसामान्यादीनाम् । तत्सिद्धिः तेषु एवान्तर्भावात्सिद्धिः । वाशब्दः पक्षान्तरं सूचयति । 'प्रधानव्यपदेशाद्वा' गुणादीनां पारम्पर्य्येण प्रधानकार्य्यत्वेन कार्य्यकारणयोरभेदात् प्रधानव्यपदेशादेव गुणादिसिद्धिः । न तु अभावात् अननुकीर्त्तनम् ॥ १२५ ॥

मिति फलितम् । अत्र च हेतुमदनित्यमित्यनन्तरं "अव्यापीत्य"धिको भाष्यसम्मतः पाठः, कारिकायान्तु साश्रयत्वादिकमपि साधर्म्म्यमुक्तम् यथा—

"हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्त"मिति ॥

तथाचैतत्सूत्रोपात्तमन्यतमं तेषामप्युपलक्षकमिति मन्तव्यम् ॥ १२४ ॥

सूत्रान्तरमवतारयितुं पृच्छति—यदीत्यादिना । आज्ञस्यादित्यस्यार्थमाह—स्वरूपत इति । धर्म्मधर्म्मिणोरभेदेन गुणादेश्चतुर्व्विंशतितत्त्वाव्यतिरिक्तत्वादित्यर्थः । कस्मादभेदत इत्याकाङ्क्षायां पूरयति—चतुर्व्विंशतितत्त्वादिति । आदिपदग्राह्याणामपि बहूनां सत्त्वाद्गुणसामान्यादेरिति पदं बहुवचनान्ततया व्याचष्टे—गुणसामान्यादीनामिति । तेषु चतुर्व्विंशतितत्त्वेषु,

---

সকল কার্য্যমাত্রেরই সমান ধর্ম্ম, অর্থাৎ সমস্ত কার্য্যেই এই সমস্ত ধর্ম্ম বিদ্যমান আছে ॥ ১২৪ ॥

সাংখ্যমতে যদি পঞ্চবিংশতিমাত্রই তত্ত্ব হয়, তবে তাহাদের মতে কি জ্ঞান-সুখাদিরূপ গুণের সামান্যের (জাতির) এবং কর্ম্মের অভাবই সিদ্ধান্তিত ? কিন্তু তাহা হইলে প্রত্যক্ষসিদ্ধ পদার্থের অপলাপরূপ দোষ হয়, এই আশঙ্কায় বলিতেছেন—ধর্ম্ম ও ধর্ম্মীর অভেদনিবন্ধন গুণসামান্যাদি চতুর্ব্বিংশতি তত্ত্বেরই স্বরূপ, অথবা চতুর্ব্বিংশতি তত্ত্বের লক্ষণাক্রান্ত বলিয়া চতুর্ব্বিংশতি তত্ত্বেরই

प्रकृतिकार्य्ययोः साधर्म्यमाह—

त्रिगुणाचेतनत्वादि द्वयोः ॥ १२६ ॥

त्रिगुणमचेतनम् । आदिशब्दात् परार्थत्वम् । द्वयोरिति कार्य्य-कारणयोः ॥ १२६ ॥

प्रकृतिभागस्य त्रिगुणस्यान्योऽन्यवैधर्म्यमाह—

प्रीत्यप्रीतिविषादाद्यैर्गुणानामन्योऽन्यं वैधर्म्यम् ॥ १२७

प्रीतिः सुखम् । आदिशब्दात् लघु प्रकाशकं सत्त्वम् । अप्रीतिः

सिद्धिः गुणसामान्यादीनामित्यर्थः । प्रधानव्यपदेशाद्वेति पक्षान्तरे तत्सिद्धिरिति तस्य विवरणं गुणादिसिद्धिरिति उपसंहरति—नत्वित्यादिना ॥ १२५ ॥

सूत्रान्तरमवतारयितुमाह—प्रकृतीत्यादि । द्वन्द्वोत्तरश्रूयमाणप्रत्ययस्यैव प्रत्येकाभिसम्बन्ध-नियमात् सूत्रीयत्वप्रत्ययान्तप्रकृतौ द्वन्द्वसमासं सूचयितुं विभज्य दर्शयति—त्रिगुणमचेतन-मिति । तथाच त्रिगुणत्वं अचेतनत्वं परार्थत्वञ्च कार्य्यकारणयोः साधर्म्यमिति सूत्रार्थः ॥ १२६ ॥

सूत्रान्तरमवतारयति—प्रकृतीत्यादिना । त्रिगुणस्य—सत्त्वरजस्तमोरूपद्रव्यत्रयस्य । आदि-शब्दादिति, आदिशब्दसमानार्थकाद्यशब्दादित्यर्थः, "द्वन्द्वात् परः श्रूयमाणः शब्दः प्रत्येकमभि-सम्बध्यते" इति न्यायादाद्यशब्दस्य प्रीत्यादिप्रत्येकाभिसम्बन्धमभिसन्धाय वारत्रयमादिशब्द-स्यार्थं दर्शितमिति मन्तव्यम् । लघु—लाघवान्वितं, प्रकाशकं—विषयावभासकं प्रीत्यादीनां यथासंख्यमभिप्रेत्य धर्मिं निर्दिशति—सत्त्वमेवेत्यर्थः, तथाच सुखस्वरूपत्वलघुत्वप्रकाशकत्वानि

অন্তর্ভূত। সুতরাং সাংখ্যমতেও গুণাদির সিদ্ধি আছে। অথবা গুণ-সামান্যাদি ও পরম্পরা প্রধানেরই কার্য্য, অথচ সাংখ্যমতে কার্য্য ও কারণ অভিন্ন, সুতরাং প্রধান-ব্যপদেশেই গুণাদির সিদ্ধি আছে। অতএব অভাব-নিবন্ধন যে গুণাদির কীর্ত্তন করেন নাই, তাহা নহে ॥ ১২৫ ॥

প্রকৃতি ও কার্য্যের সাধর্ম্ম্য বলিতেছেন, ত্রিগুণত্ব, অচেতনত্ব ও পরার্থত্ব এই তিনটি প্রকৃতি ও তৎকার্য্যের সমান ধর্ম্ম ॥ ১২৬ ॥

সত্ত্ব, রজঃ ও তমোরূপ যে প্রকৃতির তিনটি ভাগ, তাহাদের পরস্পর বিরুদ্ধ ধর্ম্ম বলিতেছেন, কেবল সত্ত্বগুণই সুখস্বরূপ, লঘু ও প্রকাশক, সুতরাং সুখ-স্বরূপত্ব, লঘুত্ব ও প্রকাশকত্ব এই তিনটি রজঃ ও তমোগুণের বিরুদ্ধ ধর্ম্ম।

दुःखम् । आदिशब्दात् उपष्टम्भकं चलं रजः । विषादः मोहः । आदिशब्दात् गुरु वरणकं तमः ॥ १२७ ॥

तेषां वैधर्म्यकथनावसरे साधर्म्यमाह—

लघ्वादिधर्मैरन्योऽन्यं साधर्म्यं वैधर्म्यं गुणानाम् ॥१२८

लघुचलगुरुत्वैः । अनेन वैधर्म्यमुक्तम् । आदिशब्दात् साधर्म्यं सूचितं, तच्च पुरुषार्थत्वं अन्योऽन्याभिभवजननमिथुनवृत्तित्वम् ॥१२८

रजस्तमसी वैधर्म्याणीति फलितम् । उपष्टम्भकं—परेषां प्रवर्त्तकं, चलं—स्वयं क्रियाशीलं, रजः—रज एव, दुःखस्वरूपत्वोपष्टम्भकत्वचलत्वानि सत्त्वतमसोर्व्वैधर्म्याणीति फलितम् । गुरु—गुरुत्वान्वितं, वरणकं—आवरकं तमः—तम एव, तथाच पूर्व्ववदत्रापि मोहस्वरूपत्व-गुरुत्वावरकत्वानि सत्त्वरजसोर्व्वैधर्म्याणीति स्थितम् ॥ १२७ ॥

सूत्रान्तरमवतारयितुमाह—तेषामिति, सत्त्वरजस्तमसामित्यर्थः । लघ्वादीत्यस्य भावप्रधान-निर्द्देशमभिप्रेत्य व्याचष्टे—लघुचलगुरुत्वैरिति । अनेन—लघुत्वादिधर्म्मोपन्यासेन । पूर्व्वसूत्रे चैव लघुत्वादिधर्म्मर्व्वैधर्म्यस्योक्ततया इह पुनर्व्वैधर्म्यकथनं सम्पातायातमेव, भाष्यकारस्याप्यत्रैव सम्मतिरित्यनुसन्धेयम् । ननु सूत्रे साधर्म्यमुक्तं, किन्तु तत्प्रतिपादको धर्म्मः स्वयं नाभिहित इत्याकाङ्क्षायामाह—आदिशब्दादिति । साधर्म्यसम्पादकमादिशब्दप्रतिपाद्यं दर्शयति—तच्चेत्यादिना । वृत्तिः क्रिया, सा च प्रत्येकमभिसम्बध्यते, तथाच अन्योऽन्याभिभववृत्तित्वं अन्योऽन्यजननवृत्तित्वं, अन्योऽन्यमिथुनवृत्तित्वं पुरुषार्थत्वञ्च गुणानां साधर्म्यमिति फलितम् । अन्योऽन्याभिभववृत्तित्वादिकमग्रे व्यक्तीभविष्यति । अन्योऽन्यमिथुनवृत्तित्वे आगमोऽप्यस्ति यथा—

"अन्योऽन्यमिथुनाः सर्व्वे सर्व्वे सर्व्वत्र गामिनः ।
रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः ॥
तमसश्चापि मिथुने ते सत्त्वरजसी उभे ।
उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते ॥

কেবল রজোগুণই দুঃখস্বরূপ, পরের প্রবর্ত্তক ও চঞ্চল, সুতরাং দুঃখস্বরূপত্ব, প্রবর্ত্তকত্ব ও চঞ্চলত্ব এই তিনটি সত্ত্ব ও তমোগুণের বিরুদ্ধ ধর্ম্ম। কেবল তমোগুণই মোহস্বরূপ, গুরুত্বযুক্ত ও আবরক, সুতরাং মোহস্বরূপত্ব, গুরুত্ব ও আবরকত্ব এই তিনটি সত্ত্ব ও রজোগুণের বিরুদ্ধ ধর্ম্ম ॥ ১২৭ ॥

গুণত্রয়ের বৈধর্ম্যকথনাবসরে সাধর্ম্যও বলিতেছেন, লঘুত্ব, চলত্ব ও গুরুত্ব

हेतुमदित्यादिना महदादीनां कार्य्यत्वमुक्तम्। तत्र प्रमाणमाह—

उभयान्यत्वात् कार्य्यत्वं महदादेर्घटादिवत् ॥ १२९

प्रकृतिपुरुषयोर्नित्ययोरन्यत्वात्। शेषं व्यक्तम् ॥ १२९ ॥

हेत्वन्तरमाह—

परिमाणात् ॥ १३० ॥

परिमितत्वात् ॥ १३० ॥

अपरां युक्तिमाह—

समन्वयात् ॥ १३१ ॥

प्रधानेन सह सम्यगन्वयात् प्रधानगुणानां सर्वपदार्थेषु दर्शनात् ॥ १३१ ॥

नैषामादिः संप्रयोगो वियोगो वोपलभ्यत" इति ॥ १२८ ॥

महदादीनां कार्य्यत्वे प्रमाणप्रदर्शकं सूत्रमवतारयति—हेतुमदित्यादिना। उभयान्यत्वादिति पदं व्याचष्टे—प्रकृतीत्यादिना। तथाच नित्यत्वेन महदादेः कार्य्यत्वमनुमेयमिति भावः ॥ १२९ ॥

हेत्वन्तरमिति, महदादेः कार्य्यत्वे साधकान्तरमित्यर्थः। परिमितत्वात्—अपकृष्टपरिमाणवत्त्वात्, महदादेः कार्य्यत्वमिति पूर्व्वेण सम्बन्धः ॥ १३० ॥

अपरां युक्तिमिति, महदादेः कार्य्यत्व इत्यादिः। समन्वयादित्यस्यार्थमाह—प्रधानेनेत्या-

---

পরস্পরের বিরুদ্ধ ধর্ম্ম। পরার্থত্ব, অন্যোন্যাভিভববৃত্তিত্ব ও অন্যোন্যজননবৃত্তিত্ব এই তিনটি পরস্পরের সমান ধর্ম্ম ॥ ১২৮ ॥

হেতুমদিত্যাদি দ্বারা মহদাদির কার্য্যত্ব বলা হইয়াছে, সেই কার্য্যত্ব বিষয়ে প্রমাণ বলিতেছেন—নিত্য প্রকৃতি ও পুরুষ হইতে ভিন্নত্ব (অর্থাৎ অনিত্যত্ব) নিবন্ধন ঘটাদির ন্যায় মহদাদিও কার্য্য ॥ ১২৯ ॥

মহদাদির কার্য্যত্বসাধক হেত্বন্তর বলিতেছেন—পরিমিতত্ব (অর্থাৎ অপকৃষ্ট পরিমাণবত্ত্ব) হেতু দ্বারাও মহদাদির কার্য্যত্ব সিদ্ধ হইবে, কারণ যাহাতে অপকৃষ্ট পরিমাণ আছে, সেই কার্য্য, যেমন ঘটাদি ॥ ১৩০ ॥

মহদাদির কার্য্যত্বে আরও যুক্তি বলিতেছেন—মহদাদি সমস্ত পদার্থে

एतदेवाह—

शक्तितश्चेति ॥ १३२ ॥

कारणशक्त्या कार्य्यं प्रवर्त्तते इति महदादयः क्षीणाः सन्तः प्रकृत्यनुपूरणेन कार्य्यं जनयन्ति। अन्यथा प्रवृत्तिशीलत्वात् सर्वदा कार्य्यं जनयेयुः ॥ १३२ ॥

व्यतिरेकमाह—

तद्धाने प्रकृतिः पुरुषो वा ॥ १३३ ॥

कार्य्यम् अकार्य्यञ्च कोटिद्वयम्। कार्य्यताहाने प्रकृतौ पुरुषे वा महदादीनां प्रवेश इति ॥ १३३ ॥

दिना। तथाच यद्यद्‌गुणान्वितं तत्तत्कार्य्यमिति व्याप्त्या महदादेः प्रधानगुणान्वितत्वेन प्रधान-कार्य्यत्वे सिद्धे सुतरां कार्य्यत्वसिद्धिरिति भावः ॥ १३१ ॥

सूत्रान्तरमवतारयितुमाह—एतदेवेति। समन्वयवत्त्वमेवेत्यर्थः। सूत्रस्य भावं वर्णयति—कारणशक्त्येत्यादिना। अन्यथा—"प्रकृत्यनुपूरणेन महदादयः कार्य्यं जनयन्तौ" त्यस्यास्वीकारे। जनयेयुरिति, किन्तु महदादयः सर्व्वदा कार्य्यं न जनयन्तीति सिद्धान्तः। तथाच ये यदनु-पूरणेन कार्य्यं जनयन्ति, तत्र तद्‌गुणवत्त्वं निर्व्विवादमेवेति सिद्धं समन्वयवत्त्वमिति भावः ॥१३२॥

सूत्रान्तरावतरणिकामाह—व्यतिरेकमिति, कार्य्यताया अभावे पृथक्तया महदादीना-

প্রধানের গুণ দেখা যায় বলিয়াও মহদাদির কার্য্যত্ব সিদ্ধ হয়, কারণ যে যাহার গুণে অন্বিত হয়, সে তাহার কার্য্য হয়, যেমন মৃত্তিকাগুণান্বিত ঘট মৃত্তিকার কার্য্য ॥ ১৩১ ॥

এই সমন্বয়বত্বই বলিতেছেন—কারণের শক্তিদ্বারাই কার্য্যের প্রবৃত্তি হয়, সুতরাং মহদাদি ক্ষীণ হইয়াও প্রকৃতির অনুপূরণদ্বারা (অর্থাৎ প্রকৃতির শক্তিতে শক্তিমৎ হইয়া) কার্য্য জন্মাইয়া থাকে। তাহা না হইলে প্রবৃত্তিশীল মহদাদি সর্ব্বদাই কার্য্য জন্মাইতে পারে (কিন্তু তাহা ত জন্মায় না) যে যদনুপূরণে কার্য্য জন্মায়, তাহাতে তাহার (পূরকের) গুণ থাকা স্বাভাবিক, সুতরাং মহদাদিতে প্রকৃতির গুণানুপ্রবেশরূপ সমন্বয়বত্ব নির্ব্বিবাদেই সিদ্ধ হইল ॥ ১৩২ ॥

उभयकोटिविनिर्मुक्ता एव महदादयो भविष्यन्ति इत्यत आह—

तयोरन्यत्वे तुच्छत्वम् ॥ १३४ ॥

तयोः—कार्य्याकार्य्ययोः, अन्यत्वे महदादीनां तुच्छरूपत्वं—अभावरूपत्वम् ॥ १३४ ॥

किमर्थं महदादयः कार्य्यत्वेन प्रकृतेः लिङ्गम्। अविनाभावादेव लिङ्गं भविष्यन्ति इत्यत आह—

कार्य्यात् कारणानुमानं तत्साहित्यात् ॥ १३५ ॥

भवति एव, यत्र कारणरूपं कार्य्यं न दृश्यते, यथा चन्द्रोदया-दविनाभूतया समुद्रवृद्ध्याऽनुमानम्। अत्र तु प्रधानरूपस्य महदादौ

मसत्त्वरूपं व्यतिरेकमित्यर्थः। सूत्रतात्पर्यं विवृणोति—कार्य्यमित्यादिना। कोटिद्वयं—प्रकारद्वयम्। प्रकृताविति, परिणामित्व इत्यादिः। पुरुष इति, अपरिणामित्व इत्यादिः ॥ १३३ ॥

सूत्रान्तरमवतारयति—उभयेत्यादिना। उभयकोटिविनिर्मुक्ताः—कार्य्याकार्य्यरूपप्रकारद्वयव्यतिरिक्ताः। सूत्रं व्याचष्टे—तयोरित्यादिना। अभावरूपत्वमिति, आपद्येत इति शेषः, कार्य्याकार्य्यव्यतिरि भावपदार्थस्यादृष्टचरत्वादिति भावः ॥ १३४ ॥

सूत्रान्तरमवतारयितुं शङ्कते—किमर्थमित्यादिना। अविनाभावात्—प्रकृतेर्व्विना अभावात्, एवं—अविनाभावादेव लिङ्गं। अनुमानम्—चन्द्रोदयानुमानम्। क्वचित् पुस्तके "चन्द्रोदयात

মহদাদি যদি কার্য্য না হয়, তবে তাহাদের পৃথগ্‌রূপে অসত্ত্ব প্রসক্তিরূপ ব্যতিরেক বলিতেছেন—জগতে কার্য্য বা অকার্য্য এই দ্বিকোটিক বস্তুই বর্ত্তমান আছে, মহদাদি যদি কার্য্য না হয়, তবে পরিণামী হইলে প্রকৃতি ও অপরিণামী হইলে পুরুষ (কারণ প্রকৃতি ও পুরুষ ভিন্ন আর কোন বস্তুই অকার্য্য নহে) ॥ ১৩৩ ॥

কার্য্যাকার্য্যরূপ কোটিদ্বয় হইতে ভিন্নই মহদাদি স্বীকার করিব, এই আশঙ্কায় বলিতেছেন—মহদাদি যদি কার্য্য বা অকার্য্য না হয়, তবে তাহাদের তুচ্ছত্ব অর্থাৎ আকাশকুসুমাদির ন্যায় অসত্ত্ব প্রসক্তি হয় ॥ ১৩৪ ॥

মহদাদিকে কার্য্যস্বরূপে প্রকৃতির অনুমাপক স্বীকার করি কেন? অবিনাভাবনিবন্ধন (অর্থাৎ প্রকৃতি ভিন্ন হয় না বলিয়াই) অনুমাপক হইবে,

दर्शनात् कार्य्यात् कारणानुमानमेव। तत्साहित्यात् प्रकृतिरूपस्य महदादौ दर्शनात् ॥ १३५ ॥

एवञ्च महत्तत्त्वमेव जगत्कारणमस्तु, किं प्रधानेन? इत्यत आह—

अव्यक्तं त्रिगुणाल्लिङ्गात् ॥ १३६ ॥

त्रिगुणात् लिङ्गात्, लयं गच्छति इति, महत्तत्वात् प्रधानमनुमातव्यम्। महत्तत्वं च अध्यवसायरूपं व्यक्तं विनाशि प्रत्यक्षसिद्धम्। तेन लिङ्गानुमानम् ॥ १३६ ॥

कश्चित् पुस्तके "समुद्रकश्चानुमान"मेतावन्मात्रं पाठः, तस्य समूलत्वे एवमेवाध्याहारादिना प्रकृतोपयोगित्वं कथञ्चित् समर्थनीयम्। सूत्रार्थं विवृणोति—यतेत्यादिना। कार्य्यात्—कार्य्यत्वात्। तथाचायमत्राभिप्रायः:—अविनाभूतत्वं नाम निमित्तनैमित्तिकसाधारणं, किन्तु नैमित्तिकेषु कार्य्येषु निमित्तस्य गुणा न दृश्यन्ते, उपादेये च कार्य्ये उपादानकारणस्य गुणा यावत् सत्त्वमुपलभ्यन्ते इति निमित्तनैमित्तिकभावविलक्षणः कश्चन कार्य्यकारणभावस्तत्रावश्यमङ्गीकार्य्य इति तत्सिद्धं कार्य्यत्वमेवोपादानकारणीभूतप्रधानसाधने समुपयुक्तमिति ॥ १३५ ॥

सूत्रान्तरमवतारयितुं शङ्कते—एवञ्चेत्यादिना। लिङ्गशब्दस्य व्युत्पत्तिं दर्शयति—लयं गच्छतीति, विशेष्यपदं दर्शयति—महत्तत्वादिति। प्रधानमिति अव्यक्तमित्यस्य विवरणम्, शेषं पूरयति—अनुमातव्यमिति। एतदेव विशदयति—महत्तत्वमित्यादिना, तेन—विनाशिना महत्तत्वेन लिङ्गेन, लिङ्गि—(लिङ्गं—विनाशिकार्य्यरूपमनुमापकं अस्यास्तीति व्युत्पत्त्या)

এই আশঙ্কায় বলিতেছেন—অবিনাভাবনিবন্ধনও অনুমাপক হইয়া থাকে, যে স্থলে কারণের রূপ কার্য্যে পরিদৃষ্ট না হয়, যেমন চন্দ্রোদয়ের অবিনাভূত (অর্থাৎ চন্দ্রোদয় ব্যতিরেকে যাহা হয় না এইরূপ) সমুদ্র বৃদ্ধিদ্বারা চন্দ্রোদয়ের অনুমান। কিন্তু মহদাদিতে প্রধানের স্বরূপ পরিদৃষ্ট হয় বিধায় এস্থলে কার্য্যত্ব-নিবন্ধন কারণের অনুমানই হইবে ॥ ১৩৫ ॥

কার্য্যত্ব হেতুদ্বারা জগতের সকারণত্ব সিদ্ধ হইলেও মহত্তত্বই জগতের কারণ হউক, প্রধান স্বীকারের প্রয়োজন কি? এই আশঙ্কায় বলিতেছেন—যাহার লয় হয়, তাহার নাম লিঙ্গ, ত্রিগুণ অথচ লিঙ্গ মহত্তত্ব হইতেই প্রধানের

तथापि अन्यदेव कारणं भविष्यति, किं प्रकृत्या ? इत्यत्राह—

तत्कार्य्यतस्तत्सिद्धेर्नापलापः ॥ १३७ ॥

तत्कारणं कार्य्यम् अकार्य्यं वा। कार्य्यत्वे तत्कारणस्यापि तथात्वे सति अनवस्था। मूलकार्य्यत्वे तदेव सा इति। 'तत्कार्य्यत' इति प्रकृतिकार्य्यतः प्रकृतिसिद्धेः न अपलापः ॥ १३७ ॥

प्रधानं तस्यानुमानम्। तथाचायमाशयः—महत्तत्त्वस्य कार्य्यत्वस्यापि केनचिन्मूलकारणेनावश्यं भवितव्यं, यत्र च विनाशिनस्तस्य लयोऽपि भवेत्, यदेव च तन्मूलकारणं तदेवास्माकं प्रधानमिति ॥ १३६ ॥

प्रधानसिद्धौ युक्त्यन्तरप्रदर्शकं सूत्रमवतारयितुं शङ्कते—तथापीत्यादिना। सूत्रतात्पर्य्यमभिधातुं विकल्पयति—तदित्यादिना। तत्कारणस्यापि—तस्य कारणस्य कारणस्यापि, तथात्वे—कार्य्यत्वे, अनवस्थेति, तस्य तस्यापि कारणस्य कल्पनीयत्वादिति भावः। द्वितीयपक्षे दोषं दर्शयितुमाह—मूलकार्य्यत्व इति, कार्य्यत्वाभाववत्त्वे सति कारणत्वे इति तदर्थः, तदेव—तत्कारणमेव, सा—प्रकृतिः। सूत्रघटकपदार्थाभिधानाय प्रथमपदमुत्थापयति—तत्कार्य्यत इति ॥ १३७ ॥

অনুমান হইবে। ইহার তাৎপর্য্য এই যে, অধ্যবসায়রূপ মহত্তত্ত্ব যে ব্যক্ত ও বিনাশি ইহা প্রত্যক্ষসিদ্ধ, অথচ যে বিনাশি, অবশ্যই তাহার বিনাশের আশ্রয়রূপ কারণ স্বীকার করিতে হইবে, সেই কারণই প্রধান, সুতরাং মহত্তত্ত্বদ্বারাই লিঙ্গপ্রধানের অনুমান হইল ॥ ১৩৬ ॥

মহত্তত্ত্বের বিনাশিত্বনিবন্ধন তাহার কারণের সিদ্ধি হইলেও অন্যই সেই কারণ হইবে, প্রকৃতি স্বীকারের প্রয়োজন কি ? এই আশঙ্কায় বলিতেছেন— মহত্তত্ত্বের কারণরূপে যাহা স্বীকার করিবে, সেই কারণ জন্য কি নিত্য ? যদি জন্য হয়, তবে সেই কারণেরও কারণ স্বীকার করিতে হইবে, আবার সেই কারণেরও কারণ স্বীকার করিতে হইবে, এরূপ ভাবে অনবস্থা হইবে। আর যদি সেই কারণ নিত্য হয়, তবে সেই প্রকৃতি। অতএব প্রকৃতির কার্য্য হইতেই প্রকৃতিসিদ্ধির অপলাপ হইবে না ॥ ১৩৭ ॥

भवतु प्रकृतिसिद्धिः, पुरुषसिद्धिर्न स्यादेव, न हि तस्य कार्य्य-मस्ति इत्यत आह—

सामान्येन विवादाभावाद्धर्मवन्न तत्साधनम् ॥ १३८

सामान्येन तावत् आत्मनि विवादो नास्ति, विशेषे हि विवादः, 'अनेकः एकः व्यापकः अव्यापकः' इत्यादिः। यथा सर्वस्मिन् दर्शने धर्मः इति अविवादः, धर्म्मविशेषे हि विप्रतिपत्तिः। 'न तत्साधनं' न तत्र कार्य्यकारणभावः साधनम्। अन्यत् साधनं वक्ष्यामि इति अभिसन्धिः ॥ १३८ ॥

देहेन्द्रियादय एव आत्मानः, किमन्यकल्पनया इत्यत आह—

शरीरादिव्यतिरिक्तः पुमान् ॥ १३९ ॥

व्यक्तम् ॥ १३९ ॥

एवं प्रधानं प्रसाध्य पुरुषसाधकसूत्रमवतारयति—भवत्वित्यादिना। "न हि तस्य कार्य्य-मस्ती"त्यभिधानं कार्य्यलिङ्गकानुमानस्य पुरुषसाधकत्वं नास्तीति प्रतिपादनार्थं। सामान्येन —आत्मत्वादिरूपसाधारणधर्म्मेण धर्म्मवदिति दृष्टान्तं विशदयति—यथेत्यादिना। समसनीयतत्-पुरुषसमासं सनविकृत्य तत्साधनपदं व्याचष्टे—तत्र कार्य्यकारणभावः साधनमिति। अपेक्षित इति शेषः। ननु विशेषेऽपि किं साधनं भविष्यतीत्यत: अभिसन्धिं पूरयति—अन्यदिति ॥ १३८ ॥

शरीरादेरेवात्मत्वमङ्गीकुर्व्वतां चार्व्वाकाणां मतस्य निरासकं प्रतिज्ञासूत्रमवतारयति—देहेत्यादिना ॥ १३९ ॥

প্রকৃতির সিদ্ধি হউক, পুরুষের সিদ্ধিত হইতেই না, যে হেতু পুরুষের কোনও কার্য্য নাই, এই আশঙ্কায় বলিতেছেন—সামান্যতঃ আত্মার অস্তিত্বে কোনও বিবাদ নাই, (অর্থাৎ আত্মা সকলেই স্বীকার করিয়া থাকে) আত্মার বিশেষত্বে অর্থাৎ আত্মা এক কি অনেক, ব্যাপক কি অব্যাপক ইত্যাদি বিষয়েই বিবাদ আছে। যেমন সমস্ত দর্শনেই "ধর্ম্ম আছে" এ বিষয়ে কোনও বিবাদ নাই, ধর্ম্মের বিশেষত্বেই বিবাদ। অতএব সামান্যতঃ আত্মসাধনে কার্য্য-কারণভাবরূপ সাধনার অপেক্ষা নাই। আত্মার বিশেষত্বসাধনে অন্য হেতু বলা হইবে ॥ ১৩৮ ॥

अत्र न्यायमाह—

संहतपरार्थत्वात् ॥ १४० ॥

यत् संहतं तत् असंहतपरार्थम्। संहतपरार्थत्वे अनवस्था स्यात्। संहतत्वञ्च गुणानाम् अन्योऽन्यमिथुनभावेन कार्य्यकरणम्। अथवा द्रवकठिनता संहतत्वं, तच्च प्रकृत्यादौ तिरोभूतमस्ति अन्यथा तत्कार्य्येषु संहततादर्शनप्रसङ्गात्॥ १४० ॥

प्रतिज्ञामात्रेण नात्मनः शरीरादिव्यतिरिक्तत्वं सिध्यतीति तत्र हेतुप्रदर्शकं सूत्रमवतारयति—अत्रेत्यादिना। "संहतस्य—गुणानां परस्परमिथुनभावेन कार्य्यं कुर्व्वतः प्रकृतिमहदादेः परार्थत्वात्—परस्य—स्वेतरस्य कस्यचिदसंहतस्येति यावत्, भोगापवर्गादिरूपप्रयोजनसाधकत्वात् देहादिव्यतिरिक्तः पुमान् इति सूत्रार्थः। अनन्तरोच्यमानामनवस्थां निरसितुं असंहतेति परस्य विशेषणं पूरयित्वा संहतस्यासंहतपरार्थत्वरूपां व्याप्तिं दर्शयति—यदित्यादिना। तथाचायं प्रयोगः—

प्रकृतिमहदादिकं असंहतपरार्थं संहतत्वात् शय्यासनादिवत्। योऽसौ असंहतः परः स एव पुरुष इति भावः। अनवस्था स्यादिति, तत्परस्यापि संहतत्वे तस्यापि परार्थत्वापत्त्या उत्तरोत्तरस्यापि परस्य संहतत्वेन परार्थत्वापत्तेरिति भावः। लाघवात् प्रकारान्तरेण संहतत्वं निर्वक्तुमाह—अथवेति। द्रवकठिनतेति द्वन्द्वोत्तरप्रत्ययात् द्रवत्वं कठिनत्वञ्चेत्यर्थः। प्रकृत्यादौ

দেহ বা ইন্দ্রিয়াদিই আত্মা হইবে, অন্য কল্পনায় প্রয়োজন কি? এই আশঙ্কায় বলিতেছেন,—"পুরুষ শরীরাদি হইতে ভিন্ন" ॥ ১৩৯ ॥

পুরুষ যে শরীরাদি হইতে ভিন্ন সে বিষয়ে যুক্তি বলিতেছেন—যে সংহত, সেই অসংহত, কোনও পরের ভোগও অপবর্গের সাধক (যেমন শয্যাসনাদি) সুতরাং সেই অসংহত পরই পুরুষ। সেই পরও যদি সংহত হয়, তবে তাহারও পরার্থত্ব স্বীকার করিতে হয়, আবার সেই পরেরও পরার্থত্ব স্বীকার করিতে হয়, এরূপ ভাবে অনবস্থা হইয়া পরে। সত্ত্ব, রজঃ ও তমঃ এই ত্রিগুণত্ব। অথবা দ্রবত্ব বা কঠিনত্বের নাম সংহতত্ব। সেই সংহতত্ব প্রকৃত্যাদিতে তিরোহিত অবস্থায় আছে, তাহা না হইলে প্রকৃতির

एतदेव स्पष्टयति—

त्रिगुणादिविपर्य्ययात् ॥ १४१ ॥

पुरुषे त्रिगुणादिविपर्य्ययात् तददर्शनात् । आदिशब्दात् अन्येषां प्रकृतिधर्म्माणामपि अदर्शनात् इति ॥ १४१ ॥

न्यायान्तरमाह—

अधिष्ठानाच्चेति ॥ १४२ ॥

चेतनो हि अधिष्ठाता भवति प्रकृतिस्तु जड़ा इत्यर्थः ॥ १४२ ॥

द्रवत्वादेरप्रत्यक्षत्वादाह—तत्त्वेति । द्रवत्वादिरूपं संहतत्वमित्यर्थः । तिरोभूतस्य तस्य तत्रा-स्वीकारे दोषं दर्शयति—अन्यथेत्यादिना । अदर्शनप्रसङ्गादिति, कारणगुणानामेव कार्य्यगुणारम्भ-कत्वादिति भावः ॥ १४० ॥

ननु पुरुषस्यापि संहतत्वमस्तु असंहतत्वे प्रमाणाभावादित्याशङ्कानिरासकतया परसूत्रमव-तारयितुमाह—एतदेवेति । पुरुषस्यासंहतत्वमेवेत्यर्थः । त्रिगुणेति भावप्रधानो निर्द्देशः, तथाच त्रैगुण्यादिरूपप्रकृतिधर्म्माभावात पुरुषे असंहतत्वमनुमेयमिति भावः ॥ १४१ ॥

न्यायान्तरमिति, पुरुषस्यासंहतत्वानुमितौ हेत्वन्तरमित्यर्थः । अधिष्ठातृत्वञ्च अपरिणामित्वे सति सन्निधानेन परिणामहेतुत्वं । स्वरूपासिद्धिव्यभिचारशङ्कां निराकरोति—चेतन इत्यादिना ॥ १४२ ॥

কার্য্য মহদাদিতেও সংহতত্বের উপলব্ধি হইতে পারে না। (কারণ যাহার কারণে যে গুণ থাকে না, সেই কার্য্যেও সেই গুণ পরিদৃষ্ট হয় না, অর্থাৎ কারণের গুণই কার্য্যের গুণ জন্মাইয়া থাকে ॥ ১৪০ ॥

পুরুষ যে অসংহত তাহাই স্পষ্ট করিতেছেন—ত্রৈগুণ্যাদিরূপ যে প্রকৃতির ধর্ম্ম, তাহার অভাবনিবন্ধন পুরুষে অসংহতত্বের অনুমান হইবে। আদি-শব্দানুসারে অন্য প্রকৃতি ধর্ম্মের অভাবও অনুমাপক ॥ ১৪১ ॥

পুরুষের অসংহতত্বানুমানে হেত্বন্তর বলিতেছেন—অধিষ্ঠাতৃত্বনিবন্ধনও পুরুষই অধিষ্ঠাতা, প্রকৃতি জড়, সুতরাং তাহাতে অধিষ্ঠাতৃত্ব নাই ॥ ১৪২ ॥

युक्त्यन्तरमाह—

भोक्तृभावात् ॥ १४३ ॥

भोग्या प्रकृतिः, भोक्ता पुरुषः । यद्यपि कूटस्थत्वादात्मनो भोक्तृत्वं नास्ति, तथापि बुद्धिच्छायापत्त्या इति उक्तम् ॥ १४३ ॥

मोक्षार्थं प्रवृत्तिः, सा किमात्मनः प्रकृतेर्वा ? इत्यत आह—

कैवल्यार्थं प्रवृत्तेः ॥ १४४ ॥

त्रिगुणस्वभावत्वात् प्रकृतेः न स्वभावप्रच्यवः, अनित्यत्वप्रसङ्गाच्च । यस्य औपाधिका गुणाः तस्य कैवल्यं सम्भवति । स च आत्मा इति ॥ १४४ ॥

युक्त्यन्तरमिति, पुरुषस्यासंहतत्वे हेत्वन्तरमित्यर्थः । भोक्तृभावात्—भोक्तृत्वात् । व्यभिचारस्वरूपासिद्धिशङ्कां निराकरोति—भोग्येत्यादिना । पुरुषस्य कूटस्थत्वेन भोग्यरूपेण परिणामलक्षणं भोक्तृत्वं पुरुषे नास्तीति दर्शयति- यद्यपीत्यादिना । पुरुषे वस्तुगत्या निरुक्तभोक्तृत्वाभावेऽपि प्रतिबिम्बरूपेणाभिमानिकभोक्तृत्वमस्तीति दर्शयति—तथापीत्यादिना । तथाचाभिमानिकभोक्तृत्वेनैवासंहतत्वमनुमेयमिति भावः ॥ १४३ ॥

सूत्रान्तरमवतारयति—मोक्षेत्यादिना । सा—प्रकृतेः प्रवृत्तिः, प्रकृतेर्व्वेति मोक्षार्थेति शेषः । "कैवल्यार्थं प्रवृत्तेश्च पुरुषोऽस्तीति" सूत्रार्थं प्रतिपादयति—त्रिगुणेत्यादिना । न स्वभावप्रच्यव इति, तथाच प्रकृतेर्मोक्षो न सम्भवतीति भावः । नन्वस्तु स्वभावस्यापि नाश इत्यत आह—अनित्यत्वप्रसङ्गाच्चेति । स्वभावस्य यावद्द्रव्यभावित्वेन स्वभावनाशे स्वभाविनोऽपि नाशावश्यम्भावादित्याशयः । नन्वेवं कस्य मोक्ष इत्याह—यस्येति । औपाधिकाः—बुद्धिच्छायापत्तिरूपोपाधिसाध्या गुणाः—

পুরুষের অসংহতত্বে হেত্বন্তর বলিতেছেন—প্রকৃতি ভোগ্য ও পুরুষ ভোক্তা, সুতরাং ভোক্তৃত্বনিবন্ধনও পুরুষ অসংহত, যদিও অপরিণামী পুরুষে প্রকৃত ভোক্তৃত্ব নাই, তথাপি বুদ্ধিপ্রতিবিম্ববশতঃ ভোক্তৃত্বের অভিমান আছে। সেই আভিমানিক ভোক্তৃত্বই পুরুষের অসংহতত্বের অনুমাপক ॥ ১৪৩ ॥

মোক্ষের জন্য প্রকৃতির প্রবৃত্তি হয়, সেই প্রবৃত্তি প্রকৃতির কি পুরুষের মুক্তির জন্য ? এই আশঙ্কায় বলিতেছেন—প্রকৃতি ত্রিগুণ স্বভাব, তাহার সেই ত্রিগুণরূপ স্বভাবের বিচ্যুতি হইতে পারে না, কারণ তাহা হইলে

स किंरूप ? इत्यत आह—

जड़प्रकाशायोगात् प्रकाशः ॥ १४५ ॥

जड़ः न प्रकाशते इति सिद्धम्। यदि आत्मा अपि जड़ः स्यात्, तस्यापि अन्येन प्रकाशेन भवितव्यम्। लाघवाच्च आत्मा एव प्रकाशरूपोऽस्तु। श्रुतिश्च 'येनेदं सर्वं विजानाति तं केन विजानीयात्, विज्ञातारमरे केन विजानीयात् इति' ॥ १४५ ॥

जड़ोऽपि आत्मा अस्तु चिद्धर्मा। तेन जगत् प्रकाशयति, न तु चिद्रूप इत्यत आह—

निर्गुणत्वान्न चिद्धर्मा ॥ १४६ ॥

यदि आत्मनो धर्मयोगः स्यात्, परिणामित्वं स्यात्, ततश्चानिर्मोक्ष इति ॥ १४६ ॥

भोगादयः। सम्भवन्तीति, औपाधिकगुणनाशेऽपि गुणिनोऽविनाशसम्भवादिति भावः। नन्वेवम्भूतः क इत्याह—स चेति। तथाच यस्य विमोक्षार्थं प्रधानप्रवृत्तिः स एव पुरुष इति सिद्धमिति साध्यत्वं केवल्यार्थं प्रवृत्तेः पुरुषोऽस्तीति ॥ १४४ ॥

एवं पुरुषं प्रसाध्य तस्य स्वरूपनिरूपकं सूत्रमवतारयति—स किंरूप इत्यादिना। "जड़स्य प्रकाशायोगात् आत्मा प्रकाशस्वरूप" इति सूत्रार्थं सङ्गमयति—जड़ इत्यादिना। नन्वस्तु अन्य एव प्रकाश इत्यत आह—लाघवाच्चेति। अनन्तातिरिक्तप्रकाशतत्कारणध्वंसादिकल्पनामपेक्ष्य आत्मन एव प्रकाशस्वरूपत्वकल्पने लाघवादित्यर्थः। आत्मनः स्वतः प्रकाशत्वे बृहदारण्यक-द्वितीयाध्यायचतुर्थब्राह्मणचतुर्दशमन्त्रं प्रमाणयितुमाह—श्रुतिश्चेति ॥ १४५ ॥

প্রকৃতির আনন্ত্যের আপত্তি হয়। (অতএব প্রকৃতির মুক্তি অসম্ভব) যাহার গুণ ঔপাধিক, অর্থাৎ বুদ্ধি-প্রতিবিম্বরূপ উপাধিসাধ্য, তাহারই মুক্তি সম্ভবপর। আত্মাই ঔপাধিক গুণবিশিষ্ট ॥ ১৪৪ ॥

আত্মার স্বরূপ কি? এই আকাঙ্ক্ষায় বলিতেছেন—যে জড়, সে প্রকাশিত হয় না, ইহা প্রসিদ্ধ, যদি আত্মাও জড় হয়, তবে তাহারও অন্য প্রকাশ স্বীকার করিতে হয়, সুতরাং লাঘবতঃ আত্মাই প্রকাশস্বরূপ। এ বিষয়ে শ্রুতিও আছে—"যদ্দ্বারা সমস্ত জানা যায়, কাহা দ্বারা তাহাকে জানা যাইবে? যে বিজ্ঞাতা, তাহাকে কাহা দ্বারা জানা যাইবে?" ॥ ১৪৫ ॥

अत्र श्रुतिविरोधमाह—

श्रुत्या सिद्धस्य नापलापस्तत्प्रत्यक्षबाधात् ॥ १४७

'असङ्गो ह्ययं पुरुषः' इत्यादि श्रुतिः। गुणयोगे सा बाधिता स्यात् ॥ १४७ ॥

दूषणान्तरमाह—

सुषुप्त्याद्यसाक्षित्वम् ॥ १४८ ॥

यदि आत्मा जडः स्यात्, सुषुप्त्यादौ असाक्षित्वं अज्ञातृत्वं स्यात्।

आत्मनश्चैतन्यधर्मकत्ववादिनो मतस्य निरासकं सूत्रमवतारयति—जड इत्यादिना। आत्मनो धर्मवत्त्वे निर्गुणत्वादिकं नोपपद्यत इति सूत्रतात्पर्य्यम्। चिन्मात्रत्वे तु "अकर्त्ता चैतन्यं सच्चिदेकरसो ह्ययमात्मे"त्याः श्रुतयः सन्ति। नन्वेवं सर्व्वज्ञत्वादि श्रुतीनां का गतिरिति चेत्तासां गतिः स्थिर इतिवल्लौकिकविकल्पानुवादमात्रत्वात् विधिनिषेधश्रुतिसाध्यनिषेधश्रुतेर्व्वलवत्त्वेन निर्गुणत्वश्रुतेर्व्वलवत्त्वाच्च। वृत्तिकारो दोषान्तरं पूरयति—यदीत्यादिना ॥ १४६ ॥

आत्मनो गुणयोगे श्रुतिविरोधप्रदर्शकं सूत्रमवतारयितुमाह—अत्रेति। आत्मनो गुणयोग इत्यर्थः। "साक्षी चेता केवलो निर्गुणश्च" आदिश्रुत्या सिद्धस्य निर्गुणत्वादेर्नापलापः तत्प्रत्यक्षस्य श्रुत्यैव बाधादिति सूत्रार्थ."। बृहदारण्यकचतुर्थाध्यायतृतीयब्राह्मणपञ्चदशमन्त्रात्मिका श्रुतिमुत्थापयति—असङ्ग इति ॥ १४७ ॥

दूषणान्तरमिति, आत्मनो जड़त्वे दूषणान्तरमित्यर्थः। सूत्रतात्पर्य्यं विवृणोति—यदि·

আত্মা জড় হইলেও চৈতন্য তাহার ধর্ম্ম স্বীকার করিব, সেই চৈতন্য দ্বারাই জগৎ প্রকাশ করিবে, কিন্তু আত্মা চিৎস্বরূপ নহে, এই আশঙ্কায় বলিতেছেন— আত্মা নিগুর্ণ, সুতরাং চিৎ (চৈতন্য) তাহার ধর্ম্ম হইতে পারে না। আত্মায় যদি ধর্ম্মযোগ হয়, তবে পরিণামিত্ব হইতে পারে, এবং তাহা হইলে মুক্তি হইতে পারে না ॥ ১৪৬ ॥

আত্মার গুণযোগ স্বীকারে শ্রুতিবিরোধ বলিতেছেন—"শ্রুতিদ্বারাই গুণাদি প্রত্যক্ষের বাধবশতঃ শ্রুতিসিদ্ধ নিগুর্ণত্বের অপলাপ হইতে পারে না। শ্রুতি আছে, পুরুষ অসঙ্গ" যদি পুরুষের গুণযোগ স্বীকার করা যায়, তবে সেই শ্রুতি বাধিত হয় ॥ ১৪৭ ॥

न च एवं, सुखमहमस्वाप्सम् इति प्रतिभासनात्। आदिशब्दात् स्वप्नग्रहणम् ॥ १४८ ॥

एक एव आत्मा इति वेदान्तिनः। तथा च—
नित्यः सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः।
एकः स भिद्यते शक्त्या मायया न स्वभावतः ॥ तत्राह—

जन्मादिव्यवस्थातः पुरुषबहुत्वम् ॥ १४९ ॥

यदि एकः आत्मा, एकस्मिन् जायमाने सर्वे जायेरन् ॥ १४९ ॥

त्यादिना। अज्ञातृत्वं स्यादिति, तन्मते चैतन्यस्य कादाचित्कत्वेन तदानीमनङ्गीकारादिति भावः। एवं—कदाचिदप्यात्मनोऽज्ञातृत्वं। अत्र युक्तिं दर्शयति—सुखमहमित्यादिना ॥ १४८ ॥

आत्मैक्यवादिनो वेदान्तिनो मतस्य निरासकं सूत्रमवतारयितुं भूमिकामारचयति—एक एवेत्यादिना। अपूर्व्वदेहेन्द्रियादिसंयोगो जन्म, आदिशब्देन मरणादिपरिग्रहः। पुरुषबहुत्वानङ्गीकारे अव्यवस्थां दर्शयति—यदीत्यादिना ॥ १४९ ॥

পুরুষের জড়ত্ব স্বীকারে দোষান্তর দেখাইতেছেন—যদি আত্মা জড় হয়, তবে সুষুপ্তি প্রভৃতি অবস্থাতে আত্মার জ্ঞাতৃত্ব থাকিতে পারে না, অথচ সুষুপ্ত্যাদি অবস্থাতেও আত্মা অজ্ঞাতা নহেন, কারণ "আমি সুখে শয়ন করিয়াছিলাম" এইরূপ প্রতিভাত হয়। সূত্রের আদিশব্দ দ্বারা স্বপ্নাবস্থার পরিগ্রহ হইবে ॥ ১৪৮ ॥

বেদান্তিগণ বলেন, আত্মা এক, তাঁহাদের মতে উক্তও হইয়াছে—"আত্মা নিত্য সর্ব্বব্যাপক অপরিণামী ও দোষরহিত, তিনি এক হইয়াও মায়াশক্তিদ্বারা বিভিন্ন বলিয়া প্রতীয়মান হন, কিন্তু স্বভাবতঃ তিনি ভিন্ন নহেন।" এই আশঙ্কায় বলিতেছেন—"জন্মমরণাদি ব্যবস্থার অনুরোধে পুরুষের বহুত্ব স্বীকার করিতে হইবে" আত্মা যদি এক হয়, তবে একজন জন্মিলে সকলেই জন্মিতে পারে। (এবং একজন মরিলে সমস্তই মরিতে পারে) সুতরাং জন্মমরণাদি ব্যবস্থা হইতে পারে না ॥ ১৪৯ ॥

পরমতমাশঙ্কতে—

উপাধিভেদেঽপ্যেকস্য নানাযোগ আকাশস্যেব ঘটাদিভিঃ ॥ ১৫০ ॥

যথা একম্ আকাশং, ঘটাদ্যুপাধিভেদাৎ ঘটে নষ্টে 'ঘটাকাশং নষ্টম্' ইতি ব্যপদিশ্যতে, তথা একাত্মপক্ষেঽপি দেহাবচ্ছেদাৎ তন্নাশে 'আত্মা নষ্ট' ইতি। ব্যপদেশমাত্রম্ নানাত্বপক্ষেঽপি, অন্যথা আত্মনো নিত্যত্বাৎ কথং জন্মমরণব্যবস্থা ইতি ॥ ১৫০ ॥

সমাধানমাহ—

উপাধির্ভিদ্যতে, ন তু তদ্বান্ ॥ ১৫১ ॥

উপাধির্ভিদ্যতে। ন চ অন্যনাশাৎ অন্যত্র নাশব্যবহারঃ

পূর্ব্বপক্ষসূত্রমবতারয়তি—পরমতমিত্যাদিনা। আকাশস্যেবেতি দৃষ্টান্তং স্পষ্টীকুর্ব্বন্ সূত্রতাৎপর্য্যং বিবৃণোতি—যথেত্যাদিনা, তন্নাশে—দেহনাশে আত্মনি নষ্ট ইতীত্যস্য ব্যপদিশ্যত ইতি পূর্ব্বেণ সম্বন্ধঃ। ননু একাত্মপক্ষে ব্যপদেশাঙ্গীকর্ত্তব্যঃ, নানাত্মপক্ষে ব্যপদেশাঙ্গীকরণং নাস্তীত্যেব বিশেষ ইত্যাশঙ্কায়ামাহ—ব্যপদেশমাত্রং নানাত্মপক্ষেঽপীতি, বিপক্ষে বাধকমাহ—অন্যথেত্যাদিনা ॥ ১৫০ ॥

সমাধানমিতি, পূর্ব্বসূত্রোক্তপূর্ব্বপক্ষস্য সমাধানমিত্যর্থঃ। উপাধিনাশে আত্মনি নাশব্যবহারঃ পূর্ব্বসূত্রোক্তো নোপপদ্যত ইত্যাহ—নচেত্যাদিনা। অতিপ্রসঙ্গাদিতি, ঘটনাশেঽপি পটনাশ-

---

এস্থলে বেদান্তিগণের পূর্ব্বপক্ষ এই যে—যেমন আকাশ এক হইলেও ঘটাদি উপাধিভেদে ঘটনাশে আকাশ বিনিষ্ট বলিয়া ব্যবহৃত হয়, সেইরূপ একাত্মপক্ষেও দেহভেদে কোন দেহরূপ উপাধিনাশে আত্মা বিনিষ্ট বলিয়া ব্যবহৃত ও কোন দেহরূপ উপাধির উৎপাদে আত্মা জাত বলিয়া ব্যবহৃত হইতে পারে, আত্মার নানাত্ববাদীর মতেও জন্মমরণাদিকে ব্যবহার মাত্রই বলিতে হইবে, নচেৎ আত্মার নিত্যত্বনিবন্ধন জন্মমরণাদি ব্যবস্থা হইবে কিরূপে? ॥ ১৫০ ॥

উক্ত পূর্ব্ব পক্ষের উত্তর বলিতেছেন—"উপাধি দেহাদিই ভিন্ন, কিন্তু উপাধিমান্ আত্মা ভিন্ন নহে, সুতরাং উপাধিনাশে আত্মার নাশ ব্যবহার হইতে

अतिप्रसङ्गात् । एकात्मपक्षे च व्यक्त एव विरुद्धधर्माध्यासः, एकत्र बन्धमोक्षाभावात् । आकाशस्य तु धूमादियोगायोगौ अविरुद्धौ, संयोगस्याव्याप्यवृत्तित्वात् ॥ १५१ ॥

एतेन किं स्यात् ? इत्यत आह—

एवमेकत्वे न परिवर्त्तमानस्य न विरुद्धधर्माध्यासः ॥ १५२ ॥

न विरुद्धधर्माध्यासो भवति ॥ १५२ ॥

व्यवहारप्रसङ्गादित्यर्थः । एकात्मपक्षे दोषान्तरं दर्शयति—एकेत्यादिना । एकत्रेति एक-कालावच्छेदेनेति शेषः, तथाच—"एककालावच्छेदेनैकत्रावर्त्तमानत्व"मेवात्र विरुद्धत्वं, तच्च बन्धमोक्षयोरस्ति । ननु एकस्मिन्नपि आकाशे धूमादिसंयोगतदभावरूपौ विरुद्धधर्म्मौ दृश्येते एवेत्यत आह—आकाशस्य तु इति । अविरोधहेतुं दर्शयति—संयोगस्याव्याप्यवृत्तित्वादिति, देशिकाव्याप्यवृत्तित्वशालिनोः भावाभावयोरेककालावच्छेदेनाप्येकत्र वर्त्तमानत्वेनाविरुद्धत्वादिति भावः ॥ १५१ ॥

सूत्रान्तरमवतारयति—एतेनेत्यादिना । एकत्वे अभ्युपगम्यमाने यदि सर्व्वतः वर्त्तमानस्य देहादिसर्व्वोपाधिष्वनुगतस्यात्मनः विरुद्धधर्म्माध्यासो नेति न, किन्तु विरुद्धधर्म्माध्यासो दुष्परिहर एवेति सूत्रार्थः । ननु भवतु विरुद्धधर्म्माध्यासः, ततः किमित्याशङ्कां ग्रन्थकारः अपनयति—नेत्यादिना । तथाच विरुद्धधर्म्माध्यासदोषापत्त्याप्येकात्मवादो नाङ्गीकर्त्तव्य इति भावः ॥ १५२

পারে না, কারণ একের নাশে অন্যের নাশ ব্যবহার স্বীকার করিলে ঘটাদিনাশে পটাদি নাশ ব্যবহাররূপ অতিপ্রসঙ্গ হয়। এবং একাত্মপক্ষে বিরুদ্ধধর্ম্মা-ধ্যাসরূপ দোষও সুব্যক্ত, কারণ এক কালাবচ্ছেদে একত্র থাকে না বিধায় বিরুদ্ধ বন্ধ ও মোক্ষ একেতে স্বীকার করিতে হয়। সংযোগের অব্যাপ্য বৃত্তিত্ব নিবন্ধন ধূমাদির সংযোগ ও তদভাব বিরুদ্ধ নহে। সুতরাং এক আকাশে সংযোগ এবং তদভাব স্বীকারে বিরুদ্ধ ধর্ম্মের অধ্যাস হয় না ॥১৫১॥

ইহা দ্বারা কি হইল ? এই আকাঙ্ক্ষায় বলিতেছেন—"আত্মার একত্ব স্বীকার করিলে সর্ব্বানুগত আত্মার যে বিরুদ্ধ ধর্ম্মাধ্যাস হয় না, তাহা নহে, বিরুদ্ধ ধর্ম্মাধ্যাস দোষ অপরিহার্য্যই হইয়া পড়ে" অথচ বিরুদ্ধ ধর্ম্মের অধ্যাস স্বীকার্য্য নহে ॥১৫২॥

अन्यधर्मस्यापि अन्यत्र आरोपो दृष्टः, यथा प्रकृतेः कर्त्तृत्वं पुरुषे आरोप्यते इत्यत आह—

अन्यधर्मत्वेऽपि नारोपात् तत्सिद्धिरेकत्वात् ॥ १५२ ॥

पुरुषकर्त्तृत्वं भ्रान्तं, अत्र पुरुषाकर्त्तृत्वस्य सत्यत्वात्, आरोपस्य असत्यत्वात्। न च सत्यासत्ययोः सम्बन्धः तात्त्विको भवति। असङ्गित्वात् आत्मनः न जन्ममरणादि सम्भवति ॥ १५२ ॥

सूत्रान्तरावतरणिकामाह—अन्येत्यादिना, अन्यत्र—प्रकृतेरन्यस्मिन् पुरुषे, आरोप्यत इति शेषः। तथाच जन्ममरणसुखदुःखादीनामपि अन्यधर्मत्वेन एकात्मपक्षेऽपि आत्मनि आरोपाज्जन्मादिव्यवस्था भविष्यतीत्याशयः। "अन्यधर्मत्वेऽपि—जन्मादिनां देहाद्युपाधिधर्मत्वेऽपि, न जन्मादिव्यवस्थासिद्धिः, आरोपात्—पुरुषे कल्पनात् न तत्सिद्धिः, एकत्वात्—आरोपाधिष्ठानपुरुषस्य तन्मते एकत्वादिति सूत्रार्थः।" आरोपस्वीकारेऽपि आत्मनि जन्मारोपे सर्व्वेषां जन्मव्यवहारापत्तिरूपाव्यवस्थाया मरणाद्यारोपेऽ सर्व्वेषां मरणादिव्यवहारापत्तिरूपाव्यवस्थायाश्चैकात्मपक्षे जागरूकत्वादिति भावः।

ननु अहं करोमीति सर्व्वजनसिद्धानुभवात् कथं यथेत्यादि दृष्टान्तसङ्गतिरिति तटस्थाशङ्कां इत्याकारां निराकुरुते—पुरुषेत्यादिना। ननु मास्तु पुरुषे कर्त्तृत्वं जन्ममरणादिकन्तु पुरुषधर्म्म एवास्तु—इति तटस्थाशङ्कां निराकर्त्तुमाह—असङ्गित्वादित्यादि ॥ १५२ ॥

একের ধর্ম্মের ও অন্যত্র আরোপ হইতে দেখা যায়, যেমন প্রকৃতির ধর্ম্ম কর্ত্তৃত্বের প্রকৃতির অন্যপুরুষে আরোপ হইয়া থাকে, অতএব এই দৃষ্টান্তানুসারে অন্যান্য ধর্ম্ম জন্ম মরণাদির ও পুরুষে আরোপ করিয়া একাত্ম পক্ষেও জন্ম মরণাদির ব্যবস্থা করা যাইবে, এই আশঙ্কায় সমাধানসূত্র বলিতেছেন, — "জন্ম মরণ সুখ দুঃখাদি অন্য ধর্ম্ম হইলেও আরোপদ্বারা জন্মাদি ব্যবস্থার সিদ্ধি হইতে পারে না।" কারণ আরোপ স্বীকার করিলেও আরোপাধিষ্ঠান পুরুষের একত্ব নিবন্ধন দর্শিত জন্মাদির অব্যবস্থার পরিহার হইতে পারে না। পুরুষের কর্ত্তৃত্বানুভব ভ্রমাত্মক, কারণ সাংখ্যমতে পুরুষের অকর্ত্তৃত্বই যথার্থ, আরোপ কখনও সত্য হয় না, সত্যাসত্যের সম্বন্ধও যথার্থ হইতে পারে না। পুরুষের অসঙ্গত্বনিবন্ধন জন্ম মরণাদি পুরুষের ধর্ম্মও হইতে পারে না ॥ ১৫২ ॥

एवं च श्रुतिविरोधः स्यात् । तथा च 'एकमेवाद्वितीयं' ब्रह्म । (छान्दोग्य उप ६ अध्याय २खण्ड प्रथममन्त्रः) "नेह नानास्ति किञ्चन, मृत्योः स मृत्युमाप्नोति । य इह नानेव पश्यति' (वृह उप ४ अध्याय ४ ब्राह्मण १९ मन्त्र) अतः आह—

नाद्वैतश्रुतिविरोधो जातिपरत्वात् ॥ १५४ ॥

व्याख्यातम् ॥ १५४ ॥

ननु अनेकात्मवादिनोऽपि एकस्यात्मनो बन्धमोक्षौ विरुद्धौ इत्यत आह—

विदितबन्धकारणस्य दृष्ट्या तद्रूपम् ॥ १५५ ॥

विदितं बन्धकारणं प्रकृतिपुरुषविवेकादर्शनं यस्य, तस्य दृष्ट्या—विवेकज्ञानेन तद्रूपं—कैवल्यरूपम् ॥ १५५ ॥

सूत्रान्तरमवतारयितुमाह—एवञ्चेति । पुरुषनानात्वे चेत्यर्थः । "अद्वैतश्रुतीनां—आत्मैक्य-प्रतिपादिकानां श्रुतीनां विरोधो नास्ति, जातिपरत्वात्—जातिः—सामान्यं एकरूपत्वमिति यावत्, तत्परत्वात्—अद्वैतश्रुतीनां तत्तात्पर्य्या" दिति सूत्रार्थः । तथाचाद्वैत श्रुतिष्वेकादिशब्दा यि-देकरूपतामात्रपराः भेदशब्दाश्च वैधर्म्यलक्षणभेदपरा इति मन्तव्यम् । अथवा जातिपरत्वात् विजातीयद्वैतनिषेधपरत्वादित्यर्थः ॥ १५४ ॥

सूत्रान्तरमवतारयितुं शङ्कते—नन्वित्यादिना । सूत्रार्थं विवृणोति—विदितमित्यादिना ॥ १५५

পুরুষ যদি নানা হয়, তবে "একমেবাদ্বিতীয়ং" ইত্যাদি অদ্বৈত শ্রুতির বিরোধ হয়, এই আশঙ্কায় বলিতেছেন—"অদ্বৈত শ্রুতির জাতিপরত্ব, নিবন্ধন অদ্বৈত শ্রুতির বিরোধ নাই।" ইহার তাৎপর্য্য এই যে অদ্বৈত শ্রুতিতে একাদি শব্দ যদি সজাতীয় দ্বিতীয় রহিতার্থক হয় ও নানাদি শব্দ যদি অনেকার্থক হয়, তবেই বিরোধ হয়, কিন্তু তাহা নহে, শ্রুতির একাদি শব্দের অর্থ একজাতীয় অর্থাৎ একরূপ এবং নানাদি শব্দের অর্থ বৈধর্ম্ম্য, সুতরাং বিরোধ নাই ॥ ১৫৪ ॥

অনেকাত্মবাদীর মতেও বা বিরুদ্ধ বন্ধ ও মোক্ষ এক আত্মার হয় কি প্রকারে? এই আশঙ্কায় বলিতেছেন—প্রকৃতি ও পুরুষের ভেদাদর্শনরূপ

विवेकादर्शननिमित्तो बन्धो न तात्त्विकः। दर्शनात् अदर्शनं निवर्त्तते इति युक्तिः। एवं च एकात्मपक्षे एव न्यायं पश्यामः, न नानात्मपक्षे, इत्यत आह—

नान्धादृष्ट्या चक्षुष्मतामनुपलम्भः ॥ १५६ ॥

अन्धः न पश्यति इति चक्षुष्मान् अपि किं न उपलभते। नानात्मवादिनाम् अनेके न्यायाः सन्ति इत्यर्थः ॥ १५६ ॥

इतोऽपि नानात्मान इत्याह—

वामदेवादिर्मुक्तः, नाद्वैतम् ॥ १५७ ॥

पुराणादौ श्रुतं 'वामदेवः मुक्तः शुकः मुक्तः' इत्यादि। यदि एक एव आत्मा, एकमुक्तौ सर्वमुक्तेः भेदश्रुतिबाधः स्यात् ॥ १५७ ॥

समाधानसूत्रमवतारयितुं पूर्व्वपक्षिणां शङ्कां दर्शयति—विवेकेत्यादिना। बन्धस्यातात्त्विकत्वे विरुद्धधर्माध्यासादिदोषाभावादुक्तदोषाद्यवादेकात्मवाद एव न्याय्य इति पूर्व्वपक्षिणामाशयः। सूत्रतात्पर्य्यं विवृणोति—अन्धो नेत्यादिना। फलितमाह—नानात्मवादिनामित्यादिना ॥ १५६ ॥

अनेके न्यायाः सन्तीति यदुक्तं तत्र कस्यचिन्न्यायस्य समुद्घाटकं सूत्रमवतारयति—इतोऽपीत्यादिना। "वामदेवो मुक्तः शुको मुक्तः" इत्यादि पुराणादिवाक्यार्थस्वरसरूपन्यायादेव नाद्वैतमिति सूत्रतात्पर्य्यं। विपक्षे वाक्यार्थबाधारूपदोषं दर्शयति—यदीत्यादिना ॥ १५७ ॥

বন্ধের কারণ যে আত্মার বিদিত হয়, বিবেক জ্ঞানদ্বারা সেই আত্মার কৈবল্য রূপের প্রকাশ পায় ॥ ১৫৫ ॥

বিবেকাদর্শন যাহার নিমিত্ত, সেই বন্ধ তাত্ত্বিক নহে; বিবেকদর্শন হইতেই বিবেকাদর্শনের নিবৃত্তি হয়, ইহাই যুক্তি, সুতরাং বন্ধের অতাত্ত্বিকত্বনিবন্ধন পূর্ব্বোক্ত বিরুদ্ধ ধর্ম্মাধ্যাসরূপ দোষ হইতে পারে না, অতএব একাত্মপক্ষেই ন্যায্যাদি যুক্তি দেখাযায়, নানাত্ম পক্ষে কোনও যুক্তি দেখা যায় না, এই আশঙ্কায় বলিতেছেন—অন্ধগণ দেখে না বলিয়া যে চক্ষুষ্মান্ ব্যক্তিও দেখে না, তাহা নহে, অর্থাৎ একাত্মবাদিগণ দেখে না বলিয়াই যে নানাত্মবাদীর পক্ষে যুক্তি নাই, তাহা নহে, নানাত্মবাদীর পক্ষেও বহু যুক্তি আছে ॥ ১৫৬ ॥

নানাত্মবাদীর পক্ষের যুক্তি বলিতেছেন, পুরাণাদিতে শুনাযায়—"বামদেব

नानात्मपक्षे अनादौ संसारे कदापि कः अपि मुच्यते इति क्रमेण सर्वमुक्तौ सर्वशून्यता स्यात्, एकात्मपक्षे तु उपाधिविगमः एव मोक्षः इत्यत आह—

अनादावद्य यावदभावाद्भविष्यदप्येवम् ॥ १५८ ॥

अनादौ संसारे अद्य यावत् शून्यतायाः अदर्शनात् भविष्यति मुक्तिः इति पक्षे नास्ति प्रमाणम् ॥ १५८ ॥

समाधानान्तरमाह—

इदानीमिव सर्वत्र नात्यन्तोच्छेदः ॥ १५९ ॥

अनन्तत्वात् आत्मनां क्रमेण मुक्तिः अपि स्यात्, संसारोच्छेदोऽपि न स्यात्। इदानीम् इव सर्वत्र भविष्यत्कालेऽपि मुक्तिः भविष्यति इति न अत्यन्तोच्छेदः स्यात्, प्रवाहनित्यत्वात्। उपाधिविगमो

सूत्रान्तरमवतारयितुं पूर्व्वपक्षिणामाक्षेपं दर्शयति—नानेत्यादिना। सूत्रतात्पर्य्यं विवृणोति—अनादावित्यादिना। शून्यताया अदर्शनादिति अभावादित्यस्य विवरणम्। भविष्यति मुक्तिरिति, सर्व्वेषामित्यादिः। नास्ति प्रमाणमिति, तथाच "भविष्यदपि एवं—शून्यताया अदर्शन"मिति सूत्रप्रतीकार्थ एवानेन समर्थित इति ध्येयम् ॥ १५८ ॥

समाधानान्तरमिति, पूर्व्वसूत्रावतरणिकोक्तपूर्व्वपक्षस्योत्तरान्तरमित्यर्थः। सूत्रस्य फलितार्थमाह—अनन्तत्वादित्यादिना। इममेवार्थं सूत्रव्याख्यानेन विशदयति—इदानीमित्यादिना, अत्र

মুক্ত, শুক মুক্ত ইত্যাদি" যদি আত্মা এক হয় তবে একের মুক্তিতেই সকলের মুক্তিপ্রসঙ্গ হয় বলিয়া উক্ত ভেদশ্রুতির বাধ হয়॥ ১৫৭ ॥

অনাদি সংসারে অবশ্যই কদাচিৎ কোন পুরুষের মুক্তি হয়, এরূপভাবে ক্রমে সকলের মুক্তি হইলে নানাত্মবাদীর মতে সমস্ত শূন্য হইতে পারে। একাত্মবাদীর পক্ষে উপাধিবিগমের নামই মুক্তি, সুতরাং সর্ব্বশূন্যতাপত্তিরূপ দোষ হয় না, এই আশঙ্কায় বলিতেছেন, অনাদি সংসার অদ্য পর্য্যন্ত সর্ব্বশূন্য হইতে দেখা যায় নাই বিধায় সকলেরই যে মুক্তি হইবে ইহাতে প্রমাণ নাই; সুতরাং ভবিষ্যৎকালেও সর্ব্বশূন্যতা হইবে না॥ ১৫৮ ॥

সর্ব্বশূন্যতাপত্তিরূপ পূর্ব্বোক্ত পূর্ব্বপক্ষের উত্তরান্তর বলিতেছেন—আত্মার

मोक्षः इति पक्षेऽपि सर्वशून्यताप्रसङ्ग इति तुल्यो ऽनुयोगः । यथा-नानात्मनां क्रमेण मुक्तौ सर्वोच्छेदः, तथा सर्वकर्मोच्छेदे सर्वोपाधिनाशात् जगत् शून्यं स्यात् । अथ उपाधीनाम् अनन्तत्वात् न शून्यता नानात्मपक्षेऽपि तुल्यत्वम् । तथा च—

अत एव हि विद्वत्सु मुच्यमानेषु सन्ततम् ।
ब्रह्माण्डजीवलोकानामनन्तत्वादशून्यता ॥ १५९ ॥

किमात्मा बद्धः मुक्तो वा ? बद्धत्वे स्वरूपस्य अप्रच्यवादनिर्मोक्षः, प्रच्यवे अनित्यत्वम् । मुक्तत्वे व्यर्थो ध्यानादिः इत्यत्राह—

व्यावृत्तोभयरूपः ॥ १६० ॥

न बद्धः नायं मुच्यते, किन्तु नित्यमुक्तः । अज्ञाननाशस्तु, ध्यानादिना क्रियते इति ॥ १६० ॥

हेतुं पूरयति प्रवाहनित्यत्वादिति, प्रवाहस्य सृष्टिप्रवाहस्य नित्यत्वात्—सदातनत्वादित्यर्थः । वेदान्तिनां सिद्धान्तेऽपि अस्य प्रश्नस्य प्रकारान्तरेण दुरुत्तरत्वं दर्शयति—उपाधीत्यादिना । एतदर्थसमर्थकं वृद्धश्लोकमवतारयितुमाह—तथाचेति । श्लोकार्थस्तु स्पष्ट एवेति ध्येयम् ॥ १५९॥

सूत्रान्तरमवतारयितुं विकल्पयति—किमित्यादिना । अप्रच्यवात्—यावद्द्रव्यभावित्वे ना-

অনন্তত্ব নিবন্ধন ক্রমশঃ মুক্তি হইলেও সংসারের উচ্ছেদ হয় না। বর্ত্তমান কালের ন্যায় ভবিষ্যৎ কালেও মুক্তি হইবে কিন্তু সংসারের উচ্ছেদ হইবে না, কারণ সংসারের প্রবাহনিত্যতা আছে। উপাধিনাশের নাম মোক্ষ এইপক্ষেও সর্ব্বশূন্যতাপত্তিরূপ অনুযোগের তুল্যতা, কারণ যেমন ক্রমশঃ নানা আত্মার মুক্তি হইলে সর্ব্বোচ্ছেদ হইতে পারে, সেইরূপ ক্রমে সমস্ত কর্ম্মের উচ্ছেদে সমস্ত উপাধির নাশ হইলেও জগৎশূন্য হইতে পারে। যদি বল উপাধির অনন্তত্বনিবন্ধন শূন্যতা হইবে না, তবে আত্মার অনন্তত্ব নিবন্ধনও শূন্যতা হইবে না এই উত্তরও তুল্য। প্রাচীনেরাও বলিয়াছেন—বিদ্বান্ অর্থাৎ তত্ত্বজ্ঞানী ব্যক্তিগণ সর্ব্বদা মুক্ত হইলেও সংসার জীবলোকের অনন্তত্ব নিবন্ধন জগৎ শূন্য হয় না ॥ ১৫৯ ॥

আত্মা বদ্ধ কি মুক্ত ? যদি বদ্ধ হয়, তবে স্বরূপ বন্ধের নাশ হইতে পারে না

आत्मनः साक्षित्वमुक्तम् । प्राप्तविवेकस्यापि साक्षित्वे अनिर्मोक्ष इत्यत आह—

साक्षात् सम्बन्धात् साक्षित्वम् ॥ १६१ ॥

अक्षं इन्द्रियम् तत्सम्बन्धात् साक्षित्वम् । विवेके च क्व इन्द्रियसम्बन्धः इति ॥ १६१ ॥

सर्वदा किंरूपः आत्मा इत्यत आह—

नित्यमुक्तत्वम् ॥ १६२ ॥

स्पष्टम् ॥ १६२ ॥

विनाशात् । प्रत्यवे—विनाशे, अनित्यत्वमिति, आत्मनः स्यादिति शेषः । स्वरूपनाशो द्रव्यनाशावश्यम्भावादिति भावः । व्यावृत्ते बद्धत्वमुक्तत्वोभयरूपे यस्मात् स व्यावृत्तोभयरूप इति विग्रहं मनसि कृत्य सूत्रस्य फलितार्थमाह—न बद्धः नायं मुच्यत इति । तर्हि किंस्वरूपः ? इत्याकाङ्क्षायां सूत्रकारेण वचसामात्मनेव नित्यमुक्तत्वमात्मन इह प्रकटयितुमाह—किन्तु नित्यमुक्त इति । "मुक्तत्वे व्यर्थो ध्यानादि"रिति पूर्व्वपक्षस्य समाधानमाह—अज्ञानेत्यादिना ॥ १६० ॥

सूत्रान्तरावतरणिकामाह—आत्मन इत्यादिना । अक्षेण इन्द्रियेण सह वर्त्तमानं साक्षं तस्मात् साक्षादिति सम्बन्धविशेषणमभिसन्धाय पदद्वयस्यार्थमाह—अक्षमित्यादिना । फलितमाह—विवेके चेत्यादिना । तथाच प्राप्तविवेकस्य इन्द्रियसम्बन्धाभावान्नास्ति साक्षित्वं नास्ति च सुतरामनिर्म्मोक्षप्रसङ्ग इति भावः ॥ १६१ ॥

বলিয়া মুক্তি হইতে পারে না। স্বরূপের নাশ স্বীকার করিলে তাহার যাবদ্দ্রব্যভাবিত্ব নিবন্ধন আত্মার অনিত্যত্ব প্রমাণ হয়। যদি মুক্ত হয়, তবে (মুক্তির সাধক) ধ্যানাদি ব্যর্থ হইয়া যায়। এই আশঙ্কায় বলিতেছেন—আত্মা বদ্ধ নহে, সুতরাং মুক্ত হইবেনও না, কিন্তু নিত্যই মুক্ত। ধ্যানাদি দ্বারা অজ্ঞানের নাশ হয় ॥ ১৬০ ॥

আত্মার সাক্ষিত্ব উক্ত হইয়াছে, বিবেক লাভ করিলেও যদি সাক্ষিত্ব থাকে, তবে মুক্তি হইতে পারে না, এই আশঙ্কায় বলিতেছেন—ইন্দ্রিয় সম্বন্ধ বশতঃই আত্মা সাক্ষী হন, বিবেক লাভ করিলে ইন্দ্রিয় সম্বন্ধ কোথায়? সুতরাং মুক্তি হইতেও কোন বাধা নাই ॥ ১৬১ ॥

औदासीन्यं चेति ॥ १६३ ॥

व्यक्तम् ॥ १६३ ॥

आत्मनः कर्त्तृत्वं श्रूयते, तत् कथम्? इत्यत आह—

उपरागात् कर्त्तृत्वं चित्सान्निध्याच्चित्सा-न्निध्यात् ॥ १६४ ॥

चित्सान्निध्येन प्रकृत्युपरागात् आत्मनः कर्त्तृत्वं कर्त्तृत्वाभिमानः। चित्सान्निध्यात् इति वीप्सा परिसमाप्तौ, श्रुतौ तथा दृष्टत्वात् इति ॥ १६४ ॥

इति कापिलसांख्यप्रवचनसूत्रवृत्तौ

विषयाध्यायः * प्रथमः ॥

आत्मस्वरूपनिरूपकं सूत्रद्वयमवतारयति—सर्व्वदेत्यादिना। नित्यमुक्तत्वं—दुःखात्यन्ताभावशून्यत्वं औदासीन्यं—अकर्त्तृत्वञ्च आत्मनः स्वरूपमिति सूत्रद्वयार्थः। "इति शब्दः पुरुषधर्म्मप्रतिपादनसमाप्त्या" विति भाष्यकारः ॥ १६२—१६३ ॥

सूत्रान्तरमवतारयति—आत्मन इत्यादिना। कथमिति, औदासीन्यस्यैव व्यवस्थापितत्वादिति भावः। सूत्रार्थमाह—चित्सान्निध्येनेत्यादिना। तथाच वास्तवकर्त्तृत्वं पुरुषे नास्तीत्येव सांख्यसिद्धान्तः कर्त्तृत्वश्रुतिस्त्वाभिमानिककर्त्तृत्वप्रतिपादिकेत्येव ध्येयम्। अत्र सूत्रे "पुरुषस्य यत्कर्त्तृत्वं तद्बुद्ध्या-

---

সর্ব্বদা আত্মার স্বরূপ কি? এই আশঙ্কায় বলিতেছেন—নিত্য, মুক্তত্ব ও ঔদাসীন্যই আত্মার স্বরূপ॥ ১৬২ ॥ ॥ ১৬৩ ॥

(ঔদাসীন্যই যদি আত্মার স্বরূপ হয় তবে) আত্মার যে কর্তৃত্ব শ্রুত হয় তাহার উপপত্তি হয় কিরূপে? এই আশঙ্কায় বলিতেছেন—চিৎসান্নিধ্যবশতঃ প্রকৃতির উপরাগে আত্মার কর্তৃত্বাভিমান হয়, (বস্তুতঃ আত্মার কর্তৃত্ব নাই) সেই আভিমানিক কর্তৃত্বই কর্তৃত্বশ্রুতির অর্থ। চিৎসান্নিধ্যাৎ চিৎসান্নিধ্যাৎ

---

* एतदध्यायविषयसंग्राहकश्लोकौ भाष्यकारोक्तौ यथा—

हेयहानी तयोर्हेतु इति व्यूहा यथाक्रमम्।

चत्वारः शास्त्रमुख्यार्था अध्यायेऽस्मिन्निरूपिताः

अथ विषयनिरूपणानन्तरं प्रधानकार्य्य-निरूपणार्थं द्वितीयाध्यायारम्भः ॥

विमुक्तविमोक्षार्थं स्वार्थं वा प्रधानस्य ॥ १ ॥

स्वभावविमुक्तः आत्मा। तस्याभिमानिकबन्धविमोक्षार्थं प्रधानस्य जगत्कर्त्तृत्वम्। अयं भावः दुःखसृष्टौ स्वभावादेव वैराग्यात् मोक्षे वै पुरुषः प्रवर्त्तते। सुखसृष्टौ च दुःखशबलत्वात् सुखस्यापि दुःख-

---

परागात् बुद्धेश्च या चिन्ता सा पुरुषसान्निध्या" दिति यथासंख्यान्वयो भाष्यसम्मतः। तथा—अध्यायसमाप्तिसूचकवीप्साया: ॥ १६४ ॥

इति श्रीकुञ्जविहारितर्कसिद्धान्तभट्टाचार्य्यविरचितायां कापिलसांख्यसूत्रानिरुद्धवृत्ति-टीकायां तत्त्वबोधिनीसमाख्यायां विषयाध्यायः प्रथमः ॥

द्वितीयाध्यायारम्भावतरणिकामाह—अथेत्यादिना। आनन्तर्य्यार्थकाथशब्दस्यैव विवरणं विषयनिरूपणानन्तरमिति, प्रथमाध्यायेनेत्यादिः। "विकारं प्रकृतिञ्चैव पुरुषञ्च सनातनम्। यो यथावद्विजानाति स वितृष्णो विमुच्यते ॥" इत्यादि विष्णुधर्म्मोत्तरादिवचनेभ्यो मोक्षोपयोगितया विषयनिरूपणं प्रधानकार्य्यनिरूपणञ्च न विरुद्धमिति मन्तव्यम्।

तत्रादौ जगत्सर्ज्जनप्रयोजनप्रदर्शनपरं सूत्रं व्याचष्टे—स्वभावेत्यादिना। स्वभावतस्त-

এইরূপ দুইবার পাঠ অধ্যায়পরিসমাপ্তির সূচক, শ্রুতিতেও অধ্যায়ের শেষ শব্দের দুইবার পাঠ দেখা যায় ॥ ১৬৪ ॥

কপিলকৃত সাংখ্যপ্রবচনসূত্রের বিষয়নিরূপক প্রথমাধ্যায়ের বৃত্তি সমাপ্ত হইল ॥

বিষয় নিরূপণের পর প্রধান কার্য্যের নিরূপণের নিমিত্ত দ্বিতীয় অধ্যায়ের আরম্ভ।

আত্মা স্বভাবতঃই বিমুক্ত, তাহার আভিমানিক বন্ধনিবৃত্তির জন্যই প্রকৃতির

पक्षनिक्षेपात् वैराग्यमेव उपजायते। तत् चतुर्विधं, यतमानसंज्ञा, व्यतिरेकसंज्ञा, एकेन्द्रियसंज्ञा, वशीकारसंज्ञा चेति। इयं दुःखमनागतम् एकविंशतिप्रकारम्, तथाहि—शरीरं षडिन्द्रियाणि, षड् विषयाः, षड् बुद्धयः, सुखं दुःखं च इति। तत्र शरीरं दुःखायतनत्वात् दुःखं, इन्द्रियाणि विषयाः बुद्धयश्च तत्साधनभावात् सुखं

दात्मा विमुक्तस्तदा कथं तद्विमोक्षार्थं प्रधानस्य जगत्कर्त्तृत्वमुपपद्यत इति शङ्कापनोदनाय विमोक्षार्थमिति पदं व्याचष्टे—आभिमानिकेत्यादिना, शेषं पूरयति—जगत्कर्त्तृत्वमिति। विमुक्तविमोक्षार्थमित्यस्य तात्पर्यं विषदयति—अयं भाव इत्यादिना। दुःखसृष्टौ—प्रधानेन दुःखसर्जने सति, स्वभावात्—स्वतः सिद्धात्, दुःखस्य स्वभावत एव द्वेषविषयत्वादिति भावः। प्रवर्त्तते—बुद्धौ प्रतिबिम्बितत्वादौपाधिकप्रवृत्तिमान् भवति, तथाच प्रवृत्तेः बुद्धिधर्मत्वेऽपि न विरोधः। एवं दुःखसृष्टेर्मोक्षार्थत्वमुपपाद्य सुखसृष्टेरपि मोक्षार्थत्वमुपपादयति—सुखेत्यादिना। दुःखशबलत्वात्—दुःखविमिश्रितत्वात्, वैराग्यमेव—सुखेऽपि विरक्तिरेवेत्यर्थः। तत्—वैराग्यं, चातुर्विध्यमेव दर्शयति—यतमानसंज्ञेत्यादिना,। तथाच—कषायैश्चित्तवर्त्तिभीरागादिभिरिन्द्रियाणि यथास्वं विषयेषु प्रवर्त्तन्ते, यथा च न प्रवर्त्तेरन् तत्परिपाचनाय प्रयत्नो यतमानसंज्ञानामवैराग्यम्। तदारम्भे च केचित् कषायाः पक्वाः केचित् पच्यन्ते, केचिच्च पक्ष्यन्ते, तत्र पच्यमानेभ्यः पक्वानां व्यतिरेकेणावधारणं व्यतिरेकसंज्ञा नाम वैराग्यं। इन्द्रियप्रवर्त्तनासमर्थत्वेन पक्वानां औत्सुक्यमात्रेण मनसि व्यवस्थापनमेकेन्द्रियसंज्ञानाम वैराग्यम्। निवृत्तसंज्ञा-

---

জগৎকর্ত্তৃত্ব। ইহার তাৎপর্য্য এই যে, দুঃখের সৃষ্টি হইলে দুঃখে স্বাভাবিক বৈরাগ্য বশতঃই পুরুষের মোক্ষে প্রবৃত্তি হয়। সুখের সৃষ্টি হইলেও দুঃখ বিমিশ্রিতত্ব নিবন্ধন সুখেরও দুঃখ পক্ষে নিক্ষেপ বশতঃ বৈরাগ্যই জন্মিয়া থাকে। সেই বৈরাগ্য যতমান সংজ্ঞা, ব্যতিরেক সংজ্ঞা, একেন্দ্রিয় সংজ্ঞা ও বশীকারসংজ্ঞা ভেদে চতুর্ব্বিধ। (যতমান সংজ্ঞাদির লক্ষণ টীকায় দ্রষ্টব্য) অতীত ও বর্ত্তমান দুঃখের ত্যাগ অসম্ভব, সুতরাং অনাগত দুঃখই হেয়. অর্থাৎ যে দুঃখ হইবার সম্ভাবনা আছে, তাহা যাহাতে হইতে না পায়, তাহাই কর্ত্তব্য। দুঃখ একবিংশতি প্রকার, যথা- শরীর ১ চক্ষুরাদি ভেদে (প্রত্যক্ষের জনক) ইন্দ্রিয় ৬, ষড় বিধ প্রত্যক্ষের বিষয় ৬, বুদ্ধি অর্থাৎ প্রত্যক্ষ ৬, সুখ ও ১, দুঃখ ১। ইহাদের মধ্যে শরীর দুঃখের আশ্রয়ত্ব নিবন্ধন দুঃখ, ইন্দ্রিয় বিষয় ও

दुःखानुषङ्गात्, दुःखं यातनापीड़ासन्तापात्मकं मुख्यत एवेति। तस्य निर्वर्त्तकम् असाधारणं कारणम् अविद्या, तृष्णे धर्म्माधर्म्मौ इति। अविद्याविपरीतज्ञानं तत्संस्कारश्च विद्वद्भिः उक्तः तृष्णादीनाम् असाधारणो हेतुः। दुःखहानं च दुःखोत्पत्तिनिवृत्तिः आत्यन्तिकी। तस्य उपायः तत्त्वज्ञानम् आत्मविषयं, ततः अविद्याया निवृत्तेः। तथा च उक्तं "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" (वृह उप २ अध्याय ४ब्रा ५ मन्त्रः)

तथाहिना औत्सुक्यमात्रेणापि निवृत्तिः उपस्थितेष्वपि दिव्यादिव्यविषयेषु उपेक्षाबुद्धिः वशीकारसंज्ञानामवैराग्यम्। अतीतदुःखस्योपभोगेनातिवाहितत्वेन हेयत्वासम्भवाद्वर्त्तमानदुःखस्य च स्वक्षणे भोगरूपत्वेन हेयत्वासम्भवादाह—अनागतमिति। दुःखस्यैकविंशतिप्रकारत्वं दर्शयति—शरीरमित्यादिना। शरीरादीनां दुःखत्वं प्रतिपादयति—तत्त्वेत्यादिना, दुःखायतनत्वात्—अवच्छेदकतासम्बन्धेन दुःखाश्रयत्वात, तत्साधनभावात्—दुःखसाधनत्वात, दुःखमित्यन्वयः। दुःखानुषङ्गात्—दुःखानुबन्धात, तत्रापि दुःखमित्यनुवर्त्तनीयं। एवं शरीरादीनां सुखान्तानामौपचारिकं दुःखत्वं प्रतिपाद्य यातनापीड़ासन्तापात्मकस्य सर्व्वानुभवसिद्धदुःखस्य मुख्यत्वमाह—दुःखमित्यादिना। तस्य—दुःखस्य, निर्व्वर्त्तकं—सम्पादकं। अविद्याया ज्ञानाभावात्मकत्वशङ्कानिरासाय अविद्यापदार्थं निर्व्वक्ति—विपरीतज्ञानमिति। मिथ्याज्ञानमित्यर्थः, तत्संस्कारः—अविद्याजनितसंस्कारः, चकारः अविद्यायाः समुच्चायकः, आदिपदेन धर्म्माधर्म्मयोरुपग्रहः। दुःखहानस्वरूपमाह—दुःखेत्यादिना, सुषुप्त्यादावपि कादाचित्की दुःखनिवृत्तिरस्त्येवेत्यत आह—आत्यन्तिकीति,

বুদ্ধি দুঃখসাধনত্ব নিবন্ধন দুঃখ, এবং সুখ দুঃখ বিমিশ্রিতত্ব নিবন্ধন দুঃখ, অর্থাৎ ইহারা মুখ্যতঃ দুঃখ না হইলেও দুঃখের আয়তনত্বাদি নিবন্ধন দুঃখরূপে যাতনা পীড়া ও সন্তাপাত্মক দুঃখ মুখ্যতঃই দুঃখরূপে গণ্য। সেই দুঃখের সম্পাদক অসাধারণ কারণ অবিদ্যা, তৃষ্ণা, ধর্ম্ম ও অধর্ম্ম। বিদ্বান্‌গণ বলিয়াছেন—মিথ্যাজ্ঞানাত্মক অবিদ্যা ও তজ্জনিত সংস্কার তৃষ্ণাদির অসাধারণ কারণ। আত্যন্তিক দুঃখোৎপত্তিনিবৃত্তিই দুঃখহান পদবাচ্য। সেই দুঃখহানের উপায় আত্মবিষয়ক তত্ত্বজ্ঞান, যেহেতু সেই তত্ত্বজ্ঞান হইতেই অবিদ্যার নিবৃত্তি হয়। উপনিষদেও উক্ত হইয়াছে—"আত্মাই সাক্ষাৎ করণীয়, সুতরাং শ্রবণ, অনুমান ও পরিচিন্তন অবশ্য কর্ত্তব্য।" পরন্তু "শ্রুতি

'শ্রোতব্যঃ শ্রুতিবাক্যেভ্যো মন্তব্যশ্চোপপত্তিভিঃ।
মত্বা চ সততং ধ্যেয় এতে দর্শনহেতবঃ' ॥

'তরতি শোকমাত্মবিৎ' ইতি (ছান্দো উপ ৭অধ্যায় ১ম খণ্ড ৩য় মন্ত্র) সঃ দ্বিবিধঃ পরশ্চ অপরশ্চ ইতি। তথা চ উক্তং 'দ্বে ব্রহ্মণী বেদিতব্যে, পরং চাপরমেব চ, ইতি। বিদ্যৈশ্বর্য্যবিশিষ্টঃ সংসারধর্ম্মৈঃ ঈষৎ অপি অসংস্পৃষ্টঃ পরং ভগবান্ মহেশ্বরঃ সর্ব্বজ্ঞঃ সকলজননাৎ বিধাতা। স কথং জ্ঞাতব্যঃ অনুমানাৎ বা যোগাদ্বা

আত্যন্তিকত্বঞ্চ প্রথমসূত্রব্যাখ্যানাবসর এব প্রপঞ্চিতম্। তস্য—দুঃখহানস্য, আত্মবিষয়ং জ্ঞানতৎকার্য্যভিন্নত্বেন পুরুষগোচরং, ততঃ—তত্ত্বজ্ঞানাৎ আত্মজ্ঞানস্য মোক্ষোপযোগিত্বে প্রমাণং দর্শয়িতুমাহ—তথাচেতি। উপপত্তিভিঃ—বহুভির্হেতুভিঃ মন্তব্যঃ—অনুমাতব্যঃ, এতে —শ্রবণাদয়ঃ, দর্শনহেতবঃ—সাক্ষাৎকারকারণানীত্যর্থঃ। আত্মনো বিভাগং দর্শয়তি—স ইত্যাদিনা। তত্র পরমাত্মলক্ষণমাহ—বিদ্যৈশ্বর্য্যেত্যাদিনা, তথাচ যোগসূত্রম্—"ক্লেশকর্ম্ম-বিপাকাশয়ৈরপরামৃষ্টঃ পুরুষবিশেষ ঈশ্বর" ইতি। ঈশ্বরানুমিতিপ্রকারং দর্শয়িতুমাহ—তথা·

বাক্য হইতে শ্রবণ বহু হেতু দ্বারা মনন ও মননের পর সর্ব্বদা চিন্তা করিতে হইবে, শ্রবণাদিই আত্মসাক্ষাৎকারের হেতু।" "আত্মজ্ঞানশালী ব্যক্তি শোক হইতে উত্তীর্ণ হয়।" সেই আত্মা পরাপরভেদে দ্বিবিধ, তাই উক্ত হইয়াছে—"পরমাত্মা ও জীবাত্মা উভয়ই জ্ঞাতব্য।" সেই পরম ভগবান্ মহেশ্বর বিদ্যৈশ্বর্য্যসম্পন্ন সামান্য রূপেও সংসার ধর্ম্ম দ্বারা অসংস্পৃষ্ট সর্ব্বজ্ঞ ও সকলের জনক বিধায় বিধাতা। প্রশ্ন সেই পরমাত্মা কিরূপে জ্ঞাতব্য? উত্তর অনুমান অথবা যোগ হইতে জ্ঞাতব্য। অনুমান যথা—বিবাদাস্পদীভূত উপলব্ধ বস্তু মাত্রেরই কোন কারণ আছে, যে হেতু উহারা প্রাগভাবের প্রতিযোগী হইয়া বর্ত্তমান, যে যে প্রাগভাবের প্রতিযোগী হইয়া বর্ত্তমান সেই সেই সকর্তৃক যেমন চিত্র। সেই কারণই পরমাত্মা। এইরূপ অনুমান হইতে সামান্যরূপে জ্ঞাত ভগবানের বিশেষরূপে জ্ঞান যোগদ্বারাই হইয়া থাকে। নিজের মানস প্রত্যক্ষ হইতেই জীবাত্মার সিদ্ধি হইয়া থাকে। সেই পরমাত্মা ও জীবাত্মার বিবেক জ্ঞানের নিমিত্তই প্রকৃতির প্রবৃত্তি। এই প্রকৃতির পরার্থত্ব বলা হইবে। প্রকৃতি যেই পুরুষের প্রতি বিবেক দ্বারা নিজকে

तथा हि, विवादाध्यासितम् उपलब्धं सकारणकं, अभूत्वा भावित्वात्, चित्रवत् इति अनुमानम्। ततः सामान्येन अवगतस्य योगेन विशेषतः ज्ञानम्। अपरस्य जीवस्य स्वानुभवात् एव सिद्धिः। तयोश्च परापरयोः विवेकज्ञानाय प्रकृतेः प्रवृत्तिः। तत्र परार्थता वक्ष्यते, स्वार्थता च, सा यं पुरुषं प्रति आत्मानं विवेकेन दर्शितवती, तं प्रति उदास्ते।' अचेतनायाः प्रकृतेः कथं प्रवृत्तिः? दृष्टम् अचेतनानामपि वृक्षाणां फलादिद्वारेण प्रवृत्तिः इति ॥ १ ॥

हीति। अभूत्वा भावित्वादिति, प्रागभावप्रतियोगित्वे सति वर्त्तमानत्वादित्यर्थः। ततः—अनुमानात्, सामान्येन—कारणत्वेन, विशेषतः—इतरवैलक्षण्येन। जीवात्मनि तु स्वीयमानसप्रत्यक्षमेव प्रमाणमिति दर्शयन्नाह—अपरस्येत्यादि। तयोः परापरयोः—जीवात्मपरमात्मनोः, विवेकज्ञानाय—मिथो विविक्तस्य रूपप्रतिपत्तये। तत्र—प्रकृतेः प्रवृत्तौ, परार्थता—पुरुषस्याभिमानिकबन्धनिवृत्तिरूपप्रयोजनता, वक्ष्यते षष्ठाध्याये प्रतिपादयिष्यते। स्वार्थं चेति सूत्रप्रतीकव्याख्यानायाह—स्वार्थता चेत्यादि, सा—प्रकृतिः, तथाच भुक्तभोगान् जीवान् प्रति औदासीन्यमेव प्रकृतिप्रवृत्तेः स्वार्थतेति भावः।

अत्रैतदवधेयम्—यदत्रात्मनो विभागकरणं परमात्मस्वरूपनिरूपणं परस्य ब्रह्मणो वेद्यत्वाभिधानं तद्विषयमनुमानादिप्रदर्शनं प्रधानप्रवृत्तेः परापरविवेकार्थत्वप्रदर्शनञ्च तन्निरीश्वरसांख्यमते कथमपि नोपपद्यत इति "अयं भाव इत्यादि वक्ष्यत इत्यन्तग्रन्थः" केनचित् सेश्वरदर्शनप्रणयशालिना प्रक्षिप्त इति प्रतिभाति। समूलत्वे तु वृत्तिकृतैव तन्मतानुसारेणायमंशो लिखित इत्यगत्या कथञ्चिदभ्युपेतव्यमिति ॥ १ ॥

দেখাইয়া থাকেন, সেই পুরুষের প্রতিই ঔদাসীন্য অবলম্বন করেন, সেই ঔদাসীন্যই প্রকৃতি প্রবৃত্তির স্বার্থতা। প্রশ্ন অচেতন প্রকৃতির প্রবৃত্তি হয় কিরূপে? উত্তর অচেতন বৃক্ষাদিরও ফলাদি দ্বারা প্রবৃত্তি দেখা যায়।

এই স্থলে জ্ঞাতব্য এই যে, উল্লিখিত আত্মার বিভাগ, পরমাত্মার স্বরূপ-নিরূপণ, পরমাত্মার বেদ্যত্বাভিধান, পরমাত্মা বিষয়ক অনুমানাদি প্রদর্শন, ও জীবাত্মা পরমাত্মা বিবেকরূপ পরার্থত্ব প্রদর্শন নিরীশ্বর সাংখ্যমতে কোন রূপেই উপপন্ন হইতে পারে না, সুতরাং "অয়ং ভাব" হইতে "পরার্থতা বক্ষ্যতে" পর্য্যন্ত বৃত্তিগ্রন্থ কোনও সেশ্বরদর্শনপ্রণয়ী ব্যক্তি কর্তৃক প্রক্ষিপ্ত।

अथ के मोक्षाधिकारिणः इत्यत्राह—

विरक्तस्य तत्सिद्धेः ॥ २ ॥

तथा च श्रुतिः "पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय अथ भिक्षाचर्य्यं चरन्ति" इति (बृह उप ३ अध्याय ५ब्रा १ मन्त्र) शान्तो दान्त उपरतः तितिक्षुः समाहितो भूत्वा आत्मनि एव आत्मानं पश्यति" ॥ २ ॥ (बृह उप ४ अः, ४ ब्रा, २३ मन्त्र)

प्रसङ्गान्मोक्षाधिकारिनिरूपकं सूत्रमवतारयति—अथेत्यादिना। सूत्रे तदिति पदं मोक्षपरम्, तथाच विरक्ता एव मोक्षाधिकारिण इति शेषः। अत्रार्थे श्रुतिं दर्शयितुमाह—तथाचेति।" पुत्रैषणायाः—आत्मनः पारलौकिकभोगविषयिण्याः कामनायाः, वित्तैषणायाः—ऐहिकभोगमात्रविषयिण्याः कामनायाः, लोकैषणायाः—यशोविषयिण्याः कामनायाः, व्युत्थाय विरज्य, भिक्षाचर्य्यं—सन्न्यासं चरन्ति—अनुतिष्ठन्तो"ति श्रुत्यर्थः। नन्वनया विरक्तस्य सन्न्यासित्व-प्रतिपादनेऽपि कथं मोक्षाधिकारित्वमित्याशङ्कायां सन्न्यासिनो मोक्षप्रतिपादिकां श्रुतिमुत्था-पयति—शान्त इति। शान्तः—शमवान्, दान्तः—दमवान्, उपरतः—सन्न्यासी, तितिक्षुः—शीतोष्णादिसहिष्णुः, समाहितः—समाधिमान्, पश्यति—मनसा साक्षात्करोतीत्यर्थः, आत्मनो रूपादिशून्यत्वेन चाक्षुषप्रत्यक्षविषयत्वायोगात्। तथाचात्मसाक्षात्कारमन्तरेण मोक्षस्य सन्न्यासित्वमन्तरेणात्मसाक्षात्कारस्य विरक्तिमन्तरेण च सन्न्यासित्वस्यासम्भवात् सिद्धं विरक्ता एव मोक्षाधिकारिण इति ध्येयम् ॥ २ ॥

এই অংশের সমূলত্ব স্বীকার করিলেও বৃত্তিকার যে সেশ্বরদর্শন মতাবলম্বনেই এই অংশ লিখিয়াছেন, ইহা অবশ্যই অগত্যা স্বীকার করিতে হইবে। সুতরাং দার্শনিকগণের উপরেই ইহার বিচারের ভার ন্যস্ত হইল ॥ ১ ॥

মোক্ষের অধিকারী কে? এবিষয়ে বলিতেছেন—"বিরক্ত ব্যক্তিরই মোক্ষ সিদ্ধি হয় বিধায় বিরক্তই মোক্ষের অধিকারী।" এবিষয়ে শ্রুতিও আছে—"নিজের পারলৌকিক ভোগবিষয়ক কামনা হইতে ঐহিক ভোগ-বিষয়ক কামনা হইতে ও যশোবিষয়ক কামনা হইতে বিরক্ত হইয়াই পরে সন্ন্যাসের অনুষ্ঠান করে।" "শমদমশালী সন্ন্যাসী শীতোষ্ণাদি সহিষ্ণু ও সমাহিত হইয়াই আত্মাতে আত্মদর্শন অর্থাৎ বিশুদ্ধ আত্মার মানস প্রত্যক্ষ করে" ॥ ২ ॥

यदि वैराग्यात् श्रवणानन्तरं मोक्षः तदा सर्व्वेषां गुरूपदेशानन्तरं मोक्षः स्यात्? न च एवं दृश्यते इत्यत आह—

न श्रवणमात्रात्तत्सिद्धिरनादिवासनाया बलवत्त्वात्॥ ३॥

न श्रवणानन्तरं मोक्षः, अनादिवासनाया बलवत्त्वात्, यस्य तु सा नदृढा तस्य क्षिप्रं मुक्तिः, अन्यत्र चिरात् इति॥ ३॥

युक्त्यन्तरमाह—

बहुभृत्यवद्वा प्रत्येकम्॥ ४॥

यथा एकस्य बहवो भृत्याः आराधनापराधाभ्यां केचित् मुच्यन्ते केचित् प्रसादभाजः केचित् बध्यन्ते, तथा प्रकृतिः एका पुरुषाश्च

सूत्रान्तरमवतारयति—यदीत्यादिना। एवं—श्रवणानन्तरमेव सर्व्वेषां मोक्षः। सूत्रतात्पर्य्यं विवृणोति—नेत्यादिना। न मोक्ष इति, सर्व्वेषामेवेत्यादिः। सा—वासना, न दृढा—जन्मान्तरकृतात्मतत्त्वानुसन्धानेन शैथिल्यात्, क्षिप्रं श्रवणमात्रमेव, अन्यत्र—वासनायाः शैथिल्याभावे चिरात्—मननश्रवणाभ्यासनिदिध्यासनादिसाध्यवासनाविनाशकालविलम्बात्। तथाच वासनाविनाशमन्तरेण कस्यापि न मुक्तिः, यस्य तु सा वासना न दृढा तस्य श्रवणमात्रेणैव तद्विनाशादचिरान्मुक्तिः, यस्य तु सा दृढा तस्य श्रवणमात्रेण वासनाया अविनाशात्तद्विनाशार्थं मननादीनामपेक्षणात् कालविलम्बेन मुक्तिरिति भावः॥ ३॥

युक्त्यन्तरमिति, न श्रवणमात्रेण सर्व्वेषामेव मुक्तिरित्यत्र हेत्वन्तरमित्यर्थः। दृष्टान्तोद्घाट-

---

যদি বৈরাগ্য বশতঃ শ্রবণের অনন্তরই মুক্তি হয়? তবে সকলেরই গুরূপ-দেশের পরে মুক্তি হউক, কিন্তু সকলেরত মুক্তি হইতে শুনা যায় না, এই আশঙ্কায় বলিতেছেন—শ্রবণের অনন্তরই সকলের মুক্তি হইবে না, কারণ অনাদি বাসনাই বলবৎ। কিন্তু যাহার সেই বাসনা জন্মান্তরকৃতাত্মতত্ত্বানুসন্ধান দ্বারা শিথিল, তাহার শীঘ্র অর্থাৎ শ্রবণের পরেই বাসনার বিনাশে মুক্তি হইবে, যাহার সেই বাসনা দৃঢ়, তাহার কালবিলম্বে অর্থাৎ নিরন্তরাভ্যাস ও নিদিধ্যাসনাদি দ্বারা বহুকালে সেই বাসনার বিনাশ হইলে পরে মুক্তি হইবে ॥ ৩ ॥

শ্রবণমাত্রেই যে সকলের মুক্তি হইবে না এবিষয়ে আরও যুক্তি বলিতে-

बहवः इति । येषां स्पष्टं विवेकज्ञानं तेषां शीघ्रं, येषाम् उपासनामात्रं तेषां क्रमेण, अन्येषां नास्ति एव ॥ ४ ॥

कूटस्थत्वादात्मनो बन्धो नास्त्येव इत्यत आह—

प्रकृतिवास्तवे च पुरुषस्याध्याससिद्धिः ॥ ५ ॥

प्रकृतिः यं प्रति आत्मानं दर्शितवती, तं प्रति प्रकृतेः अप्रवर्त्तनं मोक्षः । यं प्रति प्रवर्त्तते तं प्रति पुरुषच्छायापत्तिः एव अध्यासः, न तात्त्विकः । तथा च—

यद्यात्मा मलिनोऽस्वच्छो विकारी स्यात् स्वभावतः ।
न हि तस्य भवेन्मुक्तिर्जन्मान्तरशतैरपि ॥ ५ ॥

तेन सूत्रतात्पर्यं विवृणोति—यथेत्यादिना । शीघ्रमिति मुक्तिरिति शेषः, एवमुत्तरत्रापि ॥४

सूत्रान्तरमवतारयति—कूटस्थत्वादित्यादिना । "प्रकृतेः—प्रधानस्य, वास्तवे—तात्त्विके, बन्धे सतीति शेषः, अध्याससिद्धिः—बन्धाध्याससिद्धिः, तथाच प्रकृतेरेव तात्त्विको बन्धः पुरुषस्य तु औपचारिक इति सूत्रतात्पर्यम् ।" इदमेव दर्शयिष्यन् वृत्तिकारः प्रसङ्गात् मोक्षमपि निर्व्वक्ति प्रकृतिरित्यादिना । पुरुषच्छायापत्तिः—प्रतिबिम्बरूपेण प्रकृतौ स्थितस्य पुरुषस्य प्रकृतिधर्म्मबन्धसम्बन्धाभिमानः, अध्यासः—बन्धाध्यासः । फलितमाह—न तात्त্বিক इति, पुरुषस्य बन्ध

ছেন—যেরূপ এক ব্যক্তির বহুভৃত্য থাকিলে আরাধন ও অপরাধ দ্বারা কেহ মুক্তিলাভ করে, কেহ প্রসাদভাগী হয় ও কেহ আবদ্ধ হয়, সেইরূপ এক প্রকৃতির যে বহুপুরুষ তাহাদের মধ্যেও যাহাদের স্পষ্টতঃ বিবেকজ্ঞান হয়, তাহাদের শীঘ্র মুক্তি হয়, যাহাদের উপাসনামাত্র হইয়াছে, তাহাদের চিত্তশুদ্ধ্যাদি দ্বারা ক্রমে মুক্তি হয়, যাহাদের উপাসনাও হয় নাই, তাহাদের মুক্তি হয় না ॥ ৪ ॥

আত্মা অপরিণামী, সুতরাং তাহার বন্ধ নাই এ বিষয়ে বলিতেছেন—"প্রকৃতির বাস্তব বন্ধ সিদ্ধ হইলে পুরুষের বন্ধের অধ্যাস সিদ্ধ হইবে।" প্রকৃতি বিবেকানুসারে যেই পুরুষের প্রতি নিজকে দেখাইতে পারিয়াছেন, সেই পুরুষের প্রতি তার প্রকৃতির প্রবৃত্তি হয় না, সেই অপ্রবৃত্তির নামই মোক্ষ। যেই পুরুষের প্রতি প্রকৃতির প্রবৃত্তি হয়, প্রতিবিম্বরূপে প্রকৃতিতে স্থিত সেই পুরুষেরই প্রকৃতি ধর্মবন্ধের সম্বন্ধাভিমানরূপ বন্ধের অধ্যাস হয়,

अत्र प्रमाणं दर्शयति—

कार्य्यतस्तत्सिद्धिः ॥ ६ ॥

प्रकृतिकार्य्याणां महदादीनाम् अविच्छेददर्शनात् प्रकृतेः बन्ध-सिद्धिः ॥ ६ ॥

प्रकृतिः प्रवृत्तिस्वभावत्वात् सर्व्वपुरुषान् प्रवर्त्तयेत्, किं विवेका विवेकदर्शनेन इत्यत्राह—

चेतनोद्देशान्नियमः कण्टकमोक्षवत् ॥ ७ ॥

यथा कण्टकं दृष्ट्वा कश्चित् कश्चित् निषेधति 'अनेन वर्त्मना मा गाः' न सर्व्वान् प्रति, तथा अधिकारात् चेतनविशेषोद्देशात् प्रवर्त्तनं, न सर्व्वं प्रति इति नियमः ॥ ७ ॥

इति शेषः । उक्तार्थसमर्थकं प्राचीनश्लोकमुत्थापयितुमाह—तथाचेति । श्लोकार्थस्तु स्पष्ट एव ॥ ५ ॥

अत्रेति, प्रकृतेरेव वास्तवबद्धत्वे इत्यर्थः । अविच्छेददर्शनादित्यन्तं कार्य्यत इत्यस्य विवरणम् । प्रकृतेर्ब्बन्धसिद्धिरिति तत्सिद्धिरित्यस्य विवरणम् ॥ ६ ॥

सूत्रान्तरमवतारयति—प्रकृतिरित्यादिना । दृष्टान्तप्रकटनेन सूत्रतात्पर्य्यं स्पष्टयति—यथेत्यादिना । तथाच बन्धमोक्षशास्त्रप्रामाण्यादिभि"रविवेकिनं प्रति प्रकृतेः प्रवर्त्तकत्वं विवेकिनं प्रति च निवर्त्तकत्व" मित्येवंरूपः कश्चनस्वभावविशेषोऽवश्यमङ्गीकर्त्तव्य इति भावः ॥ ७ ॥

কিন্তু তাহা যথার্থ বন্ধ নহে। প্রাচীনগণও বলিয়াছেন—"আত্মা যদি স্বভাবতঃই মলীন অস্বচ্ছ ও বিকারী হয়, তবে শত জন্মেও তাহার মুক্তি হইতে পারে না।" (কারণ দ্রব্য সত্ত্বে কখনও স্বভাবের নাশ হয় না) ॥ ৫ ॥

প্রকৃতিরই যে যথার্থ বন্ধ এ বিষয়ে প্রমাণ দেখাইতেছেন—প্রকৃতির কার্য্য মহদাদির কখনও বিচ্ছেদ দেখা যায় না বিধায় প্রকৃতিরই যথার্থ বন্ধ বলিতে হইবে ॥ ৬ ॥

প্রবৃত্তিই যদি প্রকৃতির স্বভাব, তবে সমস্ত পুরুষকেই প্রবর্ত্তিত করা উচিত, বিবেকাবিবেকদর্শনের প্রয়োজন কি এই আশঙ্কায় বলিতেছেন,—যেমন

न आत्मनो बन्ध इत्युक्तम्, तदाह—

अन्ययोगेऽपि तत्सिद्धिर्नाञ्जस्येनायोदाहवत् ॥ ८ ॥

प्रवर्त्तकत्वम् एव प्रकृतेः बन्धाय। प्रकृतियोगे अपि तच्छायापत्त्या पुरुषस्य बन्धाभिमानसिद्धिः। नाञ्जस्येन न तत्त्वतः। 'अयोदाहवत्' इति—यथा तप्तलोहयोगात् लोहः दहति इति मन्यते, न च लोहस्य दाहकत्वं, किन्तु संयोगात् अग्नेरेव इति ॥ ८ ॥

किमर्थं सृष्टिः? इत्यत्राह—

रागविरागयोर्योगः सृष्टिः ॥ ९ ॥

रागात् भुक्तिः, वैराग्यात् मुक्तिः। परमार्थतस्तु रागादपि भोगे विषयदोषदर्शनात् वैराग्यमेवेति ॥ ९ ॥

आत्मनो बन्धस्यातात्त्विकत्वसमर्थकं सूत्रमवतारयति—नेत्यादिना। प्रसङ्गाद्बन्धकारणं निर्व्वक्ति—प्रवर्त्तकत्वमेवेति। यथाक्रमं सूत्रघटकपदानि व्याचष्टे—प्रकृतियोगेऽपीत्यादिना। तच्छायापत्त्या—प्रकृतिप्रतिबिम्बितत्वेन। दृष्टान्तं विशदीकरोति—यथेत्यादिना ॥ ८ ॥

भोगमोक्षयोर्निमित्तकारणनिरूपकं सूत्रमवतारयितुमाह—किमर्थमिति, किं कारणकमित्यर्थः।

কোন ব্যক্তি কণ্টক দেখিয়া ব্যক্তিবিশেষকেই "এই পথে যাইও না" বলিয়া নিবর্ত্তিত করিয়া থাকে, সকলকে নহে, সেইরূপ অধিকারবশে চেতনবিশেষের উদ্দেশেই প্রকৃতির প্রবর্ত্তন হয়, সকলের উদ্দেশে নহে, ইহাই স্বাভাবিক নিয়ম ॥ ৭ ॥

আত্মার যে যথার্থ বন্ধ নাই, ইহা বলা হইয়াছে, তাহাই দৃষ্টান্তদ্বারা বলিতেছেন—বন্ধের নিমিত্তই প্রকৃতির প্রবর্ত্তকত্ব। প্রকৃতিযোগেও প্রতিবিম্বিতত্ব নিবন্ধন পুরুষের বন্ধাভিমান হয়, কিন্তু সেই বন্ধ যথার্থ পুরুষের নহে। যেমন তপ্তলোহ-যোগে দাহস্থলে লোহায় দগ্ধ করিতেছে বলিয়া লোকে মনে করিয়া থাকে, বস্তুতঃ কিন্তু লোহের দাহকত্ব নাই, সংযোগবশতঃ অগ্নিরই যথার্থ দাহকত্ব ॥ ৮ ॥

ভোগ ও মুক্তির কারণ কি? এই আকাঙ্ক্ষায় বলিতেছেন—রাগ হইতেই

प्रथमाध्याये 'सत्त्वरजस्तमः' इत्यादिसूत्रे पञ्चविंशतितत्त्वमुक्तम्। इदानीं सप्रपञ्चं क्रममाह—

महदादिक्रमेण पञ्चभूतानाम् ॥ १० ॥

सृष्टिः इति। क्रमं वक्ष्यति ॥ १० ॥

किं स्वार्थं परार्थं वा? इत्यत्राह—

आत्मार्थत्वात् सृष्टेर्नैषामात्मार्थ आरम्भः ॥ ११ ॥

पुरुषार्थत्वात् सृष्टेः न एषां—महदादीनाम् आत्मार्थे—स्वार्थे आरम्भः। नित्यत्वात् प्रकृतेः स्वार्थारम्भो युक्तः, महदादीनान्तु कारणलयेन नाशात् सृष्टिमात्रम् इति ॥ ११ ॥

सृष्टिः—भुक्तिः मुक्तिश्चेति शेषः। सूत्रमिदमर्थानुरोधात् पाठक्रमव्यत्ययेन व्याख्येयम्, यथा रागे सति सृष्टिः, विरागे च सति योगः—स्वरूपे अवस्थानं मुक्तिरिति यावत्। तथा-चैतदभिसन्धानेनैव वृत्तिकारः फलितमाह—रागादिति भुक्तिः वैराग्यान्मुक्तिरिति। रागोऽपि विषयदोषदर्शनद्वारा वैराग्यं प्रति हेतुरिति दर्शयन्नाह—परमार्थतस्त्विति ॥ ९ ॥

सूत्रान्तरमवतारयति—प्रथमाध्याय इत्यादिना। शेषं पूरयति सृष्टिरिति ॥ १० ॥

प्रकृतिस्रष्टृत्वात् महदादिस्रष्टृत्वस्य विशेषप्रतिपादकं सूत्रमवतारयितुं पृच्छते—किं स्वार्थं परार्थं वेति महदादिकर्तृकसृष्टिरित्यर्थः। पुरुषार्थत्वादिति आत्मार्थत्वादित्यस्य विवरणम् ॥ ११ ॥

ভুক্তি ও বৈরাগ্য হইতে মুক্তি হয়, বস্তুতঃ রাগ হইতেও ভোগে বিষয়ের দোষ-দর্শনে বৈরাগ্যই হইয়া থাকে ॥ ৯ ॥

প্রথমাধ্যায়ে "সত্ত্বরজস্তমঃ" ইত্যাদি সূত্রে পঞ্চবিংশতিতত্ত্ব বলা হইয়াছে, সংপ্রতি তাহার বিস্তারিত ক্রম বলিতেছেন—মহদাদিক্রমে পঞ্চভূতের সৃষ্টি হয়। ক্রমে পরপর সূত্রে বলা হইবে ॥ ১০ ॥

মহদাদি কর্তৃক যে সৃষ্টি হয়, তাহা স্বার্থ কি পরার্থ? এই আকাঙ্ক্ষায় বলিতেছেন, মহদাদি কর্তৃক যে সৃষ্টি, তাহার পুরুষার্থত্বনিবন্ধন ইহাদের আরম্ভ স্বার্থ নহে। প্রকৃতি নিত্য, সুতরাং তাহার স্বার্থ আরম্ভযুক্ত। মহদাদির কারণলয়াত্মক নাশ অবশ্যম্ভাবী, সুতরাং তাহাদের সৃষ্টি করাই ফল, অন্য আর কোন স্বার্থ নাই ॥ ১১ ॥

दिक्कालौ सिद्धौ, कथं गणनायां न श्रुतौ इत्यत्राह—

दिक्कालावाकाशादिभ्यः ॥ १२ ॥

तत्तदुपाधिभेदात् आकाशम् एव दिक्कालशब्दवाच्यम्। तस्मात् आकाशे अन्तर्भूतौ। आदिशब्दः सम्पातयातः। सप्तम्यर्थे पञ्चमी ॥ १२ ॥

महतो बुद्धेर्लक्षणमाह—

अध्यवसायो बुद्धिः ॥ १३ ॥

"एवम् एव" इति निश्चयः अध्यवसायः ॥ १३ ॥

धर्म्मादीनां क्व अन्तर्भावः ? इत्यत्राह—

तत्कार्य्यं धर्म्मादि ॥ १४ ॥

सूत्रान्तरावतरणिकामाह—दिक्कालावित्यादिना, ननु सूत्रे आदिशब्दस्य सत्त्वात् कथमाकाश एवान्तर्भावो दर्शित इत्याशङ्कामपनेतुं तस्य प्रामादिकत्वमाह – आदिशब्द इत्यादिना। ननु सूत्रे पञ्चमीश्रुतेः आकाशे अन्तर्भूताविति व्याख्यानमसङ्गतमित्यत आह—सप्तम्यर्थे पञ्चमीति ॥१२॥

क्रमप्राप्तस्य महतो निरूपकं सूत्रमवतारयति—महत इत्यादिना। सूत्रीयाध्यवसायपदार्थमाह—एवमेव इति निश्चय इति। बुद्धिमहतोरेकपर्य्यायताज्ञापनाय सूत्रे बुद्धिशब्दोपादानम् ॥ १३ ॥

প্রসিদ্ধ দিক্ ও কালের গণনায় শ্রুতি নাই কেন? এই আশঙ্কায় বলিতেছেন,—তত্তদুপাধিভেদে আকাশই দিক্ ও কালশব্দবাচ্য, সুতরাং দিক্ ও কাল আকাশেই অন্তর্ভূত। সূত্রের আদি শব্দটি অভ্যাসবশতঃ প্রযুক্ত হইয়াছে, বস্তুতঃ এস্থলে ইহার কোনও প্রয়োজন নাই। 'আকাশাদিভ্যঃ এই পঞ্চমী বিভক্তি এস্থলে সপ্তমী বিভক্তির অর্থে প্রযুক্ত হইয়াছে।, (অন্যথা "আকাশে অন্তর্ভূত" এইরূপ অর্থ হইতে পারে না ॥ ১২ ॥

মহত্তত্ত্বের লক্ষণ বলিতেছেন—"এইপ্রকারই" এই নিশ্চয়রূপ অধ্যবসায়ই বুদ্ধি (মহত্তত্ত্ব) ॥ ১৩ ॥

धर्मज्ञानवैराग्यैश्वर्य्याणि। तत्कार्य्यत्वेन आत्मधर्मत्वं निरस्तम्। कार्य्यकारणयोः अभेदात् अन्तर्भावो दर्शितः॥ १४॥

तस्या विशेषम् आह—

महदुपरागाद् विपरीतम्॥ १५॥

अधर्माज्ञानावैराग्यानैश्वर्य्याणि। दृष्टो हि सहकारिभेदात् कार्य्यभेदः। यथा वेत्रबीजस्य वेत्राङ्कुरजनकत्वं, वह्निसंयोगसहकारिणः कदलीकाण्डजनकत्वं, तथा सत्त्वसहकारिणः महतः धर्मादिजनकत्वं, तमःसहकारिणः अधर्मादिजनकत्वम् इति॥ १५॥

सूत्रान्तरमवतारयति—धर्म्मादीनामित्यादिना। आदिशब्दसंग्राह्याणि दर्शयन् धर्म्मादिति पदं व्याचष्टे—धर्म्मेत्यादिना। तत्कार्य्यत्वेन—बुद्धिकार्य्यत्वेन, निरस्तमिति, धर्म्मधर्म्मिणो-रभेदादिति भावः। ननु बुद्धिकार्य्यत्वेऽपि कथं नाधिक्यमिति शङ्कां निराकर्त्तुमाह—कार्य्येत्यादि। अन्तर्भाव इति बुद्धावित्यादि॥ १४॥

तस्या इति, बुद्धेरित्यर्थः, विशेषं—सहकारि विशेषवशादपराण्यपि कार्य्याणि। सूत्रे महदुपरागादिति पदं महतस्तमसोऽभिभवादित्यर्थकं। पूर्व्वसूत्रोक्तधर्म्मादिचतुष्टयवैपरीत्ये-नाधर्म्मादिचतुष्टयबोधनायोपात्तं विपरीतमिति पदं व्याचष्टे—अधर्म्मेत्यादिना। एवं स्थिते सूत्रतात्पर्य्यं विशदयति—दृष्टो हीत्यादिना। भाष्यकारस्तु सूत्रमिदं "महत्—महत्तत्त्वं रजस्तमोभ्यां उपरागात विपरीतं—अधर्म्मादिधर्म्मकमपि भवतीति. व्याख्यातवान्॥ १५॥

ধর্ম্মাদির অন্তর্ভাব কিসে হইবে? এ আকাঙ্ক্ষায় বলিতেছেন—ধর্ম্মাদি অর্থাৎ ধর্ম্মজ্ঞান, বৈরাগ্য ও ঐশ্বর্য্য মহত্তত্ত্বের কার্য্য। মহত্তত্ত্বের কার্য্যত্বনিবন্ধন ধর্ম্মাদির আত্মধর্ম্মত্ব নিরস্ত হইল, ফলে কার্য্যকারণের অভেদ বশতঃ মহত্তত্ত্বেই অন্তর্ভাব প্রদর্শিত হইল॥ ১৪॥

সহকারিবিশেষের সমবধানে বুদ্ধির অপর কার্য্য বলিতেছেন—মহত্তত্ত্ব তমোগুণে অভিভূত হইলে তাহা হইতে ধর্ম্মাদির বিপরীত অর্থাৎ অধর্ম্ম, অজ্ঞান, অবৈরাগ্য ও অনৈশ্বর্য্য হইয়া থাকে। যেমন বেত্রবীজের বেত্রাঙ্কুর জনকত্ব থাকিলেও বহ্নিসংযোগরূপ সহকারী সমবধানে বেত্রবীজ কদলীবৃক্ষ জন্মায়, সেইরূপ এক মহত্তত্ত্বই সত্ত্বগুণরূপসহকারি সমবধানে ধর্ম্মাদি ও তমোগুণরূপ সহকারীর সমবধানে অধর্ম্মাদি জন্মাইয়া থাকে॥ ১৫॥

क्रमप्राप्तम् अहङ्कारादिलक्षणमाह—

अभिमानोऽहङ्कारः ॥ १६ ॥

अहम् इति अभिमानः ॥ १६ ॥

तस्य कार्य्यमाह—

एकादशपञ्चतन्मात्रं तत्कार्य्यम् ॥ १७ ॥

एकादश इन्द्रियाणि पञ्च तन्मात्राणि षोड़शकं तत्कार्य्यम् ॥ १७ ॥

कथमेकस्मात् कारणात् जड़प्रकाशौ भवतः ? इत्यत्राह—

सात्त्विकमेकादशकं प्रवर्त्तते वैकृतादहङ्कारात् ॥ १८ ॥

महद्विकारात् अहङ्कारात् सात्त्विकं सत्त्वसहकृतं एकादशकं एकादशेन्द्रियं प्रवर्त्तते। तमःसहकृतं तन्मात्रम् ॥ १८ ॥

एवं बुद्धिधर्म्मानभिधाय अहङ्कारलक्षणनिरूपकं सूत्रमवतारयति—क्रमेत्यादिना। अहङ्कारलक्षणस्याभिमानस्याकारं दर्शयति—अहमिति ॥ १६ ॥

तस्येति अहङ्कारस्येत्यर्थः। सूत्रं व्याचष्टे—एकादशेत्यादिना। तत्कार्य्यं—अहङ्कारकार्य्यं। इन्द्रियादीनामहङ्कारकार्य्यत्वञ्च—मया अनेनेन्द्रियेनेदं रूपादिकं भोक्तव्यमित्याद्यभिमानादेवादिसर्गेष्विन्द्रियादीनामुत्पत्तेरिति मन्तव्यम् ॥ १७ ॥

सूत्रान्तरमवतारयितुं शङ्कते—कथमित्यादिना। महद्विकारादिति वैकृतादित्यस्य विवरणम्। तन्मात्रोत्पत्तौ सहकारिताकाङ्क्षायां पूरयति—तमःसहकृतं तन्मात्रमिति। अत्रच—"सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात् भूतादेस्तन्मात्रः स तामसस्तैजसादुभयमिति कारिकया मनोमात्रस्यैव सात्त्विकत्वं सात्त्विकाहङ्कारोपादानत्वञ्चाभिधायान्येषामिन्द्रियाणां तैजसाहङ्कारोपादानकत्वमभिहितम्। भाष्यकारोऽपि तदनुसारेण "एकादशानां पूरणमेकादशकं मनः षोड़शात्मकगणमध्ये सात्त्विकं, अतस्तत्सात्त्विकादहङ्काराज्जायत" इति सूत्रमिदं

ক্রমপ্রাপ্ত অহঙ্কারাদির লক্ষণ বলিতেছেন—"অহং" ইত্যাকার অভিমানের নাম অহঙ্কার ॥ ১৬ ॥

সেই অহঙ্কারের কার্য্য বলিতেছেন—একাদশ ইন্দ্রিয় ও পঞ্চতন্মাত্র এই ষোড়শগণ অহঙ্কারের কার্য্য ॥ ১৭ ॥

এক অহঙ্কাররূপ কারণ হইতে কি প্রকার জড় পঞ্চ তন্মাত্র ও প্রকাশ

इन्द्रियत्रैविध्यम् आह—

कर्मेन्द्रियबुद्धीन्द्रियैरान्तरमेकादशकम् ॥ १९ ॥

कर्मेन्द्रियैः वागादिभिः पञ्चभिः, बुद्धीन्द्रियैः घ्राणादिभिः पञ्चभिः, सह आन्तरं मन इति एकादशकम् इन्द्रियम् ॥ १९ ॥

भौतिकानि इन्द्रियाणि इति, तत्प्रतिषेधार्थमाह—

आहङ्कारिकत्वश्रुतेर्न भौतिकानि ॥ २० ॥

तत्र च श्रुतिबाधात् इत्यर्थः ॥ २० ॥

व्याख्याय "राजसाहङ्काराद्दशेन्द्रियाणीत्यादि पूरितवानिति विरोधो दृश्यते। एवमेन्द्रियाणां देवतालयश्रुत्या देवताद्यभेदेन व्यष्टिकरणापेक्षया समष्टिकरणानां देवतात्वेन च। देवतात्वावच्छिन्नतदिन्द्रियाभिप्रायकतया इतिकृद्वचसः इन्द्रियत्वावच्छिन्नाभिप्रायकतया च भाष्यकारादिवचसः साधुत्वं कथञ्चिदुपपादनीयमिति विभावनीयम् ॥ १८ ॥

ज्ञानकर्मान्तरभेदेनेन्द्रियत्रैविध्यप्रतिपादकं सूत्रमवतारयितुमाह—इन्द्रियेति। वागादिभिरित्यादिना पाणिपादपायूपस्थानां परिग्रहः घ्राणादिभिरित्यादिना च चक्षुस्त्वक्श्रोत्ररसनानां परिग्रहः। "इन्द्रस्य—सङ्घातेश्वरस्य करणं इन्द्रियं, तथाचाहङ्कारकार्य्यत्वे सति करणत्वमिन्द्रियत्व"मिति भाष्यकारः ॥ १९ ॥

इन्द्रियाणां भौतिकत्वमित्यारम्भवादिनः, तेषां मतस्य निरासकं सूत्रमवतारयति—भौतिकानीत्यादिना। श्रुतिबाधादिति, यद्यपीन्द्रियाणामाहङ्कारिकत्वप्रतिपादिका साक्षात् श्रुतिर्न दृश्यते, तथापि आचार्य्यवाक्यात् मन्वादिवाक्यप्रामाण्याच्चानुमीयमानायास्तदर्थकश्रुत्या बाधादेव नेन्द्रियाणि

ইন্দ্রিয়গণ হইয়া থাকে, এই আশঙ্কায় বলিতেছেন—মহদ্বিকার অহঙ্কার হইতে সত্ত্বসহকারে একাদশ ইন্দ্রিয় ও তমঃসহকারে পঞ্চতন্মাত্র প্রবৃত্ত হয় ॥ ১৮ ॥

ইন্দ্রিয়ের ত্রৈবিধ্য বলিতেছেন—বাক্, পাণি—পাদ, পায়ু ও উপস্থ ভেদে কর্ম্মেন্দ্রিয় পাঁচ, নাসিকা, চক্ষু, ত্বক্, শ্রোত্র ও রসনা ভেদে জ্ঞানেন্দ্রিয় পাঁচ এবং আন্তরিন্দ্রিয় মন, এই ত্রিবিধ ইন্দ্রিয়ের সমষ্টিতে একাদশ ॥ ১৯ ॥

আরম্ভবাদিগণ, বলেন ইন্দ্রিয় ভৌতিক তাহার প্রতিষেধের জন্য সূত্র

যুক্ত্যন্তরমাহ—

देवतालयश्रुतेर्नारम्भकस्य ॥ २१ ॥

कारणे कार्य्यलय: इति स्थितम्। "आदित्यं वै चक्षु: गच्छति" इति देवे लय: श्रूयते। तस्मात् न आरम्भकस्य न आरम्भकाभिमतस्य भूतस्य कारणत्वम् इति ॥ २१ ॥

नित्यानि इन्द्रियाणि इति केचित्, तत्परिहारार्थमाह—

तदुत्पत्ति: श्रूयते, विनाशदर्शनाच्च ॥ २२ ॥

अहङ्कारात् तदुत्पत्ति: श्रूयते। उत्पन्नस्य विनाश: अपि अवश्य-म्भावी इति ॥ २२ ॥

भौतिकानीति तात्पर्य्यम्। तथाच भाष्यम्—"आहङ्कारिकत्वे च प्रमाणभूता श्रुति: काललुप्ता। मन्वाद्यखिलस्मृतिभ्यस्त्वनुमीयत" इति ॥ २० ॥

युक्त्यन्तरमिति, इन्द्रियाणां भौतिकत्वाभावे हेत्वन्तरमित्यर्थ:। सूत्रं व्याचष्टे—कारण इत्यादिना। शेषं पूरयति—कारणत्वमिति, उपादानकारणत्वमित्यर्थ: ॥ २१ ॥

इन्द्रियनित्यत्ववादिनां मतस्य निरासकं सूत्रमवतारयति—नित्येत्यादिना। सूत्रे विनाश-दर्शनाच्चेति, नेन्द्रियाणि नित्यानीति शेष: ॥ २२ ॥

বলিতেছেন, শ্রুতিতে আছে ইন্দ্রিয় অহঙ্কার হইতে উৎপন্ন, সুতরাং ইন্দ্রিয় ভৌতিক নহে, কারণ তাহা হইলে শ্রুত্যর্থের বাধ হয় ॥ ২০ ॥

ইন্দ্রিয় যে ভৌতিক নহে, তাহাতে আরও যুক্তি বলিতেছেন—কারণে যে কার্য্যের লয় হয়, ইহা প্রমাণসিদ্ধ, শ্রুতিতে আছে "চক্ষু আদিত্যে বিলীন হয়" সুতরাং আরম্ভরূপে অভিমতভূতে ইন্দ্রিয়ের উপাদানকারণত্ব থাকিতে পারে না ॥ ২১ ॥

কেহ কেহ বলেন, ইন্দ্রিয় নিত্য, তাহার প্রতিষেধার্থ বলিতেছেন—অহঙ্কার হইতে ইন্দ্রিয়ের উৎপত্তি শ্রুত হয়, উৎপন্নের বিনাশও অবশ্যম্ভাবী, সুতরাং ইন্দ্রিয় নিত্য নহে ॥ ২২ ॥

चक्षुरादीनां शक्तिभेददर्शनात् ऐन्द्रियकाणि इन्द्रियाणि इति, तन्निषेधति—

अतीन्द्रियमिन्द्रियं, भ्रान्तानामधिष्ठाने ॥ २३ ॥

भ्रान्तानाम् अधिष्ठाने चक्षुर्गोलकादौ इन्द्रियत्वज्ञानम्। अन्यथा छिन्नकर्णस्य श्रवणानुपपत्तिः, पाटलचक्षुषो रूपग्रहणप्रसङ्गः ॥ २३ ॥

एकम् इन्द्रियं, उपाधिभेदात् नानात्वम् इत्यत्राह—

शक्तिभेदेऽपि भेदसिद्धौ नैकत्वम् ॥ २४ ॥

भवतु उपाधिभेदः, शक्तिभेदस्तु अवश्यं वक्तव्यः, स च सत्यः इति नानात्वमपि सत्यम् ॥ २४ ॥

चक्षुरादीनां गोलकाद्यात्मकत्ववादिनां मतस्य निरासकं सूत्रमवतारयति—चक्षुरित्यादिना। शक्तिभेददर्शनात्—गोलकगतकार्य्यकारित्वतारतम्यदर्शनात् ऐन्द्रियकाणि—इन्द्रियग्राह्याणि, गोलकाद्यात्मकानीति यावत्। भ्रान्तानां—अनभिज्ञचार्व्वाकादीनां। अन्यथा—गोलकाद्यात्मकत्वे, श्रवणानुपपत्तिरिति,। तदानीं दृष्टस्य कार्य्यस्य विनाशादिति भावः। पाटलचक्षुषः—आरक्तनेत्रस्य, रोगादिनापहतेन्द्रियस्येति यावत्, रूपग्रहणप्रसङ्ग इति, तदानीमपि गोलकस्य सत्त्वादिति भावः ॥ २३ ॥

एकेन्द्रियवादनिरासकं सूत्रमवतारयति—एकमित्यादिना। सूत्रतात्पर्य्यं विवृणोति—भवत्वित्यादिना। अवश्यं वक्तव्य इति अन्यथा कार्य्यभेदानुपपत्तेरिति भावः। नानात्वमिति

"চক্ষুরাদিতে গোলকগত কার্য্যকারিত্বের তারতম্য দেখা যায় বিধায় ইন্দ্রিয়গ্রাহ্য গোলকাদিই ইন্দ্রিয়" ইহাও কেহ কেহ বলিয়া থাকেন, তাহার নিষেধ করিতেছেন—অধিষ্ঠান গোলকাদিতে অনভিজ্ঞদিগেরই ইন্দ্রিয়জ্ঞান হইয়া থাকে, বস্তুতঃ ইন্দ্রিয়গণ ইন্দ্রিয়গ্রাহ্য নহে। অধিষ্ঠানের ইন্দ্রিয়ত্ব স্বীকার করিলে ছিন্নকর্ণ ব্যক্তির শ্রবণের অনুপপত্তি ও আরক্ত চক্ষু ব্যক্তির রূপাদিদর্শনের আপত্তি হইতে পারে ॥ ২৩ ॥

কেহ কেহ বলেন, ইন্দ্রিয় এক, গোলকাদি উপাধিভেদে নানা বলিয়া ব্যবহৃত হইয়া থাকে, তদুত্তরে বলিতেছেন—উপাধিভেদ থাকিলেও শক্তির

একত্বেনৈব উপপত্তৌ বহুত্বকল্পনা গুর্ব্বী ইত্যত্রাহ—

ন কল্পনাবিরোধঃ প্রমাণদৃষ্টস্য ॥ ২৫ ॥

স্পষ্টম্ ॥ ২৫ ॥

মনসো লক্ষণমাহ—

উভয়াত্মকং চ মনঃ ॥ ২৬ ॥

বুদ্ধীন্দ্রিয়াত্মকং কর্ম্মেন্দ্রিয়াত্মকং মনঃ, অধিষ্ঠানাৎ উভয়প্রবৃত্তেঃ ॥ ২৬ ॥

নৈকত্বমিত্যস্য বিবরণম্, সত্যমিতি, শক্তিভেদে শক্তিশক্তিমতোরভেদেন শক্তিমতামিন্দ্রিয়াণাং মিথোভেদস্যাপ্যাবশ্যকত্বাদিত্যর্থঃ ॥ ২৪ ॥

সূত্রান্তরমবতারয়তি—একত্বেনেত্যাদিনা। স্পষ্টমিতি, "প্রমাণেন—প্রত্যক্ষাদিপ্রমাণেন দৃষ্টস্য—জ্ঞাতস্য সাধিতস্যেতি যাবৎ, কল্পনয়া—লাঘবাদিপ্রদর্শনেন, বিরোধঃ—বৈপরীত্যং ন ভবতীতি সূত্রার্থঃ সুব্যক্ত ইত্যর্থঃ ॥ ২৫ ॥

মনসঃ স্বরূপপ্রতিপাদকং সূত্রমবতারয়তি—মনস ইত্যাদিনা। উভয়াত্মকত্বমেব বিবৃণোতি বুদ্ধীত্যাদিনা। অত্র হেতুং পূরয়তি—অধিষ্ঠানাদিতি। উভয়প্রবৃত্তেঃ কর্ম্মেন্দ্রিয়বুদ্ধীন্দ্রিয়প্রবৃত্তেঃ অধিষ্ঠানাৎ—সম্পাদকত্বাদিত্যর্থঃ, তৎসম্পাদকত্বঞ্চ মনসোঽনবধানে অন্যেষামিন্দ্রিয়াণাং স্বস্বব্যাপারাসমর্থত্বাদিতি ধ্যেয়ম্ ॥ ২৬ ॥

ভেদ অবশ্যই স্বীকার করিতে হইবে, (নচেৎ কার্য্যের ভেদ অসম্ভব) সেই শক্তি ভেদ সত্য হইলে ইন্দ্রিয়ের নানাত্বও সত্য। (কারণ শক্তি ও শক্তিমৎ পদার্থ অভিন্ন বিধায় শক্তির ভেদ স্বীকার করিলে শক্তিমতের ভেদও অনিবার্য্য) ॥ ২৪ ॥

একত্ব স্বীকারেই উপপত্তিসম্ভবে ইন্দ্রিয়ের বহুত্ব কল্পনায় গৌরব হয়, এই আশঙ্কায় বলিতেছেন—প্রমাণসিদ্ধ পদার্থের কল্পনাবশে বৈপরীত্য হইতে পারে না ॥ ২৫ ॥

মনের লক্ষণ বলিতেছেন—মন জ্ঞানেন্দ্রিয় ও কর্ম্মেন্দ্রিয় এই উভয়াত্মক, কারণ মনই উভয় ইন্দ্রিয়ের প্রবৃত্তিসম্পাদক ॥ ২৬ ॥

कथमेकस्मात् अहङ्कारात् अनेकानि इन्द्रियाणि ? इत्यत आह—

गुणपरिणामभेदान्नानात्वमवस्थावत् ॥ २७ ॥

धर्माधर्मसहकारिसत्त्वादिगुणपरिणामभेदात् अनेकानि । 'अवस्थावत्' इति, यथा एकस्य देहस्य बाल्ययौवनवार्द्धकानि इति ॥ २७ ॥

उभयेन्द्रियविषयमाह—

रूपादिरसमलान्त उभयोः ॥ २८ ॥

उभयोः बुद्धीन्द्रियकर्मेन्द्रिययोः । बुद्धीन्द्रियस्य विषयाः रूपरसगन्धस्पर्शशब्दाः । कर्मेन्द्रियस्य विषयाः वचनविहरणादानानन्दरसमलाः । रसमलः नाम मलः, तदन्तः ॥ २८ ॥

सूत्रान्तरमवतारयितुं प्रश्नः—कथमित्यादिना । सूत्रतात्पर्यं विवृणोति—धर्मेत्यादिना । सूत्रे नानात्वमित्यत्रेन्द्रियाणामिति शेषः ; तथाच इन्द्रियाणां नानात्वमित्यस्यैव भावार्थमाह—अनेकानीति, इन्द्रियाणीति शेषः ॥ २७ ॥

इन्द्रियाणां विषयनिरूपकं सूत्रमवतारयति—उभयेत्यादिना । यद्यपि ज्ञानेच्छाकृतिद्वेषाणामेव सविषयकत्वादिन्द्रियविषयत्वं दुर्घटं, तथापि स्वजन्यज्ञानविषयतामादाय ज्ञानेन्द्रियाणां स्वजन्यकृतिविषयतामादाय च कर्म्मेन्द्रियाणां विषयत्वमादाय तत्रापि च मते कृतिविषयत्वं परम्परयैवोपगन्तव्यम्, अतएव सर्व्वेषामेकरूपेण कृतिविषयत्वानुमानाद्भाष्यकारेण वचनाद्यादानस्य-गन्तव्यानन्दयितव्योत्स्रष्टव्यानामेव कर्म्मेन्द्रियविषयत्वमभिहितमिति मन्तव्यम् । सूत्रीयरस-मलशब्दस्यार्थं प्रदर्शयितुमाह—रसमाला नाम मल इति । अन्नादिरसानां मलः पुरीषादिरिति भाष्यकारः ॥ २८ ॥

এক অহঙ্কার হইতে অনেকবিধ ইন্দ্রিয়ের উৎপত্তি হয় কিরূপে ? এই আশঙ্কায় বলিতেছেন—ধর্ম্ম অধর্ম্মরূপ সহকারিসদ্ভাবে গুণপরিণামের ভেদবশতঃ (এক হইতেই) অনেক ইন্দ্রিয় হইয়া থাকে, যেমন এক দেহেরই বাল্য, যৌবন ও বার্দ্ধক্যরূপ নানা অবস্থা হয় ॥ ২৭ ॥

জ্ঞান ও কর্ম্মেন্দ্রিয়ের বিষয় বলিতেছেন—জ্ঞানেন্দ্রিয়ের বিষয় রূপ রস, গন্ধ, স্পর্শ ও শব্দ, কর্ম্মেন্দ্রিয়ের বিষয় বচন, আদান, বিহরণ, আনন্দ ও মূত্র পুরীষাদি ॥ ২৮ ॥

আত্মেন্দ্রিয়য়োঃ বৈধর্ম্ম্যমাহ—

দ্রষ্টৃত্বাদিরাত্মনঃ, করণত্বমিন্দ্রিয়াণাম্ ॥ ২৯

ব্যক্তম্ ॥ ২৯ ॥

অন্তঃকরণত্রয়াণামন্যোঽন্যং বৈধর্ম্ম্যমাহ—

ত্রয়াণাং স্বালক্ষণ্যম্ ॥ ৩০ ॥

মহদহঙ্কারমনসাং স্বালক্ষণ্যং—স্বং স্বং লক্ষণম্। মহতঃ অধ্যবসায়ঃ, অহঙ্কারস্য অভিমানঃ, মনসঃ সঙ্কল্প ইতি ॥ ৩০ ॥

আত্মেন্দ্রিয়য়োঃ বৈধর্ম্ম্যমিতি, বিরুদ্ধো ধর্ম্মো যেষাং তে বিধর্ম্মাণঃ, তেষাং ভাবো বৈধর্ম্ম্যং বিরুদ্ধধর্ম্ম ইত্যর্থঃ। সূত্রে দ্রষ্টৃত্বাদিরিত্যাদিনা শ্রোতৃত্ববক্তৃত্বাদীনামুপগ্রহঃ, যদ্যপি কূটস্থে আত্মনি দর্শনাদিকর্তৃত্বাদিরূপং দ্রষ্টৃত্বাদিকং বস্তুতো নাস্তি—তথাপি অয়স্কান্তমণিবৎ সান্নিধ্যমাত্রেণেন্দ্রিয়াণাং প্রেরকত্বাদবিবেকিনাভিমানিকং দ্রষ্টৃত্বাদিকমস্তীতি তদেবাত্র দ্রষ্টৃত্বাদিপদার্থঃ। তথাচোক্তং—

অত আত্মনি কর্তৃত্বমকর্তৃত্বঞ্চ সংস্থিতম্।
নিরিচ্ছত্বাদকর্ত্তাসৌ কর্ত্তা সন্নিধিমাত্রতঃ ॥

করণত্বমিন্দ্রিয়াণামিতি, নচ প্রমাণবিভাগে প্রত্যক্ষাদিবুদ্ধিবৃত্তীনামেব করণত্বাভিধানাদবেন্দ্রিয়াণাং করণত্ববচনমসমীচীনমিতি বাচ্যম্, তত্র পৌরুষেয়বোধরূপফলানামবচ্ছেদকদর্শনাদিরূপচক্ষুরাদিদ্বারকবুদ্ধিবৃত্তীনামেব করণত্বস্য নির্ব্বচনাদিতি ধ্যেয়ম্। তথাচ করণত্বমাত্মনো বিরুদ্ধদ্রষ্টৃত্বাদিকমিন্দ্রিয়াণাং বৈধর্ম্ম্যমিতি ফলিতম্ ॥ ২৯ ॥

সূত্রান্তরাবতরণিকামাহ—অন্তঃকরণেতি। মহদহঙ্কারমনসামিতি ত্রয়াণামিত্যস্য বিবরণম্। স্বং অসাধারণং লক্ষণং যেষাং তে স্বলক্ষণাস্তেষাং ভাবঃ স্বালক্ষণ্যমিতি ব্যুৎপত্ত্যা স্বালক্ষণ্যপদার্থমাহ— স্বং স্বং লক্ষণমিতি। তদেব স্পষ্টয়তি—মহত ইত্যাদিনা ॥ ৩০ ॥

আত্মা ও ইন্দ্রিয়ের বিরুদ্ধ ধর্ম্ম বলিতেছেন—দর্শন কর্ত্তৃত্ব ও শ্রবণ কর্ত্তৃত্ব প্রভৃতি আত্মার ধর্ম্ম এবং করণত্ব ইন্দ্রিয়ের ধর্ম্ম,—(সুতরাং পরস্পারের ধর্ম্ম পরস্পারে বিরুদ্ধ ॥ ২৯ ॥

অন্তঃকরণত্রয়ের পরস্পর বিরুদ্ধ ধর্ম্ম বলিতেছেন—স্ব স্ব লক্ষণই মহৎ অহঙ্কার ও মনের ধর্ম্ম,—যথা অধ্যবসায় মহতের, অভিমান অহঙ্কারের ও

एषां साधर्म्यमाह—

सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च॥ ३१॥

प्राणाद्याः पञ्च वायवः त्रिभिः करणैः धार्य्यन्ते॥ ३१॥

करणानां वृत्तीराह—

क्रमशोऽक्रमशश्चेन्द्रियवृत्तिः॥ ३२॥

'क्रमशश्च' मन्दालोके चौरं दृष्ट्वा इन्द्रियेण वस्तु विचारयति, ततः 'चोरः अयम्' इति मनसा सङ्कल्पयति, ततः धनं गृह्णाति इति

एषामिति, महदहङ्कारमनसामित्यर्थः। साधर्म्यं—समानधर्मं। "प्राणाद्याः—प्राणापानसमानोदानव्यानाख्याः पञ्च वायवः सामान्यकरणवृत्तिः—अन्तःकरणत्रयस्य साधारणी वृत्ति"रित्यर्थमभिसन्धाय भावार्थमाह—प्राणाद्या इत्यादिना॥ ३१॥

सामग्रीसमवधानवैचित्र्यादिन्द्रियवृत्तीनां क्रमाक्रमोत्पत्तिरूपवैचित्र्यस्य प्रदर्शकं सूत्रमवतारयति—करणानामित्यादिना। क्रमाक्रमोत्पत्तिकत्वञ्च—निगदव्याख्यानेन वृत्तिग्रन्थेन दर्शयति—क्रमशश्चेत्यादिना। आनन्तर्ययौगपद्यानङ्गीकुर्वन् अक्रमशश्चेत्यस्यौपचारिकत्वं व्यवस्थापयति—यद्यपीत्यादिना। यथा उपर्युपरि संस्थापितपद्मदलानां अस्त्रादिना कृतस्य द्वैधीभावस्य क्रमिकत्वेऽपि युगपदुत्पत्तिकत्वप्रतीतिस्तथैवेन्द्रियवृत्तीनामपि युगपदुत्पत्तिकत्वप्रतीतिः शीघ्रभावित्वनिबन्धना भ्रान्तिरेवेति भावः। इन्द्रियवृत्तयश्च कारिकया दर्शिता यथा—

शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः।
वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम्॥

সঙ্কল্প মনের ধর্ম্ম। (ফলে অধ্যবসায় অহঙ্কার ও মনের অভিমান মহৎ ও মনের এবং সঙ্কল্প মহৎ ও অহঙ্কারের বিরুদ্ধ ধর্ম্ম ইহাও সিদ্ধ হইল)॥ ৩০॥

মহৎ অহঙ্কার ও মনের সমান ধর্ম্ম বলিতেছেন—প্রাণ, অপান, সমান, উদান, ও ব্যান নামক পঞ্চ বায়ু অন্তঃকারণত্রয়ের সাধারণ বৃত্তি, সুতরাং প্রাণাদি পঞ্চবায়ুকে মহৎ অহঙ্কার মন এই অন্তঃকরণত্রয়ই ধারণ করিয়া থাকে॥ ৩১॥

ইন্দ্রিয়ের বৃত্তি বলিতেছেন—ইন্দ্রিয়ের বৃত্তি ক্রমেও অক্রমে হইয়া থাকে। ক্রমে যথা—ক্ষীণ আলোকে চোরকে দেখিয়া প্রথমে ইন্দ্রিয়দ্বারা বিচার করে যে ইহা কি? পরে মনের দ্বারা কল্পিত হয় যে এই ব্যক্তি চোর, পরে

अहङ्कारेण अभिमन्यते, ततः 'चौरं गृह्णामि' इति बुद्ध्या अध्यवस्यति। 'अक्रमशश्च' रात्रौ विद्युदालोके व्याघ्रं दृष्ट्वा झटिति अपसरति) तत्र चतुर्णाम् एकदा वृत्तिः। यद्यपि वृत्तीनाम् एकदा असम्भवात् तत्रापि क्रमः एव, तथापि उत्पलशतपत्रव्यतिभेदवत् अवभासनात् अक्रमः इति उक्तम् इति ॥ ३२ ॥

कति वृत्तयः ? इत्यत्राह—

वृत्तयः पञ्चतय्यः क्लिष्टा अक्लिष्टाश्च ॥ ३३ ॥

प्रमाणविपर्य्ययविकल्पनिद्रास्मृतयः। प्रत्यक्षानुमानशब्दाः प्रमाणानि। विपर्य्ययो मिथ्याज्ञानम् अतद्रूपप्रतिष्ठम्। विकल्पः

आलोचनञ्च तत्त्वकौमुदीप्रदर्शितं यथा—

अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्व्विकल्पकम्।
बालमूकादिविज्ञान-सदृशं मुग्धवस्तुजम्। इति ॥ ३२ ॥

सूत्रान्तरमवतारयितुं शङ्कते—कतीति। वृत्तीनां पञ्चप्रकारं योगसूत्रोक्तं दर्शयति—प्रमाणेत्यादिना। पूर्व्वं व्याख्यातान्येव प्रमाणानि निःसन्देहार्थं स्मारयति—प्रत्यक्षेत्यादिना। विपर्य्ययं निरूपयति—विपर्य्ययेत्यादिना। तद्रूपे—ज्ञानप्रतिभासितरूपे न प्रतिष्ठते—नावाधितं

অহঙ্কারদ্বারা অভিমত হয় যে, এই চোর ধনগ্রহণ করিতেছে, তৎপরে বুদ্ধি দ্বারা অধ্যবসায় করে যে চোরকে আমি ধরিব। অক্রমে যথা—রাত্রিতে বিদ্যুতের আলোকে ব্যাঘ্র দেখিয়া তৎক্ষণাৎ পলায়ন করে। ঐ স্থলে দর্শন সঙ্কল্প অভিমান ও অধ্যবসায়রূপ চারিটি করণের বৃত্তি এক কালেই হইয়া থাকে। যদিও বৃত্তিদ্বয়ের যৌগপদ্য নাই বলিয়া এককালে বৃত্তিচতুষ্টয়ের সম্ভব নাই, সুতরাং ঐ স্থলেও ক্রমেই বৃত্তিচতুষ্টয় হইয়াছে, তথাপি উপর্য্যুপরি সংস্থিত শতপদ্মপত্রের বিদারণের ন্যায় ঝটিতি হওয়ায় যৌগপদ্যের ভ্রম হয় বলিয়া অক্রম বলা হইয়াছে ॥ ৩২ ॥

বৃত্তি কত প্রকার এই আকাঙ্ক্ষায় বলিতেছেন—প্রমাণবিপর্য্যয়, বিকল্প, নিদ্রা ও স্মৃতিভেদে বৃত্তি পাঁচ প্রকার। প্রত্যক্ষ অনুমান ও শব্দের নাম প্রমাণরূপ বৃত্তি। (প্রত্যক্ষাদির লক্ষণ পূর্ব্বেই বলা হইয়াছে) জ্ঞানপ্রতি-

उभयस्पृक् ज्ञानम् । निद्रा तमोऽवलम्बि ज्ञानम् । स्मृतिः अतीतज्ञानम् । क्लिष्टा क्लेशयुक्ताः रजस्तमोमय्यः । अक्लिष्टाः सत्त्वमय्यः दग्धक्लेशाः ॥ ३३ ॥

वृत्तिनिवृत्तौ मुक्तिः इति आह—

तन्निवृत्तावुपशान्तोपरागः स्वस्थः ॥ ३४ ॥

वृत्तिनिवृत्तौ क्षपिताविद्यास्मितारागद्वेषाभिनिवेशः स्वस्थः स्वरूपं लभते ॥ ३४ ॥

वर्त्तत इत्यतद्रूपप्रतिष्ठं अतद्वति तत्प्रकारकं भ्रमज्ञानमिति यावत्, विपर्य्ययः—विपर्य्ययनाम्नी वृत्तिरित्यर्थः । विकल्पलक्षणमाह—उभयस्पृगिति, विरुद्धभावाभावोभयावगाहि—ज्ञानं संशयापरपर्य्यायकं विकल्प इत्यर्थः । भाष्यकारस्तु "शब्दज्ञानानुपाती वस्तुशून्यो विकल्प" इति योगसूत्रानुसारेण विशेषदर्शनकालेऽपि "राहोः शिरः, पुरुषस्य चैतन्य" मित्यादिज्ञानस्य विकल्पत्वमभिहितवान् । वृत्तिकारमते तु विशेषदर्शनकाले तादृशज्ञानमेव न भवति विशेषदर्शनाभावे च सम्बन्धधर्मिणोरुत्पद्यमानं तादृशज्ञानं विपर्य्यय एवान्तर्भवतीति पर्य्यालोचनीयम् । निद्रास्वरूपमाह—तमोऽवलम्बीति, तमोमात्रावलम्बीत्यर्थः । तथाच सुषुप्तिकाले जाग्रत्स्वप्नवृत्तीनां विषयप्रच्छादकं यत्तमः तन्मात्रावलम्बनेन या बुद्धिवृत्तिरुत्पद्यते सा निद्रावृत्तिरित्यर्थः । अतीतेति, अतीतस्य—पूर्व्वज्ञातस्य यज्ज्ञानं संस्कारजन्यज्ञानमिति यावत् सा स्मृतिरित्यर्थः । एतासां पञ्चवृत्तीनां पुनर्द्वैविध्यं विशदयति क्लिष्टा—इत्यादिना । क्लेशप्रयुक्ताः—क्लेशैरविद्यादिभिराक्रान्ताः । दग्धक्लेशाः दग्धः क्लेशो याभ्यस्ता इति व्युत्पत्त्या क्लेशविघातिकाः योगकालीना वृत्तय इत्यर्थः ॥ ३३ ॥

ভাসি রূপে যে অবাধে বর্ত্তমান থাকে না, সেই ভ্রমজ্ঞানের নাম বিপর্য্যয় বৃত্তি। যে বিরুদ্ধ ভাব ও অভাব এই উভয় কোটিকে বিষয় করে, সেই সংশয়ের নাম বিকল্প বৃত্তি। সুষুপ্তি কারণ জাগ্রৎ ও স্বপ্নবৃত্তি বিষয় প্রচ্ছাদক তমোমাত্র অবলম্বন করিয়া যে বুদ্ধিবৃত্তি জন্মে তাহাকে নিদ্রাবৃত্তি বলে। সংস্কার মাত্রাবলম্বনে পূর্ব্বানুভূত বস্তুর যে জ্ঞান হয়, তাহার নাম স্মৃতি। এই বৃত্তি-সকল ক্লিষ্ট ও অক্লিষ্টভেদে দুই প্রকার। যে সকল বৃত্তি অবিদ্যাদিক্লেশে সমাক্রান্ত রজস্তমোময়ী সেই সকল বৃত্তি ক্লেশ দেয় বলিয়া তাহাদের নাম ক্লিষ্ট, আর যে সকল বৃত্তি যোগকালে উৎপন্ন হইয়া ক্লেশ বিনাশ করে, সত্ত্বময়ী সেই সকল বৃত্তির নাম অক্লিষ্ট। ৩৩ ॥

दृष्टान्तमाह—

कुसुमवच्च मणिः ॥ ३५ ॥

यथा जपाकुसुमसंसर्गात् स्फटिके लौहित्यं, तदपगमात् स्फटिकः स्वरूपेण अवतिष्ठते, तथा सोऽपि इति ॥ ३५ ॥

करणानां तुल्यत्वात् सर्वदा तुल्यरूपता इत्यत्राह—

पुरुषार्थं करणोद्भवोऽप्यदृष्टोल्लासात् ॥ ३६ ॥

न तुल्यता, करणोद्भवानुद्भवाभ्यां विशेषात्। 'विशेषश्च अदृष्टोल्लासात् बलवत्तरत्वात् ॥ ३६ ॥

सूत्रान्तरमवतारयति—वृत्तावित्यादिना। वृत्तिः—वृत्त्यापाधिकी या पुरुषस्यान्यरूपता तन्निवृत्तिः। सूत्रं व्याचष्टे—वृत्तीत्यादिना। स्वरूपावस्था च तादृशी सदृष्टान्तोक्ता यथा—

अनाद्यविद्यकलङ्कादिप्रतिबिम्बे हि यादृशी।
स्याद्दर्पणे दर्पणता केवलात्मस्वरूपिणी॥
अहं त्वं जगदित्यादौ प्रशान्ते दृश्यसम्भ्रमे।
स्यात्तादृशी केवलता स्थिते द्रष्टर्यवीक्षणे॥ इति ॥ ३४ ॥

दृष्टान्तमिति, पूर्वसूत्रार्थे निदर्शनमित्यर्थः। सूत्रोयदृष्टान्तं विशदयति—यथेत्यादिना। तदपगमात्—जपाकुसुमसंसर्गविलयात्। सोऽपि पुरुषोऽपि ॥ ३५ ॥

करणानां विचित्रभोगसम्पादनप्रयोजकत्वसाधकं सूत्रमवतारयति—करणानामित्यादिना।

বৃত্তির নিবৃত্তি হইলেই মুক্তি হয়, ইহাই বলিতেছেন—বৃত্তির নিবৃত্তি হইলেই অবিদ্যা, অস্মিতা, রাগ, দ্বেষ ও অভিনিবেশের বিলয় হয়, সুতরাং পুরুষ স্বরূপ লাভ করে ॥ ৩৪ ॥

ইহার দৃষ্টান্ত বলিতেছেন—যেমন জবাকুসুমসংসর্গে স্ফটিকে লৌহিত্যের উপলব্ধি হয় ও তদপগমে স্ফটিক স্বরূপে অবস্থিত হয়, সেইরূপ আত্মাও বৃত্তিবশে অবিদ্যা অস্মিতা রাগদ্বেষ ও অভিনিবেশ অভিভূত বৃত্তিবিগমে অবিদ্যাদি বিমুক্ত হইয়া স্বরূপে অবস্থিতি করে ॥ ৩৫ ॥

সমস্ত করণই এক উপাদানে গঠিত বলিয়া তুল্য, সুতরাং তাহারা একবিধ কার্য্যেরই জনক হইতে পারে, এই আশঙ্কায় বলিতেছেন—তুল্যরূপতা হইতে

दृष्टान्तमाह—

धेनुवद्वत्साय ॥ २७ ॥

यथा धेनुत्वेन तुल्यत्वेऽपि या क्षीरिणी सा वत्सं पुष्णाति ॥ २७ ॥

तुल्यत्वात्—एकोपादानकत्वेनाविशेषात् । तुल्यता—सर्व्वेषां एकविधमात्रकार्य्यसम्पादकता स्यादिति शेषः । पूरयित्वा सूत्रस्य तात्पर्य्यं विवृणोति—नैत्यादिना । सर्व्वेषां एकविधमात्रकार्य्यसम्पादकत्वाभावे हेतुं दर्शयति—कारणेत्यादिना । कारणानां—चक्षुरादीनां उद्भवानुद्भवाभ्यां—एकैकस्मिन् एकैकभोगजननशक्तेर्व्यक्ताव्यक्ताभ्यां, विशेषात्—एकोपादानकत्वादिना तुल्यत्वेऽपि शक्तिवैचित्र्यात्, ननु तदुद्भवानुद्भवयोरपि विचित्रकारणापेक्षत्वाद्विशेष एव कुत इत्याकाङ्क्षायामाह—विशेषश्चेति, सापेक्षत्वात् अदृष्टापेक्षत्वादिति. विजातीयकर्म्माधीनविजातीयभोगसाधकविजातीयादृष्टानामेकैकस्यैकैकोद्भवे सहकारितया विद्यमानत्वादित्यर्थः । तथाच यादृशभोगसाधकादृष्टसहकारेण यस्योद्भवः तस्य तादृशभोगसाधकत्वमिति न तुल्यतेति भावः । नन्वेकोपादानकत्वरूपतुल्यतायास्तौल्यसम्पादनत्वेऽपि कथमदृष्टविशेषसमवधानमात्रेण तद्बाधात इत्याशङ्कायामाह—बलवत्त्वादिति, तुल्यतासम्पादकैकोपादानकत्वरूपहेत्वपेक्षया वैचित्र्यसम्पादकविजातीयादृष्टानामधिकबलवत्त्वादित्यर्थः ॥ २६ ॥

दृष्टान्तमिति, सामान्यधर्म्मेण तुल्यत्वेऽपि सहकारिविशेषसमवधानेन विचित्रकार्य्यजनकत्वे निदर्शनमित्यर्थः । दृष्टान्तं विशदयति—यथेत्यादिना ॥ २७ ॥

পারে না, কারণ এক এক ইন্দ্রিয়ে এক এক রূপ ভোগজনক শক্তির বিকাশ হয় ও অপর ইন্দ্রিয়ে তাহার বিকাশ হয় না বিধায় উপাদান কারণ এক হইলেও ইন্দ্রিয়গণের পরস্পর বৈলক্ষণ্য আছে। এক এক ইন্দ্রিয়ে এক এক শক্তির বিকাশ হওয়া না হওয়ার প্রতিও বিজাতীয় কর্ম্মাধীন বিচিত্র অদৃষ্টরূপ সহকারীর সমবধান এবং অসমবধানই কারণ। ফল বলে তুল্যতাসম্পাদক একোপাদানকত্বাদিরূপ হেতু অপেক্ষা বৈচিত্র্যসম্পাদক বিজাতীয় অদৃষ্টেরই বলবত্ত্ব স্বীকার করিতে হইবে ॥ ২৬ ॥

সাধারণতঃ তুল্যরূপতা থাকিলেও যে সহকারিবিশেষের সমবধান ও অসমবধানবশে শক্তির তারতম্য হয়, তাহার দৃষ্টান্ত বলিতেছেন—যেমন ধেনুবর্গে, সমস্ত ধেনু তুল্য হইলেও তাহাদের মধ্যে যে ক্ষীরিণী অর্থাৎ নব প্রসবিনী সেই বৎস পোষণ করিতে পারে, অন্যে পারে না ॥ ২৭ ॥

বাহ্যান্তরভেদাৎ কতি করণানি ইত্যত্রাহ—

করণং ত্রয়োদশবিধমবান্তরভেদাৎ ॥ ৩৮ ॥

অন্তর্বুদ্ধ্যহঙ্কারমনাংসি। বাহ্যানি দশেন্দ্রিয়াণি ॥ ৩৮ ॥

ইন্দ্রিয়েষু কথং করণত্বম্? ইত্যত্রাহ—

ইন্দ্রিয়েষু সাধকতমত্বযোগাৎ কুঠারবৎ ॥ ৩৯ ॥

যথা সাধকতমত্বেন কুঠারে করণত্বং, তথা ইন্দ্রিয়েষ্বপি ইতি ৩৯ ॥

প্রকারান্তরেণেন্দ্রিয়বিভাজকং সূত্রমবতারয়তি—বাহ্যেত্যাদিনা। সূত্রে অবান্তরভেদাদিতি, করণত্বব্যাপ্যধর্ম্মাণাং ভিন্নত্বাদিত্যর্থঃ। ত্রয়োদশবিধত্বং নিষ্কৃষ্য দর্শয়তি—অন্তরিত্যাদিনা। এতত্ত্রয়োদশানামপি ব্যক্তিভেদেনানন্ত্যমিত্যাবেদয়িতুং সূত্রে বিধপ্রত্যয়েন নির্দ্দেশ ইতি ধ্যেয়ম্ ॥ ৩৮ ॥

সূত্রান্তরমবতারয়িতুং শঙ্কতে—ইন্দ্রিয়েষু কথং করণত্বমিতি, ফলাযোগব্যবচ্ছিন্নস্যৈব করণত্বাৎ বহিরিন্দ্রিয়েষু চ তদভাবাদিতি শঙ্কাশয়ঃ। কুঠারবদিতি দৃষ্টান্তং বিশদয়তি—যথেত্যাদিনা। অয়মত্রাভিসন্ধিঃ—যথা ফলাযোগব্যবচ্ছিন্নতয়া প্রহারস্যৈব ছিদায়াং মুখ্যকরণত্বেঽপি প্রকৃষ্টসাধকতমত্বরূপগুণযোগাৎ কুঠারস্যাপি গৌণং করণত্বং, তথা ফলাযোগ-

---

বাহ্য ও আভ্যন্তর করণ সমষ্টিতে কতপ্রকার? এই আকাঙ্ক্ষায় বলিতেছেন—বুদ্ধি অহঙ্কার ও মন ভেদে অন্তরিন্দ্রিয় তিন প্রকার, চক্ষু কর্ণাদিভেদে বহিরিন্দ্রিয় দশ প্রকার, সুতরাং করণত্বের অবান্তর ধর্ম্মভেদে করণ ত্রয়োদশ প্রকার ॥ ৩৮ ॥

যাহাতে কখনও ফলের অযোগ থাকে না, তাহাকেই করণ বলা যায়, কিন্তু সমস্ত ইন্দ্রিয়ে তাহা নাই, সুতরাং ইন্দ্রিয়ের করণত্ব হয় কিরূপে? এই আশঙ্কায় বলিতেছেন—যেমন কুঠারে ফলাযোগব্যবচ্ছেদ না থাকিলেও প্রকৃষ্ট সাধকতমত্বনিবন্ধন কুঠার ছেদনের করণ, সেইরূপ সমস্ত ইন্দ্রিয়ে ফলাযোগব্যবচ্ছেদ না থাকিলেও প্রকৃষ্ট পুরুষার্থ সাধকতমত্বনিবন্ধন ইন্দ্রিয়গণ পুরুষার্থসাধনে করণ, এস্থলে জ্ঞাতব্য যে কেবল প্রকৃষ্ট সাধকতমত্ব নিবন্ধন যে করণ, হয় সে গৌণকরণ ফলাযোগব্যবচ্ছিন্ন হয় সেই মুখ্য করণ, যেমন

त्रयोदशकरणानां कार्य्यमाह—

द्वयो: प्रधानं मनो लोकवद्भृत्यवर्गेषु ॥ ४० ॥

द्वयो:—बुद्धीन्द्रियकर्मेन्द्रिययो: प्रधानं मन:, तदधिष्ठानादेव एषां प्रवृत्ते:, यथा लोके भृत्येषु स्वामी ॥ ४० ॥

युक्तिमाह—

अव्यभिचारात् ॥ ४१ ॥

व्यक्तम् ॥ ४१ ॥

युक्त्यन्तरमाह-

तथाशेषसंस्काराधारत्वात् ॥ ४२ ॥

नष्टेन्द्रियाणामपि संस्कारदर्शनात् ॥ ४२ ॥

व्यवच्छिन्नतया बुद्धेरेव पुरुषार्थं प्रति मुख्यकरणत्वेऽपि प्रकृष्टसाधकतमत्वगुणयोगादन्येन्द्रियाणामपि गौणं करणत्वमव्याहतमिति ॥ ३९ ॥

सूत्रान्तरमवतारयति—त्रयोदशेत्यादिना । सूत्रं विवृणोति—द्वयोरित्यादिना । मनस: प्राधान्ये हेतुमाह--तदधिष्ठानादेवेति, मन:परिचालनादेवेत्यर्थ: दृष्टान्तं स्पष्टयति—यथेत्यादिना । स्वामी—भृत्यानां परिचालकपुरुष:, प्रधान इति शेष: ॥ ४० ॥

युक्तिमिति, मनस: प्राधान्ये हेतुमित्यर्थ: । व्यक्तमिति, "अव्यभिचारात्—मनस: सर्व्वे फलाभावरूपव्यभिचारस्याभावात्, मनस: प्राधान्य"मिति सूत्रतात्पर्य्यं स्पष्टमित्यर्थ: ॥ ४१ ॥

ছেদনে কুঠার গৌণকরণ ও প্রহারই মুখ্য করণ, অতএব এস্থলেও ফলাযোগ-ব্যবচ্ছিন্ন বুদ্ধিই পুরুষার্থসাধনে মুখ্য করণ এবং চক্ষুরাদি ইন্দ্রিয় গৌণ-করণ ॥ ৩৯ ॥

ত্রয়োদশ করণের কার্য্য বলা প্রসঙ্গে মনের প্রাধান্য বলিতেছেন—বুদ্ধী-ন্দ্রিয় ও কর্ম্মেন্দ্রিয়ের মধ্যে মনই প্রধান, কারণ মনঃপরিচালিত হইয়াই অন্য ইন্দ্রিয়ের প্রবৃত্তি হয়। যেমন লোকেও ভৃত্যবর্গমধ্যে পরিচালক পুরুষই প্রধান ॥ ৪০ ॥

মনের প্রাধান্যে যুক্তি বলিতেছেন—মন সম্বন্ধে ফলাভাবরূপ ব্যভিচার হয় না বলিয়াই মন প্রধান ॥ ৪১ ॥

न्यायमाह—

स्मृत्यानुमानाच्च ॥ ४३ ॥

इन्द्रियं विनापि स्मृतिदर्शनात् मनः अनुमीयते ॥

आत्माधारः संस्कारः इत्यत्राह—

सम्भवेन्न स्वतः ॥ ४४ ॥

स्वतः आत्मनो न सम्भवेत्, कूटस्थनिर्गुणत्वात् ॥ ४४ ॥

युक्त्यन्तरमिति, दार्ढ्याय तस्मिन्नेवार्थे हेत्वन्तरमित्यर्थः। अशेषाणां सर्व्वेषां संस्काराणां—स्मृतिसाधकानां अनुभवजन्यानां आधारत्वात्—आश्रयत्वात्, तथा—मनसः प्राधान्यमिति' सूत्रार्थः।" ननु बहिरिन्द्रियाणामेव संस्काराधारत्वमस्त्वित्याशङ्कामपनयति - नष्टेत्यादिना,—नष्टानि—अनुभवानन्तरं तिरोहितानि इन्द्रियाणि—चक्षुरादीनि येषां तेषामपि संस्कारस्य दर्शनात्—अरणान्यथानुपपत्त्यावश्यमङ्गीकरणात् न संस्कारस्य बहिरिन्द्रियाश्रितत्वं कल्पनार्हमित्यर्थः ॥ ४२ ॥

न्यायमाहेति—संस्कारस्य बहिरिन्द्रियानाश्रितत्वे प्रमाणं दर्शयतीत्यर्थः। "इन्द्रियं विनापि स्मृतिदर्शना"दिति स्मृत्येत्यस्य विवरणम्। अनुमीयते—संस्काराधारतया निर्णीयते। तथाच संस्काराधारतया मनसः प्राधान्यमिति पूर्व्वसूत्रोक्तमेव स्थितम् ॥ ४३ ॥

संस्कारस्यात्मधर्म्मत्वं वदतां नैयायिकादीनां मतस्य निरासकं सूत्रमवतारयितुमाह—आत्माधार इति। आत्मा आधारो यस्येति बहुव्रीहिः। न सम्भवेदिति संस्कार इति शेषः। अत्र हेतुं पूरयति—कूटस्थनिर्गुणत्वादिति ॥ ४४ ॥

মনের প্রাধান্যে আরও যুক্তি বলিতেছেন—স্মৃতির জনক সমস্ত সংস্কারের আশ্রয়ত্ব নিবন্ধনও মনই প্রধান। অন্য ইন্দ্রিয়বর্গকে সংস্কারের আশ্রয় বলা যায় না। কারণ ইন্দ্রিয়ের বিনাশে ও সংস্কারের সত্তা দেখা যায়, নচেৎ যাহার এক ইন্দ্রিয়ের বিনাশ হইয়াছে, তাহারও সেই ইন্দ্রিয়ানুভূত বিষয়ের স্মরণ হয় কিরূপে? ॥ ৪২ ॥

সংস্কার যে বহিরিন্দ্রিয়াশ্রিত নহে, তাহার প্রমাণ বলিতেছেন—যে হেতু অন্য ইন্দ্রিয় না থাকিলেও স্মরণ হইতে দেখা যায়, অতএব মনই সংস্কারাশ্রয় বলিয়া অনুমেয় ॥ ৪৩ ॥

कारणत्वे तुल्ये किंनिबन्धन: गुणप्रधानभाव इत्यत्राह—

आपेक्षिको गुणप्रधानभाव:, क्रियाविशेषात् ॥ ४५

स्पष्टम् ॥ ४५ ॥

निरभिसन्धानात् न अपर: परार्थं प्रवर्त्तते इत्यत्राह —

तत्कर्मार्जितत्वात्तदर्थमभिचेष्टा लोकवत् ॥ ४६ ॥

बुद्धिप्रतिबिम्बितपुरुषकर्मार्जितत्वात् पुरुषार्थम् अभिचेष्टा प्रवर्त्तनं बुद्ध्यादीनाम् । यथा लोके येन अर्जित: भृत्य: तत्कार्यं करोति ॥ ४६ ॥

सूत्रान्तरमवतारयति—कारणत्व इत्यादिना । आपेक्षिक:—पुरुषभोगवैचित्र्यापेक्षानिमित्तक: । अत्र हेतुमाह—क्रियाविशेषादिति, भोगवैचित्र्यजनकादृष्टजनककर्म्मणां वैलक्षण्यादित्यर्थ: ॥४५॥

सूत्रान्तरमवतारयति—निरभिसन्धानादित्यादिना । सूत्रं व्याचष्टे—बुद्धीत्यादिना । अत्रेदमवधेयम्—यद्यपि कूटस्थतया पुरुषस्य वस्तुत: कर्म्म नास्ति, तथापि बुद्धिप्रतिबिम्बितेन पुरुषेण यत्कर्म्म स्वीयत्वेनाभिमन्यते तत्कर्म्मार्जितत्वादित्यर्थ एव इत्तिलानपर्य्यालास्ति विरोध: । तादृशाभिमानमपि कथं भवतीति चेत्तादृशं कर्म्मान्तरमेव तत्र कारणम् । अनादित्वाच नानवस्था दोषावहेति ॥ ४६ ॥

সংস্কার আত্মার ধর্ম্ম হইবে, এই আশঙ্কায় বলিতেছেন—সংস্কার আত্মার ধর্ম্ম হইতে পারে না, কারণ আত্মা কূটস্থ ও নিগুর্ণ ॥ ৪৪ ॥

করণত্ব তুল্য থাকিলেও গৌণ প্রধান ভাব হয় কেন? এই আশঙ্কায় বলিতেছেন—পুরুষের বিচিত্র ভোগ সাধনের নিমিত্তই গৌণ প্রধান ভাব হয়। সেই ভোগের বৈচিত্র্যের প্রতিও বিচিত্র কর্ম্মজন্য অদৃষ্টের বৈচিত্র্যই কারণ ॥ ৪৫ ॥

কোনও অভিসন্ধান ব্যতিরেকে অপর অপরের জন্য প্রবর্ত্ত হয় না! (সুতরাং এস্থলে অভিসন্ধান কি?) এই আশঙ্কায় বলিতেছেন—বুদ্ধিপ্রতিবিম্বিত পুরুষের কর্ম্মাধীন হইয়াই বুদ্ধ্যাদি পুরুষার্থসাধনে প্রবৃত্ত হয়। যেমন লোকেও যে ভৃত্য যাহার কর্ম্মে অর্জিত হয়, সে তাহার কর্ম্ম করিয়া থাকে ॥ ৪৬ ॥

सर्वत्र बुद्धेः प्राधान्यमिति आह—

समानकर्मयोगे बुद्धेः प्राधान्यं लोकवल्लोकवत् ॥ ४७ ॥

यथा लोके ग्रामाध्यक्षात् राज्याध्यक्षः श्रेष्ठः, तस्मात् अपि राजा इति, तथा मनः बुद्ध्यर्थं प्रवर्त्तते इति सर्वप्रधाना बुद्धिः इति। समानकर्मयोगे—पुरुषार्थतुल्यक्रियायोगेऽपि सर्वेषाम् इति। लोकवत् इति वीप्सा अध्यायपरिसमाप्तौ ॥ ४७ ॥

इति कापिलसांख्यप्रवचनसूत्रवृत्तौ
प्रधानकार्य्याध्यायो * द्वितीयः ॥ २ ॥

बुद्धिप्राधान्यव्यवस्थापकं सूत्रमवतारयति—सर्व्वत्रेत्यादिना। लोकवदिति दृष्टान्तं दर्शयति—यथेत्यादिना। लोक इति राजार्थकत्वाविशेषेऽपीति शेषः। सर्व्वप्रधानेति, करणानां मध्ये इत्यादिः। पूरयित्वा प्रथमप्रतीकं व्याचष्टे—पुरुषेत्यादिना ॥ ४७ ॥

इति श्रीकुञ्जविहारीतर्कसिद्धान्तभट्टाचार्य्यविरचितायां सांख्यसूत्रानिरुद्धवृत्तिटीकायां
तत्त्वबोधिनीसमाख्यायां प्रधानकार्य्याध्यायो द्वितीयः ॥

সর্ব্বত্রই বুদ্ধির প্রাধান্য বলিতেছেন—সকলেরই পুরুষার্থসাধনরূপ এক কর্ম্মকারিত্ব থাকিলেও অন্য করণ হইতে প্রধান মন ও বুদ্ধির জন্য প্রবর্ত্ত হয় বলিয়া বুদ্ধিই সমস্ত করণের মধ্যে প্রধান। যেমন লোকেও গ্রামাধ্যক্ষ হইতে রাজ্যাধ্যক্ষ শ্রেষ্ঠ ও রাজ্যাধ্যক্ষ হইতে রাজা শ্রেষ্ঠ লোকবৎ এই দ্বিঃপাঠ অধ্যায়পরিসমাপ্তির সূচক ॥ ৪৭ ॥

কপিলকৃত সাংখ্যসূত্রের প্রধানকার্য্যনির্ণায়ক
দ্বিতীয় অধ্যায় সমাপ্ত হইল ॥ ২ ॥

---

* एतदध्यायप्रतिपाद्यसंग्राहकश्लोको भाष्यकारोक्तो यथा—

लिङ्गदेहस्य घटकं यत् त्रयोदशं करणं।
प्रधानकार्य्यं तत् सूक्ष्ममध्यायेऽनुवर्णितम् ॥

प्रधानकार्य्यनिरूपणानन्तरं वैराग्यार्थं

तृतीयाध्यायारम्भः॥

अविशेषाद् विशेषारम्भः॥ १॥

अविशेषात् भूतसूक्ष्मात् विशेषस्य महाभूतस्य आरम्भः॥ १॥

तस्माच्छरीरस्य॥ २॥

तस्य मांसादिमयविचारात् निर्विद्यते॥ २॥

तृतीयाध्यायस्यावतरणिकामाह—प्रधानेत्यादिना। प्रधानकार्य्याणां—स्थूलभूतादीनां निरूपणानन्तरं—अभिधानानन्तरं वैराग्यार्थं—वैराग्यसाधनाभिधानार्थं।

न विद्यते विशेषः—शान्तघोरमूढत्वादिरूपो यत्रेति व्युत्पत्त्या अविशेषादित्यस्यार्थमाह—भूतसूक्ष्मादिति, शब्दादिपञ्चतन्मात्रादित्यर्थः। सुखाद्यात्मकत्वरूपशान्तादिविशेषः स्थूलभूतेष्वेव व्यक्ताधिकभावेनाभिव्यज्यते न सूक्ष्मेषु तेषां शान्तैकरूपतयैव योगिभिरभिव्यक्तेरिति भावः॥ १॥

"तस्मात्—त्रयोविंशतितत्त्वात् शरीरस्य—स्थूलसूक्ष्मशरीरद्वयस्य आरम्भ" इति सूत्रार्थः। ननु शरीरारम्भाभिधानस्य क उपयोग इत्याकाङ्क्षायामाह—तस्येति। तथाच शरीरस्य मांसादिमयत्वावधारणे विनाशित्वाद्यवधारणेन तत्र वैराग्यं जायत इति तदुपयोगितया तदभिधानमिति भावः॥ २॥

প্রধান কার্য্য ভূতাদির নিরূপণ করিয়া বৈরাগ্যসাধনের অভিধানার্থ তৃতীয় অধ্যায়ের আরম্ভ॥

সূক্ষ্মভূত অর্থাৎ শব্দাদি পঞ্চতন্মাত্র হইতে স্থূল মহাভূতের আরম্ভ হয়॥ ১॥

সেই ত্রয়োবিংশতি তত্ত্ব হইতে স্থূল সূক্ষ্ম শরীরের উৎপত্তি হয়। শরীরের মাংসাদিময়ত্ব বিচার করিলেই বিনাশিত্বের উপলব্ধি করিয়া পুরুষ দুঃখিত হয়, ফলে শরীরের প্রতি বৈরাগ্য জন্মে॥ ২॥

উৎপত্তিঃ দর্শিতা, নাশঃ কুতঃ ? ইত্যত আহ—

তদ্বীজাৎ সংসৃতিঃ ॥ ৩ ॥

তস্য ভূতারম্ভস্য কারণাৎ ধর্মাধর্মাৎ সংসরণং নাশঃ ॥ ৩ ॥

ভূতানামারম্ভকস্য ভাবত্বে সর্বদা আরম্ভাৎ অনির্মোক্ষঃ ইত্যত আহ—

আ বিবেকাচ্চ প্রবর্ত্তনমবিশেষাণাম্ ॥ ৪ ॥

বিবেকজ্ঞানপর্য্যন্তম্ আরম্ভকস্বভাবত্বং ভূততন্মাত্রাণাম্ ইতি ॥ ৪ ॥

শরীরনাশহেতুপ্রদর্শকং সূত্রমবতারয়তি—উৎপত্তিরিত্যাদিনা। সূত্রং ব্যাচষ্টে—তস্যেত্যাদিনা। সংসরণমিতি সংসৃতিরিত্যস্য বিবরণম্, তস্যার্থমাহ—নাশ ইতি। বিজ্ঞানভিক্ষুস্তু সূত্রমিদমন্যথা ব্যাচষ্টে, তথাচ ভাষ্যম্—"তস্য শরীরস্য বীজাৎ ত্রয়োবিংশতিতত্ত্বরূপাৎ সূক্ষ্মাচ্ছরীরাৎ পুরুষস্য সংসৃতির্গতাগতে ভবতঃ, কূটস্থস্য বিভুতয়া স্বতো গত্যাদ্যসম্ভবাদিত্যর্থঃ। ত্রয়োবিংশতিতত্ত্বেঽবস্থিতো হি পুরুষস্তেনৈবোপাধিনা পূর্ব্বকৃতকর্ম্মভোগার্থং দেহাদ্দেহং সংসরতি।

মানসং মনসৈবায়মুপভুঙ্‌ক্তে শুভাশুভম্।
বাচাবাচাকৃতং কর্ম্ম কায়েনৈব তু কায়িকম্ ॥"

ইত্যাদিভিঃ পূর্ব্বসর্গীয়করণৈরেবোৎসর্গতঃ সর্গান্তরেষুপভোগশ্রিত্তে"রিতি ॥ ৩ ॥

সূত্রান্তরমবতারয়তি—ভূতানামিত্যাদিনা। সূত্রীয়পদত্রয়ং যথাক্রমং পদত্রয়েণ বিবৃণোতি—বিবেকেত্যাদিনা। তথাচ বিবেকোত্তরং তং প্রত্যনারম্ভকত্বাদেব নানির্মোক্ষপ্রসঙ্গ ইতি ভাবঃ ॥ ৪ ॥

শরীরের উৎপত্তি প্রদর্শিত হইল, কিন্তু নাশের কারণ কি ? এই আশঙ্কায় বলিতেছেন—সেই ভূতারম্ভের কারণ ধর্ম্ম ও অধর্ম্ম হইতেই শরীরের বিনাশ হয় ॥ ৩ ॥

আরম্ভই যদি ভূতগণের স্বভাব হয়, তবে সর্ব্বদাই আরম্ভ হইতে পারে এবং তাহা হইলে কখনও মুক্তি হইতে পারে না, এই আশঙ্কায় বলিতেছেন—পুরুষের বিবেকজ্ঞান হওয়া পর্য্যন্তই স্থূলভূত ও পঞ্চতন্মাত্রের সেই পুরুষের প্রতি আরম্ভকস্বভাবত্ব থাকে, (সুতরাং বিবেকজ্ঞান হইলে সেই পুরুষের প্রতি আরম্ভকস্বভাবত্ব থাকে না বলিয়াই মুক্তি না হওয়ায় আপত্তি

अविवेकिनं प्रति आरम्भकत्वे महाप्रलयेऽपि तं प्रति आरम्भकत्वं स्यात् इति आह—

उपभोगादितरस्य ॥ ५ ॥

अविवेकिन: उपभोगात्, महाप्रलये शरीराभावात् कुत: उपभोग: ? इति न तं प्रति आरम्भकत्वम् ॥ ५ ॥

अनारम्भकत्वे तु कुत: विशेषात् अविवेकिनं प्रति पुन: आरम्भकत्वम् ? इत्यत आह—

सम्प्रति परिष्वक्तो द्वाभ्याम् ॥ ६ ॥

धर्माधर्माभ्याम् । गमागमपरिष्वक्तो प्रलयेऽपि धर्माधर्मानुबद्ध: आत्मा इति तं प्रति पुन: आरम्भ: । मुक्तो न तथा इति ॥ ६ ॥

सूत्रान्तरमवतारयितुमापत्तिमुत्थापयति—अविवेकिनमित्यादिना, इति—इत्यापत्तौ । अविवेकिन इति इतरस्येत्यस्य विवरणम् । उपभोगादिति प्रवर्त्तनमविशेषाणामिति पूर्व्वसूत्रेण सम्बन्ध: । तथाच अविवेकिन उपभोगसम्पादनायैव तं प्रति भूततन्मात्राणामारम्भकत्वमिति सूत्रतात्पर्य्यम् । नन्वेतावता कथं सूत्रावतरणिकोक्तापत्ते: समाधानमित्याकाङ्क्षामपनयति—महाप्रलय इत्यादिना ॥ ५ ॥

सूत्रान्तरमवतारयितुं पुनरापत्तिमुत्थापयति—अनारम्भकत्व इत्यादिना । धर्म्माधर्म्माभ्यामिति द्वाभ्यामित्यस्य विवरणम् । तथाच—"सम्प्रति—सृष्टिकाले (पुरुष:) द्वाभ्यां धर्म्माधर्म्माभ्यां सृष्टिकालोपस्थितकारिसमवधानेन भोगसाधनाभ्यां ताभ्यां पूर्व्वसर्गकर्म्मार्ज्जितधर्म्माधर्म्माभ्यामित्यर्थ:,

অবিবেকীর প্রতি যদি ভূত ও পঞ্চতন্মাত্রের আরম্ভকত্বভাবও থাকে, তবে মহাপ্রলয়েও অবিবেকী পুরুষের প্রতি আরম্ভ হইতে পারে; এই আশঙ্কায় বলিতেছেন—অবিবেকীর উপভোগার্থই ভূত ও পঞ্চতন্মাত্রের আরম্ভকত্ব থাকে, কিন্তু মহাপ্রলয়ে শরীর থাকে না। সুতরাং উপভোগ হইবে কি প্রকারে? অতএব উপভোগের সম্ভাবনা থাকে না বলিয়াই মহাপ্রলয়ে অবিবেকীর প্রতিও আরম্ভকত্ব থাকে না ॥ ৫ ॥

যদি আরম্ভকত্বের অভাব হয়, তবে পুনরায় অবিবেকীর প্রতি আরম্ভকত্ব হয় কি প্রকারে? এই আপত্তিতে বলিতেছেন—প্রলয়েও অবিবেকী

नित्यत्वे तु मुक्तेः कथं पारतन्त्र्यम्? इत्यत आह—

मातापितृजं स्थूलं प्रायशः इतरन्न तथा ॥ ७ ॥

प्रायशः इति दृश्यत्वात्। इतरत् सूक्ष्मशरीरं न तथा, दुरूह-त्वात् ॥ ७ ॥

परिष्वक्तः—आबद्धः भवति, सुतरां तद्भोगार्थं पुनरारम्भकत्व” मिति सूत्रार्थः। ननु प्रलये पुरुषं प्रति आरम्भकत्वविगमेऽपि पुनरारम्भकत्वं भवति, किन्तु मुक्तावारम्भकत्वविगमे पुनरारम्भकत्व न न भवतीत्यत्र कौ हेतुरित्याशङ्कामपनयति—समागमेत्यादिना। धर्म्माधर्म्मानुबद्धः—सृष्टिकाल-रूपसहकारिसमवधानाभावेन भोगसाधनानुन्मुखाभ्यां धर्म्माधर्म्माभ्यामनुगतः, (तथाच प्रलये धर्म्माधर्म्मसत्त्वेऽपि भोगसाधनानुन्मुखतया नारम्भकत्वमिति मन्तव्यम्) समागमपरिष्वक्ती—धर्म्माधर्म्मानुगततया जन्ममरणसाधनानुसक्तः, पुनरिति सृष्टिकाल इत्यादिः। न तथाच—न भोगसाधनानुन्मुखाभ्यामपि धर्म्माधर्म्माभ्यामनुबद्धः, मुक्तौ ज्ञानेन तयोः समूलक्षापं कषित्यादि-त्याशयः। तथाच मुक्तौ भोगस्वरूपयोग्यस्याप्यसत्त्वान्न मुक्तं प्रति पुनरारम्भ इति स्थितम् ॥ ६ ॥

शरीरद्वयनिरूपकं सूत्रमवतारयति—नित्यत्व इत्यादिना। स्थूलं शरीरं प्रायशः—बाहुल्येन मातापितृजं—शुक्रशोणितसम्भवमित्यर्थः। बाहुल्ये हेतुं दर्शयति—दृश्यत्वादिति—तथैव दृष्टचरत्वादित्यर्थः। स्वेदजादिशरीराणामपि स्थूलत्वस्य दृष्टत्वात् प्रायश इत्युक्तम्। न तथा—न मातापितृजं दुरूहत्वात् तथात्वेनानधिगम्यमानत्वात् ॥ ७ ॥

পুরুষ পূর্ব্বজন্মকর্ম্মার্জ্জিত ধর্ম্ম ও অধর্ম্মে আবদ্ধ থাকে, সুতরাং জন্ম ও মরণাদি সাধনেও অনুসক্ত থাকে, তবে সৃষ্টিকালরূপ সহকারীর অভাবে ও ভোগায়তন শরীরের অভাবে সেই ধর্ম্ম অধর্ম্ম ভোগসাধন উন্মুখ থাকে না, বলিয়াই প্রলয়ে ভূতগণের আরম্ভকত্ব থাকে না, অতএব সৃষ্টিকালরূপ সহকারী সম-বধান হইলেই পুনরায় অবিবেকী পুরুষের প্রতি আরম্ভ হইয়া থাকে। মুক্তি হইলে কিন্তু ভোগসাধনে অনুন্মুখ ধর্ম্মাধর্ম্মদ্বারাও পুরুষ আবদ্ধ থাকে না, সুতরাং মুক্ত পুরুষের প্রতি আর কখনও আরম্ভ হয় না ॥ ৬ ॥

মুক্তি যদি নিত্য হয়, তবে তাহার পরাধীনতা কেন? এই আশঙ্কায় আভিমানিক বন্ধের কারণীভূত দেহ নিরূপণ করিয়াছেন—যেরূপ দৃষ্টিগোচর হয় তাহাতে স্থূলদেহ প্রায় সমস্তই মাতাপিতা হইতে জন্মে (কেবল স্বেদজাদি কতিপয় স্থূলদেহই মাতাপিতা হইতে জন্মে না) সূক্ষ্ম শরীর মাতাপিতৃজ নহে, কারণ তাহা দুরূহ ॥ ৭ ॥

द्वयोः देहयोः कस्य भोगः ? इत्यत आह—

पूर्व्वोत्पत्तेस्तत्कार्य्यत्वं भोगादेकस्य नेतरस्य ॥ ८

पूर्व्वोत्पत्तेः—सूक्ष्मशरीरस्य । भोगात् एकस्य तस्य, न इतरस्य स्थूलस्य, तत्कार्य्यत्वम् । स्थूलशरीरस्य गौणः भोगः मृतशरीरे भोगादर्शनात् ॥ ८ ॥

कतिभिः तत्त्वैः सूक्ष्मशरीरारम्भः इत्यत आह—

सप्तदशैकं लिङ्गम् ॥ ९ ॥

सप्तदश च एकं च अष्टादश । तैः लिङ्गं सूक्ष्मदेहः उत्पद्यते । बुद्ध्यहङ्कारमनांसि पञ्च सूक्ष्मभूतानि दश इन्द्रियाणि इति ॥ ९

सूत्रान्तरमवतारयितुं शङ्कते—द्वयोरित्यादिना । पूर्व्वं सर्गादौ उत्पत्तिर्यस्येति व्युत्पत्त्या पूर्व्वोत्पत्तिशब्दस्यार्थमाह—सूक्ष्मशरीरस्येति । तस्येति एकस्येत्यस्य विवरणम्, सूक्ष्मशरीरस्यैवेति तदर्थः, सूत्रे तत्कार्य्यत्वपदं सुखदुःखादिकार्य्यकत्वार्थकं, तथाच सूक्ष्मदेहस्यैव भोगात् सूक्ष्मदेहस्यैव सुखदुःखादिकार्य्यकत्वं न तु स्थूलदेहस्य सुखदुःखादिकार्य्यकत्वमिति सूत्रार्थः । ननु भोगायतनस्यैव शरीरत्वात् स्थूलदेहे भोगाभावे कथं तत्र शरीरत्वव्यवहार इत्यत आह—स्थूलस्येति, गौणः—सूक्ष्मशरीरभोगनिबन्धनः, तथाच तद्गौणभोगायतनत्वमादायैव तत्र शरीरव्यवहार इति भावः । गौणत्वे हेतुमाह—मृतशरीरे भोगादर्शनादिति ॥ ८ ॥

सूत्रान्तरमवतारयितुं पृच्छति—कतिभिरित्यादिना । सूत्रं व्याख्यातुं "सप्तदशैक"मिति पदस्य विग्रहवाक्यं दर्शयति—सप्तदश च एकञ्चेति, अस्य फलितार्थमाह—अष्टादशेति, तैः—अष्टादशभिः, तदष्टादशैव विशिष्य दर्शयति—बुद्धीत्यादिना । नन्वेवं "कर्म्मात्मा पुरुषो योऽसौ बन्धमोक्षैः प्रयुज्यते । स सप्तदशकेनापि राशिना युज्यते च सः ॥" इति विष्णुधर्म्मोत्तर-वचनेन "वासनाभूतसूक्ष्मञ्च कर्म्म विद्ये तथैव च । दशेन्द्रियं मनोबुद्धिरेतल्लिङ्गं विदुर्बुधाः ॥" इत्यादि वाशिष्ठादिवचनेन च सप्तदशतत्त्वात्मकत्वप्रतिपादकेन विरोध इति चेन्न, अष्टादश

স্থূল ও সূক্ষ্মদেহের মধ্যে কোন্‌টি ভোগ দেহ ? এই আশঙ্কায় বলিতেছেন,—পূর্ব্বোৎপন্ন সূক্ষ্ম শরীরেরই ভোগ হয় বিধায় সুখদুঃখাদি ভোগ সূক্ষ্ম শরীরেরই কার্য্য, স্থূল শরীরের নহে। স্থূল শরীরের ভোগ, সূক্ষ্ম শরীরের ভোগের অধীন, কারণ মৃত শরীরে ভোগ দৃষ্ট হয় না। ৮ ॥

কতটি পদার্থদ্বারা সূক্ষ্ম শরীরের আরম্ভ হয়, এই প্রশ্নে বলিতেছেন—বুদ্ধি

सूक्ष्मदेहस्य सर्व्वत्र तुल्यत्वात् कथं पुत्तिकाहस्तिदेहानां विसदृशानां तस्मात् उत्पत्तिः? इत्यत आह—

व्यक्तिभेदः कर्म्मविशेषात् ॥ १० ॥

व्यक्तम् ॥ १० ॥

यदि आत्मा अन्यः, कथं देहे अहम् इति अभिमानः? इत्यत आह—

तदधिष्ठानाश्रये देहे तद्वादात् तद्वादः ॥ ११ ॥

आत्माधिष्ठानाश्रये देहे सम्भोगात् आत्मवादात् देहे अहम् इति अभिमानवादः ॥ ११ ॥

बुद्ध्यन्तर्भावमभिप्रेत्यैव तत्र तत्र सप्तदशात्मकत्वाभिधानात् वृत्तिकृता च तदनन्तर्भावमभिप्रेत्यैव एवं व्याख्यातत्वादिति सुधीभिर्व्विभावनीयम्। भाष्यकारः एकतादिप्रत्ययानुरोधेन स्थूलदेहस्यावयवित्वमङ्गीकुर्व्वन्नपि दर्शितविष्णुधर्म्मोत्तरवचने राशिशब्दप्रयोगस्वरसात् अवयविरूपद्रव्यान्तरकल्पने गौरवाच्च लिङ्गदेहस्यावयवित्वं न स्वीकृतवान्, वृत्तिकृता च "तैः सूक्ष्मदेह उत्पद्यत" इति वदता लिङ्गदेहस्यापि अवयवित्वमङ्गीकृतमित्यनयोः साधुत्वं निर्म्मत्सराणां सुधियामेव विवेचनाधीनमिति ॥ ९ ॥

सूत्रान्तरमवतारयितुं शङ्कते—सूक्ष्मे त्यादिना। तुल्यत्वात्—तन्मात्राणामविशेषैकरूपत्वात्। व्यक्तमिति, कर्म्मणां—शरीरसाधकादृष्टरूपसहकारिणां विशेषात्—वैलक्षण्यात् व्यक्तीनां—स्थूलदेहानां भेदः—वैलक्षण्यमिति व्याख्यानं स्पष्टमित्यर्थः ॥ १० ॥

सूत्रान्तरावतरणिकामाह—यदीत्यादिना। अन्यः—देहाद्भिन्नः। तत्पदस्यात्मपरतामभिसन्धाय प्रथमपदं व्याचष्टे—आत्मे त्यादिना। आत्मनः अधिष्ठानं—आश्रयः आश्रयत्वेनाभिमत इति यावत्, यः सूक्ष्मदेहः, तदाश्रये, देहे स्थूलदेहे, तद्वादादित्यस्य हेतुं पूरयति—सम्भोगादिति,

---

অহঙ্কার মন পঞ্চতন্মাত্র ও দশ ইন্দ্রিয় এই অষ্টাদশপদার্থদ্বারা সূক্ষ্মশরীরের উৎপত্তি হয় ॥ ৯ ॥

সূক্ষ্মদেহের সর্ব্বত্রই তুল্যতাবশতঃ তাহা হইতে কি প্রকারে বিসদৃশ পুত্তিকাদেহ ও হস্তিদেহের উৎপত্তি হয়? এই আশঙ্কায় বলিতেছেন—শরীরসাধক অদৃষ্টরূপ সহকারীর বৈলক্ষণ্য বশতঃই স্থূলদেহের বৈলক্ষণ্য হয় ॥ ১০ ॥

যদি আত্মা দেহ হইতে ভিন্ন, তবে দেহে অহং অভিমান হয় কিরূপে? এই

अत्र दृष्टान्तमाह—

न स्वातन्त्र्यात् तदृते छायावच्चित्रवच्च ॥ १२ ॥

यदि आत्मना विना देहे अहम् इति प्रत्ययः, तदा मृतदेहे अहम् इति प्रत्ययः स्यात्। न च एवम्। यथा आवरणेन विना न छाया, भित्तिं विना न चित्रं, तथा अत्रापि ॥ १२ ॥

सूक्ष्मदेह एव आत्मा भविष्यति इत्यत्राह—

मूर्त्तत्वेऽपि न, सङ्घातयोगात् तरणिवत् ॥ १३ ॥

सङ्घातत्वात् मूर्त्तत्वात् परार्थः। 'तरणिवत्' इति यथा प्रकाशत्वे अपि मूर्त्तत्वात् न आदित्यस्य आत्मत्वम् ॥ १३ ॥

सम्भोगाभिमानादित्यर्थः, तद्वादादित्यस्यार्थमाह—आत्मवादादिति, तथाच देहावच्छेदक-सम्भोगाभिमाननिबन्धनादात्मवादादित्यर्थः। तद्वाद इति पदं व्याचष्टे—देह इत्यादिना ॥ ११ ॥

ऋतेति देहातिरिक्तात्मना विना अहमिति प्रत्ययो न भवतीत्यर्थ इत्यर्थः। सूत्रतात्पर्यं विवृणोति—यदीत्यादिना। एवं—मृतदेहे अहमिति प्रत्ययः। तथाच तदृते—आत्मना विना स्वातन्त्र्यात्—देहवशात् न देहे अहमिति प्रत्ययः इति सूत्रार्थः। दृष्टान्तं विशदयति—यथेत्यादिना ॥ १२ ॥

सूत्रान्तरावतरणिकामाह—सूक्ष्मेत्यादिना। सूत्रे नेति सूक्ष्मदेह आत्मेति शेषः। अत्र हेतुं दर्शयितुमाह—सङ्घातयोगादिति, अस्यार्थमाह—[illegible] सङ्घातत्वादिति, अस्य वाति-

---

আশঙ্কায় বলিতেছেন—আত্মাধিষ্ঠান সূক্ষ্মদেহের আশ্রয় স্থূলদেহে ভোগাভিমান বশে আত্মবাদ হয় বলিয়াই দেহে অহং এই অভিমান হয় ॥ ১১ ॥

দেহাতিরিক্ত আত্মা ভিন্ন যে দেহে অহং অভিমান হইতে পারে না তাহাতে দৃষ্টান্ত বলিতেছেন—দেহাতিরিক্ত আত্মা ভিন্ন যদি দেহে অহং অভিমান হইত,তবে মৃত শরীরেও অহং এইরূপ প্রতীতি হইতে পারিত। কিন্তু তাহা ত হয় না, সুতরাং আবরণ ভিন্ন যেমন ছায়া হয় না, ভিত্তি ভিন্ন যেমন চিত্র হয় না, সেইরূপ আত্মাতিরিক্ত দেহ ভিন্নও দেহে অহং এইরূপ প্রতীতি হয় না ॥ ১২ ॥

সূক্ষ্ম দেহই আত্মা হইবে এই আশঙ্কায় বলিতেছেন—যে হেতু যে মূর্ত্ত

मनः आत्मा भविष्यति इत्यत आह—

अणुपरिमाणं तत्कृतिश्रुतेः ॥ १४ ॥

मनः अणुपरिमाणं तत्क्रियायां श्रुतिदर्शनात् । निरुपाधेः न इन्द्रियत्वम् इति उपाधिः वक्तव्यः । यदि कर्णशष्कुली-वत् नियतावयवस्य उपाधित्वं, तदा तावन्मात्रे वृत्तिलाभः न अन्यत्र

विशदार्थमाह—मूर्त्तत्वादिति, हेतुगर्भविशेषणं पूरयति—परार्थ इति । तथाच यतः सूक्ष्मदेहः मूर्त्तत्वात् परार्थः अतः मूर्त्तोऽपि न स आत्मेति सूत्रार्थः । मूर्त्तत्वस्य परार्थत्वव्याप्यत्वं सिद्धमेव, परार्थस्यात्मत्वे तस्य तस्यापि परार्थत्वापत्त्या अनवस्थास्यादतः परार्थभिन्न एवात्मा वक्तव्य इति भावः । दृष्टान्तं विशदयति—यथेत्यादिना ॥ १३ ॥

मनस आत्मत्वनिरासकं सूत्रमवतारयति—मन इत्यादिना । विशेष्यपदं पूरयित्वा सूत्रं व्याचष्टे—मन इत्यादिना, अणुपरिमाणं—सूक्ष्मपरिमाणं, तत्क्रियायां—मनसः क्रियावत्त्वे, श्रुतिदर्शनात्—"असंशयं महाबाहो ! मनो दुर्निग्रहं चलम्" मित्यादि गीताषष्ठाध्यायभगवद्वाक्यदर्शनात् । विभुत्वे च क्रिया न सम्भवतीति सुष्ठूक्तं तत् कृतिश्रुतेरणुपरिमाणं मन इति एवञ्चात्मनो विभुत्वश्रवणात्, नाणुपरिमाणं मन आत्मा भवितुमर्हतीति भावः । एवं मनस आत्मत्वाभावसाधकं अणुपरिमाणत्वं साधित्वा व्यापकत्वे बाधं दर्शयति—अथेत्यादिना । न इन्द्रियत्वमिति, उपाधिरहितस्य विभोरिन्द्रियत्वे सर्व्वत्रैव तदिन्द्रियकार्य्यकारित्वप्रसङ्गात् नेन्द्रियत्वं सम्भवतीत्यर्थः । उपाधिर्वक्तव्य इति मनसो व्यापकत्वाङ্গीकारे तस्येन्द्रियत्वरक्षार्थमवश्यमाकाशस्य कर्णशष्कुली-

---

সেই পদার্থ, অতএব মূর্ত্তত্ব আছে বলিয়াও সূক্ষ্মদেহ আত্মা হইতে পারে না, যেমন আদিত্য প্রকাশস্বভাব হইলেও মূর্ত্তত্ব নিবন্ধন আত্মা নহে ॥ ১৩ ॥

মনই আত্মা হউক, এই আশঙ্কায় বলিতেছেন—মনের সক্রিয়ত্বে শ্রুতি আছে, সুতরাং মন সূক্ষ্ম, (কারণ ব্যাপক বস্তু সক্রিয় হইতে পারে না, যেমন আকাশ ব্যাপক তাহার ক্রিয়া নাই) অতএব সূক্ষ্ম মন আত্মা হইতে পারে না, কারণ আত্মা যে বিভু এবিষয়ে শ্রুতির অভাব নাই। ব্যাপকপদার্থ উপাধ্যবচ্ছিন্ন না হইয়া ইন্দ্রিয় হইতে পারে না, সুতরাং মন যদি বিভু হয় তবে তাহার ইন্দ্রিয়ত্ব রক্ষার জন্য অবশ্যই কোন উপাধি স্বীকার করিতেই হইবে, যেমন আকাশের কর্ণবিবরাবচ্ছেদেই ইন্দ্রিয়ত্ব, সেইরূপ কোন নিয়ত অবয়বাবচ্ছেদে যদি মানবের ইন্দ্রিয়ত্ব স্বীকার করা যায়, তবে শ্রোত্রের ন্যায় মনেরও কেবল সেই নিয়ত অবয়বাবচ্ছেদেই বৃত্তি হইতে পারে অন্য

ইতি শ্রোত্রবৎ প্রসজ্যেত। ততশ্চ দেহমাত্রম্ উপাধিঃ বক্তব্যঃ। তথা চ তদবচ্ছেদেন বৃত্তিলাভে 'শিরসি মে বেদনা' 'পাদে মে সুখম্' ইতি অব্যাপ্যবৃত্তিত্বপ্রতীতিবিরোধঃ॥ যুগপজ্‌জ্ঞানানুৎপত্তেঃ অপি মনসঃ অণুত্বম্ আহু। ন্যায়শ্চ অন্যত্র প্রপঞ্চিতঃ ইতি॥ ১৪॥

বত্ কল্পনীয়োপাধিরঙ্গীকর্ত্তব্য ইতি ভাবঃ। উপাধ্যঙ্গীকারাসম্ভবং দর্শয়তি—যদীত্যাদিনা। তাবন্মাত্রে—উপাধিতয়া কল্পিতেনাবয়বেনাবচ্ছিন্নে দেহে অন্যত্র—তদবয়বানবচ্ছিন্নে দেহে, অত্র দৃষ্টান্তং দর্শয়তি শ্রোত্রবদিতি, যথা শ্রোত্রস্য কর্ণশষ্কুল্যবচ্ছিন্নদেহ এব বৃত্তিলাভো নান্যত্র, তথা মনসোঽপি স্বোপাধ্যবয়বাবচ্ছিন্নদেহ এব বৃত্তিলাভঃ স্যান্নান্যত্রেত্যর্থঃ। ততশ্চ—অবয়ববিশেষস্যোপাধিত্বাসম্ভবাচ্চ, দেহমাত্রং—সামান্যতো দেহঃ, অত্র দোষং দর্শয়িতুমাহ—তথাচেতি, তদবচ্ছেদেন—সামান্যতো দেহাবচ্ছেদেন, বৃত্তিলাভে—মনসো বৃত্তিলাভে, অব্যাপ্যবৃত্তিত্বপ্রতীতিবিরোধঃ—দেহস্য কিঞ্চিদ্দেশাবচ্ছিন্নবৃত্তিত্বজ্ঞানবিরোধঃ, শিরআদিদেশস্যোপাধিত্বাভাবেন তদবচ্ছিন্নবৃত্তিত্ববোধস্যাযুক্তত্বাদিতি ভাবঃ। মনসোঽণুত্বসাধনে প্রকারান্তরং দর্শয়তি—যুগপদিত্যাদিনা, আহুরিতি নৈয়ায়িকপ্রমুখা ইতি শেষঃ। ন্যায়ঃ—যুগপজ্‌জ্ঞানানুৎপত্তের্মনসোঽণুত্বসাধকত্বে যুক্তিঃ, অন্যত্র—ন্যায়গ্রন্থে প্রপঞ্চিতঃ—বিশেষতঃ প্রতিপাদিতঃ, তথাহি—চক্ষুরাদীনাং নানেন্দ্রিয়াণাং সত্যপি বিষয়সন্নিকর্ষে একাত্মন্য কদা চাক্ষুষরাসনাদীনি নোৎপদ্যন্ত ইত্যনুভবাদনুমাতব্যং তত্তদিন্দ্রিয়সংযোগি সহকারিনিমিত্তান্তরমব্যাপকং কিঞ্চিদস্তি, যস্যসম্বন্ধশালিনেন্দ্রিয়েণ জ্ঞানমুৎপদ্যতে সম্বন্ধাভাববতা চেন্দ্রিয়েণ জ্ঞানং নোৎপদ্যত ইতি, তাদৃশঞ্চ মন এব, তস্য বিভুত্বে চ সম্বন্ধাভাবাসম্ভবাদেকদা নানাজ্ঞানানুৎপত্তির্ন সম্ভবতীতি সিদ্ধং যুগপজ্‌জ্ঞানানুৎপত্তেরণু মন ইতি॥ ১৪॥

অবয়বাবচ্ছেদে বৃত্তি হইতে পারিবে না, সুতরাং মনের উপাধি স্বীকার করিতে হইলে সামান্যতঃ দেহকেই উপাধি বলিতে হয়, কিন্তু তাহা হইলেও সামান্য দেহাবচ্ছেদেই বৃত্তিলাভ হইতে পারে বলিয়া "আমার মস্তকে বেদনা" "পাদে সুখ" ইত্যাদি একদেশাবচ্ছিন্ন বৃত্তির প্রতীতির বিরোধ হয়। এককালে জ্ঞানদ্বয়ের উৎপত্তি হয় না বলিয়াও নৈয়ায়িক প্রভৃতি দার্শনিকগণ মনের অণুত্ব স্থাপন করিয়াছেন। তাহার যুক্তি অন্যত্র বিশদভাবে বর্ণিত আছে। (টীকা দ্রষ্টব্য)॥ ১৪॥

हेत्वन्तरम् आह—

तदन्नमयत्वश्रुतेः ॥ १५ ॥

तस्य मनसः अन्नमयत्वे श्रुतिः अस्ति। अन्नमयत्वेन च सौम्यत्वं दर्शितम्। सौम्यत्वं च चन्द्ररूपत्वम् इति। न च आत्मा चन्द्रः। श्रुतिश्च 'अन्नं वै प्राणाः'। प्राणश्च चन्द्रमयः श्रेयः। चन्द्रमा मनसो जातः तस्मात् अणु मनः न आत्मा इति ॥ १५ ॥

पुरुषार्थं महदादीनां प्रवृत्तिः संसृतिः किमर्थम्? इत्यत्राह—

पुरुषार्थं संसृतिर्लिङ्गानां सूपकारवद्राज्ञः ॥ १६

यथा प्रवृत्तिः तथा संसृतिः। संसृतौ च मरणदुःखम् इति निर्विण्णो भवति। 'सूपकारवत्' इति परार्थम् एव प्रवृत्तिः ॥ १६ ॥

हेत्वन्तरमिति, मनस आत्मत्वाभावे युक्त्यन्तरमित्यर्थः। सूत्रतात्पर्य्यं विवृणोति—तस्ये-त्यादिना। ततः किमित्यत आह—अन्नमयत्वेन च सौम्यत्वं दर्शितमिति, "अन्नमयं हि सौम्यमन" इति छान्दोग्योपनिषत्षष्ठाध्यायपञ्चखण्डचतुर्थश्लोकेन प्रतिपादितमित्यर्थः, (तथाच वृत्तिकृन्मते निरुक्तश्रुत्युक्तसौम्यपदं न सम्बोधनार्थकं, परन्तु मनसो विशेषणमिति मन्तव्यम्) किन्तत् श्रुतिप्रतिपाद्यं सौम्यत्वमित्याकाङ्क्षायामाह—चन्द्रमयत्वमिति। ननु चन्द्रमयत्वेऽपि प्रकृते किमायातमित्यत आह—नच आत्मा चन्द्र इति। मनसोऽन्नमयत्वश्रुतिं दर्शयितुमाह—श्रुति-श्चेति। तथाच अन्नमित्यादि प्रदर्शितसर्व्ववाक्यार्थपर्य्यालोचनया कार्य्यकारणयोरभेदाङ्गीकारे मनसः अन्नमयत्वमपि सिद्धमिति मन्तव्यम्। उपसंहरति—तस्मादित्यादिना ॥ १५ ॥

सूत्रान्तरमवतारयितुं प्रश्नयते—पुरुषेत्यादिना। दृष्टान्तप्रदर्शनेन सूत्रं व्याचष्टे—यथे-

মন যে আত্মা হইতে পারে না, তাহাতে যুক্ত্যন্তর বলিতেছেন—মনের অন্ন-ময়ত্বে শ্রুতি আছে, ছান্দোগ্য উপনিষদে অন্নময়ত্বদ্বারা মনের সৌম্যত্ব প্রদর্শিত হইয়াছে, সেই সৌম্যত্ব চন্দ্ররূপত্ব, চন্দ্র আত্মা নহে, শ্রুতিতে আছে—"অন্ন প্রাণময়, প্রাণ চন্দ্রময়, চন্দ্রমা মন হইতে উৎপন্ন" সুতরাং কার্য্যকারণের অভেদ বশতঃ মনের অন্নময়ত্বও প্রতিপন্ন হইবে। অতএব সূক্ষ্ম মন আত্মা নহে, ইহাই সিদ্ধান্ত ॥ ১৫ ॥

পুরুষার্থসাধনের জন্যই যদি মহদাদির প্রবৃত্তি হয়, তবে লিঙ্গদেহের

विप्रतिपत्तौ सत्यां स्वपक्षमाह—

पाञ्चभौतिको देहः ॥ १७ ॥

स्पष्टम् ॥ १७ ॥

का विप्रतिपत्तिः इत्यत आह—

चातुर्भौतिकमित्यन्ये ॥ १८ ॥

आकाशपरित्यागेन चातुर्भौतिकं शरीरम् इति अन्ये ॥ १८ ॥

मतान्तरम् आह —

ऐकभौतिकमपरे ॥ १९ ॥

पार्थिवं शरीरम् इति ॥ १९ ॥

यादिना, पुरुषार्थत्वमेव प्रकाशयितुमाह—संहताविति। सूपकारवदिति दृष्टान्तस्य फलमाह—
ार्थमेव प्रवृत्तिरिति ॥ १६ ॥

विप्रतिपत्ताविति, वक्ष्यमाणचातुर्भौतिकत्वादिविरुद्धबुद्धावित्यर्थः। स्पष्टमिति, पञ्चानां भूतानां क्षित्यादीनां मिलितानां परिणामो देह इति व्याख्यानं सुव्यक्तमित्यर्थः ॥ १७ ॥

विप्रतिपत्तिप्रदर्शनपरं सूत्रमवतारयति—केत्यादिना। "चातुर्भौतिकत्वे कस्य भूतस्य परित्यागः" इत्याकाङ्क्षायां सूत्रं व्याचष्टे—आकाशेत्यादिना ॥ १८ ॥

मतान्तरमिति, शरीरस्य भौतिकत्वविषये विप्रतिपत्त्यन्तरमित्यर्थः। ऐकभौतिकत्वपक्षे कस्य भूतस्य ग्रहणमित्याकाङ्क्षायामाह—पार्थिवं शरीरमिति। एतन्मते अन्यानि चतुर्भूतान्यु-

অপগমে হয় কেন? এই আশঙ্কায় বলিতেছেন—প্রবৃত্তির ন্যায় লিঙ্গের অপগমে পুরুষার্থই হইয়া থাকে, কারণ সেই অপগমে পুরুষের মরণ দুঃখ হয় ও তজ্জন্য নিতান্তই খেদান্বিত হয়। (ফলে বৈরাগ্য জন্মে) "যেমন পাচক রাজার জন্যই রন্ধনাদিতে প্রবৃত্ত হয়, সেইরূপ মহদাদির প্রবৃত্তি এবং লিঙ্গের সংসৃতিও পুরুষার্থ ॥ ১৬ ॥

দেহ সম্বন্ধে নানাবিধ বিরুদ্ধ মত আছে, তন্মধ্যে নিজের মত বলিতেছেন—দেহ ক্ষিতি, জল, তেজ, বায়ু ও আকাশ এই পঞ্চভূতে নির্মিত ॥ ১৭ ॥

বিপ্রতিপত্তি কিরূপ? তাহাই দেখাইতেছেন—কেহ কেহ বলেন, শরীর আকাশ ভিন্ন চতুর্ভূতে নির্মিত ॥ ১৮ ॥

देहचैतन्यं निरस्यति—

न सांसिद्धिकं चैतन्यं प्रत्येकादृष्टेः ॥ २० ॥

पृथक्पृथग्भूतेषु चैतन्यादर्शनात् न स्वभावचैतन्यम्। अत एव मिलितानां च चैतन्यं न आशङ्कनीयम्। अन्यथा हि प्रत्येकं क्षुद्रजन्तुसंयमनसमर्थास्तन्तवः मिलिताः ते हस्तिनम् अपि संयमयन्ति, न च एवंभूतानि भूतानि। न देहचैतन्यम् ॥ २० ॥

पञ्चात्मकमाधारणीति मन्तव्यम्। केचित् ऐकभौतिकमनेकभौतिकमित्यपि व्याचक्षते, यथा मनुष्यादिशरीरे पार्थिवांशाधिक्येन पार्थिवता, तथा सूर्यादिशरीरे तैजसांशाधिक्येन तैजसादितेति तेषामाशयः ॥ १९ ॥

चैतन्यस्य देहधर्मत्वं वदतां चार्वाकाणां मतस्य निरासकं सूत्रमवतारयति—देहेत्यादिना। "प्रत्येकादृष्टे"रितिपदं व्याचष्टे—पृथगित्यादिना, "सांसिद्धिकं चैतन्य" मित्यस्य विवरणं स्वभावचैतन्यमिति, भूतानामिति शेषः। ननु प्रत्येकं चैतन्यं मास्तु मिलितानामेव देहरूपेण परिणतानां धर्मो भविष्यतीत्याशङ्कायामाह—अत एवेति। प्रत्येकधर्मत्वाभावादेवेत्यर्थः। प्रत्येकावृत्तिधर्मो न तत्समुदाये दृष्टचर इति भावः। इममेवार्थं दृष्टान्तेन द्रढयति—अन्यथेत्यादिना। एवं—मिलितान्यपि चैतन्यवन्ति। फलितमाह—नेत्यादिना ॥ २०

অন্য মত বলিতেছেন,—অপর কেহ কেহ বলেন, দেহ কেবল পৃথিবীদ্বারা নির্ম্মিত ॥ ১৯ ॥

চার্ব্বাকমতাবলম্বিগণ বলে চৈতন্য দেহের ধর্ম্ম, তাহার নিরাস করিতেছেন,—পৃথক্ পৃথক্ ক্ষিত্যাদিভূতে যখন চৈতন্য দৃষ্ট হয় না, তখন চৈতন্য ভূতগণের স্বভাবসিদ্ধ ধর্ম্ম হইতে পারে না, অতএব মিলিত অর্থাৎ দেহরূপে পরিণত ভূতগণেরও ধর্ম্ম হইতে পারে না। কারণ পৃথক্ভাবেও যাহাতে যে গুণ থাকে, মিলিত হইলে তাহার বৃদ্ধি হইতে দেখা যায়, যেমন প্রত্যেকতঃ সূত্র তন্তুগণ মিলিত হইলে হস্তিসংযমনের শক্তিও লাভ করিয়া থাকে, কিন্তু ভূতগণ এইরূপ নহে, অর্থাৎ প্রত্যেকতঃ চৈতন্যের লেশও ভূতগণে দৃষ্ট হয় না, যে মিলিত হইলে সেই চৈতন্যের বৃদ্ধি হইবে। সুতরাং চৈতন্য দেহের ধর্ম্ম নহে, ইহাই সিদ্ধান্ত ॥ ২০ ॥

दूषणान्तरम् आह—

प्रपञ्चमरणाद्यभावश्च ॥ २१ ॥

देहस्य चेतनत्वे प्रपञ्चत्वस्य मरणस्य अभावः, चेतनस्य नित्यत्वात् ॥ २१ ॥

अथ चेतनस्यापि मरणं मुक्तिः इति दूषणान्तरमाह—

मदशक्तिवच्चेत्, प्रत्येकपरिदृष्टे सौक्ष्म्यात् सांहत्ये तदुद्भवः ॥ २२ ॥

यथा मदशक्तिः प्रतिपुरुषे सूक्ष्मत्वेन दृष्टा, सांहत्ये महत्त्वात्, प्रभवात् दृढच्छिलामपि वहन्ति। न च भूतेषु अपि प्रत्येकं सूक्ष्मचैतन्यं दृष्टं, येन सांहत्ये देहे चैतन्यं स्यात्। 'न सांसिद्धिकम्' इति सूत्रे निषिद्धं निषेधमुखेन दर्शितं भवति, अत्र सूत्रे विधिमुखेन इति न पुनः उक्तम् ॥ २२ ॥

दूषणान्तरमिति, देहस्य चेतनत्वे अन्यदूषणमित्यर्थः। प्रपञ्चत्वपदस्य मरणपदव्याख्यानमभिसन्धाय सूत्रं व्याचष्टे—देहस्येत्यादिना। भाष्यकारस्तु "प्रपञ्चमरणाद्यभावश्चेति" सूत्रपाठं कल्पयित्वा "प्रपञ्चस्य सर्व्वस्यैव मरणसुषुप्त्याद्यभावश्च देहस्य स्वाभाविकचैतन्ये सति स्या"दिति व्याख्यातवान्। उक्तिकल्पनेऽपि आदिशब्देन सुषुप्त्यादीनामेवोपग्रहः। सुषुप्त्यादिकं देहस्य चेतनता, स्वाभाविकचैतन्ये च सति स्वभावस्य यावद्द्रव्यभावित्वेन सा नोपपद्यत इति भावः ॥ २१

सूत्रान्तरमवतारयति—अथेत्यादिना। सूत्रतात्पर्यं विवृणोति—यथेत्यादिना। एतत्-सूत्रप्रतिपाद्यदोषस्य पूर्व्वसूत्रे एव दर्शितत्वात् पुनरुक्तिरिति शङ्कामपाकरोति—नेत्यादिना ॥ २२

দেহের চেতনত্বে অন্য দোষ দেখাইতেছেন—দেহের চৈতন্য স্বীকার করিলে মরণের অভাব হইয়া পড়ে, কারণ চেতন নিত্য ॥ ২০ ॥

চেতনেরও ত মুক্তিরূপ মরণ আছে, সুতরাং দেহের মরণও তৎস্থানীয় হইবে, এই অভিপ্রায়ে অন্য দোষ দেখাইতেছেন—যেমন প্রতিপুরুষে সূক্ষ্ম মদশক্তি পরিদৃষ্ট হয় বলিয়া মদ্বিগণে মহৎশক্তির উদ্ভব হওয়ায় (পুরুষগণ) বৃহৎশিলাকেও বহন করিয়া থাকে, কিন্তু ভূতগণে প্রত্যেকতঃ সূক্ষ্ম চৈতন্যও দৃষ্ট হয় না, যদ্দ্বারা সম্মিলিত ভূতস্বরূপ দেহে মহৎ চৈতন্য হইবে। "ন সাংসিদ্ধিক"-

वैराग्यादीनां पारम्पर्य्येण मुक्तिसाधनत्वमुक्तम्। साक्षात् मुक्ति-साधनमाह—

ज्ञानान्मुक्तिः ॥ २३ ॥

व्यक्तम् ॥ २३ ॥

व्यतिरेकमाह—

बन्धो विपर्य्ययात् ॥ २४ ॥

अज्ञानात् ॥ २४ ॥

न ज्ञानमात्रात् मुक्तिः, कर्म्मणोऽपि मुक्तिसाधनत्वात्। तथा च श्रुतिः—'तं विद्याकर्म्मणी समन्वारभेते पूर्वप्रज्ञा च' इति। तत्राह—

नियतकारणत्वान्न समुच्चयविकल्पौ ॥ २५ ॥

नियतम् एव कारणम्। ज्ञानात् मुक्तिः, कर्म्मणः भुक्तिः। यत्रापि अकामकर्मणः समुच्चयः श्रूयते, तत्रापि ज्ञानार्थं, तस्मात् न समुच्चयः।

ज्ञानस्यैव साक्षान्मुक्तिसाधकत्वमित्यस्य प्रतिपादकं सूत्रमवतारयति—वैराग्यादीना ॥ २३ ॥

व्यतिरेकमिति, मुक्तिकारणविपरीतं बन्धकारणमित्यर्थः। अज्ञानादिति "विपर्य्यया"-दित्यस्य विवरणम् ॥ २४ ॥

सूत्रान्तरावतरणिकामाह—नेत्यादिना। सूत्रतात्पर्य्यं विवृणोति—नियतमित्यादिना,

বিত্যাদি পূর্ব্বসূত্রে নিষিদ্ধ চৈতন্য নিষেধমুখে প্রদর্শিত হইয়াছে, এই সূত্রে বিধিমুখে প্রদর্শিত হইল, সুতরাং পুনরুক্তি হইল না ॥ ২২ ॥

পারম্পর্য্যরূপে বৈরাগ্যাদির মুক্তিসাধনত্ব বলা হইয়াছে, সম্প্রতি সাক্ষাৎ মুক্তির সাধন বলিতেছেন—জ্ঞান হইতেই মুক্তি হয় ॥ ২৩ ॥

বন্ধের কারণ বলিতেছেন—অজ্ঞান হইতে বন্ধ হয় ॥ ২৪ ॥

কেবল জ্ঞান হইতেই যে মুক্তি হয়, তাহা নহে, কারণ কর্ম্মও ত মুক্তির সাধন, শ্রুতিতেও আছে—"জ্ঞান এবং কর্ম্ম উভয়েই মুক্তি সম্পাদন করে" এই

नापि कदाचित् ज्ञानात् कदाचित् कर्मणः इति विकल्पः। श्रुतिश्च—

"वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्। तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥" (बृह उप ४ अध्याय ४ब्रा २ मन्त्रः) ॥ २५

दूषणान्तरमाह—

स्वप्नजागराभ्यामिव मायिकामायिकाभ्यां नोभयोर्मुक्तिः पुरुषस्य ॥ २६ ॥

मायिकः स्वप्नः, अमायिकः जागरः। स्वप्नवत् कर्म, जागरवत्

नैयत्यं विशदयति—ज्ञानादित्यादिना। "नन्वेवं ज्ञानकर्म्मणोः समुच्चयश्रुतेः का गति"रित्याशङ्का-निराकरणायाह—एवं त्यादि, तथाच साक्षान्मोक्षसाधकस्य ज्ञानस्य सम्पादकतया परम्परया मोक्षपयोगित्वेनैव समुच्चयाभिधानं न तु साक्षान्मोक्षसाधकत्वेनेति स्थितम् ॥ २५ ॥

दूषणान्तरमिति ज्ञानकर्म्मणोः समुच्चये इति शेषः। सूत्रे मायिकामायिकाभ्यामिति स्वप्न-जागराभ्यामित्यस्य विशेषणम्, तच्च यथासंख्येन विशेषणत्वं स्पष्टयति—मायिक इत्यादिना। तत्र मायिकत्वमस्थिरत्वं, अमायिकत्वं तदपेक्षया स्थिरत्वम्। ज्ञानकर्म्मणोरपि समुच्चय-

আশঙ্কায় বলিতেছেন—জ্ঞান হইতে মুক্তি হয় ও কর্ম্ম হইতে ভোগ হয়, এরূপ কারণই নিয়ত আছে, তবে যে সব শ্রুতিতে জ্ঞান ও অকাম কর্ম্মের সমুচ্চয় উক্ত হইয়াছে—তাহাতেও মুক্তির কারণীভূত জ্ঞানের সম্পাদকত্বরূপেই বলা হইয়াছে, অর্থাৎ নিষ্কাম কর্ম্ম জ্ঞান সম্প্রদান করেন বলিয়া পরম্পরায় মুক্তির প্রয়োজক ইহাই সেই শ্রুতির তাৎপর্য্য, সুতরাং জ্ঞান ও কর্ম্ম উভয়ই যে সাক্ষাৎ মুক্তির কারণ, তাহা নহে। কদাচিৎ জ্ঞান হইতে মুক্তি হয় ও কদাচিৎ কর্ম্ম হইতে মুক্তি হয়, এইরূপ বিকল্পও বলা যায় না, কারণ শ্রুতি আছে—"অজ্ঞানের পরপারে বর্ত্তমান স্বপ্রকাশ এই মহাপুরুষকে আমি জানিয়াছি। তাহাকে জানিয়াই জীব মুক্তিলাভ করে, মুক্তিলাভের আর কোনও উপায় নাই ॥ ২৫ ॥

জ্ঞান ও কর্ম্মের সমুচ্চয়ে আরও দোষ বলিতেছেন—যেমন অস্থির স্বপ্ন-

ज्ञानम्। तुल्यकालयोः हि समुच्चयः, न तु स्वप्नजागरयोः तुल्यकालत्वं, तस्मात् न ज्ञानकर्मसमुच्चयः॥ २६॥

प्रत्ययत्वात् स्वप्नप्रत्ययवत् जागरप्रत्ययस्य अपि मिथ्यात्वम् इत्यत आह—

इतरस्यापि नात्यन्तिकम्॥ २७॥

स्वप्नप्रत्ययस्य अपि न आत्यन्तिकं मिथ्यात्वं, खपुष्पवत्, न च स्वात्मनि अपि मिथ्यात्वं, अन्यथा स्वप्न इत्येव न स्यात्। न च अत्यन्तादृष्टे स्वप्नः, किन्तु जाग्रद्दृष्टे अर्थे॥ २७॥

व्याघातकैककालानवस्थायित्वं प्रकटयितुं स्वप्नजागरसादृश्यं दर्शयति—स्वप्नवदित्यादिना। तथाचायं सूत्रार्थः—यथा मायिकामायिकाभ्यां स्वप्नजागराभ्यां विभिन्नकालावस्थायिभ्यां मिलिताभ्यां किञ्चिदपि न सिध्यति, तथा उभयोः—स्वप्नजागरवद्भिन्नकालयोः कर्मज्ञानयोरपि पुरुषस्य मुक्तिर्न सम्भवतीति। ज्ञानकर्मणोः समुच्चयासम्भवं सिद्धान्तयितुं दृष्टान्तीकृतस्वप्नजागरयोः समुच्चयासम्भवं विशदयति तुल्येत्यादिना। उपसंहरति तस्मादित्यादिना॥ २६॥

सूत्रान्तरमवतारयति—प्रत्ययत्वादित्यादिना, मिथ्यात्वमिति स्यादिति शेषः। स्वप्नप्रत्ययस्यापीति इतरस्यापीत्यस्य विवरणम्। स्वप्नस्यापि आत्यन्तिकमिथ्यात्वभावं साधयति—न चेत्यादिना। तथाच दृष्टान्तासिद्धेरेव न जाग्रत्प्रत्ययस्यापि मिथ्यात्वमिति स्थितम्॥ २७॥

পদার্থ ও তদপেক্ষা কথঞ্চিৎ স্থির জাগ্রৎ পদার্থ (বিভিন্ন কালাবস্থায়িত্ব-নিবন্ধন) একত্রিত হইয়া কোনও পুরুষার্থসাধন করে না, তেমনি স্বপ্নজাগরবৎ বিভিন্নকালীন কর্ম্ম এবং জ্ঞান হইতেও পুরুষের মুক্তি হইতে পারে না, কারণ তুল্যকালীন বস্তুরই সমুচ্চয় হইয়া থাকে, কিন্তু স্বপ্ন ও জাগরের ন্যায় কর্ম্ম এবং জ্ঞানেরও তুল্যকালত্ব নাই। অতএব জ্ঞান ও কর্ম্মের সমুচ্চয় সর্ব্বদা অসম্ভব॥ ২৬॥

প্রত্যয়ত্বের অবিশেষবশতঃ স্বপ্নপ্রত্যয়ের ন্যায় জাগ্রৎ প্রত্যয়েরও মিথ্যাত্ব হউক, এই আশঙ্কায় বলিতেছেন—স্বপ্ন প্রত্যয়েরও আকাশ-কুসুমের ন্যায় সর্ব্বথা মিথ্যাত্ব নাই, কেননা স্বরূপতঃই মিথ্যা স্বপ্ন এইরূপ ব্যবহারই হইতে পারিত না। অত্যন্ত অদৃষ্ট পদার্থেও স্বপ্ন হয় না, কিন্তু জাগ্রদ্দৃষ্ট পদার্থেরই স্বপ্ন হইয়া থাকে। (অতএব দৃষ্টান্তাসিদ্ধিবশতঃই জাগ্রৎপ্রত্যয়ের মিথ্যাত্ব হইতে পারে না)॥ ২৭॥

दृष्टकारणाभावात् सङ्कल्पमात्रेण योगिनां न सर्वा सिद्धिः इत्यत आह—

सङ्कल्पितेऽप्येवम् ॥ २८ ॥

न अस्मदादीनां सङ्कल्पात् सिद्धिः इति योगजधर्मोपष्टम्भितानां सिद्धानाम् अपि न भवितव्यम् । तस्मात् न मिथ्या इति ॥ २८ ॥

एतदेवाह—

भावनोपचयाच्छुद्धस्य सर्वं प्रकृतिवत् ॥ २९ ॥

यथा महदादीनां पूर्वम् अपेक्ष्य कार्य्यकरणं, प्रकृतेस्तु न कार्य्यकरणे कस्याऽपि अपेक्षा, तथा दृष्टकारणाभावादपि योगिनां भावनोपचयात् सर्वं सम्पद्यते ॥ २९ ॥

सूत्रान्तरावतरणिकामाह—दृष्टेत्यादिना । "सङ्कल्पितेऽपि योगिना सङ्कल्पमात्रेणापि सिद्धेऽपि एवं—न मिथ्यात्व"मिति सूत्रार्थं समर्थयति—नेत्यादिना । न मिथ्येति योगिनां सङ्कल्पितपदार्थ इत्यादिः ॥ २८ ॥

एतदेवेति योगिसङ्कल्पितार्थस्यामिथ्यात्वमेवेत्यर्थः । प्रकृतिवदिति दृष्टान्तं विकाशयन् सूत्रतात्पर्यं विवृणोति—यथेत्यादिना । योगिनामिति 'शुद्धस्य' इत्यस्य विवरणम्, शुद्धत्वद्योतनाय बहुवचनोपन्यासः । भावनायाः—ध्यानसाध्यसंस्कारविशेषस्य उपचयात्—उत्कर्षात् ॥ २९ ॥

দৃষ্টকারণের অভাব বশতঃই সঙ্কল্পমাত্রে যোগিদিগের সমস্ত সিদ্ধি হইতে পারে না। এই আশঙ্কায় বলিতেছেন—অস্মদাদির সঙ্কল্পমাত্রে সিদ্ধি হয় না বলিয়া যে যোগজন্য বিশেষ ধর্ম্মশালি সিদ্ধপুরুষদিগেরও হইতে পারিবে না, তাহা নহে। অতএব যোগিদিগের সঙ্কল্পমাত্র সিদ্ধ বস্তুও মিথ্যা নহে ইহাই সিদ্ধান্ত ॥ ২৮ ॥

যোগিদিগের সঙ্কল্পিত অর্থ যে মিথ্যা নহে, তাহাই বলিতেছেন—মহদাদির কার্য্যকরণে পূর্ব্বপূর্ব্বের অপেক্ষা থাকিলেও যেরূপ প্রকৃতির কার্য্যকরণে কাহারও অপেক্ষা নাই, সেইরূপ (অস্মদাদির কার্য্যসাধনে দৃষ্টকারণের অপেক্ষা থাকিলেও) দৃষ্টকারণাভাবেও ধ্যানসাধ্যসংস্কারের উৎকর্ষ বশতঃই যোগিদিগের সমস্ত সম্পন্ন হইয়া থাকে ॥ ২৯ ॥

भावनार्थं ध्यानमाह—

रागोपहतिर्ध्यानम् ॥ ३० ॥

रागो रजोगुणात् चलितत्वं, तदपहतिः,—निश्चलितत्वं ध्यानम् ॥ ३० ॥

तन्निष्पत्तिः कथम् इत्यत आह—

वृत्तिनिरोधात् तत्सिद्धिः ॥ ३१ ॥

वृत्तयः प्रमाणादयः पञ्च, तन्निरोधात् तन्निष्पत्तिः ध्यानसिद्धिः ॥ ३१ ॥

तन्निरोधः कथम् इत्यत आह—

धारणासनस्वकर्मणा तत्सिद्धिः ॥ ३२ ॥

धारणा नाभ्यादिदेशे चित्तधारणम्। आसनं स्वस्तिकादिः।

प्रसङ्गात् ध्याननिरूपकं सूत्रमवतारयति—भावनेत्यादिना। निश्चलितत्वमिति अभिभव इत्यर्थः ॥ ३० ॥

तत्सिद्धिरिति, ध्याननिष्पत्तिरित्यर्थः, कथं—केनोपायेन। प्रमाणादय इत्यादिना विपर्य्ययविकल्पनिद्रास्मृतीनां परिग्रहः। तत्रापि ध्येयातिरिक्तवृत्तिमात्रस्योपग्रहः कर्त्तव्यः, तथाच तन्निरोधपदेन सम्प्रज्ञातयोग एवोक्तो भवतीति मन्तव्यम्। योगाङ्गध्यानादिवद् योगस्यापि तत्त्वज्ञानकारणत्वं "अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीत्यादि" कठोपनिषदादिषु प्रतिपादितमस्तीत्यनुसन्धेयम् ॥ ३१ ॥

तन्निरोध इति, वृत्तिनिरोध इत्यर्थः। नाभ्यादीत्यादिपदेन हृदयपुण्डरीकादिपरिग्रहः।

(প্রসঙ্গতঃ) ভাবনার হেতু ধ্যান বলিতেছেন—রজোগুণ বশতঃ যে চাঞ্চল্য তাহার নাম রাগ, সেই রাগের অভিভবই ধ্যান পদার্থ ॥ ৩০ ॥

সেই ধ্যানের সিদ্ধি হয় কি সে? এই আশঙ্কায় বলিতেছেন—প্রমাণ বিপর্য্যয় বিকল্প নিদ্রা ও স্মৃতিরূপ যে পাঁচ প্রকার বৃত্তি, তাহার নিরোধ হইতে ধ্যানের সিদ্ধি হয় ॥ ৩১ ॥

সেই বৃত্তির নিরোধ হয় কি সে? এই আকাঙ্ক্ষায় বলিতেছেন—নাভি-

अनेन यमनियमप्राणायामप्रत्याहाराः उपलक्षिताः । स्वकर्म्म स्वजाति-विहितकर्म्मानुष्ठानम् इति वृत्तिनिरोधसिद्धिः ॥ ३२ ॥

नानासनेषु स्वमतमासनमाह—

स्थिरसुखमासनम् ॥ ३३ ॥

येन स्थैर्य्यं सुखं च स्यात्, तदासनम् अनुष्ठेयम् ॥ ३३ ॥

अन्यं निरोधोपायमाह—

निरोधश्छर्द्दिविधारणाभ्याम् ॥ ३४ ॥

छर्द्दिः—रेचकम् । विधारणं—कुम्भकम् । उपलक्षणमेतत् पूरकोऽपि द्रष्टव्यः ॥ ३४ ॥

किं तत् स्वकर्म्म इत्यत आह—

स्वकर्म्म स्वाश्रमविहितकर्म्मानुष्ठानम् ॥ ३५ ॥

स्पष्टम् ॥ ३५ ॥

स्वस्तिकादिरित्यादि पदेन पद्मादिपरिग्रहः । यमादीनि योगसूत्रोक्तान्येवाविदितव्यानि, तथाच सूत्राणि—"अहिंसासत्यमस्तेयब्रह्मचर्य्यपरिग्रहाः यमाः ।" "शौचसन्तोषतपःस्वाध्यायेश्वर-प्रणिधानानि नियमाः ।" "तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः ।" स्वविषया सम्प्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः ।" इति—एभिः, वृत्तिनिरोधसिद्धिरिति तत्सिद्धिरित्यस्य विवरणम् ॥ ३२ ॥

सूत्रान्तरमवतारयति—नानेत्यादिना । सूत्रतात्पर्य्यं विवृणोति—येनेत्यादिना ॥ ३३ ॥

अन्यमिति, धारणेत्यादि सूत्रोक्तापेक्षमित्यर्थः । भाष्यकारस्तु सूत्रमिदं "स्थिरसुखमासन" मिति सूत्रात् पूर्व्वं पठित्वा धारणानिरूपणपरतया व्याख्यातवानित्यनुसन्धेयम् ॥ ३४ ॥

এবং হৃদয়পুণ্ডরীকাদি দেশে চিত্তধারণরূপ ধারণা স্বস্তিক পদ্মাদি আসন যোগশাস্ত্রোক্ত যমনিয়মপ্রাণায়ামপ্রত্যাহার ও স্বজাতিবিহিত কর্ম্মের অনুষ্ঠান ইহাদের দ্বারা বৃত্তিনিরোধের সিদ্ধি হয় ॥ ৩২ ॥

নানাবিধ আসনের মধ্যে স্বাভিমত আসন বলিতেছেন—যেই আসনদ্বারা স্থিরতাও সুখ হয়, সেই আসনই অনুষ্ঠেয় ॥ ৩৩ ॥

নিরোধের উপায় বলিতেছেন—রেচক কুম্ভক এবং পূরকদ্বারাও বৃত্তি নিরোধ হয় ॥ ৩৪ ॥

अन्यं वृत्तिनिरोधोपायमाह—

वैराग्यादभ्यासाच्च ॥ ३६ ॥

वैराग्यात् द्विविधात्, अपरात्—अलम् इति प्रत्ययात्, परात् ज्ञानप्रसादमात्रात्। अभ्यासात् पौनःपुन्येन ध्यानात्। चः समुच्चये ॥ ३६ ॥

वृत्तीनाम् अवान्तरभेदमाह—

विपर्य्ययभेदाः पञ्च ॥ ३७ ॥

अविद्या मिथ्याज्ञानं, अस्मिता अभिमानः, रागः अनुरागः,

धारणेत्यादिसूत्रोक्तस्वकर्म्मणो निरूपकं सूत्रमवतारयति—किमित्यादिना। "स्वस्य य आश्रमः ब्रह्मचर्य्यादीनामन्यतमः तस्मिन् विहितस्य कर्म्मणः अनुष्ठानं यथाविधि आचरणं स्वकर्म्मेति" सूत्रार्थः ॥ ३५ ॥

सूत्रान्तरमवतारयति—अन्यमित्यादिना। परापरभेदेन वैराग्यस्य द्वैविध्यादाह—द्विविधादिति। अलमिति प्रत्ययादिति "अनुभूयमानं सर्व्वमेवव्यर्थ" मिति ज्ञानादित्यर्थः। ज्ञानप्रसादमात्रादिति पूर्व्वोक्तात् गुणवैतृष्ण्यरूपादित्यर्थः। चः समुच्चय इति, चकारः धारणादीनामपि समुच्चायक इत्यर्थः। तथाच न केवलं धारणादिभ्यः परापरवैराग्याभ्यां अभ्यासाच्च वृत्तिनिरोधो भवतीति सूत्रार्थः ॥ ३६ ॥

तदेवं "ध्यानान्मुक्ति" रिति सूत्रार्थं प्रतिपाद्य "पञ्चो विपर्य्यया" दिति सूत्रार्थं प्रतिपादयितुमुना, विपर्य्ययनिरूपकं सूत्रमुत्थापयति—वृत्तीनामित्यादिना। वृत्तीनामवान्तरभेदमिति वृत्तीनां

ধারণেত্যাদি সূত্রোক্ত স্বকর্ম্ম কি ? এই আকাঙ্ক্ষাবশতঃ বলিতেছেন—ব্রহ্মচর্য্যাদি অন্যতম যে নিজের আশ্রম তদ্বিহিত কর্ম্মানুষ্ঠানের নাম স্বকর্ম্ম ।৩৫।

বৃত্তিনিরোধের অন্য উপায় বলিতেছেন (এই সূত্রের চকার ধারণাদির সমুচ্চায়ক) কেবল যে ধারণাদি হইতেই বৃত্তি নিরোধ হয়, তাহা নহে, পরন্তু "দৃশ্যমান সমস্তই ব্যর্থ" এতাদৃশ জ্ঞানরূপ অপর বৈরাগ্য পর্ব্বোক্ত গুণ বৈতৃষ্ণ্যরূপ পরবৈরাগ্য এবং পুনঃ পুনঃ ধ্যানরূপ অভ্যাস হইতেও বৃত্তি নিরোধ হয় ॥ ৩৬ ।

বৃত্তির মধ্যে বিপর্য্যয়ের অবান্তর ভেদ বলিতেছেন—অবিদ্যা (মিথ্যাজ্ঞান)

द्वेषः क्रोधः, अभिनिवेशः त्रासः इति विपर्ययेण विपर्ययिज्ञानम् उपलक्षितम् ॥ ३७ ॥

अशक्तिमाह—

अशक्तिरष्टाविंशतिधा ॥ ३८ ॥

तुष्टिमाह—

तुष्टिर्नवधा ॥ ३९ ॥

পুস্তকালয়

सिद्धिमाह—

सिद्धिरष्टधा ॥ ४० ॥

मध्ये विपर्ययस्यावान्तरभेदमित्यर्थः। "योगदर्शनोक्ताः अविद्यास्मितारागद्वेषाभिनिवेशाः विपर्ययस्यावान्तरभेदा" इति सूत्रार्थं विशदयति—अविद्येत्यादिना। अधर्मामित्रादिष्विवात्र विरोधार्थकनञ्समासमभिप्रेत्याविद्यापदार्थमाह—मिथ्याज्ञानमिति, अनित्यादिषु नित्यादि-ज्ञानरूपं तत्त्वज्ञानविरोधि भ्रमज्ञानमेवाविद्या, न तु तत्त्वज्ञानाभाव इति भावः। ननु "विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठ"मिति सामान्यलक्षणोपात्तमिथ्याज्ञानत्वाभावेन रागादीनां कथं विपर्ययावान्तरभेदत्वमित्यत आह—विपर्ययेणेत्यादि। विपर्ययेण—रागादिना, विपर्ययि—ज्ञानं रागादिविषयकं ज्ञानं, उपलक्षितं—इह विवक्षितं। तथाच रागादौ मिथ्याज्ञानत्वा-भावेऽपि विवक्षिते तज्ज्ञाने मिथ्याज्ञानत्वानपायान्न विपर्ययावान्तरभेदत्वहानिरिति ॥ ३७ ॥

अशक्तिमिति विपर्ययकारणीभूतामशक्तिमित्यर्थः। अशक्तेरष्टाविंशतिप्रकारत्वं "एव-मितरस्या" इति सूत्रे दर्शयिष्यते ॥ ३८ ॥

तुष्टेर्नवधात्वं सिद्धेरष्टधात्वञ्च स्वयमेव वक्ष्यतीति सुगमम् ॥ ३९—४० ॥

অস্মিতা (অভিমান) রাগ (অনুরাগ) দ্বেষ (ক্রোধ) ও অভিনিবেশ (ত্রাস) ভেদে বিপর্য্যয় পাঁচপ্রকার। রাগাদি শব্দসকল বিষয়বাচী হইলেও এস্থলে বিষয়ি অর্থাৎ রাগাদিবিষয়ক জ্ঞানের বাচক বলিয়াই বিবক্ষিত, অতএব "বিপর্য্যয়ে মিথ্যাজ্ঞান"মিত্যাদি সূত্রোক্ত বিপর্য্যয়ের সামান্য লক্ষণের রাগাদিতে অব্যাপ্তি হইল না। ৩৭।

অশক্তি বলিতেছেন—অশক্তি অষ্টাবিংশতি প্রকার। ৩৮।

তুষ্টি বলিতেছেন—তুষ্টি নয় প্রকার। ৩৯॥

चतुर्थं विपर्य्ययभेदमाह—

अवान्तरभेदाः पूर्ववत् ॥ ४१ ॥

पूर्ववदिति—पूर्वाचार्य्यैः उक्ता, द्वाषष्टिः विपर्य्ययभेदाः । प्रकृति-महदहङ्कारपञ्चतन्मात्रेषु आत्मबुद्धिः अविद्या तमः अष्टविषयत्वात् अष्टधा । देवाः हि अणिमादिकम् आत्मीयत्वेन अभिमन्यन्ते, सा इयम् अस्मिता मोहः अष्टविषयत्वात् अष्टधा । शब्दादिषु तन्मात्रेषु पञ्चसु दिव्यादिव्यतया रागः महामोहः दशविषयत्वात् दशधा । शब्दादयः दश, अणिमाद्यष्टैश्वर्य्योपधानेन सहिताः, ते च अन्येन उपहन्यमानाः इति द्वेषः तामिस्रः अष्टादशविषयत्वात् अष्टादशधा । देवाः हि एतान् उपभुञ्जानाः असुरैः उपहन्यन्ते इति अभिनिवेशः

चतुर्थमिति विपर्य्ययाशक्तितुष्टिसिद्धिषु मध्ये इत्यर्थः । विपर्य्ययभेदं—सामान्यत उक्तानां पञ्चविधविपर्य्ययाणामवान्तरभेदम् । सूत्रं व्याचष्टे—पूर्ववदित्यादिना । पूर्व्वाचार्य्यैर्यथा द्वाषष्टिः विपर्य्ययभेदा उक्तास्तथैव मन्तव्या इत्यर्थः ।—द्वाषष्टिविपर्य्ययभेदान् दर्शयति—प्रकृतीत्यादिना । अत्रच कार्य्यकारणयोरभेदेन केवलविकृतिष्वात्मबुद्धेरपि तन्मात्रात्मबुद्धावेवान्तर्भावादविद्याया अष्टविधत्वहानिरिति विभावनीयम् । उपसंहरति—एवमिति, अविद्यादीनां दर्शितावान्तर-भेदैरित्यर्थः । अत्राविद्यादीनां तमआदिसंज्ञोत्कीर्त्तनं तत्तज्जनकत्वज्ञापनार्थमिति मन्तव्यम् । ईश्वरकृष्णेनापि अविद्यादीनां तमआदिसंज्ञोल्लेखेनैव विविधद्वाषष्टिभेदो दर्शितः, तथाहि—

সিদ্ধি বলিতেছেন—সিদ্ধি আট প্রকার ॥ ৪০ ॥

বিপর্য্যয় অশক্তি তুষ্টি ও সিদ্ধির মধ্যে পর্ব্বোক্ত পঞ্চবিধ বিপর্য্যয়ের প্রত্যেকতঃ অবান্তর ভেদ বলিতেছেন—পূর্ব্ববর্ত্তী আচার্য্যগণ বিপর্য্যয়ের দ্বাষষ্টি প্রকার ভেদ বলিয়াছেন, যথা—প্রকৃতি, মহৎ অহঙ্কার ও পঞ্চতন্মাত্রে আত্ম-বুদ্ধির নাম অবিদ্যা, এই অবিদ্যাকে সাংখ্যশাস্ত্রে "তমঃ" বলে। এই অবিদ্যা প্রকৃত্যাদি অষ্ট প্রকার ঐশ্বর্য্যকে আত্মীয় বলিয়া মনে করেন, সেই অভিমানই অস্মিতা, মোহ তাহার নামান্তর, এই অস্মিতাও অণিমাদি অষ্টবিধ বিষয় ভেদে অষ্ট প্রকার, শব্দাদি পঞ্চ তন্মাত্র দিব্য ও অদিব্য ভেদে দশ প্রকার, সুতরাং এই বিষয় ভেদে তত্তদ্বিষয়ক রাগ দশ প্রকার, মহামোহ ইহাদের

रागः अन्धतामिस्रः अष्टादशविषयत्वात् [अष्टादशधा । एवं द्वाषष्टिः इति ॥ ४० ॥

अशक्तिभेदान् आह—

एवमितरस्याः ॥ ४२ ॥

इतरस्याः अशक्तेः, एवं अनेकधा अष्टाविंशतिधा । एकादश इन्द्रियवधाः—

बाधिर्य्यं कुष्ठितान्धत्वं जड़ताऽजिघ्रता तथा ।
मूकताकौण्यपङ्गुत्वक्लैव्योदावर्त्तमुग्धताः ॥

भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः ।
तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्रः ॥ ४१ ॥

अशक्तिरष्टाविंशतिधेत्युक्तम्, तत्प्रतिपादकतया सूत्रमिदं व्याचष्टे—इतरस्या इत्यादिना । "एव" मित्यस्य विवरणं अनेकधेति, तस्यापि विवरणं अष्टाविंशतिधेति । अष्टाविंशतिविधत्वं प्रतिपादयन् बुद्धिवधहेतुमेकादशेन्द्रियवधमादौ दर्शयति—एकादशेत्यादिना । बाधिर्य्यं—बधिरता श्रवणशक्तेरभाव इति यावत्, कुष्ठिता—स्पर्शशक्तेरभावः, अन्धत्वं—दर्शनशक्तेरभावः जड़ता—रसनशक्तेरभावः आजिघ्रता—घ्राणशक्तेरभावः, मूकता—वाक्शक्तेरभावः, कौण्यं—ग्रहणशक्तेरभावः, पङ्गुता—गमनशक्तेरभावः, क्लैव्यं—क्लीवता, उदावर्त्त—मलत्यागशक्तेरभावः, मुग्धता—बोधशक्तेरभावः, एते एकादश यथाक्रमं श्रोत्रादीनां इन्द्रियाणां वधाः स्वस्वकार्य्यसामर्थ्याभावा इत्यर्थः । एतद्विषयाः—एतदेकादशेन्द्रियवधहेतुकाः

নামান্তর। অণিমাদি অষ্ট প্রকার ঐশ্বর্য্যও শব্দাদি, ইহারা সকলেই অন্য-উপহন্যমান হয় বলিয়া তাহাতে দ্বেষ জন্মে, এই দ্বেষও অষ্টাদশ বিষয় ভেদে অষ্টাদশপ্রকার, তামিস্র, ইহাদের নামান্তর। এই অষ্টাদশ প্রকার বিষয় ভোগ করেন বলিয়া দেবগণ অসুর কর্তৃক উপহত হন, সুতরাং তাহাদের ত্রাস জন্মে, এই ত্রাসও অষ্টাদশ বিষয়ভেদে অষ্টাদশ প্রকার, অন্ধ তামিস্র ইহাদের নামান্তর। এইরূপে বিপর্য্যয়ের ভেদ ৬২ প্রকার ॥ ৪১ ॥

অশক্তির ভেদ বলিতেছেন—অশক্তির ভেদ অষ্টাবিংশতি প্রকার। যথা—বাধির্য্য (শ্রবণশক্তির অভাব) কুষ্ঠতা (স্পর্শন শক্তির অভাব) অন্ধত্ব

एतद्विधया एकादश बुद्धेः। नव तुष्टयः, अष्ट सिद्धयः, तद्विपर्य्ययेण सप्तदश बुद्धेः। एवम् अष्टाविंशतिः इति ॥ ४२ ॥

तुष्टिभेदान् आह—

आध्यात्मिकादिभेदान्नवधा तुष्टिः ॥ ४३ ॥

अनात्मनि आत्मबुद्ध्या प्रवर्त्तमाना आध्यात्मिकाः चतस्रः। आदि-शब्दात् बाह्याः पञ्च ॥ प्रकृतिविवेकदर्शनात् चेत् मुक्तिः, सैवोपास्या, किमात्मना इति प्रकृत्याख्या एका तुष्टिः अम्भः इति उच्यते। विवेक-

एकादश बुद्धेः अशक्तय इति शेषः। एवं इन्द्रियवधद्वारेण बुद्धेरशक्तीरुक्त्वा स्वरूपतो बुद्धेरशक्ती-र्दर्शयति नवेत्यादिना। तद्विपर्य्ययेण—तुष्टीनां सिद्धीनाञ्चाभावेन, बुद्धेः सप्तदशाशक्तय इत्यर्थः। एवं एकादशसप्तदश च मिलित्वा। तथाचोक्तं कारिकया—

एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा।
सप्तदशधा बुद्धेर्विपर्य्ययात्तुष्टिसिद्धीनाम् ॥ ४२ ॥

तुष्टिर्नवधेत्युक्तं तन्नवधात्वप्रतिपादकं सूत्रमवतारयति—तुष्टीत्यादिना। आदिशब्देन बाह्यानामुपग्रहात् आध्यात्मिक्यः बाह्याश्चेति प्रथमतो द्विविधास्तुष्टयः, तत्राध्यात्मिकीनां स्वरूप-माह—अनात्मन्नित्यादिना। यस्तावदसदुपदेशतुष्टः श्रवणमननादिना विवेकसाक्षात्काराय न यतते, तस्यैव चतस्र आध्यात्मिकास्तुष्टयो भवन्ति—तत्राद्यायाः स्वरूपमाह—प्रकृतीत्यादिना। सैव—प्रकृतिरेव, एवकारव्यवच्छेद्यं दर्शयति—किमात्मनेति, प्रकृत्युपासनारहितेन श्रवणादि-

(দর্শন শক্তির অভাব) জড়তা (রসন শক্তির অভাব) অজিঘ্রতা (ঘ্রাণশক্তির অভাব) মূকতা (বাক্‌শক্তির অভাব) কৌণিণ্য (গ্রহণ শক্তির অভাব) পঙ্গুতা (গমনশক্তির অভাব) ক্লৈব্য (নপুংসকত্ব) উদাবর্ত্ত (মলত্যাগ শক্তির অভাব) মুগ্ধতা (বোধশক্তির অভাব) এই একাদশ প্রকার ইন্দ্রিয়াসামর্থ্য জন্য বুদ্ধির অশক্তি একাদশ প্রকার, এবং নবতুষ্টি ও অষ্ট সিদ্ধির বিপর্য্যয় (অভাব) বুদ্ধির অশক্তি সপ্তদশপ্রকার, সুতরাং একাদশ ও সপ্তদশের সমষ্টিতে অশক্তি ২৮ প্রকার ॥ ৪২ ॥

তুষ্টির ভেদ বলিতেছেন—আধ্যাত্মিক ও বাহ্য ভেদে তুষ্টি ৯ প্রকার। আত্ম-ভিন্ন বস্তুতে আত্মবুদ্ধিদ্বারা প্রবর্ত্তমান আধ্যাত্মিক তুষ্টি ৪ প্রকার ও বাহ্য তুষ্টি ৫ প্রকার। যথা—প্রকৃতি বিবেক দর্শন হইতেই যদি মুক্তি হয়, তবে সেই

ज्ञानात् अपि न साक्षात्, अदर्शनात्, व्रतग्रहणात् भविष्यति इति उपादानाख्या द्वितीया तुष्टिः सलिलम् उच्यते। व्रतात् अपि न साक्षात्, किन्तु कालात् भवति इति कालाख्या तृतीया तुष्टिः, ओघः इति उच्यते। कालवशात् अपि न सर्वेषां मुक्तिः, किन्तु भाग्यात् एव इति भाग्याख्या चतुर्थी तुष्टिः वृष्टिः इति उच्यते। आत्मानम् अधिकृत्य इति आध्यात्मिकाः॥ पञ्चधा विषयोपरमात् बाह्या पञ्च। विषयार्जनदुःखात् उपरमे एका तुष्टिः पारम् उच्यते। रक्षणदुःखात् उपरमे द्वितीया तुष्टिः सुपारम् उच्यते। अर्थं भावयतः दुःखात् उपरमे तृतीया तुष्टिः पारपारम् उच्यते। भोगदोषं भावयतः दुःखात्

तत्परेणात्मना न किञ्चिदपि फलमित्यर्थः। अम्भ इत्युच्यत इति, प्रकृत्याख्यायास्तुष्टेः "अम्भ" इति पारिभाषिकं नामान्तरमित्यर्थः, एवमुत्तरत्रापि। द्वितीयायाः स्वरूपं दर्शयति—विवेकख्यातिना। न साक्षादिति, मुक्तिरिति शेषः। अत्र हेतुमाह—अदर्शनादिति, तर्हि कस्माद् भवतीत्याकाङ्क्षायामाह—व्रतग्रहणादिति, प्रव्रज्यारूपव्रतग्रहणादित्यर्थः। उपादानाख्येति, उपादीयते—फलसाधनाय गृह्यते इति उपादानं प्रव्रज्या, तदाख्येत्यर्थः। एवं तृतीयां चतुर्थीञ्च आध्यात्मिकीं तुष्टिं सुव्यक्तां नेव वृत्तिग्रन्थेन प्रदर्श्य बाह्यास्तुष्टीः प्रदर्शयितुमाह—पञ्चधेति,

প্রকৃতিই উপাস্য, প্রকৃতি নিরপেক্ষ কেবল আত্মার উপাসনা দ্বারা কি হইবে? এইরূপ একতুষ্টিকে প্রকৃত্যাখ্য তুষ্টি বলে, "অম্ভ" ইহার পারিভাষিক নামান্তর। বিবেকজ্ঞান হইতেও সাক্ষাৎ মুক্তি হয় না, যেহেতু সেরূপ দেখা যায় না, কিন্তু সন্ন্যাসাদি ব্রত গ্রহণ হইতেই মুক্তি হয়, এই দ্বিতীয় তুষ্টিকে উপাদানাখ্য তুষ্টি বলে, "সলিল" ইহার পারিভাষিক নামান্তর। ব্রত হইতেও সাক্ষাৎ মুক্তি হয় না কিন্তু কালবশেই হইয়া থাকে এই তৃতীয় তুষ্টিকে কালাখ্যতুষ্টি বলে, "ওঘ" ইহার পারিভাষিক নামান্তর। কালবশেও সকলের মুক্তি হয় না, কিন্তু ভাগ্যবশেই হইয়া থাকে এই চতুর্থতুষ্টিকে ভাগ্যাখ্য তুষ্টি বলে, "বৃষ্টি" ইহার পারিভাষিক নামান্তর। এই চতুর্বিধ তুষ্টি আত্মাবলম্বনে হয় বলিয়াই ইহাদিগকে আধ্যাত্মিক তুষ্টি বলে। পাঁচ প্রকার বিষয়োপরম বশে বাহ্য তুষ্টি পাঁচ প্রকার। বিষয়ের অর্জ্জন দুঃখ বশতঃ বিষয়োপরমে এক তুষ্টি হয়, ইহাকে "পার" বলে। "বিষয়ের রক্ষণ দুঃখ বশতঃ বিষয়োপরমে দ্বিতীয় তুষ্টি হয়

उपरमे चतुर्थी तुष्टिः अनुत्तमाम्भः उच्यते। न अनुपहत्य भूतानि भोगसिद्धिः इति दुःखात् उपरमे पञ्चमो तुष्टिः उत्तमाम्भः उच्यते। एवं नवधा इति ॥ ४३ ॥

सिद्धेः भेदान् आह—

ऊहादिभिः सिद्धिरष्टधा ॥ ४४ ॥

ऊहः तर्कः मननम् इति एका सिद्धिः तारम् उच्यते। शब्दज्ञानं द्वितीया सिद्धिः, सुतारम् उच्यते। अध्ययनं तृतीया सिद्धिः तारतारम् उच्यते। गुरुब्रह्मचारिणां प्राप्तिः चतुर्थी सिद्धिः रम्यकम् उच्यते।

अर्जनरक्षणक्षयभोगहिंसादोषदर्शनजनितपञ्चविधदुःखेन कामिनीकाञ्चनादिविषयवैराग्यात् पञ्च-बाह्यास्तुष्टयो भवन्तीत्यर्थः। ता एव विशद्य दर्शयति—विषयेत्यादिना ॥ ४३ ॥

सिद्धिरष्टधेत्युक्तम्, तदष्टधात्वप्रतिपादकं सूत्रमवतारयति—सिद्धेरित्यादिना। ऊहादि-भेदैः सिद्धिरष्टधा भवतीति सूत्रार्थः, तत्र क ऊहपदार्थः, के वा आदिपदग्राह्या इत्याकाङ्क्षायां तद्विवृतिफलकं व्याख्यानमाह—ऊह इत्यादिना। मननमिति संशयपूर्व्वपक्षनिराकरणे-नोत्तरपक्षव्यवस्थापनमित्यर्थः। शब्दज्ञानं—शब्दजनितमर्थज्ञानम्। अध्ययनं—यथाविधि गुरुमुखादध्यात्मविद्यानामक्षरस्वरूपग्रहणम्। अत्र च पूर्व्वं पूर्व्वं प्रत्युत्तरोत्तरस्य हेतुत्वात् पाठक्रमो नादरणीयः। न्यायेन स्वयं परीक्षितेऽप्यर्थे गुरुशिष्यसहाध्यायिभिः सह संवादेन विना श्रद्धा नोत्पद्यत इति संवादार्थं गुरुब्रह्मचारिप्राप्तेः सिद्धित्वमभिहितमिति मन्तव्यम्। आध्यात्मिकसिद्धि—दुःखात्मकसंशयविपर्य्यासानां परिहारेण विवेकसाक्षात्कारस्य स्वच्छप्रवाहे—

ইহাকে "সুপার" বলে। বিষয়ের ক্ষয় ভাবনা করিলে যে দুঃখ হয়, তদ্দশে বিষয়োপরমে তৃতীয় তুষ্টি হয়, ইহাকে "পারপার" বলে। ভোগের দোষ ভাবনা করিলে যে দুঃখ হয়, তদ্দশে বিষয়োপরমে চতুর্থ তুষ্টি হয়, ইহাকে "অনুত্তমাম্ভ" বলে। ভূত হনন না করিয়া ভোগসাধন করা যায় না, এই দুঃখ বশতঃ বিষয়োপরমে পঞ্চম তুষ্টি হইয়া থাকে, ইহাকে "উত্তমাম্ভ" বলে। এইরূপ আধ্যাত্মিক ও বাহ্য তুষ্টি ভেদে তুষ্টি নয় প্রকার ॥ ৪৩ ॥

সিদ্ধির ভেদ বলিতেছেন—(ঊহাদিভেদে সিদ্ধি ৮ প্রকার) ঊহ তর্ক অর্থাৎ মনন প্রথম সিদ্ধি ইহাকে "তার" বলে। শব্দজ্ঞান দ্বিতীয় সিদ্ধি, ইহাকে "সুতার" বলে। অধ্যয়ন তৃতীয় সিদ্ধি ইহাকে "তারতার" বলে।

बाह्यान्तःशुद्धिः पञ्चमी सिद्धिः सदामुदितम् उच्यते। आध्यात्मिकदुःखविघातः षष्ठी सिद्धिः प्रमोदम् उच्यते। आधिभौतिकदुःखविघातः सप्तमी सिद्धिः मुदितम् उच्यते। आधिदैविकदुःखविघातः अष्टमी सिद्धिः मोदमानम् उच्यते। एवम् अष्टधा इति। प्राधान्येन "विपर्य्ययाशक्तितुष्टिसिद्धिः" इति चतुःप्रकारा, अवान्तरभेदात् पञ्चाशत् ॥ ४४ ॥

उत्तरेण पूर्वपरित्यागात् सिद्धिः इति आह—

नेतरादितरहानेन विना ॥ ४५ ॥

इतरात् अशक्तितः इतरहानेन विपर्य्ययहानेन विना न सिद्धिः।

धनस्थापनम्, साक्षाद्धनैरन्यैर्दीर्घकालसेविताभ्यासपरिपाकेण विना न सम्भवतीति सुहृदा सोऽपि संगृहीतः। *दुःखानामाध्यात्मिकादिभेदाः प्रागेव व्याख्याताः। अत्र च त्रिविधदुःखविघाता एव मुख्याः सिद्धयः इतरास्तु पञ्च तदुपायतया गौण्य इत्यवधेयम्। तथापि ऊहादिसिद्धीनां ताराद्दीनि पारिभाषिकनामान्तराण्येव वृत्तौ दर्शितानि, तत्र च कौमुदीकारेणाध्ययनस्य नाम "तार" मूहस्य च नाम "तारतार"मभिहितम्। भाष्यकारेण तु पारिभाषिकाण्येतानि नामानि न दर्शितान्येवेत्यनुसन्धेयम्। प्राधान्येनेति, — अवान्तरभेदाविवक्षयेत्यर्थः। पञ्चाशदिति, अत्र पञ्चाशत्त्वाभिधानमपि अविद्यादीनां प्रत्येकावान्तरभेदाविवक्षयेति मन्तव्यम्, तथा च पञ्चविपर्य्ययाः अशक्तिरष्टाविंशतिधा, तुष्टिर्नवधा, सिद्धिरष्टधेति पञ्चाशदित्यर्थः ॥ ४४ ॥

গুরুব্রহ্মচারিগণের প্রাপ্তি চতুর্থ সিদ্ধি ইহাকে "রম্যক" বলে। বাহ্যাভ্যন্তর-শুদ্ধি পঞ্চম সিদ্ধি, ইহাকে "সদামুদিত" বলে। আধ্যাত্মিক দুঃখ বিঘাত ষষ্ঠ সিদ্ধি, ইহাকে "প্রমোদ" বলে। আধিভৌতিক দুঃখ বিঘাত সপ্তম সিদ্ধি, ইহাকে "মুদিত" বলে। আধিদৈবিক দুঃখবিঘাত অষ্টম সিদ্ধি, ইহাকে মোদমান বলে। প্রধানতঃ বিপর্য্যয় অশক্তি তুষ্টি ও সিদ্ধি এই ৪ প্রকার, অবান্তরভেদে ৫০ প্রকার। এস্থলে ইহাও জ্ঞাতব্য যে অবিদ্যাদি প্রত্যেকের অবান্তর ভেদ বিবক্ষা না করিয়া অর্থাৎ বিপর্য্যয়ের পাঁচ প্রকার মাত্র ভেদ বিবক্ষা করিয়াই এই পঞ্চাশৎ প্রকার ভেদ বলা হইয়াছে, অন্যথা এক বিপর্য্যয়েরই ৬২ প্রকার ভেদ প্রদর্শিত হওয়ায় তাহার সহিত বিরোধ হয় ॥৪৪॥

एवं तुष्टितः अशक्तिहानेन विना न सिद्धिः। एवं तद्धानेन विना इति ॥ ४५ ॥

सर्गे सति वैराग्यम् कति सर्गभेदाः? इत्यत्राह—

दैवादिप्रभेदाः ॥ ४६ ॥

आदिशब्दात् षड़्भेदाः। तथा च—

दैवादौ षड़्विधश्च स्यात् संसारः कर्मसम्भवः।

सुरोऽसुरो नरः प्रेतो नारकस्तिर्य्यकस्तथा ॥

स्थावराणां नारकेषु अन्तर्भावः ॥ ४६ ॥

उत्तरसूत्रस्य प्रतिपाद्यं संक्षेपेण प्रतिपादयंस्तदवतरणिकामाह—उत्तरेणेति। सूत्रं व्याचष्टे—इतरादित्यादिना, इतरादिति पदन्त्वार्षमेव। तद्धानेन—तुष्टिहानेन विना न सिद्धिरित्यर्थः। तथाच विपर्य्ययाशक्तितुष्टयो हातव्या इति भावः ॥ ४५ ॥

सूत्रान्तरमवतारयति—सर्गे इत्यादिना। आदिशब्दादिति आदिशब्देनासुरादीनामुपग्रहादित्यर्थः। षड़्भेदानेव दर्शयितुं प्रमाणमुपन्यस्यति—तथाचेत्यादिना। न्यूनतां परिहरति—स्थावराणामित्यादिना। कारिकया तु ब्राह्मप्राजापत्यः, ऐन्द्रं गान्धर्व्वः याक्षः राक्षसः पैशाचः इत्यष्टविधदैवसर्गः पशुमृगपक्षिसरीसृपस्थावरभेदेन तैर्य्यग्योनयः पञ्चविधः चतुर्ष्वपि वर्णेषु संस्थानस्याविशेषान्मानुष्यश्चैकविध इति संक्षेपतः भौतिकः सर्गः प्रदर्शितः। तत्र च "लोमवत्त्वाङ्गुलवत्त्व" पशुत्वमिति पशुलक्षणे सति पशुपदेन मुक्तिकादीनामलाभात्तत्संग्रहाय मृगपदोपादानमिति न पौनरुक्त्याम्। एवञ्च कारिकोक्तानामपि यथायथमत्रैवान्तर्भाव इति विभावनीयम् ॥ ४६ ॥

উত্তরোত্তরদ্বারা পূর্ব্ব পূর্ব্ব পরিত্যাগ বশেই সিদ্ধি হয়, ইহাই বলিতেছেন,—অশক্তি হইতে বিপর্য্যয় পরিত্যাগ ব্যতিরেকে সিদ্ধি হয় না, এবং তুষ্টি হইতে অশক্তি পরিত্যাগ ব্যতিরেকে সিদ্ধি হয় না। এবং তুষ্টি ত্যাগ ব্যতিরেকেও সিদ্ধি হয় না। সুতরাং বিপর্য্যয় অশক্তি ও তুষ্টি অবশ্য পরিত্যাজ্য ॥ ৪৫ ॥

সর্গ থাকিলেই সর্গে বৈরাগ্য হইতে পারে, অতএব সর্গের ভেদ কত প্রকার? এই আকাঙ্ক্ষায় বলিতেছেন—সূত্রের আদিশব্দ অনুসারে দৈবাদিভেদে সর্গের ভেদ ৬ প্রকার। ঋষিগণও বলিয়াছেন—কর্ম্মানুসারী সংসার দৈবাদি ভেদে ৬ প্রকার যথা—সুর অসুর নর প্রেত তির্য্যক ও নারক। স্থাবরদিগেরও নারকেই অন্তর্ভাব ॥ ৪৬ ॥

प्रकृतेः प्रवृत्तिशीलत्वात् सर्वदा सृष्टौ न मुक्तिः इत्यत आह —

आब्रह्मस्तम्भपर्य्यन्तं तत्कृते सृष्टिराविवेकात् ॥४७॥

तत्कृते—पुरुषकृते मोक्षार्थं सृष्टिः, विवेकपर्य्यन्तं प्रकृतेः शीलमिदं विवेकज्ञानं यावत् प्रवर्त्तते, स्वभावस्यानपायित्वात् ॥ ४७ ॥

कुत्र कथं सृष्टिः ? इत्यत्राह—

ऊर्द्ध्वं सत्त्वविशाला ॥ ४८ ॥

देवलोके ॥ ४८ ॥

नागलोके सृष्टिमाह—

तमोविशाला मूलतः ॥ ४९ ॥

पाताले ॥ ४९ ॥

मर्त्यलोके सृष्टिमाह—

मध्ये रजोविशाला ॥ ५० ॥

विशाला—उद्रिक्ता ॥ ५० ॥

सूत्रान्तरमवतारयति—प्रकृतेरित्यादिना। मोक्षार्थमिति पुरुषकृते इत्यस्यैव निष्कृष्टार्थः। सूत्रे आब्रह्मस्तम्भपर्य्यन्तमिति सृष्टिरित्यस्य विशेषणम्। विवेकपर्य्यन्तमिति आविवेकादित्यस्य विवरणं तात्पर्य्यार्थमाह प्रकृतेरित्यादिना। तथाच—आविवेकज्ञानानन्तरं तं पुरुषं प्रति प्रकृतेः प्रवृत्त्यभावान्न मोक्षानुपपत्तिरिति भावः ॥ ४७ ॥

व्यष्टि सृष्टेर्विभागप्रदर्शनपरं सूत्रत्रयमवतारयति—कुत्रेत्यादिना। देवलोक इति ऊर्द्ध्वमित्यस्य विवरणम्। पाताल इति मूलत इत्यस्य विवरणम् ॥ मध्य इति मर्त्त्यलोक इत्यर्थः ॥४८॥४९॥५०॥

প্রকৃতির প্রবৃত্তিশীলত্ব নিবন্ধন সর্ব্বদা সৃষ্টি হইলে মুক্তি হইতে পারে না, এই আশঙ্কায় বলিতেছেন—পুরুষের মুক্তির জন্য যে আব্রহ্মস্তম্ভপর্য্যন্ত সৃষ্টি হয় বিবেক অর্থাৎ তত্ত্বজ্ঞানই তাহার সীমা। কারণ প্রকৃতির স্বভাবই এইরূপ যে বিবেকজ্ঞান পর্য্যন্তই প্রবৃত্ত হয়, অথচ স্বভাবেরও কোন কালেই অপলাপ হয় না ॥ ৪৭ ॥

কোথায় কি প্রকার সৃষ্টি হয়, এই আকাঙ্ক্ষায় বলিতেছেন—দেব-

ननु एकैकस्य गुणानाम् अन्योऽन्यमिथुनभावात् कथं प्रकृतेः सृष्टिवैचित्र्यम् इत्यत आह—

कर्मवैचित्र्यात् प्रधानचेष्टा गर्भदासवत् ॥ ५१ ॥

यथा गर्भदासः विचक्षणः विचित्रं कर्म कुरुते प्रभोः अर्थाय, तथा प्रधानं पुरुषार्थं विचित्रां सृष्टिं कुरुते कर्मवैचित्र्यात् कर्मलाभात् ॥ ५१ ॥

उत्तरोत्तरभूमिलाभात् कृतकृत्यस्य किं मोक्षेण इत्यत आह—

आवृत्तिस्तत्रापि, उत्तरोत्तरयोनियोगाद्धेयः ॥५२॥

उत्तरोत्तरविशिष्टजन्मलाभेऽपि संसारे आवृत्तिः । तस्मात् हेयः संसारः ॥ ५२ ॥

सूत्रान्तरमवतारयितुं शङ्कते—नन्वित्यादिना एकैकस्य गुणानां—सत्त्वरजस्तमसां, अन्योन्य-मिथुनभावात्—परस्परगुणप्रधानभावात् । दृष्टान्तं विशदं सूत्रं व्याचष्टे—यथेत्यादिना । कर्मलाभादिति पुरुषाणां विचित्रभोगजनककर्मजन्यादृष्टलाभादित्यर्थः । तथाच विचित्रकर्म-निमित्तकमेव सृष्टिवैचित्र्यमिति भावः ॥ ५१ ॥

उत्तरोत्तरभूमिलाभादिति, सत्कर्मादिवशादुत्तरोत्तरोत्कर्षशालिस्वर्गादिभोगस्थानलाभा-दित्यर्थः । उत्तरोत्तरविशिष्टजन्मलाभेऽपीति तत्रापीत्यस्य विवरणम् । संसारे आवृत्तिः कथ-मित्याकाङ्क्षायामाह—सूत्रे उत्तरोत्तरयोनियोगादिति, अधोऽधोयोनिजन्मन इत्यर्थः । उपसंहरति —तस्मादिति, विशिष्टजन्मलाभेऽप्यावृत्तेरवश्यम्भावादित्यर्थः ॥ ५२ ॥

লোকে সত্ত্ববহুলা, পাতালে তমোবহুলা ও মর্ত্ত্যলোকে রজোবহুলা সৃষ্টি হয় ॥ ৪৮ ॥ ৪৯ ॥ ৫০ ॥

সত্ত্ব রজঃ ও তমঃ রূপ এক একটি স্বীয়গুণের গুণ প্রধান ভাব বশতঃ প্রকৃতি হইতে সৃষ্টির বৈচিত্র্য হয় কিরূপে ? এই আশঙ্কায় বলিতেছেন, —যেমন বিচক্ষণ গর্ভদাস প্রভুর প্রয়োজনে বিচিত্র কর্ম্ম করিয়া থাকে, সেইরূপ প্রধান ও বিচিত্র কর্ম্মলাভ বশতঃ বিচিত্র সৃষ্টি সম্পাদন করে ॥ ৫১ ॥

উত্তরোত্তর উৎকর্ষশালি স্বর্গাদি স্থানলাভে কৃতকৃত্য পুরুষের মুক্তির প্রয়োজন কি ? এই আশঙ্কায় বলিতেছেন—উত্তরোত্তর বিশিষ্ট

एतत् एव आह—

समानं जरामरणादिजं दुःखम् ॥ ५३ ॥

आब्रह्मस्तम्बपर्य्यन्तम् ॥ ५३ ॥

कारणे प्रकृतौ लयादेव कृतकृत्यस्य किं मोक्षेण इत्यत आह—

न कारणलयात् कृतकृत्यता मग्नवदुत्थानात् ॥५४॥

भवेदेवं, यदि प्रकृतिलीनस्य न पुनः आवृत्तिः। न तु एवं, पुनरावृत्तिश्रुतेः। तथा च—

दशमन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः।
भौतिकास्तु शतं पूर्णं, सहस्रं त्वाभिमानिकाः ॥
बौद्धा दश सहस्राणि तिष्ठन्ति विगतज्वराः।
पूर्णं शतसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः।
निर्गुणं पुरुषं प्राप्य कालसंख्या न विद्यते ॥

एतदेवेति,—मोक्षापेक्षया विशिष्टजन्मलाभस्यापि हेयत्वमेवेत्यर्थः। सूत्रार्थं विशदयितुं पूरयति—आब्रह्मेति। तथाच शरीरिमात्रस्यैव जरामरणादिजं दुःखं समानमित्यतोऽपि विशिष्ट-जन्मलाभोऽपि हेय इत्यर्थः ॥ ५३ ॥

सूत्रान्तरमवतारयितुं शङ्कते—कारण इत्यादिना। सूत्रतात्पर्य्यमाख्यातुं भूमिकामारचयति—भवेदित्यादिना, एवं—कृतकृत्यता। एवं अनावृत्तिः। पुनरावृत्तौ प्रमाणं दर्शयितुमाह—तथा-

---

জন্ম লাভ করিলেও সংসারে পুনরাবৃত্তি অবশ্যম্ভাবী, সুতরাং সংসার সর্ব্বথা পরিত্যাজ্য ॥ ৫২ ॥

মোক্ষ অপেক্ষা বিশিষ্ট জন্ম লাভের হেয়ত্বই বলিতেছেন—আব্রহ্মস্তম্ব পর্য্যন্ত সকলেরই জরামরণাদির জন্য দুঃখ সমান, সুতরাং বিশিষ্ট জন্ম লাভও হেয় ॥ ৫৩ ॥

প্রকৃতিরূপ কারণে লয় বশতঃই কৃতকৃত্য পুরুষের মোক্ষের প্রয়োজন কি? এই আশঙ্কায় বলিতেছেন—প্রকৃতি লয়ই কৃতকৃত্যতা হইত যদি প্রকৃতি লীনের পুনরাবৃত্তি না হইত, কিন্তু পুনরাবৃত্তি শ্রুতি বশতঃ প্রকৃতি লীনেরও অনাবৃত্তি নাই। উক্তও আছে—“ইন্দ্রিয় চিন্তকগণ দশমন্বন্তর

यथा स्नानार्थं मग्नस्य पुनः उत्थानं, तथा प्रकृतिलीनस्य इत्यर्थः ॥ ५४ ॥

नित्यत्वात् यथा नात्मनो बन्धः, तथा प्रधानस्यापि इत्यत आह—

अकार्य्यत्वेऽपि तद्योगः पारवश्यात् ॥ ५५ ॥

अकार्य्यत्वम् अप्रयोजकं, किन्तु परतन्त्रत्वं, तच्च प्रकृतौ अस्ति इति। तद्योगाच्च बन्धयोगः ॥ ५५ ॥

परः आत्मा किंरूपः? इत्यत्र आह—

स हि सर्ववित् सर्वकर्त्ता ॥ ५६ ॥

प्रकृतिप्रतिबिम्बितत्वात् एवम् अभिमानः ॥ ५६ ॥

थेति। टीकार्थस्तु स्पष्ट एव। मग्नवदिति दृष्टान्तं विशदयति—यथेत्यादिना। तथाच—प्रकृतिलीनस्यापि पुनरावृत्तेरवश्यम्भावात् न प्रकृतिलयस्यापि परमपुरुषार्थत्वं सम्भवतीति भावः ॥ ५४ ॥

सूत्रान्तरमवतारयति—नित्यत्वादिना। अकार्य्यत्वं—नित्यत्वं, अप्रयोजकमिति बन्धासम्बन्धे इति शेषः। परतन्त्रत्वं—पारवश्यं बन्धं प्रति प्रयोजकमिति शेषः। तच्च—परतन्त्रत्वञ्च, तद्योगात्—परतन्त्रत्वयोगात् ॥ ५५ ॥

सूत्रान्तरमवतारयति—पर इत्यादिना। ननु स्वमते आत्मनो निर्द्धर्म्मकत्वात् सर्वेत्यादिसूत्रं

ভৌতিকগণ পূর্ণ শত মন্বন্তর ও আভিমানিকগণ পূর্ণ সহস্র মন্বন্তর বিগতজ্বর হইয়া থাকে, এবং বৌদ্ধগণ দশ সহস্র মন্বন্তর ও অব্যক্ত চিন্তকগণ শত সহস্র মন্বন্তর বিগতজ্বর হইয়া থাকে। কিন্তু নির্গুণ পুরুষকে লাভ করিলে আর কালসংখ্যা থাকে না” অর্থাৎ যেরূপ স্নানার্থ মগ্ন ব্যক্তির পুনরুত্থান আছে, সেইরূপ প্রকৃতিলীন ব্যক্তিরও পুনরুত্থান আছে ॥ ৫৪ ॥

নিত্যতাবশতঃ যেরূপ আত্মার বন্ধ হয় না, সেইরূপ প্রধানেরও বন্ধ হইতে পারে না, এই আশঙ্কায় বলিতেছেন—আচার্য্যত্ব অর্থাৎ নিত্যত্ব বন্ধাভাবের প্রয়োজক নহে, কিন্তু পরতন্ত্রত্বই বন্ধের প্রয়োজক, সেই পরতন্ত্রত্ব প্রকৃতির আছে, সুতরাং সেই পরতন্ত্রত্ব যোগবশতঃই প্রকৃতির বন্ধযোগ আছে ॥ ৫৫ ॥

तात्त्विकम् एव कर्त्तृत्वं भवतु, किं प्रतिबिम्बकल्पनया, तथा च न्यायाभिमतः एव ईश्वरः अस्ति इत्यत आह—

ईदृशेश्वरसिद्धिः सिद्धा ५७ ॥

यदि अस्मदभिमतः आत्मा ईश्वरः, भवतु। न्यायाभिमते च प्रमाणं न अस्ति। एवञ्च प्रथमाध्याये 'ईश्वरासिद्धेः' इति सूत्रे वर्णितम् ॥ ५७ ॥

द्वितीयाध्याये 'विमुक्तविमोक्षार्थम्' इति सूत्रे स्वार्थं परार्थं च प्रधानप्रवृत्तिः इति उक्तम्। अत्र स्वार्थस्य गौणत्वम्। परार्थत्वम् एव आह—

स्वसिद्धान्तविरुद्धमित्यत आह—प्रकृतीति। तथाच औपाधिकमेवात्मनः सर्व्वविस्त्वं सर्व्व-कर्त्तृत्वञ्च सूत्रे प्रोक्तं, न तु वास्तवमिति न सिद्धान्तविरोध इति भावः ॥ ५६ ॥

सूत्रान्तरमवतारयितुं भूमिकामारचयति—तात्त्विकमित्यादिना। भवतु इति तदित्यादिः। नन्वेवमीश्वरप्रतिषेधोऽनुपपन्न इत्यत आह—न्यायेति, तथाच न्यायाभिमतेश्वर एव प्रतिषिद्ध इति नानुपपत्तिरिति भावः। एतच्च—न्यायाभिमतेश्वरे प्रमाणासत्त्वञ्च ॥ ५७ ॥

পরমাত্মার স্বরূপ কি? এই আকাঙ্ক্ষায় বলিতেছেন—সেই পরমাত্মা সর্ব্ববিৎ ও সর্ব্বকর্ত্তা। বস্তুতঃ সাংখ্যমতে আত্মার ধর্ম্মরাহিত্য বশতঃ প্রকৃত সর্ব্ববেদিত্ব ও সর্ব্বকর্তৃত্ব অসম্ভব, কিন্তু প্রকৃতি প্রতিবিম্বিতত্ব নিবন্ধন এইরূপ অভিমান হইয়া থাকে ॥ ৫৬ ॥

প্রকৃত কর্তৃত্বই পরমাত্মার হউক, প্রতিবিম্ব কল্পনায় প্রয়োজন কি? ফলে ন্যায়াভিমত ঈশ্বরেরই অস্তিত্ব প্রতিপন্ন হইতে পারে, এই আশঙ্কায় বলিতেছেন—যদি আমাদের অভিমত আত্মাই ঈশ্বর হয়, তবে হউক (তাহাতে কোনও আপত্তি নাই) কিন্তু ন্যায়াভিমত ঈশ্বরে কোনও প্রমাণ নাই, ইহা প্রথমাধ্যায়ে 'ঈশ্বরাসিদ্ধেঃ' এইসূত্রে বর্ণিত হইয়াছে ॥ ৫৭ ॥

প্রধানসৃষ্টিঃ পরার্থং স্বতোঽপ্যভোক্তৃত্বাদুষ্ট্রকুঙ্কুম-বহনবৎ ॥ ৫৮ ॥

চেতনস্য অপি পরার্থং প্রবৃত্তিঃ দৃশ্যতে, যথা উষ্ট্রঃ কুঙ্কুমং বহতি। অচেতনায়াঃ তু প্রকৃতেঃ অভোক্তৃত্বাৎ পরার্থম্ এব প্রবর্ত্তনম্ ইতি ॥৫৮॥

চেতনস্য প্রবৃত্তিঃ দৃষ্টা, ন অচেতনস্য ইত্যত্রাহ—

অচেতনত্বেঽপি ক্ষীরবচ্চেষ্টিতং প্রধানস্য ॥ ৫৯ ॥

যথা ক্ষীরমচেতনং বৎসার্থং প্রবর্ত্ততে, তথা প্রধানং পুরুষার্থে প্রবর্ত্ততে ॥ ৫৯ ॥

দৃষ্টান্তান্তরমাহ—

কর্ম্মবদ্দৃষ্টের্বা কালাদেঃ ॥ ৬০ ॥

যথা কৃষীবলেন কৃতং কর্ম্ম ধান্যারোপণাদি কালাৎ এব ফলতি, ন চ বৃক্ষাঃ চেতনাঃ। আদিশব্দাৎ অদৃষ্টং গ্রাহ্যম্ ॥৬০॥

উত্তরসূত্রস্য পৌনরুক্ত্যমপাকুর্ব্বন্নবতরণিকামাহ—দ্বিতীয়াধ্যায় ইত্যাদিনা। "স্বতোঽপি প্রধানস্য সৃষ্টিঃ পরার্থং—পরস্য পুরুষস্য ভোগাপবর্গার্থ"মিতি সূত্রার্থঃ। অত্র হেতুমাহ সূত্রে অভোক্তৃত্বাদিতি, অচেতনত্বেন ভোগাপবর্গাসম্ভবাদিত্যর্থঃ। দৃষ্টান্তমাহ—উষ্ট্রকুঙ্কুমবহনবদিতি। তমিমং দৃষ্টান্তং বিশদয়ন্ তাৎপর্য্যার্থমাহ—চেতনস্যেত্যাদিনা ॥ ৫৮ ॥

সূত্রান্তরমবতারয়তি—চেতনেত্যাদিনা। সূত্রার্থং বিশদয়তি—যথেত্যাদিনা। তথাচ চেতনত্বমেব প্রবৃত্তিপ্রযোজকমিত্যনুপপন্নমিতি ভাবঃ ॥ ৫৯ ॥

দ্বিতীয়াধ্যায়ে "বিমুক্ত বিমোক্ষার্থং" এই সূত্রে স্বার্থ ও পরার্থ প্রধানের প্রবৃত্তি বলা হইয়াছে, এবিষয়ে স্বার্থের গৌণত্ব, সুতরাং পরার্থত্ব বলিতেছেন—স্বতঃ হইলেও অভোক্তৃত্ব নিবন্ধন প্রধানের সৃষ্টি পরার্থ, অর্থাৎ পুরুষের ভোগ ও অপবর্গের নিমিত্ত চেতনেরও পরার্থ প্রবৃত্তি দেখা যায়, যেমন উষ্ট্র কুঙ্কুম বহন করে। অতএব অভোক্তৃত্ব নিবন্ধন অচেতন প্রকৃতির পরার্থই প্রবৃত্তি ॥ ৫৮ ॥

চেতনেরই প্রবৃত্তি দেখা যায়, অচেতনের প্রবৃত্তি দেখা যায় না, এই আশঙ্কায় বলিতেছেন—যেমন অচেতন দুগ্ধ বৎসের নিমিত্ত প্রবৃত্ত হয়, সেইরূপ (অচেতন) প্রধানও পুরুষের নিমিত্ত প্রবৃত্ত হয় ॥ ৫৯ ॥

उष्ट्रस्यापि ताड़नादिभयाभिसन्धानात् प्रवृत्तिः दृश्यते, न च अचेतनायाः प्रकृतेः अभिसन्धानमस्ति इत्यत आह—

स्वभावाच्चेष्टितमनभिसन्धानाद्भृत्यवत् ॥ ६१ ॥

यथा गर्भदासभृत्यः स्वामिनि अभिसन्धानशून्यः स्वभावात् एव कार्य्यं करोति, तथा प्रकृतिः इति ॥ ६१ ॥

पक्षान्तरमाह—

कर्माकृष्टेर्वाप्यनादितः ॥ ६२ ॥

अनादित्वात् संसारस्य धर्माधर्माकर्षणात् प्रधानं प्रवर्त्तते, यथा पुंसां कर्मवशात् अचेतनाः अपि वृक्षाः फलन्ति इति ॥ ६२ ॥

दृष्टान्तान्तरमिति, अचेतनप्रवृत्तावपरं दृष्टान्तमित्यर्थः। सूत्रतात्पर्यं विवृणोति—यथेत्यादिना। कृषीवलेन—कृषकेण, ननु वृक्षाणां चेतनत्वादेव अत्र प्रवृत्तिरित्याशङ्कामपाकर्त्तुमाह—न चेति ॥ ६० ॥

सूत्रान्तरावतरणिकामाह—उष्ट्रस्येत्यादिना। दृष्टान्तं विशद्य सूत्रं व्याचष्टे—यथेत्यादिना। स्वामिनि अभिसन्धानशून्यः—स्वामिकार्य्यकरणद्वारा पृथक् स्वार्थसन्धानरहितः ॥ ६१ ॥

पक्षान्तरमिति, अचेतनाया अपि प्रकृतेः प्रवृत्त्युपपादने युक्त्यन्तरमित्यर्थः। सूत्रतात्पर्यं विवृणोति—अनादित्वादित्यादिना। अस्मिन्नर्थे दृष्टान्तं दर्शयितुमाह—यथेति ॥ ६२ ॥

অচেতনের প্রবৃত্তিবিষয়ে অপর দৃষ্টান্ত বলিতেছেন,—যেমন কৃষককৃত ধান্তরোপণাদি কর্ম্ম কালবশে বা অদৃষ্টবশেই ফলিত হয়। বৃক্ষগণও চেতন নহে, (সুতরাং ঐ স্থলে অচেতনেরই প্রবৃত্তি স্বীকার অনিবার্য্য) ॥ ৬০ ॥

উষ্ট্রেরও তাড়নাদি ভয়াভিসন্ধানেই প্রবৃত্তি দেখা যায়, অথচ অচেতন প্রকৃতির অভিসন্ধান অসম্ভব, সুতরাং প্রবৃত্তি হয় কিরূপে? এই আশঙ্কায় বলিতেছেন—যেমন গর্ভদাস ভৃত্য স্বামীর কার্য্যকরণদ্বারা নিজের স্বতন্ত্র স্বার্থসিদ্ধি প্রতিসন্ধান ব্যতিরেকে স্বভাবতঃই কার্য্য করিয়া থাকে। সেইরূপ প্রকৃতিও স্বার্থপ্রতিসন্ধান ব্যতিরেকে স্বভাবতঃই সৃষ্টি করিয়া থাকে ॥ ৬১ ॥

অচেতন প্রকৃতির প্রবৃত্ত্যুপপাদনে অন্য যুক্তি বলিতেছেন—সংসারের

युक्तिबहुत्वात् पुनर्वचनं न पुनरुक्ततादोषाय इत्यत आह—

विविक्तबोधात् सृष्टिनिवृत्तिः प्रधानस्य सूदवत् पाके ॥ ६३ ॥

पुरुषार्थं सृष्टिः, तन्निवृत्तिस्तु प्रकृतिपुरुषविवेकज्ञानात्, यथा सूपकारः पाकं कृत्वा निवर्त्तते ॥ ६३ ॥

उपदेशाद्विवेकज्ञानेऽपि मुक्तिर्न दृश्यते इत्यत्राह—

इतर इतरवज्जहाति तद्दोषात् ॥ ६४ ॥

न यथा कथञ्चिद्बोधमात्रात् मुक्तिः, किन्तु इन्द्रियात् इतरः आत्मा इतरवत् प्रधानं जहाति ध्यानादिना पृथक्करोति, तद्दोषात् प्रकृतेः चलत्वादिदोषदर्शनात् ॥ ६४ ॥

पुनरुक्तिदोषमपाकुर्व्वन् सूत्रान्तरावतरणिकामाह—युक्तिबहुत्वादिति। सूत्रतात्पर्य्यं विवृणोति—पुरुषेत्यादिना। प्रकृतिपुरुषविवेकज्ञानादिति विविक्तबोधादित्यस्य विवरणम् ॥ ६३ ॥

सूत्रान्तरमवतारयति—उपदेशादित्यादिना। पूरयित्वा सूत्रतात्पर्य्यं विवृणोति—नेत्यादिना। भाष्यकारस्तु "इतर इतरवत्तद्दोषादिति" सूत्रपाठं प्रकल्प्य इतरस्तु विविक्तबोधरहितः इतरवद्-बद्धवदेव प्रकृत्या तिष्ठति, कुतस्तद्दोषात् तस्य प्रधानस्यैव तत्पुरुषार्थासमापनाख्याद्दोषादिति व्याख्यातवानित्यनुसन्धेयम् ॥ ६४ ॥

অনাদিফলনিবন্ধন ধর্ম্ম ও অধর্ম্মের আকর্ষণবশতঃ প্রধানের প্রবৃত্তি হয়, যেমন পুরুষদিগের কর্ম্মবশতঃ অচেতন বৃক্ষগণও ফলিত হয়। ৬২।

যুক্তির বাহুল্যপক্ষে পুনরুক্তিও দোষাবহ নহে, এইজন্য বলিতেছেন,—পুরুষার্থ যে সৃষ্টি হয়, প্রকৃতি ও পুরুষের ভেদজ্ঞান হইতেই তাহার নিবৃত্তি হয়, যেমন পাক করিয়াই পাচক নিবৃত্ত হইয়া থাকে। ৬৩।

উপদেশবশে বিবেকজ্ঞান হইলেও মুক্তি হইতে দেখা যায় না, এই আশঙ্কায় বলিতেছেন,—যথাকথঞ্চিৎ বোধমাত্রেই মুক্তি হয় না, কিন্তু ইন্দ্রিয়েতর আত্মা প্রকৃতির চলত্বাদি দোষদর্শনবশতঃ ধ্যানাদিদ্বারা প্রধানকে পৃথক্ জ্ঞান করিয়া থাকে। ৬৪।

मोक्षस्वरूपमाह—

द्वयोरेकतरस्य वौदासीन्यमपवर्गः ॥ ६५ ॥

द्वयोः प्रकृतिपुरुषयोः। प्रकृतेः औदासीन्यं विवेकिनं प्रति अप्रवर्त्तनं, पुरुषस्य औदासीन्यं प्रकृत्यनभिष्वङ्गः। 'एकतरस्य' इति आत्मनः, तस्यैव मुख्यत्वात् ॥ ६५ ॥

प्रकृतेः प्रवृत्तिशीलायाः औदासीन्ये सर्वमुक्तिप्रसङ्गः इत्यत्राह—

अन्यसृष्ट्युपरागेऽपि न विरज्यते, प्रबुद्धरज्जु-तत्त्वस्यैवोरगः ॥ ६६ ॥

न प्रवृत्तिशीलायाः औदासीन्यं, स्वभावत्यागदोषात्। किन्तु विवेकिनं प्रति अप्रवर्त्तने अन्यान् प्रति सृष्ट्युपरागेऽपि सृष्टिकरणेऽपि न विरज्यते—सृष्टौ न निवर्त्तते। यथा रज्जौ सर्पभ्रमे प्रबुद्धरज्जु-तत्त्वकस्यैव उरगः—सर्पभ्रमः निवर्त्तते, न तु अज्ञातरज्जुतत्त्वस्य ॥६६॥

प्रसङ्गतो मोक्षस्वरूपनिरूपकं सूत्रमवतारयति—मोक्षेत्यादिना। द्वयोरौदासीन्यं विभज्य व्याचष्टे—प्रकृतेरित्यादिना। प्रकृत्यनभिष्वङ्गः—प्रकृतावनादिसञ्चितस्य संस्कारात्मकस्य स्व-स्वामिभावस्य निवृत्तिः। एकतरपदेनात्मन एव ग्रहणे युक्तिमाह—तस्यैव मुख्यत्वादिति, आत्मन एव प्राधान्यादित्यर्थः ॥ ६५ ॥

सूत्रान्तरमवतारयति—प्रकृतेरित्यादिना। सूत्रतात्पर्यं विवृणोति—नेत्यादिना। दृष्टान्तं स्पष्टयति—यथेत्यादिना ॥ ६६ ॥

মোক্ষের স্বরূপ বলিতেছেন—প্রকৃতি ও পুরুষের অথবা কেবল পুরুষের ঔদাসীন্যই অপবর্গ, বিবেকীর প্রতি অপ্রবর্ত্তন প্রকৃতির ঔদাসীন্য ও প্রকৃতিতে অনাদিসঞ্চিত সংস্কারাত্মক স্বস্বামিভাবের নিবৃত্তি পুরুষের ঔদাসীন্য ॥ ৬৫ ॥

প্রবৃত্তিশীল প্রকৃতির ঔদাসীন্যে সকলেরই মুক্তি হইতে পারে, এই আশঙ্কায় বলিতেছেন—প্রবৃত্তিশীল প্রকৃতির সর্ব্বথা ঔদাসীন্যই হইতে পারে না, কারণ তাহা হইলে স্বভাবত্যাগরূপ দোষ হয়। কিন্তু বিবেকীর প্রতি অপ্রবর্ত্তন হইলেও অন্যের প্রতি সৃষ্টিকরণে নিবৃত্তি হয় না। যেমন যে রজ্জু বলিয়া

अत्र न्यायमाह—

कर्मनिमित्तायोगाच्च ॥ ६७ ॥

विवेकिनं प्रति कर्म्मणः निमित्तस्य अभावात् । न बीजं विना अङ्कुरो भवति । श्रुतिरपि—

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥"

(मुण्ड०, उप०, २खण्ड०, ८मन्त्रः) ॥ ६७ ॥

अदृष्टस्य बुद्धिकार्य्यत्वात् अहङ्कारायुत्पत्तौ भवतु अदृष्टसहायता, प्रकृतेः स्वकार्य्यकारणे क्वादृष्टसहकारिता ? इत्यत्राह—

नैरपेक्ष्येऽपि प्रकृत्युपकारेऽविवेको निमित्तम् ॥ ६८

अदृष्टनैरपेक्ष्येऽपि प्रकृतेरविवेकः सहकारीति ॥ ६८ ॥

अत्रेति, विवेकिनं प्रति प्रकृतेः प्रवृत्त्यसम्भवे, इत्यर्थः । अभावादिति अयोगादित्यस्य विवरणम् । निमित्ताभावे कार्य्यानुत्पादं दृष्टान्तेन द्रढयति—नेत्यादिना । विवेकिनः कर्म्माभावं समर्थयितुमाह—श्रुतिरपीति । अस्य—विवेकिनः, परावरे—परमात्मनि ॥ ६७ ॥

सूत्रान्तरमवतारयति—अदृष्टस्येत्यादिना । क्वादृष्टसहकारितेति, सहकारिणः कार्य्याधिकरणसत्त्वनियमादिति भावः । सहकारीति निमित्तमित्यस्य विवरणम्, तथाच विविक्तरूपसहकारिविरहादपि विविकिनं प्रति न प्रकृतिप्रवृत्तिरिति भावः ॥ ६८ ॥

বুঝিতে পারে, তাহারই সর্পভূত রজ্জুতে সর্পভ্রমের নিবৃত্তি হয়, যে রজ্জু বলিয়া বুঝিতে না পারে, তাহার সর্পভ্রমের নিবৃত্তি হয় না ॥ ৬৬ ॥

বিবেকীর প্রতি প্রকৃতির প্রবৃত্ত্যাসম্ভবে যুক্তি বলিতেছেন—বিবেকীর প্রতি কর্ম্মরূপ নিমিত্তের অভাববশতঃ (প্রকৃতির প্রবৃত্তি হইতে পারে না) বীজ ভিন্ন (কখনও) অঙ্কুর হয় না। বিবেকীর কর্ম্মাভাবে শ্রুতিও আছে, যথা—"সেই পরমাত্মা পরিদৃষ্ট হইলে বিবেকীর মনের বন্ধন বিদীর্ণ হয়, সমস্ত সংশয় ছিন্ন হয় ও সমস্ত কর্ম্মের ক্ষয় হয়" ॥ ৬৭ ॥

অদৃষ্ট বুদ্ধির ধর্ম্ম, সুতরাং অহঙ্কারাদির উৎপত্তিতে সহায় হইতে পারে, কিন্তু প্রকৃতির কার্য্যকরণে অদৃষ্টের সহকারিতা হয় কিরূপে ? (যেহেতু

প্রকৃতিনিবৃত্তিং দৃষ্টান্তেনাহ—

নর্ত্তকীবৎ প্রবৃত্তস্যাপি নিবৃত্তিশ্চারিতার্থ্যাৎ ॥৬৯

যথা নর্ত্তকী পরিষচ্চারিতার্থ্যাৎ নিবর্ত্ততে, তথা প্রকৃতিঃ অপি পুরুষস্য বিবেকচারিতার্থ্যাৎ সর্গাৎ নিবর্ত্ততে ॥ ৬৯ ॥

নিবৃত্তাঽপি প্রকৃতিঃ কুতোঽপি কারণাৎ প্রবর্ত্তিষ্যতে ইত্যত্রাহ—

দোষবোধেঽপি নোপসর্পণং প্রধানস্য কুলবধূবৎ ॥৭০

স্বদোষবিজ্ঞানাৎ বিবেকেন প্রকৃতেঃ ন উপসর্পণং, যথা কুলবধূঃ পরপুরুষেণ দৃষ্টা 'ন পুনঃ তদ্দর্শনং মে ভবিষ্যতি' ইতি অবহিত্থাং কুরুতে ॥ ৭০ ॥

প্রকৃতিনিবৃত্তিমিতি, বিবেকিনং প্রতীত্যাদিঃ। দৃষ্টান্তং বিঘটয্য সূত্রস্য ভাবার্থমাহ—যথেত্যাদিনা ॥ ৬৯ ॥

সূত্রান্তরমবতারয়তি—নিবৃত্তেত্যাদিনা। সূত্রতাৎপর্য্যং বিবৃণোতি—স্বদোষেত্যাদিনা। অবহিত্থাং—আকারগুপ্তিং ॥ ৭০ ॥

কার্য্যাধিকরণে যে না থাকে, সে সহকারী হইতে পারে না) এই আশঙ্কায় বলিতেছেন—অদৃষ্টের অপেক্ষা না থাকিলেও অবিবেক প্রকৃতির সহকারী, অর্থাৎ অবিবেক প্রযুক্তা হইয়াই প্রকৃতি সৃষ্টি করিয়া থাকেন, অতএব সেই অবিবেকরূপ সহকারীর অভাববশতঃও বিবেকীর প্রতি প্রকৃতির প্রবৃত্তি হইতে পারে না ॥ ৬৮ ॥

দৃষ্টান্তদ্বারা বিবেকীর প্রতি প্রকৃতির নিবৃত্তি বলিতেছেন—যেমন নর্ত্তকী সভার চরিতার্থতা হইলেই নৃত্য হইতে বিরত হয়, সেইরূপ প্রকৃতিও পুরুষের বিবেকরূপ চরিতার্থতা হইলেই সৃষ্টি হইতে নিবৃত্তি হয় ॥ ৬৯ ॥

প্রকৃতি নিবৃত্ত হইয়াও কোন কারণ বশতঃ পুনরায় প্রবৃত্ত হইতে পারে, এই আশঙ্কায়ই বলিতেছেন—বিবেকদ্বারা স্বদোষবিজ্ঞানবশতঃই প্রকৃতির আর সেই পুরুষের সমীপে গমন সম্ভবপর নহে। যেমন কুলবধূ পরপুরুষ-কর্তৃক দৃষ্ট হইলে "পুনরায় যেন আমার আর তাহার দর্শন হয় না।" এই ভাবিয়া আত্মগোপন করিয়া থাকে ॥ ৭০ ॥

यस्य बन्धः तस्य मोक्षः । न च पुरुषस्य तौ स्त इत्यत आह—

नैकान्ततो बन्धमोक्षौ पुरुषस्याविवेकादृते ॥ ७१ ॥

प्रकृतिपुरुषाविवेकात् बन्धमोक्षाविति अभिमानमात्रमिति ॥७१॥

अथासत्यस्य सत्यपूर्वकत्वात् कस्य बन्धमोक्षौ सत्यौ ? इत्यत आह—

प्रकृतेराञ्जस्यात् ससङ्गत्वात्, पशुवत् ॥ ७२ ॥

आञ्जस्यात् तत्त्वतः । ससङ्गत्वात्—गुणयोगात् । यथा पशुः सङ्गात् गुणयोगात् बध्यते । तस्मात् प्रकृतेः बन्धमोक्षौ सत्यौ । अविवेकिनं प्रति प्रवर्त्तनम् एव बन्धः, मोक्षः पुनः विवेकिनं प्रति अप्रवर्त्तनम् । तेन च न स्वभावप्रच्युतिदोष इति ॥ ७२ ॥

सूत्रान्तरमवतारयितुमाह—यस्येति । सूत्रे एकान्तत इति, तत्त्वत इत्यर्थः । अविवेकादृते इत्यस्यैव तात्पर्य्यं विवृणोति—प्रकृतीत्यादिना, तथाचाभिमानिकावेव पुरुषस्य बन्धमोक्षौ न तात्त्विकाविति भावः ॥ ७१ ॥

सूत्रान्तरमवतारयितुं प्रस्तौति—अथेति । असत्यस्य—आभिमानिकस्य, सत्यपूर्व्वकत्वात्—वास्तवसापेक्षत्वात् । तत्त्वत इति तात्त्विकावित्यर्थः । गुणयोगात्—दुःखसाधनैर्धर्म्मादिभिर्लिप्तत्वात् दृष्टान्तं स्पष्टयति—यथेत्यादिना, गुणयोगात् रज्ज्वा लिप्तत्वात् । एवं स्थिते सूत्रार्थमुपसंहरति—तस्मादित्यादिना । प्रकृतेस्तात्त्विकबन्धमोक्षयोः स्वरूपं दर्शयति—अविवेकिनमित्यादिना, प्रदर्शनप्रयोजनमाह—तेनेत्यादिना । साधारणतः प्रवृत्तिशीलत्व एव विवेकिनं

যাহার বন্ধ তাহারই মোক্ষ, কিন্তু পুরুষের ত সেই বন্ধ ও মোক্ষ নাই, এই বিষয়ে বলিতেছেন—অবিবেকব্যতিরেকে বাস্তবিক পুরুষের বন্ধ মোক্ষ নাই, কিন্তু প্রকৃতিপুরুষের ভেদজ্ঞানের অভাববশতঃ বন্ধ ও মোক্ষের অভিমান হয় মাত্র। ইহার অভিপ্রায় এই যে, প্রকৃতির সহিত অবিবিক্ত (একীভাবাপন্ন) থাকাই পুরুষের বন্ধন, আর জ্ঞানদ্বারা বিবিক্ত (পৃথগ্‌ভাবাপন্ন) হওয়াই মুক্তি ॥ ৭১ ॥

সত্য ব্যতিরেকে আভিমানিকের সম্ভব হয় না, সুতরাং কাহার বন্ধ ও মোক্ষ সত্য ? এই আশঙ্কায় বলিতেছেন—যেমন রজ্জুরূপ গুণলিপ্তত্বনিবন্ধন পশু বদ্ধ হয়, সেইরূপ দুঃখসাধনধর্ম্মাদিরূপ গুণলিপ্তত্বনিবন্ধন প্রকৃতিও বদ্ধ

केन रूपेण प्रकृतिरात्मानं बध्नाति, केन च विमोचयतीत्यत आह—

रूपैः सप्तभिरात्मानं बध्नाति प्रधानं, कोषकारवत्, विमोचयत्येकेन रूपेण ॥ ७२ ॥

रूपैः सप्तभिः—धर्मवैराग्यैश्वर्य्याधर्माज्ञानावैराग्यानैश्वर्य्यैः बध्नाति विमोचयति एकेन रूपेण—ज्ञानेन ॥ ७३ ॥

काम्याकाम्यकर्मभ्यां भुक्तिः मुक्तिश्चेति, तत्त्यागे दृष्टहानिरित्यत आह—

निमित्तत्वमविवेकस्येति न दृष्टहानिः ॥ ७४ ॥

अदृष्टस्य ज्ञानद्वारेण परम्परया कारणत्वं मुक्तौ। संसारस्य तु कारणमविवेकः। तस्मान्न दृष्टहानिरिति ॥ ७४ ॥

प्रवृत्ती स्वभावप्रच्युतिदोषो घटत इति भावः। नचैवं पुरुषस्य मोक्षाभिधानमनुचितमिति वचनीयं, तस्याभिमानिकदुःखवियोगपरत्वादिति ध्येयम् ॥ ७२ ॥

सूत्रान्तरमवतारयति—केनेत्यादिना। सूत्रे कोषकारवदिति, कोशकारः कीटो यथा स्वनिर्म्मितेनैवावासेनात्मानं बध्नाति तद्वदित्यर्थः ॥ ७३ ॥

ननु यद्येकेन ज्ञानेनैव मुक्तिस्तदा निष्कामकर्म्मणा मुक्तिश्रुत्याविरोध इत्याशङ्कया सूत्रान्तरमवतारयति—काम्येत्यादिना। शङ्कां परिहर्त्तुमाह—अदृष्टस्येति। तथाच निष्कामकर्म्मणा

হয়। সুতরাং প্রকৃতির বন্ধ ও মোক্ষই সত্য। অবিবেকীর প্রতি প্রবর্ত্তনই প্রকৃতির বন্ধ ও বিবেকীর প্রতি অপ্রবর্ত্তনই প্রকৃতির মুক্তি, অতএব স্বভাব-প্রচ্যুতি দোষও সম্ঘটিত হইল না। ৭২ ॥

প্রকৃতি কোনরূপে আত্মার বন্ধন ও কোনরূপে মোচন করে? এই আকাঙ্ক্ষায় বলিতেছেন—কোশকার কীট যেমন স্বনির্ম্মিত আবাসদ্বারা নিজকে আবদ্ধ করে, প্রকৃতিও তেমন ধর্ম্ম, বৈরাগ্য, ঐশ্বর্য্য, অজ্ঞান, অবৈরাগ্য ও অনৈশ্বর্য্য এই সাত প্রকার রূপদ্বারা আপনাকে আবদ্ধ করে ও জ্ঞান এই একপ্রকার রূপদ্বারা মোচন করে ॥ ৭৩ ॥

কাম্য কর্ম্মদ্বারা ভোগ ও নিষ্কাম কর্ম্মদ্বারা মুক্তি হয়, এইরূপ শ্রুতি আছে,

विवेकश्च कथं स्यात्? इत्यत्राह—

तत्त्वाभ्यासान्नेति नेतीति त्यागाद्विवेकसिद्धिः ॥७५॥

स्पष्टम्। श्रुतिश्च—"स एष नेति नेत्यात्माऽगृह्यः, न हि गृह्यते, अशीर्य्यः, न हि शीर्य्यते" (बृह०, उप०, ३अध्याय०, ९ब्रा०, २६मन्त्रः) इत्यादि ॥ ७५ ॥

यदि तत्त्वाभ्यासादिना मोक्षः, उपदेशानन्तरं सर्वेषामेषां मुक्तिः स्यात्, अभ्यासस्य तुल्यत्वात् इत्यत्राह—

अधिकारिप्रभेदान्न नियमः ॥ ७६ ॥

उत्तममध्यमाधमशक्तिभेदात् एकदा इति न नियमः ॥ ७६ ॥

ज्ञानमुत्पद्यते, ज्ञानाच्च मुक्तिरिति एवेनेत्यादिना ज्ञानमात्रस्य साक्षान्मोक्षहेतुत्वमुक्तं, निष्काम-कर्म्मणश्च परम्परया मोक्षहेतुत्वमिति नास्ति विरोध इति भावः। ज्ञानेनैव कथं साक्षान्मोक्ष इत्याकाङ्क्षायां सूत्रं व्याचष्टे—संसारस्येत्यादिना। तथाच संसारहेतोरविवेकस्य ज्ञानमात्र-विनाश्यत्वात् तदा विनाशे च मुक्तेरसम्भवात् ज्ञानादेव साक्षान्मुक्तिरिति युक्तम् ॥ ७४ ॥

सूत्रान्तरमवतारयितुं प्रश्नते—विवेक इत्यादिना। स्पष्टमिति, प्रकृतिपर्य्यन्तेषु जड़ेषु नेति नेतीत्यभिमानत्यागरूपात्तत्त्वाभ्यासात् विवेकसिद्धिः—विवेकसाक्षात्कारो भवतीति सूत्रार्थो व्यक्त इत्यर्थः। अत्रार्थे श्रुतिं दर्शयितुमाह—श्रुतिश्चेति ॥ ७५ ॥

তাহার পরিত্যাগে (অর্থাৎ কেবল জ্ঞানদ্বারাই মুক্তি স্বীকার করিলে) সেই শ্রুতির সহিত বিরোধ হয়, এই আশঙ্কায় বলিতেছেন—নিষ্কাম কর্ম্মজন্য অদৃষ্ট জ্ঞান সম্পাদন করে বলিয়া পরম্পরা মুক্তির কারণ, সংসারের কারণ অবিবেক জ্ঞান ভিন্ন সেই অবিবেকের নাশ হয় না, অবিবেকের নাশ না হইলেও মুক্তি হইতে পারে না, সুতরাং একমাত্র জ্ঞানই সাক্ষাৎ মুক্তির কারণ, অতএব কোনও বিরোধ নাই। ৭৪।

বিবেক হয় কি প্রকারে? এই আকাঙ্ক্ষায় বলিতেছেন—দেহ আমি নই, ইন্দ্রিয় আমি নই, এইরূপ ভাবে প্রকৃতি পর্য্যন্ত সমস্ত জড় বস্তুতে আত্মাভিমান ত্যাগরূপ তত্ত্বাভ্যাস হইতে বিবেকসাক্ষাৎকার হয়। ইহারই সমর্থক "স এষ নেতি" ইত্যাদি শ্রুতিও আছে। ৭৫।

यदि विवेकान्मुक्तिः, कथं विवेकिनो भोगदर्शनम् इत्यत आह—

बाधितानुवृत्त्या मध्यविवेकतोऽप्युपभोगः ॥ ७७ ॥

तीव्रविवेकस्य उपभोगो नास्ति। मध्यविवेकस्यापि उपभोगः रागाभावात् अलम् इति ज्ञानेन बाधितत्वात् वासनानुवृत्तिमात्रम्। उपात्तफलं कर्मोपभोगात् क्षिणोमि इति उपभुङ्क्ते इति ॥ ७७ ॥

सूत्रान्तरमवतारयति—यदीत्यादिना। स्पष्टमन्यत् ॥ ७६ ॥

सूत्रान्तरमवतारयितुं प्रवृत्ते—यदीत्यादिना। मध्यविवेकत्वं नाम विदेहमुक्तिप्रतिबन्धि-प्रारब्धमात्रवत्त्वं, तदभाव एव च तीव्रविवेकत्वं। तथाच मध्यविवेकेऽपि सति दुःखे बाधितानामपि दुःखानां प्रारब्धवशात् प्रतिबिम्बरूपेणानुवृत्तेरुपभोगो भवतीति सूत्रार्थः। नन्वेवं मध्यविवेकस्याविवेकतः को विशेष इत्याशङ्कामपाकरोति—रागाभावादित्यादिना। ज्ञानस्यैवाविद्यासंस्कारस्य दाहः। एतदेव स्पष्टयति—उपात्तेत्यादिना। तथाच प्रारब्धकर्मणो भोगनाश्यत्वादेव मध्यविवेकस्य तदुपभोगो भवति, न तु तेन हर्षविषादौ भवतः, अविवेकस्य तु भवत इति भेदः समवधेय इति ॥ ७७ ॥

তত্ত্বাভ্যাস হইতেই যদি মুক্তি হয়, তবে উপদেষ্টার সমস্ত শিষ্যেরই কেন মুক্তি হয় না? কারণ অভ্যাস সকলেরই তুল্য, এই আশঙ্কায় বলিতেছেন—উত্তম, মধ্যম ও অধমভেদে অধিকারীর বৈলক্ষণ্য বশতঃ "একদাই সকলের মুক্তি হইবে" এইরূপ নিয়মই হইতে পারে না, অর্থাৎ অধিকারি-ভেদে তত্ত্বজ্ঞানেই পৌর্ব্বাপর্য্য ঘটে ॥ ৭৬ ॥

যদি বিবেক হইতেই মুক্তি হয়, তবে বিবেকীরও ভোগ হইতে দেখাযায় কেন? এই আশঙ্কায় বলিতেছেন—তীব্র বিবেক ব্যক্তির উপভোগ থাকে না, কারণ তাহার উপভোগসাধক প্রারব্ধ পর্য্যন্তেরও নাশ হয়। প্রারব্ধ বশতঃ বাধিত দুঃখাদির অনুবৃত্তি হয় বলিয়া মধ্যবিবেক ব্যক্তির উপভোগ আছে। তবে রাগাভাববশতঃ "সমস্তই ব্যর্থ" এই জ্ঞানদ্বারা বাধিত হয় বলিয়া বাসনানুবৃত্তিমাত্রই হইয়া থাকে (অবিদ্যা সংস্কারাদির অনুবৃত্তি হয় না) "আমার ফল অবশ্যম্ভাবি, সেই কর্ম্মের উপভোগদ্বারা ক্ষয় করিব" ইহা জানিয়াই ভোগ করে, (কিন্তু সেই ভোগে তাহার হর্ষ বা বিষাদ কিছুই হয় না, সুতরাং কিঞ্চিৎ বিলম্বে প্রারব্ধ শেষ হইলেই বিদেহ মুক্তি হয়)। ৭৭ ॥

মধ্যবিবেকিনঃ স্বরূপমাহ—

জীবন্মুক্তশ্চ ॥ ৭৮ ॥

চ ইবার্থে, মুক্ত ইব মুক্তঃ রাগাভাবাৎ ধর্ম্মাদ্যনুৎপত্তেশ্চ। শ্রুতিরপি—

আত্মানং চেদ্বিজানীয়াদয়মস্মীতি পুরুষঃ।

কিমিচ্ছন্ কস্য কামায় শরীরমনুসংজ্বরেৎ

(বৃহ০, উপ০, ৪অধ্যা০, ৪ব্রা০, ১২মন্ত্রঃ) ইতি ॥ ৭৮ ॥

জীবতো মুক্তিরিত্যনুপপত্তেঃ ইদমাহ—

উপদেশ্যোপদেষ্টৃত্বাৎ তৎসিদ্ধিঃ ॥ ৭৯ ॥

তীব্রবিবেকিনো বাহ্যাসংবেদিনঃ উপদেষ্টৃত্বমেব নাস্তি, মন্দবিবেকিনোঽপি অজ্ঞানাৎ নোপদেষ্টৃত্বং, কিন্তু স উপদেশ্যঃ। উপদেষ্টা মধ্যবিবেকী। অতঃ তৎসিদ্ধিঃ জীবন্মুক্তসিদ্ধিঃ ॥ ৭৯ ॥

সূত্রান্তরমবতারয়তি—মধ্যেত্যাদিনা। জীবতোঽপি মধ্যবিবেকিনো মুক্ততুল্যত্বে শ্রুতিং প্রমাণয়ন্নাহ—শ্রুতিরপীতি। অয়মস্মীতি, প্রকৃত্যাদিভ্যো বিবিক্তস্বরূপোঽস্মীত্যর্থঃ, অনুসংজ্বরেৎ ॥ ৭৮ ॥

সূত্রান্তরমবতারয়তি—জীবত ইত্যাদিনা। উপদেষ্টৃত্বেনৈব মধ্যবিবেকিনো জীবন্মুক্তত্বমুপপাদয়িষ্যন্ তীব্রবিবেকিমন্দবিবেকিনোরুপদেষ্টৃত্বং নিরাকরোতি—তীব্রেত্যাদিনা ॥ ৭৯ ॥

মধ্য বিবেকের স্বরূপ বলিতেছেন—রাগাভাব বশতঃ ধর্ম্মাদির উৎপত্তি হয় না বলিয়া মধ্য বিবেকী জীবিত থাকিয়াও মুক্তভুল্য, শ্রুতিও আছে—"আমি প্রকৃত্যাদি হইতে পৃথক্" ইহা যদি পুরুষ জানিতে পারে, তবে কোন্ ইচ্ছায় কোন্ কামনায় শরীরকে জীর্ণ করিবে? অর্থাৎ তখন আর তাহার কোন ইচ্ছা বা কামনা থাকে না ॥ ৭৮ ॥

জীবিত ব্যক্তির মুক্তি অনুপপন্ন এই আশঙ্কায় বলিতেছেন—বাহ্য জ্ঞানশূন্য তীব্র বিবেকব্যক্তি উপদেষ্টা হইতে পারে না। অজ্ঞানবশতঃ মন্দবিবেক ব্যক্তিরও উপদেষ্টৃত্ব নাই। কিন্তু সে উপদেশ্য মধ্যবিবেক ব্যক্তিই উপদেষ্টা। অতএব উপদেষ্টৃত্ব হইতেই জীবন্মুক্তির সিদ্ধি হইবে ॥ ৭৯ ॥

अत्र प्रमाणं दर्शयति—

श्रुतिश्च ॥ ८० ॥

उवाच 'जीवन्नेव हि विद्वान् हर्षायासाभ्यां विमुच्यते' इति ॥ ८० ॥

मन्दविवेकोऽपि उपदेष्टा भविष्यति इत्यत आह—

इतरथान्धपरम्परा ॥ ८१ ॥

अज्ञानी गुरुः, किञ्च शिष्यः अज्ञाता इति ॥ ८१ ॥

उपदेशे हि ज्ञानात् मोक्षः, उपदेशानन्तरं मुच्येत, किं विलम्बेन ? इत्यत आह—

चक्रभ्रमणवद् धृतशरीरः ॥ ८२ ॥

यथा दण्डापगमे संस्कारवशात् चक्रं भ्रमति, तथा विवेकिनामपि देहधारणकर्मणः अक्षीणत्वात् न तत्क्षणात् मुक्तिः, किन्तु उपभोगादिना कर्मक्षयात् इति । तथा च श्रुति

जीवेति जीवन्मुक्तत्वे इत्यर्थः । आकाङ्क्षानिवृत्ताय पूरयति—उवाचेति । सूत्रार्थस्तु स्पष्ट एव ॥ ८० ॥

सूत्रान्तरमवतारयति—मन्देत्यादिना । सूत्रे इतरथेति, मन्दविवेकस्याप्युपदेष्टृत्वे इत्यर्थः । अन्धपरम्परामेव विवृणोति—अज्ञानीत्यादिना । अयमाशयः—स्वयमज्ञाता चेदुपदिशेत्तदा भ्रान्त एव शिष्यमपि भ्रान्तं कुर्यात्, सोऽप्यन्यं सोऽप्यन्यमित्येवमन्धपरम्परा स्यादिति ॥ ८१ ॥

सूत्रान्तरमवतारयितुं शङ्कते—उपदेश इति । दृष्टान्तं स्फुटीकृत्य सूत्रतात्पर्यं विवृणोति

এবিষয়ে প্রমাণ দেখাইতেছেন—শ্রুতিও বলিয়াছেন—তত্ত্বজ্ঞানসম্পন্ন ব্যক্তি জীবিত থাকিয়াই হর্ষ ও দুঃখ হইতে বিমুক্ত হয় । ৮০ ।

মন্দবিবেক ব্যক্তিও উপদেষ্টা হইবে, এই আশঙ্কায় বলিতেছেন—মন্দবিবেক ব্যক্তি উপদেষ্টা হইলে অন্ধপরম্পরাপাত হয়, অর্থাৎ গুরু অজ্ঞানী হইলে শিষ্যও অজ্ঞাতা হইবে, এবং সে আবার নিজের ভ্রমবশতঃ অন্যকে ভ্রান্ত করিবে, সেও আবার অন্যকে ভ্রান্ত করিবে, এইরূপে ভ্রান্তেরই পরম্পরা হইতে পারে । ৮১ ।

উপদেশ অনুসারে জ্ঞান হইলেই যদি মুক্তি হয়, তবে উপদেশের পরেই

दीक्षयैव नरो मुच्येत्तिष्ठेन्मुक्तोऽपि विग्रहे ।
कुलालचक्रमध्यस्थो विच्छिन्नोऽपि भ्रमेद्घटः ॥ ৮২ ॥

तस्मादस्ति जीवन्मुक्तः इति आह—

संस्कारलेशतस्तत्सिद्धिः ॥ ৮৩ ॥

जीवन्मुक्तिसिद्धिः ॥ ৮৩ ॥

कदा परममुक्तिः इत्यत्र आह—

विवेकान्निःशेषदुःखनिवृत्तौ कृतकृत्यः नेतरान्नेतरात् ॥ ৮৪ ॥

निःशेषेण त्रिविधदुःखस्य अत्यन्तनिवृत्तौ कृतकृत्यः, परमुक्ति-

—यथेत्यादिना। देहधारककर्माण इति शरीरारम्भकप्रारब्धकर्माण इत्यर्थः। अजीवत्वात्—अपरिज्ञानादजीवफलकत्वात्। इममेवार्थं द्रढयति—तथाचेत्यादिना ॥ ৮২ ॥

जीवन्मुक्तिप्रकरणोपसंहारपरतया परसूत्रमवतारयति—तस्मादित्यादिना। सूत्रे संस्कारलेशत इति शरीरधारणहेतवो ये प्रारब्धकर्मजसंस्कारास्तेषामल्पमात्रावशेषादित्यर्थः। तथाच तत्संस्कारशेषसत्त्वे न तद्भोगनिष्पत्तये जीवनं तद्भोगस्य च हर्षविषादाद्यजनकत्वेन भोगाभावतया मुक्तितुल्यत्वमिति जीवन्मुक्तिसिद्धिरिति भावः ॥ ৮৩ ॥

মুক্তি হইতে পারে, বিলম্বের কারণ কি ? এই আশঙ্কায় বলিতেছেন,—যেমন দণ্ড সরাইয়া নিলেও দণ্ডকৃত বৈরাগ্য সংস্কারবশে কিছুকাল চক্র ভ্রমণ করে (তৎক্ষণাৎ ভ্রমণ হইতে বিরত হয় না) সেইরূপ বিবেকীরও প্রারব্ধ কর্ম্মের ক্ষয় না হওয়ায় তৎক্ষণাৎ মুক্তি হয় না, কিন্তু উপভোগাদিদ্বারা কর্ম ক্ষয় হইলেই মুক্তি হয়। শ্রুতিও বলিয়াছেন—“জ্ঞানদ্বারাই নর মুক্তিলাভ করে, কিন্তু মুক্ততুল্য হইয়াও কিছুকাল শরীর অবলম্বন করিয়াই থাকে, যেমন কুলালচক্রমধ্যস্থিত ঘট দণ্ডবিচ্ছিন্ন হইয়াও কিছুকাল ভ্রমণ করিয়া থাকে ॥ ৮২ ॥

প্রারব্ধ কর্ম্মের সংস্কার অল্পমাত্রায় থাকে বলিয়াই জীবন্মুক্তির সিদ্ধি হয় ॥৮৩

लाभे:। नैतावता कर्म च इति॥ नैतावता इति वीप्सा अध्याय-परिसमाप्तौ॥ ८४॥

वैराग्याध्यायस्तृतीयः॥

वैराग्यानन्तरं शिष्यप्रबोधाय आख्यायिकार्थं

चतुर्थोऽध्यायारम्भः।

राजपुत्रवत् तत्त्वोपदेशात्॥ १॥

कश्चित् राजपुत्रः गण्डस्थजन्मा निःसारितः शबराधिपेन गृहीतः पुत्रत्वेन तदाचारमात्रं जानाति। अथ अपुत्रस्य राज्ञः मरणे

एवं जीवन्मुक्तिं प्रसाध्य परममुक्तिस्वरूपनिरूपणपरमेतदध्यायचरमसूत्रमवतारयति कदेत्यादिना। तत्साध्यतया हेतुं पूरयति—परममुक्तिप्राप्तिरिति। इयमेव विदेहमुक्तिः निर्वाणं कैवल्यमाख्यायत इत्यवधेयम्॥ ८४॥

इति श्रीकृष्णमिश्रादिवर्णविद्यान्तभट्टाचार्यविरचितायां सांख्यसूत्रविवरणटीकायां तत्त्वबोधिनीसमाख्यायां वैराग्याध्यायस्तृतीयः॥

चतुर्थाध्यायावतरणमाह—वैराग्येत्यादिना। राजपुत्रवदित्याख्यायिकां निरूपयति-

পরম মুক্তি হয় কখন? এই আকাঙ্ক্ষায় বলিতেছেন—বিবেক হইতে নিঃশেষরূপে ত্রিবিধ দুঃখের অত্যন্ত নিবৃত্ত হইলেই জীব পরম মুক্তিলাভ করিয়া কৃতার্থ হয়। জ্ঞান ভিন্ন কর্ম্মাদি হইতে এই পরম মুক্তির লাভ হয় না, এই পরম মুক্তির নাম বিদেহ মুক্তি ও কৈবল্য ও নির্ব্বাণ। ৮৪।

কপিলকৃত সাংখ্যসূত্রের তৃতীয় বৈরাগ্যাধ্যায় সমাপ্ত।

---

* [illegible] आख्यायिकायां यथा—

"[illegible]: [illegible]।

[illegible] एवं [illegible]॥"

अमात्यैः आनीय प्रबोधितः 'न त्वं शबरः राजपुत्रः असि' इति उक्तः झटिति एव पूर्वसंस्कारवशात् राजपुत्राचारं गृहीतवान् । एवं मन्दानामपि प्रबोधायोपदेशो देय इति ॥ १ ॥

आख्यायिकान्तरमाह—

पिशाचवदन्यार्थोपदेशेऽपि ॥ २ ॥

कश्चिदाचार्य्यः "विजने उपदेशं गच्छाव" इति शिष्यमादाय अटवीं प्रविश्य उपदेशं दत्तवान् । गुल्मान्तरितेन पिशाचेन श्रुतम् ।

कश्चिदित्यादिना । गण्डचर्जन्मेति विशेषणं निःसारणहेतुतयोपात्तम्, गण्डचर्जस्य तद्गुरु-पन्नागानामाद्यादिविघातकत्वेन परित्यागस्य च ज्योतिषशास्त्रसिद्धत्वात् तथाहि—

"अश्विनीमघमूलानां गण्डचाद्यास्त्रिनाडिकाः ।
अन्त्याः पौष्णोरगेन्द्राणां पञ्चैव घटिका अनु: ॥
सन्ध्यारात्रिदिवाभागे गण्डयोगोद्भवः शिशुः ।
आत्मानं मातरं तातं विनिहन्ति यथाक्रमम् ॥
सर्व्वेषां गण्डजातानां परित्यागो विधीयते ।
तातेनादर्शनं वापि यावत् षाण्मासिको भवेत् ॥" इति ।

तदाचारमात्रमिति, तस्य शबरस्य य आचारः पशुमारणादिरूपः तन्मात्रमित्यर्थः । मात्र-पदेन राजपुत्राचारः व्यवच्छेदः । आख्यायिकाफलमाह—एवमिति । तथाच तत्त्वोपदेशात् राजपुत्रस्येव मन्दानामपि विवेको जायत इति तदुपदेशोऽप्यवश्यं कर्त्तव्य इति सूत्रार्थः ॥ १ ॥

বৈরাগ্যাধ্যায়ের পর শিষ্যদিগের জ্ঞানের নিমিত্ত আখ্যায়িকা বলিবার জন্ত চতুর্থ অধ্যায় আরম্ভ ।

কোন এক রাজপুত্র গণ্ডকণে জন্মিয়াছিল বলিয়া নিঃসারিত হইয়া এক ব্যাধ কর্তৃক গৃহীত হইয়াছিল ও তাহার পুত্ররূপে পশুমারণাদিরূপ তাহার আচারমাত্রই জানিত। অনন্তর অন্য পুত্ররহিত সেই রাজার মরণ হইলে অমাত্যগণ তাহাকে আনিয়া বুঝাইয়া দিল যে, তুমি ব্যাধের পুত্র নহ, তুমি রাজার পুত্র, এইরূপ উপদিষ্ট হইয়া পূর্ব্বসংস্কারবশতঃ সে রাজপুত্রের আচার গ্রহণ করিল। অতএব মন্দাধিকারীর জ্ঞানের জন্যও অবশ্য উপদেশ দেওয়া উচিত ॥১॥

तत्रापि मुक्तिरभूत्। प्रसङ्गेनापि आत्मज्ञानात् मुक्तिरिति वाक्यार्थः ॥ २ ॥

अत्र विशेषमाह—

आवृत्तिरसकृदुपदेशात् ॥ ३ ॥

तीव्रवैराग्यवतां श्रुतिमात्रात् मोक्षो भवतु। मन्दानान्तु निरन्तरोपदेशत्वात् आवृत्तिः करणीया ॥ ३ ॥

आख्यायिकान्तरमाह—

पितापुत्रवदुभयोर्दृष्टत्वात् ॥ ४ ॥

कश्चित् ब्राह्मणः दारिद्र्यात् गुर्विणीं भार्य्यां तत्पितृगृहे निक्षिप्य प्रतिग्रहार्थं देशान्तरं गतः बहुना कालेन गृहमागत पुत्रं दृष्ट्वा न ज्ञातवान्, अथ तन्माता भर्त्तारं पुत्रञ्च विज्ञापितवती।

"अन्यव्रते श्रुतोऽप्युपदेशः सर्व्वथा श्रोतव्य" इति प्रतिपादनफलकं सूत्रान्तरमवतारयितुमाह—आख्यायिकान्तरमिति आख्यायिकार्थस्तु स्पष्ट एव ॥ २ ॥

अत्रेति, तत्त्वोपदेशादावित्यर्थः। आवृत्तिः करणीयेति, छान्दोग्यादौ श्वेतकेतुप्रमुखान् प्रति आरुणिप्रभृतीनामसकृदुपदेशश्रवणादिति भावः ॥ ३ ॥

आख्यायिकायाः फलितार्थमाह—एवं विनैवाविद्या। तथाच—"पितापुत्रयोरिव उभयोः—गुरुशिष्ययोरपि दृष्टत्वात्—प्रत्यक्षानुमितत्वात् सकृदुपदेशादपि ज्ञानं भवतीति सूत्रार्थः। किन्तु तेन सकृदा पुनरभ्यासेन भवितव्यमन्यथान्धपरम्परापाताद्विघ्नवशित्।

অত্র আখ্যায়িকা বলিতেছেন — কোন এক আচার্য্য "নির্জ্জন স্থানে উপদেশ গ্রহণ কর" এই কথা শিষ্যকে বলিয়া বনে প্রবেশ করিয়া উপদেশ দিয়াছিলেন। গুল্মান্তরিত কোন এক পিশাচ তাহা শুনিয়াছিল ও তৎফলে তাহারও মুক্তি হইয়াছিল। অতএব প্রসঙ্গক্রমে আত্মজ্ঞান হইলেও মুক্তি হয়, ইহাই আখ্যায়িকার তাৎপর্য্য ।২।

তত্ত্বোপদেশ বিষয়ে বিশেষ বলিতেছেন—তীব্র বৈরাগ্য ব্যক্তিদিগের একবার শ্রবণমাত্র মুক্তি হইলেও মন্দাধিকারী ব্যক্তিগণ বারবার উপদেষ্ট, সুতরাং তাহাদের জন্য অবশ্য উপদেশের আবৃত্তি করিবে অর্থাৎ তাহাদিগকে পুনঃ পুনঃ উপদেশ দিতে হইবে ।৩।

ततः उभयोरपि ज्ञानमभूत्। गुरुं विना सुहृदुपदेशादपि तत्त्वज्ञानं भवति इत्यर्थः ॥ ४ ॥

आख्यायिकान्तरमाह—

श्येनवत् सुखदुःखी त्यागवियोगाभ्याम् ॥५॥

केनापि पुंसा श्येनशावकः प्राप्तः, खण्डगुडादिना आहारेण समानेन च पुष्टः कालेन यौवनमवाप। "कथमहमेनं दुःखिनं करोमि" इति तेन पुंसा वने त्यक्तः। श्येनश्च बन्धत्यागात् सुखी पुरुषवियोगाच्च दुःखीति दुःखशबलत्वात् सुखस्य द्वयमपि हेयमिति भावः ॥ ५ ॥

भाष्यकारस्तु "आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ" इत्यनुसारेण तस्य पितापुत्रयोरिवात्मनोऽपि उभयोः—मरणोत्पादयोः दृष्टत्वात्—अनुमितत्वात् वैराग्येण विवेकी भवतीति सूत्रार्थं वर्णितवानित्यनुसन्धेयम् ॥ ४ ॥

पुरुषवियोगादिति, दयालोः पोषकपुरुषस्य विच्छेदादित्यर्थः। आख्यायिकायाः फलितार्थमाह—दुःखशबलत्वादिति, दुःखविमिश्रितत्वादित्यर्थः। द्वयं—सुखं दुःखञ्च ॥ ५ ॥

কোন এক ব্রাহ্মণ দরিদ্রতাবশতঃ গর্ভিণী ভার্য্যাকে তাহার পিতৃগৃহে রাখিয়া দেশান্তরে গিয়াছিলেন, পরে বহুকাল গত হইলে গৃহে আসিয়া পুত্রকে দেখিয়া চিনিলেন না, অনন্তর সেই পুত্রের মাতা ভর্ত্তা ও পুত্রকে পরস্পরের নিকট পরিচিত করিয়া দিলেন, তখন উভয়েরই পুত্র ও পিতা বলিয়া জ্ঞান হইল। অতএব গুরুভিন্ন সুহৃদের উপদেশেও তত্ত্বজ্ঞান হইয়া থাকে ॥৪॥

কোন এক পুরুষ এক শ্যেনশাবক পাইয়া খণ্ডগুড়াদি সমান আহারে তাহার পোষণ করিয়াছিল, কালে সেই শাবক যৌবনপ্রাপ্ত হইল। পরে "কেন আমি ইহাকে দুঃখিত করি?" ইহা ভাবিয়া সেই পুরুষ তাহাকে বনে ছাড়িয়া দিল। শ্যেন পক্ষীও বন্ধন ত্যাগ হইল বলিয়া সুখীও সেই প্রতিপালক দয়ালু পুরুষের বিচ্ছেদে দুঃখী হইল। (জীব ও শ্যেনপক্ষীর ন্যায় ত্যাগ ও পরায় সুখী ও দুঃখী হয়।) সুখমাত্রই দুঃখবিমিশ্রিত, সুতরাং সুখ ও দুঃখ উভয়ই ত্যাজ্য ॥৫॥

आख्यायिकान्तरमाह—

अहिनिर्ल्वयनीवत् ॥ ६ ॥

निर्ल्वयनी निर्मोकः। कश्चिदहिः बिवरद्वारि निर्मोकं त्यक्त्वा ममेदमिति धूलीपङ्कलिप्तं दृष्ट्वा शोचति, स्नेहाच्च न मुमोच तावत् निर्मोकानुसारात् केनापि आहितुण्डिकेन गृहीतः। ममत्वस्नेहादयो न कर्त्तव्या इत्यर्थः॥ ६ ॥

आख्यायिकान्तरमाह—

छिन्नहस्तवद्वा ॥ ७ ॥

कश्चिन्मुनिः भ्रातुराश्रमं प्रविश्य फलादिकमाजहार। भ्रात्रापि उक्तः "स्तेयी त्वम्" इति। तेनोक्तं "प्रायश्चित्तं वद"। भ्रात्रापि उक्तं "हस्तच्छेदादन्यत् प्रायश्चित्तं नास्ति" इति। तेन च राज्ञे निवेद्य स्वहस्तौ छेदितौ। तस्मादकार्य्यं न कर्त्तव्यं, प्रमादकृते च तन्निष्कृतिः अवश्यं कर्त्तव्येति ॥ ७ ॥

निगदव्याख्यानेन वृत्तिग्रन्थे नाख्यायिकार्थं व्याख्याय फलितार्थमाह—ममत्वेत्यादिना। भाष्यकारस्तु "जीर्णां त्वचमिवोरगः" इत्यनुसारेण "यथाहि जीर्णां त्वचं परित्यजत्यनायासेन उरगः, तथैव तनुतनुप्रकृतिं बहुकालोपभुक्तां जीर्णां उरगवत् त्यजे"दिति सूत्रार्थं वर्णितवान्। किन्तु वृत्तिकृन्मत एवाख्यायिकात्वं स्फुटं तिष्ठतीत्यवधेयम् ॥ ६ ॥

आख्यायिकार्थमुपसंहरति—तस्मादित्यादिना। भिक्षुः पुनरिदमपि सूत्रमन्यथा व्याख्यातवान्। यथा—"त्यक्तञ्च मद्यादिकं पुनः न स्वीकुर्य्यादित्याह—'छिन्नहस्तवदि'ति' यथा छिन्नं हस्तं पुनः कोऽपि नादत्ते, तथैवैतत्त्यक्तं पुनर्नाभिनन्देतेत्यर्थः" इति ॥ ७ ॥

কোন এক সর্প বিবরদ্বারে নিজের নির্মোক ত্যাগ করিয়া ধূলিপঙ্কযুক্ত দেখিয়া ইহা আমার ভাবিয়া খেদান্বিত হইলেও স্নেহবশতঃ তাহা ছাড়িয়া গেল না। পরে সেই নির্মোক অনুসারে কোন এক আহিতুণ্ডিক (সাঁপুড়ে) কর্তৃক ধৃত হইল। অতএব অযথা মমত্ব ও স্নেহাদি কর্তব্য নহে। ।৬।

কোন এক মুনি ভ্রাতার আশ্রমে প্রবেশ করিয়া (না বলিয়া) ফলাদি আহরণ করিয়াছিল, যখন ভ্রাতা বলিলেন, "তুমি চোর" তখন সে বলিল,

आख्यायिकान्तरमाह—

असाधनानुचिन्तनं बन्धाय भरतवत् ॥ ८ ॥

भरतो नाम नृपः प्रत्यासन्नमोक्षोऽपि तत्प्रसवप्रसूतां हरिणीं दृष्ट्वा हरिणशावकं पुपोष। तं विहाय नान्यमना बभूव। मरणसमये तद्गतमनाः प्राणान् तत्याज। तत्सङ्गात् मुक्तिं नाप। अनिष्टचिन्तनं न कार्य्यम् इत्यर्थः ॥ ८ ॥

बहुभिर्मेलनं न कुर्य्यादित्याह—

बहुभिर्योगे विरोधो रागादिभिः कुमारीशङ्खवत् ॥ ९

बहुभिः कलहः अवश्यं, यथा कुमारीशङ्खानाम् अन्योऽन्यं झणत्कारः परस्परसङ्घर्षात् ॥ ९ ॥

धर्म्योऽपि तस्मिन् चित्तं नातिनिवेशनीयं, यद्विवेकख्यात्यन्तरङ्गसाधनं न भवतीति प्रतिपादनपरं प्रसिद्धं जड़भरतोपाख्यानमवतारयन्नाह—आख्यायिकान्तरमिति। नान्यमना बभूवेति, तथाचोक्तं जड़भरतं प्रकृत्य विष्णुपुराणे—

"चपलं चपले तस्मिन् दूरगं दूरगामिनि।
आसीच्चेतः समासक्तं तस्मिन् हरिणपोतके॥" इति।

फलितार्थमाह—अनिष्टेत्यादिना ॥ ८ ॥

"প্রায়শ্চিত্ত বলুন", ভ্রাতাও বলিলেন, "হস্তচ্ছেদন ভিন্ন ইহার প্রায়শ্চিত্ত নাই" তখন সে রাজাকে জানাইয়া নিজের হস্ত ছেদন করিল। অতএব অকার্য্য করা কর্ত্তব্য নহে, দৈবাৎ করিয়া ফেলিলেও প্রায়শ্চিত্তাদিদ্বারা তাহার নিষ্কৃতি অবশ্য কর্ত্তব্য ॥ ৭ ॥

ভরতনামক রাজা মুক্তপ্রায় হইয়াও সেই মুক্তির ক্ষণেই হরিণীকে প্রসব করিতে দেখিয়া হরিণশাবকের পোষণ করিয়াছিলেন। (এমন কি) তাহাকে পরিত্যাগ করিয়া তিনি অন্যমনা হইতে পারিতেন না। মরণসময়েও হরিণগত চিত্ত হইয়াই প্রাণ পরিত্যাগ করিলেন, সুতরাং তৎসঙ্গে আর মুক্তি লাভ করিতে পারিলেন না। অতএব (ধর্ম্মকার্য্য হইলেও যাহা সাক্ষাৎ মুক্তির সাধক নহে, তাহার অনুষ্ঠান বন্ধের কারণ হইয়া থাকে) সুতরাং তাদৃশ চিন্তা কর্ত্তব্য নহে ॥ ৮

द्वाभ्याम् अपि न कुर्यात् इत्याह—

द्वाभ्यामपि तथैव ॥ १० ॥

संकथनादिदोषात् ॥ १० ॥

आख्यायिकान्तरमाह—

निराशः सुखी पिङ्गलावत् ॥ ११ ॥

पिङ्गला नाम वेश्या रत्यर्थं भुजङ्गागमनप्रतीक्षणात् अनिद्रा दुःखम् अनुभूतवती। एकदा तु अत्यन्तदुःखनिर्विण्णा 'पुनः न एवं करिष्यामि' इति निर्विण्णा बभूव। निराशा सुखं लेभिति, आशैव दुःखं तत्त्यागः सुखमित्यभिप्रायः ॥ ११ ॥

सूत्रान्तरमवतारयति—बहुभिरित्यादिना। दृष्टान्तं विशदयति—वसीत्यादिना ॥ ९ ॥

सूत्रे तथैवेति—विरोध एवेत्यर्थः। तत्र हेतुं पूरयति—संकथनादिदोषादिति, द्वयोः मेलनेऽपि परस्परालापस्यावश्यम्भावादित्यर्थः। तथाचोक्तम्—

"वासे बहूनां कलहो भवेद्वार्त्ता द्वयोरपि ।
एक एव चरेत्तस्मात् कुमार्या इव कङ्कणम् ॥" इति ॥ १० ॥

पिङ्गलावदिति दृष्टान्तं स्फुटीकरोति—पिङ्गला नामेत्यादिना। तथाचोक्तं—

"आशा हि परमं दुःखं नैराश्यं परमं सुखं।
यथा संछिद्य कान्ताशां सुखं सुष्वाप पिङ्गला ॥" इति ॥

आख्यायिकायाः फलितार्थमाह—आशैवेत्यादिना। न च आशात्यागेन दुःखविगमे सत्यपि साधनाभावेन सुखं कुतः सम्भवतीति वक्तव्यं, चित्तस्य सत्त्वप्रधानत्वेन स्वाभाविकमेव यत्-

পরস্পর সম্পর্কে যেমন কুমারীর শঙ্খের শব্দ হইয়া থাকে, বহুলোকের সহিত সম্মেলনেও সেইরূপ কলহ অবশ্যম্ভাবী। অতএব বহুলোকের সংসর্গ কর্ত্তব্য নহে। ৯।

উভয়ের সম্মেলনে ও পরস্পরালাপে বিরোধ ঘটে, অতএব তাহাও কর্ত্তব্য নহে, যোগীদের পক্ষে একাকী থাকাই বিধেয়। ১০।

পিঙ্গলানাম্নী এক বেশ্যা রত্যাশায় উপপতির আগমন প্রতীক্ষা করতঃ অনিদ্রায় কষ্ট পাইয়াছিল। এক দিন অত্যন্ত দুঃখিতা হইয়া "আর এইরূপ

गृहारम्भः दुःखाय, इत्याह—

अनारम्भेऽपि परगृहे सुखी सर्पवत् ॥ १२ ॥

व्यक्तम् ॥ १२ ॥

शास्त्रे व्याख्यानपरोपालम्भादिकमसारमस्ति, तत्परित्यजनीयम् इत्याह—

बहुशास्त्रगुरूपासनेऽपि सारादानं षट्पदवत् ॥ १३

यथा भ्रमरः पुष्पं विहाय मधु समादत्ते, तद्वत् मोक्षार्थिना अविद्या त्याज्या इति ॥ १२ ॥

सुखं आशापिहितं तिष्ठति, तस्य आशाविगमेन तदभिव्यक्तिकत्वात्। अत एव दुःखनिवृत्तावपि इष्यते सुखव्यवहारः, यथा भारापगमे "सुखी संवृत्त" इति व्यवह्रियते ॥ ११ ॥

व्यक्तमिति, मोक्षप्रतिबन्धकत्वात् भोगार्थमारम्भोऽपि न कर्तव्य इत्युपदेशः स्पष्ट इत्यर्थः। तथाचोक्तं—

"गृहारम्भो हि दुःखाय न सुखाय कथञ्चन।
सर्पः परकृतं वेश्म प्रविश्य सुखमेधते ॥" इति ॥ १२ ॥

सूत्रान्तरमवतारयति—शास्त्र इत्यादिना। षट्पदवदिति दृष्टान्तं व्याचष्टे—यथेत्यादिना। तथाचोक्तम्—

"अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः।
सर्वतः सारमादद्यात् पुष्पेभ्य इव षट्पदः ॥" इति ॥ १३ ॥

প্রতীক্ষা করিব না" ইহা ভাবিয়া দুঃখিতা হইয়াও আশা ত্যাগ করিয়া সুখে নিদ্রা গিয়াছিল। অতএব আশা থাকিলেই দুঃখ এবং তাহা ত্যাগ করিতে পারিলেই সুখ ॥ ১১ ॥

ইন্দুরেরা বহুকষ্টে গৃহ নির্ম্মাণ করে, কিন্তু সর্প তাহাতে প্রবেশ করিয়া সুখে বাস করে। অতএব গৃহাদি নির্ম্মাণ না করিলেও সর্পের মত পরগৃহে সুখী হওয়া যায়, সুতরাং মুমুক্ষু ব্যক্তিরা বাসের জন্য গৃহাদির আড়ম্বর করিবেন না ॥ ১২ ॥

বহু শাস্ত্রে নানা ব্যাখ্যান পরোপালম্ভাদি বহু অসার এবং বহু উপাদানাদি

कस्य समाधि: भवति ? इत्यत्राह—

इषुकारवन्नैकचित्तस्य समाधिहानि: ॥ १४ ॥

यथा इषुकार: इषौ गतमना: समीपे गच्छन्तं राजानं न बुद्धवान्, तथैव एकाग्रमनसो न समाधिहानि: इति ॥ १४ ॥

सत्त्वशुद्ध्यर्थं न व्रतादिभङ्ग: कर्त्तव्य: इत्याह—

व्रतनियमलङ्घनादानर्थक्यं लोकवत् ॥ १५ ॥

यथा लोके बहुय: कृतसमयलङ्घनं सर्वे परित्यजन्ति, तथा व्रतादिलङ्घनात् वेदार्थबाह्यो भवति इति ॥ १५ ॥

सूत्रान्तरमवतारयितुं प्रश्नते—कस्येति। दृष्टान्तं स्पष्टयति—यथेत्यादिना। तथाचोक्तम्—

"तद्वेवमात्मन्यवरुद्धचित्तो न वेद किञ्चिद्बहिरन्तरं वा।

यथेषुकारो नृपतिं व्रजन्तमिषौ गतात्मा न ददर्श पार्श्वे॥" इति ॥ १४ ॥

सूत्रान्तरमवतारयति—सत्त्वेत्यादिना। लोकवदिति दृष्टान्तं स्पष्टयति—यथेत्यादिना, कृतसमयलङ्घनमिति कृतं समयस्य—प्रतिज्ञाया: लङ्घनं—अप्रतिपालनं येन तादृशं जनमित्यर्थ:। वेदार्थबाह्य इति, व्रतादिलङ्घनकारी जन:, वेदार्थस्य तत्त्वज्ञानस्य बाह्य:—बहिर्भूत: तल्लाभे असमर्थ इत्यर्थ:। तथाच—"व्रतानां—चित्तशुद्ध्यादिसम्पादकस्नातकादिव्रतानां, नियमानां—शास्त्रविहितशौचाचारादीनां लङ्घनात्—अप्रतिपालनात्, आनर्थक्यं—तत्त्वज्ञानसाधनानां योगाद्यनुष्ठानस्य वैफल्यमिति सूत्रार्थ:। एवञ्च समुत्पन्ने तत्त्वज्ञाने व्रतादिलङ्घनेऽपि न दोष:। तथाचोक्तम्—

থাকিলেও ভ্রমরের ন্যায় সারগ্রাহী হইবে। ভ্রমর যেমন পুষ্প পরিত্যাগ করিয়া তাহার সারাংশ মধু গ্রহণ করে, সেইরূপ মোক্ষার্থীদিগেরও বিদ্যারূপ সারাংশ গ্রহণ করিয়া অবিশুদ্ধি পরিত্যাগ কর্ত্তব্য। ১৩।

যেমন শরনির্ম্মাতা পুরুষ শরনির্ম্মাণমনস্ক হইলে (একাগ্রতাবশতঃ) সমীপগত রাজাকেও দেখিতে পায় না, সেইরূপ একাগ্রমনা ব্যক্তিরও সমাধি ভঙ্গ হয় না। অতএব সমাধির জন্য একাগ্রতা আবশ্যক। ১৪।

চিত্তবিশুদ্ধির জন্য অনুষ্ঠেয় ব্রতাদির পরিত্যাগ করা কর্ত্তব্য নহে, যেমন লোকে বহুবার প্রতিজ্ঞাভঙ্গকারী ব্যক্তি সকলেরই পরিত্যাজ্য

तत्त्वज्ञानविस्मरणेन दुःखमवश्यं भवति इत्याह—

तद्विस्मरणेऽपि भेकीवत् ॥ १६ ॥

कश्चित् नृपः मृगयां गतः, वने सुन्दरीं कन्यामपश्यत्। तामपृच्छत् "का त्वमिति"। सा प्राह "राजदुहिताऽहम्"। राजा प्राह "मां भजस्व"। सा प्राह "वाढ़ं, किन्तु समयं कुरु, त्वया जलं मम न दर्शनीय"मिति। "एवमस्तु" इति उक्त्वा तस्याः पाणिं जग्राह। एवं गते काले क्रीड़या आयासिता कुत्र जलमिति राजानं पप्रच्छ। राजाऽपि संभ्रमात् समयं विस्मृत्य जलमदर्शयत्। सा च भेकराजदुहिता जलस्पर्शात् भेकी बभूव। राजाऽपि जालादिना तामन्विष्य प्राप्य बहु दुःखमनुबभूव। तस्मात् तत्त्वाभ्यासविच्छेदो न कार्य्यः इति ॥ १६ ॥

"अपेतव्रतकर्म्मा तु केवलं ब्रह्मणि स्थितः।
ब्रह्मभूतश्चरन् लोके ब्रह्मचारीति कथ्यते ॥ इति ॥" १५ ॥

भिन्नव्याख्यानेन श्रुतिमध्ये नारायणिकानामध्याय मतमफलितार्थं दर्शयति—तस्मादि-त्यादिना ॥ १६ ॥

হয়, সেইরূপ ব্রতাদিলঙ্ঘনকারী ব্যক্তিও বেদার্থ হইতে পরিত্যাজ্য অর্থাৎ বেদার্থলাভে অসমর্থ হয়। অতএব ব্রতনিয়মাদি লঙ্ঘন করিয়া যোগাদির অনুষ্ঠান করিলেও তাহা ব্যর্থ হয় ॥ ১৫ ॥

তত্ত্বজ্ঞান বিস্মৃত হইলে দুঃখ অবশ্যম্ভাবী। কোন এক রাজা মৃগয়ায় গিয়া বনে এক সুন্দরী কন্যা দেখিলেন ও তাহাকে জিজ্ঞাসা করিলেন, "তুমি কে ?" সে বলিল "আমি রাজার কন্যা" রাজা বলিলেন, "আমাকে ভজনা কর" সে বলিল, "স্বীকার করিলাম, কিন্তু প্রতিজ্ঞা কর যে, তুমি আমায় জল দেখাইতে পারিবে না" "তাহাই হইবে" বলিয়া রাজা তাহার পাণি গ্রহণ করিলেন। এরূপে কিছু দিন অতীত হইলে (একদিন) ক্রীড়া-পরিশ্রান্তা সেই রাজদুহিতা রাজাকে জিজ্ঞাসা করিলেন "জল কোথায় ?" রাজাও প্রতিজ্ঞা ভুলিয়া গিয়া সসম্ভ্রমে তাহাকে জল দেখাইয়া দিলেন।

आख्यायिकान्तरमाह—

नोपदेशश्रवणेऽपि कृतकृत्यः परामर्शादृते विरोचनवत्॥१७

न श्रवणमात्रात् मुक्तिः, किन्तु मननात् एव। यथा इन्द्रविरोचनौ तत्त्वज्ञानाय ब्रह्मलोकं गतौ, ब्रह्मणा च उपदिष्टौ। विरोचनः तत्त्वज्ञान-श्रवणात् स्वगृहम् आगतः न मननादि कृतवान्। अतो नामुच्यत। इन्द्रः तु ब्रह्माणमाराधयन् बहुकालं मननमकरोत्॥ १७॥

इन्द्रस्य किं वृत्तम्? इत्यत्राह—

दृष्टस्तयोरिन्द्रस्य॥ १८॥

तयोः मध्ये इन्द्रस्य बोधः दृष्टः। बहुकालाभ्यासेन ब्रह्मप्रसादनात् मननिदिध्यासनसाक्षात्कारात् सिद्धिः इति॥ १८॥

सूत्रस्य भावार्थं विवृणोति—नेत्यादिना। तथाच—सूत्रं परामर्शादृते इत्यस्य मननं विनेत्यर्थः, मननञ्च श्रुतार्थस्य तात्पर्यनिर्णयकानुशीलनं। विरोचनवदिति दृष्टान्तं व्याचष्टे—यथेत्यादिना॥ १७॥

सूत्रान्तरमवतारयितुं प्रकृते—इन्द्रस्येत्यादिना। सूत्रं व्याकुर्वन्नाह—तयोरिति। इन्द्र-विरोचनयोरित्यर्थः। अन्वयानिष्पत्तेः पूरयति—बोध इति।—बहुकालेत्यादिना॥ १८॥

সেই ভেকরাজার কন্যাও জলস্পর্শে ভেকী হইয়া গেল। রাজা জালাদিদ্বারা বহু অনুসন্ধান করিয়াও তাঁহাকে না পাইয়া অতিশয় দুঃখ অনুভব করিলেন, অতএব তত্ত্বাভ্যাসের পরিত্যাগ করিবে না॥ ১৬॥

শ্রবণমাত্র মুক্তি হয় না, পরন্তু মননাদি হইতেই মুক্তি হয়। যেমন ইন্দ্র ও বিরোচন উভয়েই তত্ত্বজ্ঞানের জন্য ব্রহ্মলোকে যাইয়া ব্রহ্মা কর্তৃক উপদিষ্ট হইলেন। বিরোচন তত্ত্বোপদেশ শ্রবণের পরেই নিজের ঘরে চলিয়া গেল, মননাদি করিল না, সুতরাং তাহার মুক্তিও হইল না। ইন্দ্র ব্রহ্মার আরাধনা করিয়া বহুকাল মনন করিলেন। সেই ইন্দ্র ও বিরোচনের মধ্যে ইন্দ্রেরই তত্ত্বজ্ঞান ও মুক্তি হইল। বহু কালাভ্যাসবশে ব্রহ্মপ্রসাদন ও শ্রবণ, মনন, নিদিধ্যাসন, সাক্ষাৎকার হইতেই সিদ্ধি হয়॥ ১৭।১৮॥

ज्ञानप्राप्तिश्च कथम्? इत्यत आह—

प्रणतिब्रह्मचर्य्योपसर्पणानि कृत्वा सिद्धिर्बहुकालात् तद्वत् ॥ १९ ॥

अप्रणतस्य अब्रह्मचारिणः अनधिकारः। तद्वत् इन्द्रवत्, यथा ब्रह्माराधनेन इन्द्रेण ज्ञानं प्राप्तं, तथा गुर्वाराधनेन अन्येनापि ॥१९॥

किं कालदेशनियमात् मुक्तिः? तथा च चिरक्षिप्रभावः न स्यात् इत्यत आह—

न कालनियमो वामदेववत् ॥ २० ॥

आराधनार्थं कालनियमः, न मोक्षार्थं, वामदेवस्य तत्त्वज्ञानात् क्षिप्रं मुक्तिदर्शनात् ॥२०॥

सूत्रान्तरमवतारयितुमाह—ज्ञानेत्यादिना। सूत्रस्य फलितार्थं कथयति—अप्रणतस्येत्यादिना। इन्द्रवदित्येव विशदयति—यथेत्यादिना ॥ १९ ॥

सूत्रान्तरमवतारयितुं शङ्कते—किमित्यादिना। न स्यादिति, कालनियमस्य सर्वं प्रत्यविशेषादिति भावः। ननु कालनियमस्याभावे मोक्षशास्त्रेषु क्वचित् पुनः कालनियमः कथमुपपद्यत इत्यत आह—आराधनार्थमिति, तथा च—चिरशुश्रूषया विहितस्याराधनस्यैव कालनियमो न तु साक्षान्मुक्तौ तस्योपयोग इति भावः। क्षिप्रं मुक्तिदर्शनादिति जन्मान्तरीयसाधनेभ्यो वामदेवस्य गर्भ एव मुक्तिरिति श्रवणादित्यर्थः ॥ २० ॥

জ্ঞান প্রাপ্তি হয় কি প্রকারে? এই প্রশ্নে বলিতেছেন—অব্রহ্মচারী ব্যক্তির তত্ত্বজ্ঞানে অধিকার নাই। ইন্দ্র যেমন প্রণতি, ব্রহ্মচর্য্য ও গুরুগৃহে বাস করতঃ ব্রহ্মার আরাধনে বহু কালে তত্ত্বজ্ঞান লাভ করিয়াছিলেন, অন্যেও সেইরূপ ভাবে গুরুর আরাধনাদ্বারাই তত্ত্বজ্ঞান প্রাপ্ত হইবে ॥১৯॥

মুক্তিতে কাল ও দেশের নিয়ম আছে কি না? যদি থাকে, তবে কাহারও শীঘ্র এবং কাহারও বিলম্বে মুক্তি হইতে পারে না, এই আশঙ্কায় বলিতেছেন—আরাধনাতেই কালাদির নিয়ম আছে, মুক্তিতে নাই, যেহেতু শুনা যায়, জন্মান্তরীয় তত্ত্বজ্ঞানবশে বামদেবের অতিশীঘ্র অর্থাৎ গর্ভেই মুক্তি হইয়াছিল ॥ ২০ ॥

জ্ঞাতে হি ধ্যায়েৎ, ন চ আত্মা কেনাপি দৃষ্টঃ। দৃষ্টঃ চেৎ, কিং ধ্যানেন? ইত্যত আহ—

অধ্যস্তরূপোপাসনাৎ পারম্পর্য্যেণ যজ্ঞোপাসকানামিব ॥ ২১ ॥

ধর্মশ্চ কেন দৃষ্টঃ, তথাপি ধর্মলাভায় যজ্ঞোপাসনং, পারম্পর্য্যেণ—দেবতোদ্দেশেন হবিস্ত্যাগাৎ। তথাপি গুরুণা যৎ অধ্যস্তং রূপং, তৎস্বরূপোপাসনাৎ পারম্পর্য্যেণ তদ্রূপং প্রকাশতে। দৃষ্টং চ সমানবস্তুচিন্তায়াং সমানানুস্মরণম্। তথা চ—

সদৃশাদৃষ্টচিন্তাদ্যাঃ স্মৃতিবীজস্য বোধকাঃ।
অতো নাতিপ্রসঙ্গোঽস্তি স্বপ্নাদৌ ভাবনাবলাৎ ॥ ২১ ॥

সূত্রান্তরমবতারয়িতুং শঙ্কতে—জ্ঞাত ইত্যাদিনা। সূত্রতাৎপর্য্যং বিবারয়ন্নাহ—ধর্মশ্চ কেন দৃষ্ট ইতি ন কেনাপি দৃষ্ট ইত্যর্থঃ। তথাপি ধর্মস্যাদৃষ্টত্বেঽপি, যজ্ঞোপাসনমিতি, যথা লোকৈঃ ক্রিয়তে ইতি শেষঃ। কথং ক্রিয়ত ইত্যাকাঙ্ক্ষাপূরকতয়া সূত্রং ব্যদিশ্যমুপন্যস্যতি—পারম্পর্য্যেণেতি, তদর্থমাহ—দেবতেত্যাদিনা। তেন চোপাসনেন ধর্মলাভোঽপি ভবতীত্যাশয়ঃ। ততঃ প্রকৃতে বিবক্ষিতমিত্যত আহ—তথাপীতি। অধ্যস্তং রূপমিত্যাদিনা মনসি সমারোপিতং, তৎস্বরূপোপাসনাৎ—গুরূপদিষ্টস্বরূপস্যানুচিন্তনাৎ কথমনুচিন্তনমিত্যাকাঙ্ক্ষায়ামাহ—পারম্পর্য্যেণেতি, গুরূপদিষ্টশাস্ত্রোক্তেতিকর্ত্তব্যতাদিনেত্যর্থঃ। ইমমেবার্থং সমর্থয়তি—দৃষ্টঞ্চেত্যাদিনা। স্মৃতিবীজস্য—সংস্কারস্য, বোধকাঃ—উদ্বোধকাঃ ॥ ২১ ॥

যাহার প্রত্যক্ষ হয়, তাহারই চিন্তা করা যায়, কিন্তু আত্মাকে ত কেহ প্রত্যক্ষ করেন নাই, যদি কেহ করিয়া থাকেন, তাহার ধ্যানেরও প্রয়োজন নাই, কারণ আত্মসাক্ষাৎকারই ধ্যানের চরম উদ্দেশ্য, অতএব আত্মার ধ্যান হয় কিরূপে? এই আশঙ্কায় বলিতেছেন—ধর্মকে কে দেখিয়াছে? তাহাকেও ত কেহ দেখে নাই, তথাপি ধর্মলাভের জন্য দেবতোদ্দেশে হবিস্ত্যাগাদিক্রমে লোকে যজ্ঞোপাসনা করিয়া থাকে (তদনুসারে ধর্ম-লাভও হয়) অতএব আত্মারও পূর্ব্বে প্রত্যক্ষ না হইলেও গুরু কর্ত্তৃক উপদিষ্টরূপ অনুসারে পারম্পর্য্যক্রমে আত্মার উপাসনা করিবে এবং তাহা

ब्रह्मादिलोकलाभात् कृतकृत्यस्य किमात्मज्ञानेन ? इत्यत आह—

इतरलाभेऽप्यावृत्तिः पञ्चाग्नियोगतो जन्मश्रुतेः ॥२२॥

अग्निहोत्रादिना ब्रह्मलोकप्राप्तिः, कर्मजञ्च क्षीयते इति पुनरावृत्तौ जन्मश्रुतिः 'यथा इह कर्मजितः लोकः क्षीयते, एवम् एव अमुत्र पुण्यजितः लोकः क्षीयते, इति, (छान्दो०, उप०, ८अध्या०, १खण्ड०, ६मन्त्रः)

किञ्च 'न कर्मणा न प्रजया धनेन, त्यागेनैके अमृतत्वमानशुः' इति (महा०, नार० १०।५) ॥ २२ ॥

सूत्रान्तरमवतारयति—ब्रह्मे त्यादिना। "इतरलाभेऽपि—मोक्षेतरब्रह्मलोकावाप्त्यादिरूपफलप्राप्तावपि, आवृत्तिः—संसारे पुनरागमनं भवतीति शेषः, अत्र हेतुमाह—पञ्चाग्नियोगतो-जन्मश्रुतेरिति, ब्रह्मलोकं गतस्यापि देवयानपथेद्युपर्जन्यधरानरयोषिद्रूपपञ्चाग्नियोगेन क्रमेण जन्मश्रवणादित्यर्थः ॥" कर्मफलेनैव ब्रह्मलोकावाप्तेः स्वयमुपादयिष्यन् तस्याः कर्मजत्वं दर्शयति—अग्निहोत्रे त्यादिना ॥ २२ ॥

হইতেই আত্মার স্বরূপ প্রকাশিত হইবে। সমান বস্তুর চিন্তায় যে পরে সমান বস্তুর স্মরণ হয়, ইহা অনুভবসিদ্ধ। শাস্ত্রেও উক্ত আছে, "সদৃশ বস্তু অদৃষ্ট ও সদৃশ বস্তুর চিন্তা প্রভৃতি সংস্কারের উদ্বোধক। অতএব ভাবনাবশে যে অদৃষ্ট বস্তুও স্বপ্নে দেখা যায়, তাহাতে কোনও আপত্তি হইতে পারে না" ॥ ২১ ॥

ব্রহ্মাদি লোক লাভেই কৃতার্থতা সম্ভবে আত্মজ্ঞানের প্রয়োজন কি ? এই প্রশ্নে বলিতেছেন—ব্রহ্মলোকাদি লাভ করিলেও পুনরায় অবশ্যই সংসারে আসিতে হয়, যেহেতু (ব্রহ্মাদি লোক প্রাপ্তদিগেরও দেবযানপথে) পঞ্চাগ্নি-যোগক্রমে জন্মশ্রুতি আছে। অর্থাৎ—দিবপর্য্যায় (মেঘ) পৃথিবী নর ও যোষিৎ পারিভাষিক পঞ্চাগ্নি, স্বর্গভোগক্ষয় হইলে স্বর্গচ্যুত হইয়া মেঘে, মেঘ হইতে জলের সঙ্গে পৃথিবী হইতে শস্যাদির সহিত নরশরীরে ও নর-শরীর হইতে রেতের সহিত স্ত্রীশরীরে প্রবিষ্ট হইয়া জন্ম হয়, ইহা উপনিষদে বিস্তৃতভাবে বর্ণিত আছে।

विरक्तस्य किं स्वरूपम्? इत्यत आह—

विरक्तस्य हेयहानमुपादेयोपादानं हंसक्षीरवत् ॥२३॥

यद्यपि सर्वेषां हेयहानम् उपादेयोपादानं, तथापि प्रकरण-विशेषात् हेयः संसारः, उपादेयो मोक्ष इति द्रष्टव्यम् ॥ २३ ॥

अत्र युक्तिमाह—

लब्धातिशययोगात् तद्वत् ॥२४॥

हंसवत् हंसस्य एव अतिशयशक्तिः येन मिश्रितमपि क्षीरं पिबति

विरक्तस्यैव तत्त्वज्ञाननिष्पत्तेः सिद्धान्तितत्वात्तत्स्वरूपनिरूपणपरतया परसूत्रमवतारयति— विरक्तस्येत्यादिना। ननु हेयहानोपादेयोपादानयोर्जीवमात्रसाधारणत्वात्ताभ्यां न किञ्चिदपि वैशिष्ट्यं, विरक्तस्य सिध्यतीति शङ्कते—यद्यपीत्यादिना, समाधत्ते—तथापीत्यादिना। तथाच संसारमोक्षयोरेव प्रस्तावात् सूत्रस्थं हेयपदं संसारपरं उपादेयपदञ्च मोक्षपरमिति भावः। एवञ्च—हंसो यथा मिश्रितयोरपि नीरक्षीरयोरसारं जलं त्यक्त्वा क्षीरमेव गृह्णाति, तथैव यः संसारमसारं त्यक्त्वा मोक्षमुपास्ते, स एव विरक्त इति स्थितम् ॥ २३ ॥

परন্তু অগ্নিহোত্রাদি কর্ম্ম দ্বারাই ব্রহ্মলোকাদি প্রাপ্ত হয়। অথচ কর্ম্মজ হইলেই তাহার ক্ষয় আছে। পুনরাবৃত্তি বিষয়ে আরও শ্রুতি আছে— "যেমন ইহলোকে কর্ম্মজিত ব্যক্তির ক্ষয় হয়, তেমন পরলোকে পুণ্যজিত ব্যক্তিরও ক্ষয় হয়।" "কর্ম্মসন্তান বা ধনদ্বারা মুক্তি হয় না, ত্যাগদ্বারাই কেহ কেহ মুক্তি লাভ করিয়াছেন।" (অতএব ব্রহ্মলোকাদি লাভে কৃতার্থতা হইতে পারে না) ॥ ২২ ॥

বিরক্তের লক্ষণ কি? এই প্রশ্নে বলিতেছেন—জলমিশ্রিত দুগ্ধ হইতে অসার জল পরিত্যাগ করিয়া দুগ্ধ গ্রহণ করা যেমন হংসের লক্ষণ, সেইরূপ হেয় পদার্থের পরিত্যাগ ও উপাদেয় পদার্থের গ্রহণ বিরক্তের লক্ষণ। যদিও হেয় পদার্থের পরিত্যাগ ও উপাদেয় পদার্থের গ্রহণ প্রাণিমাত্রেরই সমান, তথাপি প্রকরণবশে এই সূত্রে হেয় শব্দের অর্থ সংসার ও উপাদেয় শব্দের অর্থ মোক্ষ বুঝিতে হইবে ॥ ২৩ ॥

अर्थं त्यजति। तथा लब्धातिशयस्य पुंसः संसारः हेयः उपादेयः मोक्षः इति ॥ २४ ॥

सरागस्यापि मुक्तिर्भविष्यति इत्यत्राह—

न कामचारित्वं रागोपहतेः शुकवत् ॥२५॥

रागोपहतस्य कामचारित्वमेव नास्ति, किं पुनर्मुक्तिरिति। यथा व्यासस्य सरागस्य न मुक्तिः, अथ तत्सुतस्य शुकस्य वीतरागत्वात् मुक्तिर्भूता एवम् ॥ २५ ॥

बन्धः कथम्? इत्यत्राह—

गुणयोगाद् बन्धः शुकवत् ॥ २६ ॥

यथा शुकः पक्षी गुणयोगात् बन्धमाप्नोति, तथा गुणयोगात् पुमानपि बन्धमाप्नोति ॥ २६ ॥

अर्थमिति, विरक्तस्य संसारत्यागमोक्षोपादानयोरित्यर्थः। हंसवदिति तद्वदित्यस्य विवरणम्। लब्धातिशयस्य—ध्यानादिना विरागशक्तिसम्पन्नस्य ॥ २४ ॥

सूत्रान्तरमवतारयति—सरागस्येत्यादिना। रागोपहतिर्यस्येति व्युत्पत्त्या रागोपहतिपदस्यार्थमाह—रागोपहतस्येति। शुकवदिति दृष्टान्तं व्याचष्टे—यथेत्यादिना ॥ २५ ॥

सूत्रान्तरमवतारयितुं पृच्छति—बन्धः कथमिति। शुकवदिति दृष्टान्तं विवृत्य सूत्रार्थमाह—यथेत्यादिना। सूत्रोक्तः श्लिष्टो गुणशब्दः शुकपक्षे मधुरभाषणादिगुणं रज्जुं वा, पुरुषपक्षे तु सत्त्वादिगुणमयमभिधत्त इत्यवधेयम् ॥ २६ ॥

এ বিষয়ে যুক্তি এই যে, সেইরূপ হংসেরই তাদৃশ অতিশয় শক্তি আছে, যাহার বলে মিশ্রিত হইলেও দুগ্ধপান করে ও জল পরিত্যাগ করে। সেইরূপ ধ্যানাদিদ্বারা যাঁহারা অতিশয় অর্থাৎ বিরাগাদি লাভ করিয়াছেন, তাদৃশ পুরুষের পক্ষেই সংসার হেয় ও মোক্ষ উপাদেয় হইতে পারে ॥ ২৪ ॥

রাগযুক্ত ব্যক্তিরই মুক্তি হইবে, এই আশঙ্কায় বলিতেছেন—রাগোপহত ব্যক্তির কামচারিত্বই নাই, মুক্তি ত দূরের কথা, তাহার দৃষ্টান্ত ব্যাসের রাগ (ভোগাসক্তি) ছিল বলিয়া মুক্তি হয় নাই, কিন্তু তাঁহার পুত্র শুকদেবের রাগশূন্যতা বশতঃ মুক্তি হইয়াছিল ॥ ২৫ ॥

भोगादेव वैराग्यं कालक्रमात् भविष्यति, किं ज्ञानेन? इत्यत्राह—

न भोगाद्रागशान्तिर्मुनिवत् ॥ २७ ॥

न मुनेरपि भोगात् रागशान्तिः, किं पुनरन्यस्य? यथा काश्यपसौभरिप्रभृतयः ॥ २७ ॥

विषयिणां कथं वैराग्यं भविष्यति? इत्यत्राह—

दोषदर्शनादुभयोः ॥ २८ ॥

उभयोः—आत्मनः विषयस्य च । आत्मनो दोषः सङ्गात् नरकपातः गर्भवासादिश्च । विषयदोषः परिणतिविरसत्वादिः ॥ २८ ॥

सूत्रान्तरमवतारयति—भोगेत्यादिना । मुनिवदिति—दृष्टान्तं विवृणोति—नेत्यादिना । यथा काश्यपसौभरिप्रभृतय इति, न भोगाद्विरक्ता इति शेषः । तथाचोक्तं सौभरिणा—

"आमृत्युतो नैव मनोरथानामन्तोऽस्ति विज्ञातमिदं मयाद्य ।
मनोरथासक्तिपरस्य चित्तं न जायते वै परमार्थसङ्गि ॥" इति ॥ २७ ॥

आत्मनो विषयस्य च दोषदर्शनादेव वैराग्यं भवतीत्यर्थपरतया परसूत्रमवतारयितुं पृच्छति—विषयिणां कथं वैराग्यमिति । अन्यत् स्पष्टम् ॥ २८ ॥

বদ্ধ হয় কি প্রকারে? এই আশঙ্কায় বলিতেছেন—শুকদেব পক্ষী যেমন মধুরভাষিত্বাদিগুণ-যোগে বা রজ্জু-যোগে বদ্ধ লাভ করে, সেইরূপ পুরুষও সত্ত্বাদিগুণযোগে বদ্ধ লাভ করে ॥ ২৬ ॥

ভোগ হইতেই কালে (ভোগের বাসনা নিবৃত্তি হইলে) বৈরাগ্য হইবে জ্ঞানের আবশ্যকতা কি? এই আশঙ্কায় বলিতেছেন—মুনিদিগেরও ভোগ হইতে রাগের শান্তি হয় নাই, অন্যের হইবে কিরূপে? তাহার দৃষ্টান্ত কশ্যপ, সৌভরি প্রভৃতি মুনিগণও ভোগ করিয়া ভোগস্পৃহা কমাইতে পারেন নাই। (অর্থাৎ ভোগে ভোগস্পৃহার বৃদ্ধি ভিন্ন হ্রাস হয় না) ॥ ২৭ ॥

বিষয়ীদিগের বৈরাগ্য হইবে কি প্রকারে? এই প্রশ্নে বলিতেছেন—আত্মার ও বিষয়ের দোষদর্শনেই বৈরাগ্য জন্মে। আত্মার দোষ প্রকৃতি

उपदेशानधिकारिणं पुरुषम् आह—

न मलिनचेतस्युपदेशबीजप्ररोहोऽजवत् ॥ २९ ॥

यथाऽसंस्कृते क्षेत्रे न बीजप्ररोहः, तथा रागादिमलिनचेतसि न उपदेशबीजप्ररोहः। 'अजवत्' इति अजनाम्नि नृपे भार्य्याशोकार्त्ते यथा वसिष्ठेन उपदेशो दत्तः न स्थिरीबभूव ॥ २९ ॥

रागादिमलिने चेतसि नाभासज्ञानमपि इत्याह—

नाभासमात्रमपि मलिनदर्पणवत् ॥ ३० ॥

यथा मलिने दर्पणे मुखाभासमपि न प्रतिभाति, तथाप्रधान-प्रतिबिम्बितत्वात् आत्मनः प्रधानकार्य्यमात्मज्ञानम् ॥ ३० ॥

परसूत्रावतारणप्रयोजनमाह—उपदेशेत्यादिना। दृष्टान्तेन द्रढयन् सूत्रार्थमाह—यथेत्यादिना ॥ २९ ॥

सूत्रान्तरप्रयोजनमाह—रागादीत्यादिना। दृष्टान्तं विशदयन् सूत्रार्थं विवृणोति— यथेत्यादिना। मुखाभासमपि—यथावन्मुखस्य छायापातोऽपि। तथेति मलिनचेतसि न यथावदात्मनः प्रतिबिम्बितत्वमिति शेषः। ननु मास्तु यथावदात्मनः प्रतिबिम्बितत्वं, तथाप्यात्मनः स्वरूपज्ञाने का बाधेत्याशङ्कामपाकरोति—प्रधानेत्यादिना। प्रधाने—बुद्धितत्त्वात्मना परिणते मालिन्यादि-दूषिते अन्तःकरणापरपर्य्याये आत्मनः प्रतिबिम्बितत्वात्—यथावदात्मनः प्रतिफलितत्वात् आत्म-

---

সঙ্গে নরকপাত গর্ভবাসাদি, বিষয়ের দোষ পরিণামে ক্লেশদায়িত্ব ও ক্ষণভঙ্গুরত্বাদি ॥ ২৮ ॥

উপদেশের অনধিকারী পুরুষ কে? তাহা বলিতেছেন—যেমন অসংস্কৃত ক্ষেত্রে বীজের অঙ্কুর হয় না, সেইরূপ রাগাদি মলিনচিত্তেও উপদেশ বীজ অঙ্কুরিত হয় না। তাহার দৃষ্টান্ত ভার্য্যাশোকার্ত্ত অজনামক রাজার চিত্তে বশিষ্ঠ মুনি প্রদত্ত উপদেশও স্থিরীভূত হয় নাই। (শোক তাপ, কাম, ক্রোধ, লোভ, মোহ, মাৎসর্য্য এই সকলই চিত্তের মালিন্য, এই সকল সত্ত্বে কখনও উপদেশ গ্রহণের সামর্থ্য জন্মে না) ॥ ২৯ ॥

মলিন দর্পণে যেমন যথার্থতঃ মুখের ছায়াও পড়ে না, মলিন চিত্তেও তেমন যথার্থতঃ আত্মার প্রতিবিম্ব পড়ে না। বিশুদ্ধ চিত্তে যথার্থতঃ আত্মার প্রতিবিম্ব

ननु महानेव कारणरूपत्वादात्मज्ञानमस्तु ? इत्यत्राह—

न तज्जस्यापि तद्रूपता पङ्कजादिवत् ॥ ३१ ॥

न कार्य्यमेव कारणं भेदात् । न हि पङ्कज एव पङ्कः ॥ ३१ ॥

अणिमादिविभूतिसिद्धस्यापि न कृतकृत्यता इत्याह—

न भूतियोगे कृतकृत्यतोपास्यसिद्धिवदुपास्यसिद्धिवत् ॥३२

यथा गुरूपासनया तत्त्वज्ञानेन सिद्धस्य अनावृत्तेः कृतकृत्यता, तथा न भूतियोगेन, पुनरावृत्तेः ॥ उपास्यसिद्धिवत् इति वीप्सा अध्यायपरिसमाप्तौ ॥ ३२ ॥

इति कापिलसांख्यप्रवचनसूत्रवृत्तौ आख्यायिकाध्यायश्चतुर्थः ॥ *

ज्ञानं—यथावदात्मविषयिणी बुद्धिवृत्तिः, प्रधानकार्य्यं—बुद्धितत्त्वात्मनापरिणतस्यान्तः-करणापरपर्य्यायस्य प्रधानस्य निर्म्माल्यं, भवति नान्यथेति शेषः । तथाच मलिनचेतसि यथावदात्मनः प्रतिबिम्बितत्वाभावादेव तत्राभासतोऽपि न तज्ज्ञानं सम्भवतीति भावः ॥ १० ॥

सूत्रान्तरमवतारयितुं पृच्छति—नन्विति । महानेव—अन्तःकरणापरपर्य्यायबुद्धितत्त्वमेव, आत्मज्ञानमस्त्विति, कार्य्यकारणयोरभेदादिति भावः । तथाच पूर्व्वसूत्रोक्तदृष्टान्तसिद्धान्तौ व्याहताविति प्रश्नार्थः, अतश्च आत्मा अस्त्विति पाठः पूर्व्वपदार्थसङ्गत्यभावेन प्रामादिक एव । अस्या-शङ्कां परिहरन् सूत्रतात्पर्य्यं विवृणोति—नेत्यादिना । तथाच—यथा पङ्काज्जातस्यापि पङ्कजस्य न पङ्करूपता, तथा महत्तत्त्वजन्यस्यापि आत्मज्ञानस्य न महत्तत्त्वरूपतेति सूत्रार्थः ॥ ११ ॥

পড়ে বলিয়াই স্বরূপতঃ আত্মার জ্ঞান জন্মে, অর্থাৎ স্বরূপতঃ আত্মার প্রতিবিম্বপাত হয় না বলিয়া আভাসতও আত্মার স্বরূপজ্ঞান অসম্ভব ॥ ৩০ ॥

মহত্তত্ত্ব (বুদ্ধিতত্ত্ব)ই আত্মজ্ঞানের স্বরূপ হউক, যেহেতু মহত্তত্ত্ব আত্ম-জ্ঞানের কারণ, এই আশঙ্কায় বলিতেছেন—মহত্তত্ত্ব জন্য হইলেও আত্মজ্ঞান মহত্তত্ত্বস্বরূপ নহে, যেমন পঙ্ক জন্য হইয়াও পঙ্কজ পঙ্কস্বরূপ নহে। অর্থাৎ কার্য্য আর কারণ যে সর্ব্বদাই অভিন্ন, ইহা ঠিক নহে, যেহেতু উভয়ের ভেদোপলব্ধি আছে ॥ ৩১ ॥

---

* एतदध्यायप्रतिपाद्यसंग्राहकश्लोकौ भाष्यकारीयौ यथा—

"अध्यायत्रितयोक्तस्य विवेकज्ञानसाधकम् ।
आख्यायिकाभिः कथितमध्याये समागतः ॥"

आख्यायिकानन्तरं परपक्षनिरासार्थं

पञ्चमोऽध्यायारम्भः ।

मङ्गलाचरणं शिष्टाचारात् फलदर्शनात् श्रुतितश्चेति ॥ १ ॥

कृतेऽपि मङ्गले ग्रन्थापरिसमाप्तेः अकृतेऽपि समाप्तेः, किं मङ्गलेन ? इति यैः उक्तं, तत् अनेन निरस्तम् ॥ १ ॥

सूत्रान्तरावतारणप्रयोजनमाह—अणिमेत्यादिना। उपायसिद्धिवदिति दृष्टान्तं व्यतिरेकेण समर्थयन् सूत्रतात्पर्यं विवृणोति—यथेत्यादिना। सिद्धस्य—मुक्तस्य। न भूतियोगेनेति कृतकृत्यतेत्यर्थः, अत्र हेतुमाह—पुनरावृत्तेरिति ॥ ३२ ॥

इति श्रीकृष्णविहारि-तर्कसिद्धान्तभट्टाचार्य्यविरचितायां सांख्यसूत्रानिरुद्धवृत्तिटीकायाम्
तत्त्वबोधिनीसमाख्यायां आख्यायिकाध्यायश्चतुर्थः ॥

पञ्चमाध्यायावतरणिकामाह—आख्यायिकेत्यादिना। परपक्षनिरासार्थमिति, स्वमतं प्रति परैः प्रयुक्तानां पूर्वपक्षाणां अपाकरणार्थमित्यर्थः।

तत्रादौ "आरम्भसूत्रीयाथशब्देन सूचितस्य मङ्गलाचरणस्य वैफल्य"मिति पूर्वपक्षस्य समाधानपरतया सूत्रमिदमवतारयिष्यन् पूर्वपक्षं निरूपयति—कृतेऽपीत्यादिना। ग्रन्थापरि-

---

গুরূপাসনাদিক্রমে তত্ত্বজ্ঞানদ্বারা মুক্ত পুরুষের যেরূপ কৃতার্থতা অণিমাদি অষ্টসিদ্ধি লাভ করিলেও সেইরূপ কৃতার্থতা হইতে পারে না, যেহেতু তাহাদের পুনরাবৃত্তি আছে ॥ ৩২ ॥

কপিলকৃত সাংখ্যসূত্রের আখ্যায়িকাপ্রতিপাদক চতুর্থ অধ্যায়
সমাপ্ত হইল ॥ ৪ ॥

আখ্যায়িকার পরে পরপক্ষনিরাসের নিমিত্ত পঞ্চম অধ্যায়ের আরম্ভ।

মঙ্গলাচরণ করিলেও গ্রন্থের সমাপ্তি হয় না, না করিলেও সমাপ্তি হয়, সুতরাং গ্রন্থের আদিতে মঙ্গলাচরণের প্রয়োজন কি? এই কথা যাহারা

सिद्धमीश्वरासत्त्वम् इदानीं न्यायमाह-

नेश्वराधिष्ठिते फलसम्पत्तिः, कर्मणा तत्सिद्धेः ॥२

यदि ईश्वरः स्वतन्त्रः कर्त्ता, कर्मणा विनापि कुर्य्यात् ? अथ

समाप्तेरिति, कादम्बर्य्यादिग्रन्थानां समाप्त्यभावादित्यर्थः, तथाचानेन कारणसत्त्वेऽपि कार्य्यानुत्पादरूपोऽन्वयव्यभिचारः प्रदर्शितः । अकृतेऽपीति मङ्गले इत्यनेनान्वयः, समाप्तेः—नास्तिकादिग्रन्थानां सम्पूर्णत्वात्, तथाचानेन कारणासत्त्वेऽपि कार्य्योत्पादरूपो व्यतिरेकव्यभिचारो दर्शितः । तन्—तेषां मतं "दर्शितान्वयव्यतिरेकव्यभिचाराभ्यां समाप्तिं प्रति मङ्गलाचरणस्य हेतुत्वासम्भवात्, अथशब्देन ग्रन्थारम्भे कृतं मङ्गलाचरणं व्यर्थमिति पूर्व्वपक्ष इति यावत् । अनेन—एतत्सूत्रेण, निरस्तं—अप्रामाण्यदीकृतम् । तथाहि "फलदर्शनात्—मङ्गलाचरणस्य सफलत्वानुमानात् मङ्गलाचरणं (न व्यर्थं)" मिति सूत्रार्थः । मङ्गलाचरणस्य सफलत्वानुमाने हेतुं दर्शयति—शिष्टाचारादिति, आचारस्यात्र भावप्रधाननिर्द्देशत्वेन शिष्टानां—फलसाधनत्वांशे भ्रान्तिरहितानां आचारत्वादित्यर्थः । तथाच मङ्गलाचरणं सफलं शिष्टाचारत्वादिति प्रयोगः । मङ्गलाचरणस्य सफलत्वे प्रमाणान्तरं दर्शयति—श्रुतितश्चेति, शिष्टाचारानुमितात् मङ्गलाचरणस्येष्टसाधनताबोधकवेदादित्यर्थः । नन्वेवमपि न समाप्तिफलकत्वसिद्धिरिति चेन्न, शिष्टाचारत्वेन सफलत्वे सिद्धे तत्र फलजिज्ञासायां सम्भवति दृष्टफलकत्वे अदृष्टफलकल्पनाया अन्याय्यत्वात् फलान्तराश्रवणाच्च समाप्तिफलकत्वस्यैवानुमीयमानत्वात् । तथाचायं प्रयोगः—मङ्गलाचरणं समाप्तिफलकं समाप्त्यन्याफलकत्वे सति सफलत्वादिति । न च दर्शितान्वयव्यतिरेकव्यभिचारपरिपन्थित्वादेव समाप्तिफलकत्वानुमानमयुक्तमिति च वचनीयम्, यत्किञ्चिदपि विफलत्वादिकल्पनेनान्वयव्यभिचारस्य जन्मान्तरीयमङ्गलाचरणस्य मानसिकादिमङ्गलाचरणसद्भावस्य वा कल्पनेन व्यतिरेकव्यभिचारस्य वारणीयत्वात् । यद्वा स्वप्रतियोगिवर्णानुकूलकृतिमत्तासम्बन्धेन "चरमवर्णध्वंस"रूपसमाप्तिं प्रति स्वजन्यविघ्नध्वंससद्वत्तासम्बन्धेन मङ्गलाचरणस्य हेतुत्वं, तथाच यत्र सत्यपि मङ्गले समाप्तिर्न दृश्यते, तत्र बलवत्तरविघ्नस्य विघ्नप्राचुर्य्यस्य वा सद्भावात् तादृशविघ्नस्य च प्रचुरमङ्गलाचरणनाश्यत्वेन नमस्कारादिरूपमङ्गलाचरणमात्राविनाशात् स्वजन्यविघ्नध्वंसवत्तासम्बन्धेन मङ्गलाचरणस्य कार्य्याधिकरणे सत्त्वाभावादेव नान्वयव्यभिचारावसर इति सूक्ष्मीक्षणीयम् ॥ १ ॥

पौनरुक्त्यावकाशमपाकुर्व्वन् ईश्वरासिद्धिवादनिराकरणपरं सूत्रमवतारयति—पूर्व्वसिद्ध-

---

বলেন, তাঁহাদের মত সূত্রদ্বারা নিরস্ত হইল, কারণ মঙ্গলাচরণের সফলত্ব শিষ্টাচারানুমিত ও শ্রুতিপ্রতিপাদিত বিষয়ে মঙ্গলাচরণ ব্যর্থ নহে ॥ ১ ॥

कर्मसहकारी कुरुते, कर्मैवास्तु, किमीश्वरेण? न च सहकारी प्रधानशक्तिं बाधते, स्वातन्त्र्यविघातात्। किञ्च स्वार्थपरार्थाभ्यां प्रवृत्तिः दृष्टा। न चेश्वरस्य स्वार्थमस्ति। परार्थत्वे कारुणिकस्य दुःखमयसृष्ट्यनुपपत्तिः। न च परार्थप्रवृत्तिः, परोपकारादिना अपि स्वार्थलाभात् प्रवृत्तेः। तस्मात् कर्मैव जगत्कारणमस्तु ॥ २ ॥

मित्यादिना। पूर्व्वसिद्धं—"ईश्वरासिद्धेः" इत्यादिसूत्रैः प्रतिपन्नं। सूत्रतात्पर्य्यं विवृणोति—यदीत्यादिना। स्वतन्त्रः—अन्यानपेक्षकृतिमान्। कर्म्मैवास्त्विति—साधकमिति शेषः, एवकार-व्यवच्छेद्यमाह—किमीश्वरेणेति, साधकत्वेनेश्वरकल्पनेनेत्यर्थः। ननु प्रधानशक्तिसङ्कोचार्थमेव सहकारी कल्प्यत इति कर्म्मणः सहकारित्वमेवास्तु? इत्याशङ्कामपाकरोति—न चेत्यादिना। यथान्यच्छाधीनकृतिमत्त्वमेव स्वातन्त्र्यमस्तु तत्र, कर्म्मणः सहकारित्वेऽपि न स्वातन्त्र्यहानिरित्यत ईश्वरकर्तृत्वे दोषान्तरमवतारयति—किञ्चेत्यादिना। ईश्वरस्यापि स्वार्थसद्भावे रागाद्यापत्त्या जीवत्वमीश्वरत्वमेव न स्यादिति तस्य स्वार्थं निषेधति न चेत्यादिना। नन्वस्तु परार्थैव सृष्टिरित्यत आह—परार्थत्व इति। स्वार्थमन्तरेण परार्थप्रवृत्तेरेवासम्भवं दर्शयति—न चेत्यादिना। स्वार्थलाभादिति कीर्त्तिकलापादिरूपस्वार्थलाभादित्यर्थः। उपसंहरति तस्मादित्यादिना। तथाच—"कर्म्मणा—आवश्यककर्म्मणैव, तत्सिद्धेः—फलनिष्पत्तिसम्भवात्, ईश्वराधिष्ठिते कारणे फलनिष्पत्तिः—कर्म्मफलरूपपरिणामस्य निष्पादः न युक्त इति" सूत्रार्थः। ततश्चेश्वर-सिद्धिः सुदूरपराहतैवेति स्थितम् ॥ २ ॥

"ঈশ্বরাসিদ্ধেঃ" ইত্যাদি সূত্রদ্বারা সিদ্ধান্তিত ঈশ্বরাসিদ্ধি এখন যুক্তিদ্বারা বলিতেছেন—যদি ঈশ্বর স্বাধীন কর্ত্তা হন, তবে কর্ম্ম ভিন্নও সৃষ্টি করিতে পারেন, আর যদি কর্ম্মসহকারী হন, তবে একমাত্র কর্ম্মই কারণ হইতে পারে, ঈশ্বরের প্রয়োজন কি? সহকারী যে প্রধানের শক্তিকে বাধা করে, তাহাও বলা যায় না, কারণ তাহা হইলে প্রধানের স্বতন্ত্রতার ব্যাঘাত ঘটে। আরও বক্তব্য এই যে, নিজের জন্য পরের জন্য প্রবৃত্তি হইতে দেখা যায়, কিন্তু ঈশ্বরের কোনও স্বার্থ নাই, পরার্থই যদি তাহার প্রবৃত্তি স্বীকার কর, তবে করুণাময় ঈশ্বরের দুঃখময় সৃষ্টি করার অনুপপত্তি হয়। স্বার্থ ভিন্ন কেবল পরার্থও প্রবৃত্তি হয় না, পরোপকারাদি দ্বারাও কীর্ত্তিকলাপাদিরূপ স্বার্থলাভ হয় বলিয়াই তাহাতে প্রবৃত্ত হয়। অতএব কেবল কর্ম্মই জগতের কারণ হইতে পারে। সুতরাং "কর্ম্ম-

एतद्दर्शयति—

स्वोपकारादधिष्ठानं लोकवत् ॥ २ ॥

न च नित्यस्य स्वोपकारः सम्भवति ॥ ३ ॥

स्वोपकार एव भविष्यति इत्यत्राह—

लौकिकेश्वरवदितरथा ॥ ४ ॥

असर्वेश इत्यर्थः ॥ ४ ॥

दूषणान्तरमाह—

पारिभाषिको वा ॥ ५ ॥

प्रकृतिच्छायापन्ना तत्र कर्तृत्वात् आत्मैव कर्त्तेति तस्य ईश्वर इति संज्ञा परिभाषा इत्यर्थः ॥ ५ ॥

एतद्दर्शयतीति, ईश्वरानधिष्ठातृत्वमेवेत्यर्थः। ईश्वराधिष्ठातृत्वे स्वोपकारात्—स्वोपकारहेतुकं लोकवदधिष्ठानं स्यादिति सूत्रार्थः। भवतु तथेति शङ्कामपाकर्तुमाह—नचेति ॥ २ ॥

कथं न सम्भवतीति शङ्कानिराकरणपरं सूत्रमवतारयति स्वोपकार—इत्यादिना। इतरथा स्वोपकारस्वीकारे लौकिकेश्वरवत्—राजादिवत् सोऽपि असर्वेश्वरः स्यादिति सूत्रार्थं बोधयितुमाह—असर्वेश इत्यर्थ इति। तथाच असर्वेश्वरत्वापूर्णकामत्वाद्यापत्त्या ईश्वरस्य स्वोपकारः स्वीकर्तुं न शक्य इति भावः ॥ ४ ॥

दूषणान्तरमिति, स्वोपकारस्वीकार इत्यादिः। सूत्रतात्पर्यं विवृणोति—प्रकृतीत्यादिना। तथाचासर्वेश्वरत्वादिमत्त्वेऽपि चेद्भवतीश्वरस्तदा अस्माकं सर्वोद्गपत्रापवादिवत् पारिभाषिक एव स ईश्वरो न तु अपूर्णकामत्वादिविरोधिन नित्यैश्वर्यमानिति भावः ॥ ५ ॥

যাহাই ফলনিষ্পত্তির সম্ভব থাকায় ঈশ্বরাধিষ্ঠিত কারণে ফলনিষ্পত্তিযুক্ত নহে ॥ ২ ॥

ঈশ্বরাধিষ্ঠাতৃত্বস্বীকার করিলে সাধারণ লোকের ন্যায় ঈশ্বরাধিষ্ঠাতৃত্বও নিজের উপকারের জন্য স্বীকার করিতে হয়। অথচ নিত্য ঈশ্বরের নিজের উপকার অসম্ভব ॥ ৩ ॥

ঈশ্বরের স্বোপকার স্বীকার করিলে লৌকিক ঈশ্বরের (রাজাদির) ন্যায় তিনিও অসর্বজ্ঞ ও অপূর্ণকাম হইয়া পড়েন ॥ ৪ ॥

অথবা ঈশ্বরের স্বোপকার স্বীকার করিলে প্রকৃতি প্রতিবিম্বিতত্বনিবন্ধন

इत्यन्तरमाह-

न रागादृते तत्सिद्धिः प्रतिनियतकारणत्वात् ॥६॥

अविनाभावस्य कारणत्वव्यभिचारे सर्वत्रानाश्वासः। रागस्य प्रवृत्तिनिमित्तमिति तं विना कथं जगन्निर्मातृत्वम्? न च मुक्तस्य रागोऽस्ति ॥ ६ ॥

राग एव भविष्यति इत्यत्राह—

तद्योगेऽपि न नित्यमुक्तः ॥ ७ ॥

रागयोगेऽपि ॥ ७ ॥

इत्यन्तरमिति, ईश्वरस्यानधिष्ठातृत्वे युक्त्यन्तरमित्यर्थः। "रागादृते—रागं विना न तत्सिद्धिः—न जगन्निर्मातृत्वसिद्धिः, अत्र हेतुमाह—प्रतिनियतकारणत्वादिति। प्रवृत्तिं प्रति रागस्य कारणत्वादित्यर्थ इति सूत्रव्याख्यानम्। ननु प्रवृत्तिं प्रति रागस्य हेतुत्वं नाङ्गीक्रियेत इति शङ्कां निरस्यति—अविनेत्यादिना। अविनाभावस्य—नियतावश्यकपूर्व्वभाविनः, कारणत्वव्यभिचारे—कारणत्वासत्त्वे, अनाश्वासः—सर्व्वत्रैव कार्य्यकारणभावकल्पनासम्भवः। अविनाभावस्यैव कारणत्वनियामकत्वादिति भावः। फलितमाह—रागस्येत्यादिना। प्रवृत्तिनिमित्तं प्रवृत्तेर्निमित्तकारणं। तं विना रागं विना। तटस्थाशङ्कां निराकरोति—नचेत्यादिना। अत्र च—"उपकारः—इष्टार्थसिद्धिः, रागस्तूत्कटेच्छेति न पौनरुक्त्य"मिति भाष्यकारोक्तिरनुसर्त्तव्या ॥ ६ ॥

सूत्रान्तरमवतारयति—राग एवेत्यादिना। रागयोगेऽपीति तद्योगेऽपीत्यस्य विवरणम्।

প্রকৃতির কর্তৃত্বে কর্তৃত্বাভিমানী হয় বলিয়া আত্মারই "ঈশ্বর" এইরূপ একটি পারিভাষিক নামমাত্র হইতে পারে, ফলে নিত্যৈশ্বর্য্যশালী পরাভিমত ঈশ্বরের সিদ্ধি হয় না ॥ ৫ ॥

পরন্তু রাগ প্রবৃত্তির প্রতি মুখ্য কারণ, সুতরাং রাগ ব্যতিরেকে ঈশ্বরের জগন্নির্মাতৃত্ব সিদ্ধি হইতে পারে না। রাগ যে প্রবৃত্তির প্রতি কারণ নহে, তাহাও বলা যায় না, কারণ রাগ ভিন্ন প্রবৃত্তি হইতে দেখা যায় না। যে ভিন্ন যাহা না হয়, সে যদি তাহার কারণ না হয়, তবে কোথাও কার্য্যকারণভাব কল্পনার সম্ভব হয় না, কারণ এইরূপ অবিনাভাবই কার্য্যকারণভাবের নিয়ামক ॥৬॥

প্রধানশক্তিযোগাৎ কর্তৃত্বং ভবিষ্যতি ইত্যত্রাহ—

প্রধানশক্তিযোগাচ্চেৎ সঙ্গাপত্তিঃ ॥ ৮ ॥

'অসঙ্গো হ্যয়ং পুরুষঃ' ইতি তদ্বিরোধাপত্তিঃ ॥ ৮ ॥

ন প্রধানসঙ্গঃ, কিন্তু প্রধানসত্তামাত্রেণ কর্তৃত্বং ভবিষ্যতি ইত্যত্রাহ

সত্তামাত্রাচ্চেৎ, সর্বৈশ্বর্য্যম্ ॥ ৯ ॥

সর্বাত্মনঃ প্রতি প্রধানসত্তায়াঃ অবিশেষাৎ সর্বাত্মনাম্ ঈশ্বরত্বম্॥৯

ঈশ্বরসাধনানি প্রমাণানি সন্তি, তৎ কথম্? ইত্যত্রাহ—

প্রমাণাভাবান্ন তৎসিদ্ধিঃ ॥ ১০ ॥

প্রত্যক্ষপ্রমাণাভাবাৎ ॥ ১০ ॥

তথাচ রাগযোগেঽপি স্বীক্রিয়মাণেঽনীশ্বরো নিত্যমুক্তঃ স্যাদিতি সূত্রার্থঃ। তদর্থমীশ্বরস্য নিত্যমুক্তত্বং বদতস্তব সিদ্ধান্তহানিরিতি ভাবঃ ॥ ৭ ॥

সূত্রান্তরমবতারয়তি—প্রধানেত্যাদিনা। সঙ্গাপত্তিরিত্যস্য ভাবার্থমাহ—অসঙ্গ ইত্যাদিনা। তথাচ অসঙ্গ ইত্যাদি শ্রুতিবিরোধাদেবং স্বরং প্রধানশক্তিযোগঃ কল্পয়িতুমশক্য ইতি ভাবঃ ॥ ৮ ॥

সূত্রান্তরাবতরণিকামাহ—নেত্যাদিনা। সূত্রতাৎপর্য্যং বিবৃণোতি—সর্বেত্যাদিনা। ঈশ্বরত্বমিতি প্রসজ্যেত ইতি শেষঃ, তথাচ ক এবেশ্বর ইতি ভবতু সিদ্ধান্তহানিরিত্যাশয়ঃ ॥ ৯ ॥

তৎকথমিতি, ঈশ্বরাসত্ত্বমিতি শেষঃ, তথাচ ঈশ্বরসাধকপ্রমাণাভিধানেন দর্শিতদোষো ন বিচারসহ ইতি ভাবঃ, অনুমানাদিকস্যাস্য সূত্রনিরাস্যত্বেন ব্যাচষ্টে—প্রত্যক্ষপ্রমাণাভাবাদিতি ॥১০॥

রাগাদি যোগও যদি ঈশ্বরের স্বীকার কর, তবে তিনি নিত্যমুক্ত হইতে পারেন না, অস্মদাদির ন্যায় ভোগবাসনাদিযুক্ত ও অমুক্ত হইয়া পড়েন, ফলে ঈশ্বরবাদীদিগের সিদ্ধান্তহানি হয় ॥ ৭ ॥

রাগ না থাকিলেও প্রধান শক্তিযোগেই কর্তৃত্ব হইবে, এইরূপ স্বীকার করিলে ঈশ্বরের সঙ্গাপত্তি হয়, ফলে "অসঙ্গোহ্যয়ং পুরুষঃ" অর্থাৎ পুরুষ নিঃসঙ্গ এই শ্রুতির বিরোধ হইবে ॥ ৮ ॥

প্রধানের সহিত পুরুষের সঙ্গ হয় না, কিন্তু প্রধানের সত্তামাত্রেই ঈশ্বরের কর্তৃত্ব হইবে, এইরূপ বলিলে সকলেরই ঈশ্বরত্বাপত্তি হয়, কারণ সমস্ত আত্মার প্রতিই প্রধান সত্তার অবিশেষ ॥ ৯ ॥

अनुमानं भविष्यति इत्यत्राह—

सम्बन्धाभावान्नानुमानम् ॥ ११ ॥

प्रत्यक्षपूर्वकत्वात् व्याप्तेः तदभावात् कुतः सम्बन्धग्रहः। न च साधारणस्य सम्बन्धग्रहः ॥ ११ ॥

शाब्दं प्रमाणं भविष्यति इत्यत्राह—

श्रुतिरपि प्रधानकार्य्यस्य ॥ १२ ॥

'प्रधानात् जगत् उत्पद्यते' इति श्रुतिः अस्ति। तस्मात् ईश्वर-साधकप्रमाणानि प्रमाणाभासानि ॥ १२ ॥

अनुमानं भविष्यतीति, ईश्वरसिद्धौ प्रमाणमित्यादिः, सूत्रतात्पर्यं विवृणोति—प्रत्यक्षेत्यादिना। व्याप्तेः—व्याप्तिज्ञानस्य, प्रत्यक्षपूर्वकत्वात्—साध्यसाधनयोः सहचारग्रहादिरूपप्रत्यक्षोपजीवकत्वात्, तदभावात्—तादृशसहचारग्रहाद्यभावात्, सम्बन्धग्रहः—व्याप्तिग्रहः, असाधारणस्य—सहचारग्रहाद्यविषयस्य। तथाच—सम्बन्धाभावात्—व्याप्तिज्ञानस्यासम्भवात् अनुमानमपि नेश्वरसिद्धौ प्रमाणमिति सूत्रार्थः। नच साक्षादीश्वरविषयकानुमानासम्भवेऽपि महदादिकं सकर्तृकं कार्य्यत्वादित्याद्यनुमानमेव कर्तृत्वेनेश्वरसाधकं भविष्यतीति वचनीयं, अप्रयोजकत्वशङ्काकवलितत्वेन तादृशानुमानस्याप्रमाणत्वात्, कथञ्चित् सप्रयोजकत्वोपपादनेऽपि प्रधानकर्तृकत्वेनापि तदर्थपर्य्यवसानसम्भवे ईश्वरसाधनत्वाभावादित्यास्तां विस्तरः ॥ ११ ॥

सूत्रान्तरमवतारयति—शाब्दमित्यादिना। श्रुतिरस्तीति, "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः" इत्यादयोऽप्यनुसन्धेयाः। "तदैक्षत बहु स्या"मित्यादि चेतन-

ঈশ্বরের সাধক প্রমাণ আছে, তবে ঈশ্বরের অসত্ত্ব হয় কেন? এই আশঙ্কায় বলিতেছেন, প্রত্যক্ষ প্রমাণের অভাববশতঃ ঈশ্বরের সিদ্ধি হইতে পারে না ॥ ১০ ॥

ব্যাপ্তিজ্ঞানের প্রতি সাধ্য ও সাধনের সহচার প্রত্যক্ষ কারণ, তদভাবে ব্যাপ্তিজ্ঞান হইবে কিরূপে, সহচার প্রত্যক্ষের অবিষয়ে ব্যাপ্তিজ্ঞান হয় না, সুতরাং ব্যাপ্তিজ্ঞানের অসম্ভব বশতঃই অনুমানও ঈশ্বরসিদ্ধিতে প্রমাণ হইতে পারে না ॥ ১১ ॥

"প্রধান হইতেই জগতের উৎপত্তি হয়" এ বিষয়েই শ্রুতিও আছে। ফলে

अविद्यायोगादात्मनः कर्त्तृत्वमिति केचित्। तत्राह—

नाविद्याशक्तियोगो निःसङ्गस्य ॥ १२ ॥

व्यक्तम् ॥ १३ ॥

दूषणान्तरमाह—

तद्योगे तत्सिद्धावन्योऽन्याश्रयत्वम् ॥ १४ ॥

अविद्यया विना न सृष्टिः, सृष्ट्या विना न अविद्या इति अन्योऽन्याश्रयत्वम् ॥ १४ ॥

अनादित्वाद्वीजाङ्कुरवत् नान्योऽन्याश्रयत्वमिति आह—

न वीजाङ्कुरवत् सादिसंसारश्रुतेः ॥ १५ ॥

भवेदेवं यद्यनादिः संसारः। किन्तु सादिः संसारः श्रुतिश्च—

कारणत्वपरश्रुतिविरोधः इति शङ्कनीयं तस्याः सर्गादावुत्पन्नमहत्तत्त्वोपाधिकमहापुरुषस्य अन्यज्ञानपरतयैवोपपत्तेः। उपसंहरति—तस्मादित्यादिना। प्रमाणवदाभासन्ते इति प्रमाणाभासानि, न तु वस्तुगत्या प्रमाणानीत्यर्थः ॥ १२ ॥

सूत्रान्तरमवतारयति—अविद्येत्यादिना। व्यक्तमिति, अविद्याशक्तियोगाङ्गीकारे "असङ्गो ह्ययं पुरुष" इति पूर्वोक्तश्रुतिविरोधो दुष्परिहर एव स्यादिति भावः ॥ १३ ॥

दूषणान्तरमिति, अविद्यायोगादात्मनः कर्त्तृत्वाङ्गीकारे दोषान्तरमित्यर्थः। सूत्रे तद्योगे—अविद्याशक्तियोगे, तत्सिद्धौ—आत्मनः कर्त्तृत्वसिद्धौ स्वापेक्षापेक्षित्वरूपं अन्योऽन्याश्रयत्वं दर्शयति—अविद्ययेत्यादिना ॥ १४ ॥

ইহাই প্রতিপন্ন হইল যে, ঈশ্বরাসিদ্ধিতে শাব্দ প্রমাণও নাই। অতএব ঈশ্বর সাধক প্রমাণ বলিয়া যে সকলকে মনে করা যায়, সে সকল প্রমাণাভাস বস্তুগত্যা প্রমাণ নহে ॥ ১২ ॥

কেহ কেহ বলেন, অবিদ্যাযোগে কর্তৃত্ব হয়, তাহাও ঠিক নহে, কারণ নিঃসঙ্গ পুরুষের অবিদ্যাযোগ অসম্ভব ॥ ১৩ ॥

অবিদ্যাযোগে আত্মার কর্তৃত্ব স্বীকার করিলে অবিদ্যাযোগ ভিন্ন সৃষ্টি হইতে পারে না এবং সৃষ্টি ভিন্ন অবিদ্যাযোগ হইতে পারে না, এইরূপ অন্যোন্যাশ্রয় দোষ হয় ॥ ১৪ ॥

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतःस्यात्।
संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन् देव एकः॥
(शुक्ल यजु, १७ अध्याय १८ क) तस्मात् प्रलये प्रवाहविच्छेद इति॥१५

अविद्यास्वरूपे वाधकमाह—

विद्यातोऽन्यत्वे ब्रह्मबाधप्रसङ्गः ॥ १६ ॥

विद्यातः अन्यत्वे ब्रह्मणोऽपि विद्यातोऽन्यत्वेनाविद्यात्वं स्यात्। ततश्च ब्रह्मत्वबाधः इति ॥ १६ ॥

सूत्रान्तरावतरणिकामाह—अनादित्वादित्यादिना। यथा बीजमन्तरेणाङ्कुरस्याङ्कुरमन्तरेण बीजस्य चासम्भवेऽपि तदन्योन्याश्रयो नानादित्वाद्दोषावहः, तथा अविद्यायोगमन्तरेण कर्तृत्वस्य कर्तृत्वमन्तरेणाविद्यायोगस्य चासम्भवेऽपि नानादित्वात्तदन्योन्याश्रयोऽपि दोषावहः स्यादित्यवतरणिकार्थः। सूत्रतात्पर्यं विवृणोति—भवेदित्यादिना, एवं—एतदन्योन्याश्रयस्यादोषावहत्वं। संसारस्य सादित्वे विप्रतिपन्नं निवारयितुं प्रति प्रमाणयन्नाह—श्रुतश्चेति। श्रुतौ प्रथमसंशब्दस्य धमतीत्यनेन द्वितीयसंशब्दस्य च जनयन इत्यनेन सम्बन्धः, तथाच—विश्वतः सर्व्वतश्चक्षुंषि यस्य स विश्वतश्चक्षुः, उत—अपिच विश्वतो मुखानि यस्य स विश्वतो मुखः, विश्वतो बाहवो यस्य स विश्वतोबाहुः उत विश्वतः पादा यस्य स विश्वतःस्यात् (पादस्य लोपोऽहस्त्यादिभ्य इति पादस्यान्त्यलोपः) एवम्भूतः एकः असहायः देवः द्यावाभूमी संजनयन् बाहुभ्यां बाहुस्थानीयाभ्यां धर्म्माधर्म्माभ्यां पतत्रैः पतनशीलैः अनित्यैः भूतैश्च संधमति सङ्गमयति जीवानिति इत्यर्थः। अत्र विशुद्धसत्त्वप्रधानतया प्रकृतावेव देवशब्दप्रयोगः, नातः इयमेव श्रुतिः ईश्वरं साधयतीति स्वसिद्धान्तहानिरिति मन्तव्यम् ॥ १५ ॥

যেমন "বীজ ভিন্ন অঙ্কুর হয় না ও অঙ্কুর ভিন্ন বীজ হয় না" এই বীজাঙ্কুরের অন্যোন্যাশ্রয় অনাদিত্বনিবন্ধন দোষাবহ নহে, সেইরূপ পূর্ব্বসূত্রোক্ত অন্যোন্যাশ্রয়ও দোষাবহ হইবে না। এই আশঙ্কায় বলিতেছেন—যদি সংসার অনাদি হইত, তবে এই অন্যোন্যাশ্রয়ের অদোষত্ব হইতে পারিত, কিন্তু সংসার সাদি (অনাদি নহে); সংসারের সাদিত্বে শ্রুতিও আছে, "এই বিশ্বের সমস্ত যাঁহার চক্ষু, এবং সমস্ত যাঁহার মুখ, সমস্ত যাঁহার বাহু ও সমস্ত যাঁহার চরণ, এতাদৃশ স্বর্গ ও পৃথিবীর উৎপাদনশীল এক দেবতা (প্রকৃতি) বহুস্থানীয় ধর্ম্ম ও অধর্ম্ম দ্বারা অনিত্য ভূতের সহিত জীবদিগকে সংযোজিত করেন ॥ ১৫ ॥

युक्त्यन्तरमाह—

अबाधे नैष्फल्यम् ॥ १७ ॥

यदि विद्यया अविद्या न बाध्यते, विद्यैव न भविष्यतीति ॥ १७ ॥

बाध्यत एव इत्यत आह—

विद्याबाध्यत्वे जगतोऽप्येवम् ॥ १८ ॥

जगतोऽपि अविद्यात्वम् ॥ १८ ॥

विद्यातः अन्यत्व इति, अविद्याया इत्यादिः, तथाचाविद्यायाः विद्याभिन्नत्वरूपत्व इत्यर्थः। एतन्मते दोषं दर्शयति—ब्रह्मणोऽपीत्यादिना। भवतु ब्रह्मणोऽप्यविद्यात्वं का क्षतिरित्याशङ्कायां सूत्रस्योत्तरपदं व्याचष्टे—तस्येत्यादिना। ब्रह्मणोऽप्यविद्यात्वे अविद्याया विद्यानाश्यत्वेन ब्रह्मणोऽपि नाशापत्त्या नित्यशुद्धत्वादिरूपब्रह्मत्वं न स्यादिति भावः ॥ १६ ॥

युक्त्यन्तरमिति, अविद्याया विद्याभिन्नत्वरूपाभ्युपगमे युक्त्यन्तरमित्यर्थः। सूत्रतात्पर्यं विवृणोति—यदीत्यादिना, विद्यैव न भविष्यतीति नैष्फल्यमित्यस्य विवरणम्, अविद्याविनाशार्थमेव विद्याया आवश्यकत्वेन अविद्याविनाशकत्वाभावे विद्यालाभार्थं कोऽपि न यतेत इति विद्यैव न सिध्येदिति भावः ॥ १७ ॥

जगतोऽपीति, न केवलं ब्रह्मण इत्यपेरर्थः। अविद्यात्वमिति विद्याभिन्नत्वमित्यादिः। तथाच जगतोऽपि विद्यया बाधः स्यादिति भावः ॥ १८ ॥

অবিদ্যার স্বরূপবিষয়ে বাধক বলিতেছেন, বিদ্যাভিন্নত্বই যদি অবিদ্যার স্বরূপ হয়, তবে বিদ্যাভিন্নত্বনিবন্ধন ব্রহ্মেরও অবিদ্যাত্ব হইতে পারে, এবং তাহা হইলে অবিদ্যার বিদ্যানাশ্যত্বনিবন্ধন ব্রহ্মেরও নাশাপত্তি হয়, নাশও স্বীকার করিলে নিত্য শুদ্ধত্বাদিরূপ ব্রহ্মত্বেরই অপলাপ হয় ॥ ১৬ ॥

যদি বিদ্যাদ্বারা অবিদ্যার নাশ না হয়, তবে পূর্ব্ব সূত্রোক্ত ব্রহ্মের বাধ না হইলেও বিদ্যার সিদ্ধি হইতে পারে না, কারণ অবিদ্যানাশের জন্যই জীব বিদ্যালাভের যত্ন করিয়া থাকে, যদি বিদ্যাদ্বারা অবিদ্যার নাশই না হয়, তবে নিষ্প্রয়োজনে কে বিদ্যালাভের যত্ন করিবে? যত্ন না করিলে কিরূপেই বা বিদ্যার সিদ্ধি হইবে? ॥ ১৭ ॥

অবিদ্যার বিদ্যাবাধ্যত্ব স্বীকার করিলে বিদ্যাভিন্নত্বনিবন্ধন ব্রহ্মের ন্যায় জগতেরও অবিদ্যাত্ব ও বিদ্যানাশ্যত্ব স্বীকার করিতে হয় ॥ ১৮ ॥

अस्तु जगतोऽपि अविद्यात्वम् इत्यत्राह—

तद्रूपत्वे सादित्वम् ॥ १९ ॥

अनादिः इयम् अविद्या । जगतः तद्रूपत्वे अविद्यायाः सादित्वम् ॥ १९ ॥

न कर्म्मणो जगत्कारणत्वं, स्वभावादेव जगत् उत्पद्यते इत्यत्राह—

न धर्म्मापलापः प्रकृतिकार्य्यवैचित्र्यात् ॥ २० ॥

प्रकृतेः नित्यत्वात् स्वभावस्य एकत्वात् धर्म्माभावात् विचित्रकार्य्यानुत्पत्तिः । तस्मात् धर्म्मभेदेन कार्य्यवैचित्र्यम् । न धर्म्मापलापः ॥ २० ॥

धर्म्मसिद्धौ प्रमाणमाह—

श्रुतिलिङ्गादिभिस्तत्सिद्धिः ॥ २१ ॥

'श्रुति' इति शाब्दं प्रमाणं दर्शितं, 'लिङ्ग' इति अनुमानम् । आदिशब्दात् योगिप्रत्यक्षं दर्शितम् । एभिः धर्म्मसिद्धिः ॥ २१ ॥

सूत्रान्तरमवतारयति— अस्त्वित्यादिना । अविद्येति भवद्भिरङ्गीक्रियत इति शेषः । तद्रूपत्वे—अविद्यारूपत्वे, सादित्वमिति स्यादिति शेषः । ध्वंसप्रतियोगिनोऽभावस्यानादित्वानुपपत्तेरित्यर्थः । तथाच भवत्सिद्धान्तहानिरिति भावः ॥ १९ ॥

स्वभावादेव जगदुत्पद्यत इति नास्तिकमतनिराकरणपरं सूत्रमवतारयति—नेत्यादिना । धर्म्मस्य—धर्म्माधर्म्मरूपस्य । विचित्रकार्य्यानुत्पत्तिरिति, कार्य्यवैचित्र्यस्य कारणवैचित्र्यनियम्यत्वादिति भावः । उपसंहरति—तस्मादित्यादिना ॥ २० ॥

জগতের অবিদ্যাস্বরূপত্ব স্বীকার করিলে অবিদ্যা ও সাদি হইয়া পরে, কারণ জগতের সাদিত্ব উভয়বাদিসিদ্ধ। অথচ অবিদ্যাবাদীদিগের মতে অবিদ্যা অনাদি। (সুতরাং অবিদ্যাবাদীদিগের মত নির্দ্দোষ নহে॥ ১৯॥

নাস্তিকগণ বলেন "কর্ম্ম জগতের কারণ নহে, স্বভাবতঃই জগতের উৎপত্তি হয়" তাহা ঠিক নহে, কারণ তাহা হইলে প্রকৃতির নিত্যত্ব ও স্বভাবের একত্ব বশতঃ কার্য্যের বৈচিত্র্য হইতে পারে না, যেহেতু কারণের বৈচিত্র্যই বৈচিত্র্যের নিয়ামক। অতএব ধর্ম্মভেদেই কার্য্যের বৈচিত্র্য হয় বিধায় ধর্ম্মের অপলাপ হইতে পারে না॥ ২০॥

यदि देशकालयोर्न कारणत्वं, कथं काश्मीरे कुङ्कुमं, वसन्ते चूतमुकुलोत्पत्तिः ? इति आह—

न नियमः, प्रमाणान्तरावकाशात् ॥ २२ ॥

न अदृष्टम् एव कारणम् इति नियमः। किन्तु अदृष्टं सहकारि-कारणं, अन्येषामपि कारणत्वं, प्रमाणसद्भावात् ॥ २२ ॥

दुःखमयसंसारदर्शनात् दुरितादृष्टमेवास्तु इत्यत आह—

उभयत्राप्येवम् ॥ २३ ॥

सुखस्यापि दर्शनात् शुभादृष्टमेव अस्तु ॥ २३ ॥

दुःखाभावे सुखाभिमानात् तत्रादृष्टशब्दो मुख्यः, सुखकारणे गौणः इत्यत आह—

अर्थात् सिद्धिश्चेत् समानमुभयोः ॥ २४ ॥

एतद्विपरीतसम्भवात् उभयोः तुल्यत्वम् इति ॥ २४ ॥

सूत्रान्तरमवतारयति—धर्म्मेत्यादिना। श्रुतिश्च "पुण्यो वै पुण्येन भवति पापः पापेने"-त्यादिः। धर्म्मसिद्धिरिति तत्सिद्धिरित्यस्य विवरणम् ॥ २१ ॥

सूत्रान्तरमवतारयितुं शङ्कते—यदीत्यादिना। सूत्रतात्पर्यं विवृणोति—नेत्यादिना। प्रमाणसद्भावादिति अन्वयव्यतिरेकादिरूपप्रमाणस्य कालादिकारणत्वग्राहकस्य सद्भावादित्यर्थः ॥ २२ ॥

दुरितादृष्टमेवास्त्विति किं शुभादृष्टेनेति एवकारार्थः। सूत्रतात्पर्यमाह—सुखस्येत्यादिना। तथाच धर्म्माधर्म्मयोस्तुल्यं प्रमाणमिति सूत्रार्थः ॥ २३ ॥

শ্রুতি, অনুমান ও যোগিপ্রত্যক্ষ এই ত্রিবিধ প্রমাণের দ্বারা ধর্ম্মের সিদ্ধি হয় ॥২১॥

যদি দেশ ও কালের কারণত্ব না থাকে, তবে কাশ্মীর দেশে কুঙ্কুমের ও বসন্তকালে চূতমুকুলের উৎপত্তি হয় কি প্রকারে ? এই আশঙ্কায় বলিতে-ছেন, কেবল অদৃষ্টই যে কারণ, এরূপ নিয়ম নাই, কিন্তু অদৃষ্ট সহকারি কারণ। অন্বয় ও ব্যতিরেকের সদ্ভাববশতঃ কালাদিরও কারণত্ব আছে ॥ ২২ ॥

সংসার দুঃখময় বলিয়া কেবল দুরিতাদৃষ্ট (অধর্ম্ম) ই যে জগতের নিমিত্ত কারণ তাহা নহে, সংসারে সুখের উপলব্ধি আছে বিধায় শুভাদৃষ্ট (ধর্ম্ম) ও নিমিত্ত কারণ ॥ ২৩ ॥

धर्मादीनाम् आत्मधर्मत्वं निषेधति—

अन्तःकरणधर्मत्वं धर्मादीनाम् ॥ २५ ॥

बुद्धिधर्मत्वम्। आत्मधर्मत्वे निःसङ्गत्वश्रुतिविरोधः ॥ २५ ॥

अन्यधर्मस्य अन्यत्र कार्य्यादर्शनात् वरमसत्त्वमेव धर्मादीनाम् इत्यत्राह—

गुणादीनां नात्यन्तबाधः ॥ २६ ॥

यथा पृथिव्यादीनां दृष्टत्वात् न अत्यन्तबाधः, तथा गुणादीनां धर्मादीनामपि। अन्यधर्मस्यापि अन्यत्र कार्य्यकरणं चितिच्छायापत्त्या इति उक्तम् ॥ २६ ॥

सूत्रान्तरमवतारयति—दुःखेत्यादिना। तत्र—दुःखकारणे, गौणः—लक्षणया दुःखानुत्पत्तिप्रयोजकपरः। एतद्विपरीतसम्भवादिति, सुखाभावे दुःखाभिमानात् सुखकारणे अदृष्टशब्दस्य मुख्यत्वं दुःखकारणे च गौणत्वमित्येवं विपरीतस्य च सम्भवादित्यर्थः। उभयोः—सुखकारणदुःखकारणयोः, तुल्यत्वं—अदृष्टशब्दस्य समानशक्तत्वम् ॥ २४ ॥

नैयायिकमतनिराकरणपरं सूत्रमवतारयति—धर्मेत्यादिना। सूत्रीयान्तःकरणशब्दस्य बुद्धिपरत्वं दर्शयितुं व्याचष्टे—बुद्धिधर्मत्वमिति। निःसङ्गत्वश्रुतिश्च "असङ्गो ह्ययं पुरुष" इति पूर्व्वमेवोक्ता ॥ २५ ॥

सूत्रान्तरमवतारयति—अन्येत्यादिना, वरमसत्त्वमिति बुद्धिधर्म्मस्य धर्मादिना बुद्धिभिन्न-

---

কেহ বলেন "দুঃখাভাবে সুখাভিমানবশতঃ দুঃখকারণেই অদৃষ্ট শব্দের শক্তি, সুখকারণে দুঃখানুৎপত্তিপ্রযোজকরূপে লক্ষণা।" তাহা ঠিক নহে, কারণ তাহা হইলে ইহার বিপরীত অর্থাৎ সুখাভাবে দুঃখাভিমান বশতঃ সুখকারণে অদৃষ্ট শব্দের শক্তি ও দুঃখকারণে সুখানুৎপত্তিপ্রযোজকত্বরূপে লক্ষণা, এরূপ কল্পনাও হইতে পারে। অতএব সুখকারণ ও দুঃখকারণ উভয় এই অদৃষ্ট শব্দের তুল্য বৃত্তি ॥ ২৪ ॥

ধর্ম্ম ও অধর্ম্ম অন্তঃকরণের ধর্ম্ম, আত্মার ধর্ম্ম নহে, কারণ আত্মার ধর্ম্ম হইলে অসঙ্গত্বশ্রুতির বিরোধ হয় ॥ ২৫ ॥

অন্যের ধর্ম্ম দ্বারা অন্যত্র কার্য্য হইতে দেখা যায় না, অতএব অন্তঃকরণের

দুঃখাভাবঃ সুখম্ ইতি তৎপ্রতিষেধার্থমাহ—

পঞ্চাবয়বযোগাৎ সুখসংবিত্তিঃ ॥ ২৭ ॥

যদ্যপি মানসপ্রত্যক্ষেণ ভাবরূপং সুখমবসীয়তে, তথাপি পরবোধায় প্রমাণমপি উক্তম্। পঞ্চাবয়বযোগাদিতি "দ্ব্যবয়বমনুমানম্" ইতি নিরস্তম্। প্রতিজ্ঞাহেতুদৃষ্টান্তোপনয়নিগমনম্ ইতি।

স্যাত্মনঃ ভোগাদিরূপকার্য্যস্যাসম্ভবাৎ পুরুষভোগাদিসম্পাদকতয়া ধর্ম্মাদিস্বীকরণমসমীচীনমিতি ভাবঃ। সূত্রতাৎপর্য্যং বর্ণয়তি—ধর্ম্মেত্যাদিনা। দৃষ্টত্বাৎ—সত্ত্বেন প্রতীয়মানত্বাৎ; ধর্ম্মাদীনামসত্ত্বং প্রতি হেতুত্বেনাভিমতং ব্যধিকরণতয়া পুরুষভোগাদিসম্পাদনাসম্ভবং নিরাকরোতি—অন্বেত্যাদিনা। চিতিচ্ছায়াপত্ত্যা—বুদ্ধৌ চিদাত্মনঃ প্রতিবিম্বরূপসম্বন্ধেন। তথাচ স্বাশ্রয়প্রতিবিম্বিতত্বেনৈব ধর্ম্মাদীনাং পুরুষভোগাদিসম্পাদকত্বাঙ্গীকারান্ন কার্য্যকারণয়োর্ব্যধিকরণ্যনিবন্ধনো দোষ ইতি ভাবঃ ॥ ২৬ ॥

সুখস্য দুঃখাভাবরূপতামঙ্গীকুর্ব্বতাং মতস্য নিরাকরণপরং সূত্রমবতারয়তি—দুঃখেত্যাদিনা। "পঞ্চাবয়বযোগাৎ প্রতিজ্ঞাদিপঞ্চাবয়বসাধ্যাদনুমানাৎ, সুখসংবিত্তিঃ—সুখস্য সদ্রূপতাসিদ্ধি"—রিতি সূত্রার্থঃ। নন্ সুখস্য সদ্রূপতয়া মানসপ্রত্যক্ষবিষয়ত্বাৎ কথমনুমানপ্রদর্শনমিত্যাশঙ্কা-সমাধানার্থং ভূমিকামারচয়তি—যদ্যপীত্যাদিনা। পরবোধায়—সুখস্য ভাবরূপত্বে বিপ্রতিপন্নং প্রতি ভাবরূপত্বপ্রতিপাদনায়, অত এব পঞ্চাবয়বসাধ্যত্বপর্য্যন্তানুসরণমপি সার্থকং স্বার্থানুমানে পঞ্চাবয়বাত্মকন্যায়স্যানুপযোগিত্বাৎ। দ্ব্যবয়বমিতি দ্বৌ প্রতিজ্ঞাহেত্বাত্মকাবেবাবয়বৌ সাধকতয়া যস্যেতি ব্যুৎপত্ত্যা প্রতিজ্ঞাহেতুমাত্রসাধ্যমিত্যর্থকম্, এতচ্চ ত্র্যবয়বাদেরপ্যুপলক্ষণং তথা-

---

ধর্ম্মাধর্ম্মাদি দ্বারাও আত্মার সুখাদিভোগ হইতে পারে না, সুতরাং ধর্ম্মাদির সত্তা স্বীকারে কোনও প্রমাণ নাই, এই আশঙ্কায় বলিতেছেন—সৎ বলিয়া প্রতীত হওয়ায় পৃথিব্যাদির উচ্ছেদ হইতে পারে না। সেরূপ ধর্ম্মাদিরও উচ্ছেদ হইতে পারে না। অন্তঃকরণধর্ম্ম ধর্ম্মাদি দ্বারা আত্মার সুখভোগাদি কার্য্য সাধন ও বুদ্ধিপ্রতিবিম্বিতত্বনিবন্ধনই হইতে পারে, ইহা বলা হইয়াছে ॥ ২৬ ॥

কেহ বলেন, দুঃখাভাবই সুখ, (সুখ কোন ভাব পদার্থ নহে) তাহার প্রতিষেধার্থ বলিতেছেন—পঞ্চাবয়বসাধ্য অনুমানরূপ প্রমাণ দ্বারা সুখের ভাবত্বের সিদ্ধি আছে। সুখ যে ভাব পদার্থ, ইহা যদিও 'অহংসুখী' ইত্যাদি

अनेन पक्षधर्मत्वं सपक्षसत्त्वं विपक्षात् व्यावृत्तिः असत्प्रतिपक्षत्वम् अबाधितविषयत्वं सिद्धम् ॥ २७ ॥

सकृद्दर्शनात् न व्याप्तिः इत्याह—

न सकृद्ग्रहणात् सम्बन्धसिद्धिः ॥ २८ ॥

स्वप्रतीतिविरोधात्। तथा च वह्निरासभयोः सकृद्दर्शनात् अनुमानं स्यात्। न एवं प्रतीयते इति ॥ २८ ॥

वावयवानां पञ्चत्वन्न्यूनाधिकसंख्यावादिनां सर्व्वेषामेव मतं निरस्तमित्याशयः। के ते पञ्चावयवा इत्याकाङ्क्षां पूरयति—प्रतिज्ञे त्यादिना। परार्थानुमाने पञ्चावयवस्योपयोगित्वं प्रदर्शयति—अनेनेत्यादिना। तथाहि सुखं सत् अर्थक्रियाकारित्वादिति सुखस्य भावत्वसाधकः प्रयोगः, तत्र च सुखं सदिति प्रतिज्ञा, अर्थक्रियाकारित्वादिति हेतुः, यद्यदर्थक्रियाकारि तत्तत् सत् यथा विषयप्रकाशरूपार्थक्रियाकारिचक्षुरिति दृष्टान्तः, सत्त्वव्याप्यपुलकादिरूपार्थक्रियाकारि च सुखमित्युपनयः, तस्मात् सुखं सदिति निगमनम्। एतेषाञ्च पञ्चावयवानां सुखस्य सत्त्वसाधकपरार्थानुमाने हेतोः पक्षधर्म्मत्वादिना पञ्चविधहेत्वाभासविधूननद्वारोपयोगित्वमिति विभावनीयमिति सङ्क्षेपः ॥ २७ ॥

सूत्रान्तरमवतारयति—सकृदित्यादिना। "सकृद्ग्रहणात एकवारं साध्यसाधनयोः सहचारदर्शनात् न सम्बन्धस्य—व्याप्तेः सिद्धिः—ज्ञान" मिति सूत्रार्थः। अत्र हेतुं पूरयति—स्वप्रतीतिविरोधादिति, प्रतीतिविरोधं विशदयति—तथाचेत्यादिना। एतच्चोपलक्षणं भूयस्त्वस्यानुगततया भूयः साध्यसाधनसहचारदर्शनादपि व्याप्तिग्रहासम्भवात्। कथं तर्हि व्याप्तिग्रह इति चेत् व्यभिचारादर्शनासहकृतसाध्यसाधनसहचारदर्शनादित्यनुसन्धेयम् ॥ २८ ॥

মানস প্রত্যক্ষদ্বারাও স্বতঃসিদ্ধ আছে, তথাপি প্রতিবাদীদিগের অবগতির জন্য প্রমাণ প্রদর্শিত হইল। "পঞ্চাবয়বযোগাৎ" বলাতে অবয়বের ন্যূনাধিক সংখ্যাবাদীদিগের মত নিরস্ত হইল। প্রতিজ্ঞা, হেতু, উদাহরণ, উপনয় ও নিগমন এই পাঁচ প্রকার অবয়ব; ইহাদের দ্বারা যথাক্রমে (হেতুতে) পক্ষবৃত্তিত্ব, নিশ্চিতসাধ্যবদ্বৃত্তিত্ব, নিশ্চিতসাধ্যাভাববদ্ব্যাবৃত্তত্ব, অসৎপ্রতিপক্ষিতত্ব ও অবাধিতত্বের সিদ্ধি হয়॥ ২৭ ॥

একবারমাত্র সাধ্য ও সাধনের সহচারদর্শনে ব্যাপ্তিজ্ঞান হয় না,

कीयं व्याप्तिः ? इत्यत आह—

नियतधर्मसाहित्यमुभयोरेकतरस्य वा व्याप्तिः ॥२९॥

उभयोः इति समव्याप्तिकयोः कृतकत्वानित्यत्वयोः । एकतरस्य विषमव्याप्तिकस्य धूमस्य इति । तथा च—

यावच्चाव्यतिरेकित्वं शतांशेनापि शङ्क्यते ।
विपक्षस्य कुतस्तावद्धेतोर्गमनिकाबलम् ॥ २९ ॥

व्याप्तिस्वरूपनिरूपणपरं सूत्रमवतारयितुं पृच्छति—कीयमिति । समव्याप्तिकयोरिति, समा व्याप्तिर्ययोरिति व्युत्पत्त्या परस्परव्याप्तिमतोः साध्यसाधनयोरित्यर्थः, तादृशसाध्यसाधने दर्शयितुमाह—कृतकत्वानित्यत्वयोरिति, अत्र कृतकत्वमुत्पत्तिमत्त्वं अनित्यत्वञ्च ध्वंसप्रतियोगित्वमित्युभयोः ध्वंसप्रागभावयोर्व्यभिचरितत्वात्, कुतः समव्याप्तिकत्वमिति चेन्न भावत्वे सतीत्यनेनाप्युभयोर्विशेषणीयत्वात् । विषमव्याप्तिकस्येति, साध्यव्यापकत्वाभाववत्त्वे सति साध्यव्याप्तिमत इत्यर्थः । धूमस्येति वह्निसाध्यकधूमहेतोरित्यर्थः । सूत्रे नियतधर्मसाहित्यमिति, धर्मतायां साहित्यं धर्मसाहित्यं सहचार इत्यर्थः, तथाच नियतः—अव्यभिचरितः यः सहचारः (साध्यसामानाधिकरण्यं) स व्याप्तिरिति लक्षणम् । उभयोरित्यादिकन्तु वस्तुगतिमनुरुध्योक्तं लक्षणे तत्प्रवेशे प्रयोजनविरहात् । धूमवान् वह्निरित्यादावतिव्याप्तिवारणाय नियतपदम् । नियतत्वाभावे व्याप्तिविरहे प्राचीनसम्मतिं दर्शयितुमाह—तथाचेति, "विपक्षस्य—साध्याभाववत्तया निश्चितस्य, अव्यतिरेकित्वं—साधनवत्त्वं यावत् शतांशेनापि (किं पुनर्विशेषेण इत्यपिरर्थः) शङ्क्यते—शङ्काविषयीक्रियते, तावत् हेतोः गमनिकाबलं—साध्यसाधनसामर्थ्यं कुतः ? अपितु नैवेति कारिकार्थः ॥ २९ ॥

কারণ, তাহা হইলে বহ্নি এবং রাসভের একবার সহচারদর্শনেও অনুমান হইতে পারে ; তাহা হয় বলিয়াও প্রতীয়মান হয় না ॥ ২৮ ॥

যেই সাধ্য ও হেতুর পরস্পর ব্যাপ্তির সম্ভাবনা হয়, সেই সাধ্য ও সাধন সমব্যাপ্তিক, যেমন কৃতকত্ব ও অনিত্যত্ব ; আর যেই হেতুতে সাধ্যের ব্যাপকত্ব না থাকিয়া কেবল ব্যাপ্তি থাকে, তাহার নাম বিষমব্যাপ্তিক, যেমন বহ্নি-সাধক স্থলে ধূম। সেই সমব্যাপ্তিক ও বিষমব্যাপ্তিক হেতুতে যে নিয়ত সাধ্যসামানাধিকরণ্য তাহার নাম ব্যাপ্তি। প্রাচীনেরাও বলিয়াছেন,—যে পর্য্যন্ত শতাংশেও বিপক্ষে সাধনবত্ত্বের সংশয় থাকে, সে পর্য্যন্ত হেতুর গমকত্ব

तत्त्वान्तरं व्याप्तिरिति तन्निराकरोति—

न तत्त्वान्तरं, वस्तुकल्पनाप्रसक्तेः ॥ ३० ॥

तत्त्वान्तरस्वीकारेऽपि अव्यभिचारो वक्तव्यः। स एवास्तु, किं वस्तुकल्पनया? इति ॥ ३० ॥

स्वमतमाह—

निजशक्त्युद्भवमित्याचार्य्याः ॥ ३१ ॥

अस्ति वह्निधूमयोर्निजा शक्तिः, सा तयोर्ग्रहणेन गृह्यते। सैव व्याप्तिरिति ॥ ३१ ॥

सूत्रान्तरमवतारयति—तत्त्व इत्यादिना। सूत्र वस्तुकल्पनाप्रसक्तेरिति व्याप्तित्वाश्रयतया ज्ञातपदार्थातिरिक्तपदार्थकल्पनाप्रसङ्गादित्यर्थः। ननु प्रामाणिकत्वे पदार्थान्तरकल्पनमपि न दोषावहमित्याशङ्कामपाकुर्वन्—तत्त्वान्तरस्वीकार इत्यादिना। वक्तव्य इति, अन्यथा धूमवान् वह्नेरित्यादावपि तत्प्रसङ्गः स्यादिति भावः। स एव—अव्यभिचार एव अव्यभिचरित सहचार एवेति यावत्, वस्तुकल्पनया—ज्ञातपदार्थातिरिक्तव्याप्तित्वाश्रयस्वीकारेण, ज्ञातवस्तुनि व्याप्तित्वकल्पनेनैवोपपत्तौ व्याप्तित्वाश्रयपदार्थान्तरकल्पनगौरवाङ्गीकारो निष्प्रयोजनक इति भावः ॥ ३० ॥

सूत्रान्तरमवतारयितुमाह—स्वमतमिति, अत्र परमतमाहेति भाष्यकारेणोक्तं पूर्व्वसूत्रोक्ताया व्याप्तेः सम्मतत्वासूचनेन दूषणानभिधानेन च तस्यैव समीचीनत्वं प्रतिभातीति विभावनीयम्। गृह्यत इति गृह्यमाणाकारेणेत्यर्थः, एतदर्थं नाभायैव उद्भवपर्य्यन्तानुसरणमित्यवधेयम्। तथाच शक्तिशक्तिमतोरभेदमतेन मते पदार्थान्तरकल्पनागौरवमपि नास्तीति निष्कर्षः ॥ ३१ ॥

হইবে কি প্রকারে? অর্থাৎ যে পর্য্যন্ত হেতুতে ব্যভিচারজ্ঞান থাকে, সে পর্য্যন্ত ব্যাপ্তিজ্ঞান হয় না ॥ ২৯ ॥

কেহ বলেন, ব্যাপ্তি একটি পদার্থান্তর, তাহা ঠিক নহে; কারণ জ্ঞাতপদার্থ দ্বারা উপপত্তিসম্ভবে অযথা তত্ত্বান্তরকল্পনা নিষ্প্রয়োজন, অর্থাৎ তত্ত্বান্তর স্বীকার করিলেও অব্যভিচরিত তত্ত্বান্তরই স্বীকার করিতে হইবে, নচেৎ অতিব্যাপ্তিদোষ হইবে, অতএব সেই অব্যভিচারের ব্যাপ্তিত্ব সম্ভবে। কল্পনার কোনও ফল নাই ॥ ৩০ ॥

एकदेशिमतमाह—

आधेयशक्तियोग इति पञ्चशिखः ॥ ३२ ॥

यदि निजा शक्तिः, अव्युत्पन्नस्यापि वस्तुनो दर्शनात् 'अत्र अयं शक्तः' इति ज्ञानं स्यात् । न च एवम् । तस्मात् आधेयशक्तिः व्याप्ति इति ॥ ३२ ॥

युक्तिमाह—

न स्वरूपशक्तिनियमः, पुनर्वादप्रसक्तेः ॥ ३३ ॥

यदि स्वरूपं शक्तिः, शक्तः शक्तः इति पुनरुक्तं स्यात् ॥ ३३ ॥

एकदेशिमतसमर्थनाय पूर्व्वसूत्रोक्तमतान्तरं दर्शयति—यदीत्यादिना । व्याप्तिरित्यादिः । आधेयशक्तिपदार्थस्तु समाधानसूत्रे विवेचयिष्यते ॥ ३२ ॥

सूत्रान्तरमवतारयितुमाह—युक्तिमाहेति, पञ्चशिखमतावलम्बी निजशक्तेर्व्याप्तित्वाभावे युक्तिमवतारयतीत्यर्थः । पुनरुक्तमिति, स्वरूपं शक्तिरिति मते शक्तशब्दस्य शक्तशब्दार्थ-विलक्षणार्थाप्रतिपादकत्वादित्यर्थः । तथाच "पुनरुक्ततावारणाय अन्यः कश्चिदिक्तशक्त्यावच्छे-दकस्वरूपतया निजशक्तेर्व्याप्तित्ववादिमतेऽपि पदार्थान्तराकल्पननिबन्धनाभिमानो न सम्भवतीति भावः ॥ ३३ ॥

আচার্য্যগণ বলেন, বহ্নি ও ধূমের নিজশক্তি আছে, উভয়ের সহচার দর্শন দ্বারাই তাহা পরিগৃহীত হয়। সেই গৃহমাণ শক্তিই ব্যাপ্তি ॥ ৩১ ॥

পঞ্চশিখ বলেন—আধেয় শক্তিযোগের নাম ব্যাপ্তি। কারণ যদি নিজ শক্তি থাকে, তবে অব্যুৎপন্ন ব্যক্তিরও, বস্তুদর্শনে "এই বস্তু ইহাতে শক্ত" এইরূপ জ্ঞান হইতে পারে, কিন্তু তাহা হয় না, অতএব আধেয় শক্তিই ব্যাপ্তি ॥ ৩২ ॥

বস্তুর স্বরূপই যে শক্তি, তাহা বলা যায় না, কারণ যদি স্বরূপই হয়, তবে "শক্ত শক্ত" এস্থানে পুনরুক্তি দোষ হয়, কেন না স্বরূপ-শক্তিবাদীর মতে শক্ত ও শক্ত শব্দের অর্থের কোনও পার্থক্য থাকে না ॥ ৩৩ ॥

युक्त्यन्तरमाह—

विशेषणानर्थक्यप्रसक्तेः ॥ ३४ ॥

शक्तो देवदत्त इति प्रत्ययो न स्यात्, किन्तु देवदत्तो देवदत्त इति ॥ ३४ ॥

अपरां युक्तिमाह—

पल्लवादिष्वनुपपत्तेः ॥ ३५ ॥

पल्लवादिषु स्वरूपस्य तादवस्थ्यात् अप्रयुक्तेऽपि मन्त्रे विषापनोदनं स्यात् ॥ ३५ ॥

समाधानमाह—

आधेयशक्तिसिद्धौ निजशक्तियोगः समानन्यायात् ॥३६॥

निजा चासौ शक्तिश्चेति निजशक्तिः, न तु स्वरूपमेव शक्तिः ।

विशेषणानर्थक्यं विशदयति—शक्त इत्यादिना । न स्यादिति "स्वरूपं शक्ति"रिति मते शक्त इत्यनेन देवदत्तस्य कथञ्चिदपि विशेषाप्रतिपादनादित्यर्थः । विशेषाप्रतिपादनेऽपि यदि विशेषणं सार्थकं स्वीक्रियते तदा दोषं दर्शयितुमाह—किन्त्विति, परन्त्वित्यर्थः, इतीति, स्यादिति शेषः, तन्मते शक्तो देवदत्त इति प्रत्ययस्य देवदत्तो देवदत्त इति प्रत्ययस्याविशेषादिति भावः ॥ ३४ ॥

अपरां युक्तिमिति, शक्तेः स्वरूपत्वासम्भवे अन्यां युक्तिमित्यर्थः । सूत्रं विवृणोति—पल्लवेत्यादिना, तथाच, स्वरूपस्य मन्त्रप्रयोगात् पूर्व्वंविद्यमानत्वेऽपि विषापनोदकत्वाभावात् प्रयुक्ते च मन्त्रे विषापनोदकत्वात्तत्र मन्त्रप्रयोगजन्यातिरिक्तैव शक्तिः कल्पनीयेति भावः ॥ ३५ ॥

বিশেষণের আনর্থক্য বশতঃ "দেবদত্ত শক্ত" এইরূপ প্রতীতিও হইতে পারে না। (অনর্থক বিশেষণ সহকারেও প্রতীতি স্বীকার করিলে) "দেবদত্ত দেবদত্ত" এইরূপও প্রতীতি হইতে পারে ॥ ৩৪ ॥

বস্তুর স্বরূপই যদি শক্তি হয়, তবে মন্ত্রপ্রয়োগের পূর্ব্বেও পল্লবাদিতে স্বরূপের বিদ্যমানতাবশতঃ বিষের অপনোদন হইতে পারে, কিন্তু তাহা হয় না, সুতরাং মন্ত্রপ্রয়োগ দ্বারা বিষাপনোদক-শক্তির উৎপত্তি হয়, ইহাই স্বীকার ॥ ৩৫ ॥

तथा च आधेयशक्तिसिद्धौ निजशक्तियोगः समानन्यायत्वात् । तथा च शक्तेः अविशेषात् आधेयशक्तियोगो वा निजशक्तियोगो वा इति समानो न्यायः । यत् च वस्तुग्रहणे प्रथमं न गृह्यते, चित्रशक्तित्वात् पदार्थानां यथास्थितोऽपि पितापुत्रसम्बन्धः विना उपदेशात् न गृह्यते । अतएव उक्तं 'निजशक्त्युद्भवम्' इति ॥ २६ ॥

पदार्थयोः तादात्म्यं निषेधति—

समाधानमिति, पूर्व्वपूर्व्वसूत्रोक्तदोषाणामुद्धारमित्यर्थः । निजशक्तिरिति स्वकीया शक्तिरित्यर्थः, एतादृशव्याख्याप्रयोजनं स्फुटयति— नत्विति, तथाच न पूर्व्वोक्तदोषाणामवकाश इति भावः । नचैवं पदार्थान्तराकल्पनगर्व्वखर्व्वं इति वाच्यं, कार्य्यकारणयोरिव शक्तिशक्तिमतो-र्भेदाभेदरूपत्व एवैतद्व्याख्यानतात्पर्य्यात्, अतएव "न तु स्वरूपमेवे" त्यत्र एवकारोऽपि सङ्गच्छते इत्यवधेयम् । आधेयशक्तिसिद्धौ—आधेयशक्तेर्व्याप्तित्वसिद्धौ, निजशक्तियोग इति व्याप्ति-र्भवितुमर्हतीति शेषः । अत्र हेतुमाह—समानन्यायत्वादिति, उभयपक्ष एव युक्तेस्तुल्यत्वा-दित्यर्थः । समानन्यायत्वमेव विशदयति—तथाचेत्यादिना । अयमाशयः—आधेयशक्तिर्यदि स्वस्य यदाधेयत्वं तच्छक्तिरित्युच्यते, तदा धूमस्य वह्न्याधेयत्वाभावाद्व्याप्तत्वं न स्यात्, स्याच्च द्रव्यत्वादौ द्रव्याद्यव्याप्तत्वं, यदि च तद्दोषादिवारणाय व्यभिचाराभावसहकृततदाधेयत्व-सहचारग्रहसमुद्बोधितशक्तिरूपा पारिभाषिकी शक्तिरुच्यते, तदा निजशक्तिरपि तद्रूपतया एव वक्तव्यतया नाममात्रेणैव भेदादुभयोर्व्याप्तित्वे नास्ति विवादावसर इति । ननु यदि वह्नि-धूमयोस्तथाविधा निजाशक्तिरस्ति तदा तत्तद्ग्रहणकाल एव सा कथं न गृह्यते इत्यत आह—यच्चेति । उपसंहर्त्तुमाह अत एवेति निजशक्तेरुग्रमाधाराने व्याप्तित्वादित्यर्थः ॥ २६ ॥

সমাধান বলিতেছেন—শক্তি নিজের অভিন্ন, কিন্তু সর্ব্বথা নিজস্বরূপ নহে, (যেমন কার্য্য ও কারণ অভিন্ন হইলেও কার্য্য সর্ব্বপ্রকারে কারণস্বরূপ নহে) অতএব, পূর্ব্বোক্ত পুনরুক্তত্বাদি দোষ হইতে পারে না। আধেয় শক্তির ব্যাপ্তির সিদ্ধি হইলে নিজ শক্তিরও ব্যাপ্তির সিদ্ধি হইবে, কারণ উভয় পক্ষেই যুক্তির তুল্যতা। অর্থাৎ সমস্ত দোষের নিরাস করিয়া শক্তির ব্যাপ্তির নির্ব্বচন করিতে হইলে নিজশক্তি ও আধেয় শক্তির নামতঃই মাত্র ভেদ থাকিবে, পদার্থতঃ নহে, সুতরাং উভয় মতে কোনও বিবাদ নাই। বস্তুগ্রহণকালে যে প্রথমতঃ শক্তির জ্ঞান হয় না, পদার্থের বিচিত্র শক্তিত্বই তাহার কারণ, যেরূপ

वाच्यवाचकसम्बन्धः शब्दार्थयोः ॥ ३७ ॥

तादात्म्यपक्षे घटोऽपि श्रोत्रग्राह्यः स्यात्, शब्दोऽपि चाक्षुषो भवेत्, अग्न्याद्युच्चारणे मुखदाहादिप्रसङ्गः इति ॥ ३७ ॥

अत्र हेतुमाह—

त्रिभिः सम्बन्धसिद्धिः ॥ ३८ ॥

त्रिभिः प्रकारैः व्युत्पत्तिग्रहणात्। आप्तोपदेशात्, यथा 'अयं घटः' इति। वृद्धव्यवहारात्, यथा 'गामानय शुक्लां, दण्डेन' इति, अत्र प्रयोजकवृद्धवाक्यात् प्रयोज्यवृद्धप्रवृत्तिं दृष्ट्वा बालस्य। प्रसिद्ध-

---

पदार्थयोरिति, पदस्य अर्थस्य पदार्थौ तयोरित्यर्थः। अर्थे शब्दस्य वाच्यत्वरूपः सम्बन्धः, शब्दे अर्थस्य वाचकत्वरूपः सम्बन्धो वर्त्तत इति सूत्राशयः ॥ ३७ ॥

अत्रेति, उक्तवाच्यत्ववाचकत्वसम्बन्धरूपशक्तिपक्षे इत्यर्थः। त्रिभिः—आप्तोपदेशवृद्धव्यवहारप्रसिद्धपदसामानाधिकरण्यरूपैः, तान् प्रकारान् क्रमशो दर्शयति—आप्तेत्यादिना, आप्तः प्रामाणिकः पुरुषः तस्य उपदेशात् "अयं घटपदवाच्य" इत्याद्याकारकनिर्देशात् घटे घटपदशक्तिग्रह इत्यर्थः। प्रयोज्यवृद्धप्रवृत्ति—दण्डकरणकगवानयनव्यवहारं, यदिच तद्व्यवहार-

---

পিতা ও পুত্রের পরস্পর সম্বন্ধ অবস্থিত থাকিলেও প্রথম দর্শনকালে অন্যের উপদেশ ভিন্ন পিতা বা পুত্রের বোধগম্য হয় না, সেইরূপ অব্যভিচরিত সহচার গ্রহব্যতিরেকেও সেই শক্তির গ্রহ হয় না। শক্তির এই অবগতি অভিপ্রায়েই উদ্ভব শব্দ বলিয়াছেন, উৎপত্তি অভিপ্রায়ে নহে। ৩৬।

কেহ বলেন, শব্দ ও অর্থ অভিন্ন, তাহা ঠিক নহে, কারণ তাহা হইলে (ঘটশব্দের ন্যায়) ঘটও শ্রোত্রগ্রাহ্য হইতে পারে, এবং ঘটের ন্যায় ঘট শব্দেরও চাক্ষুষ প্রত্যক্ষ হইতে পারে, পরন্তু অগ্নি শব্দের উচ্চারণে মুখদাহাদির আপত্তি হইতে পারে, অতএব শব্দ ও অর্থের বাচ্য ও বাচকস্বরূপই সম্বন্ধ, অর্থাৎ অর্থে শব্দের বাচ্যস্বরূপ সম্বন্ধ ও শব্দে অর্থের বাচকস্বরূপ সম্বন্ধ ইহাই সিদ্ধান্ত। ৩৭।

আপ্তোপদেশ, বৃদ্ধব্যবহার ও প্রসিদ্ধ পদের সান্নিধ্য বশতঃ শক্তিগ্রহ হয়। আপ্তোপদেশে যথা—"এইটি ঘটপদবাচ্য" এইরূপ প্রামাণিক পুরুষের উপদেশে

पदसामानाधिकरण्यात्, यथा 'पक्षी आम्रं भक्षयति' इति श्रुत्वा आम्रभक्षणार्थं जानाति, पक्षी इति तदानीं प्रतिपद्यते ॥ ३८ ॥

कार्य्ये व्युत्पत्तिः इति नियमं व्युदस्यति—

न कार्य्ये नियम उभयथा दर्शनात् ॥ ३९ ॥

कार्य्ये व्युत्पत्तिर्दृष्टा, यथा 'अहरहः सन्ध्यामुपासीत' इति। सिद्धार्थे च दृष्टा, यथा 'हरिर्देवाधिदेवः'। तथा हि विध्यर्थवाद-मन्त्रात्मका: वेदाः। विधौ कार्य्यतैकार्थसमवेतायाम् इष्टसाधनतायां

दर्शनेन समुदितार्थबोधसम्भवेऽपि न प्रत्येकपदशक्तिग्रहः सम्भवति, तथापि गां नय, घटमानये-त्याद्यावापोद्वापाभ्यां गवादिपदानां प्रत्येकशक्तिग्रहो भवेदित्याशयः। आम्रभक्षणार्थे आम्रं भक्षय-तीतिपदयोरात्मभक्षणरूपमर्थं, यो जानाति स अयं पक्षिपदवाच्य इति तदानीमवगच्छतीत्यर्थः। नैयायिकादिभिश्चोपमानादितोऽपि शक्तिग्रहं वदन्ति, तथाचोक्तं—

"शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद्व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥"

इत्यन्यत्र विस्तरः ॥ ३८ ॥

गामानय घटं नयेत्यादि वृद्धव्यवहारप्रयोजकवाक्यानि सर्व्वाण्येव प्रवर्त्तकत्वेन लिङादिपद-घटितानि, ततश्च तद्व्यवहारदर्शिनः शिशवोऽपि कार्य्यविषयकेनवाद्यर्थबोधं प्रत्येव गवादिपदानां सामर्थ्यमवधारयन्तः तदुत्तरमपि कार्य्यान्वितगवादौ शक्तिज्ञानेनैव तादृशगवादिकं प्रतिपद्यन्त इति कार्य्यान्वितस्वार्थे पदानां शक्तिरिति मीमांसकमतविशेषः, तन्निराकरणपरं सूत्रमवतारयति—

হইতে ঘটে ঘটপদের শক্তিজ্ঞান হয়। বৃদ্ধব্যবহার যথা—"দণ্ডধারা শুক্ল গো আনয়ন কর" এইরূপ প্রয়োজক বৃদ্ধের বাক্যানুসারে "দণ্ডকরণক শুক্লগবা-নয়ন" রূপ আদিষ্ট বৃদ্ধের ব্যবহারদর্শনে শিশুদিগের গবাদিপদের শক্তিজ্ঞান হয়। প্রসিদ্ধপদসান্নিধ্য যথা—যে "আম্রং" "ভক্ষয়তি" এই দুই পদের অর্থ জানে, তাহার "আম্রং ভক্ষয়তি পক্ষী" এই শব্দশ্রবণেও আম্রভক্ষণকারী পক্ষি-দর্শনে পক্ষীতে পক্ষিশব্দের শক্তিগ্রহ হয়। ৩৮ ।

মীমাংসক বলেন, লিঙাদি পদার্থরূপ কার্য্যান্বিত স্বার্থেই পদের শক্তি, তাহা ঠিক নহে; যেহেতু "অহরহঃ সন্ধ্যামুপাসীত" কার্য্যান্বিত স্বার্থে এবং

प्रामाण्यम् । विधिशक्तेरुत्तम्भकत्वेनार्थवादस्यापि पारम्पर्य्येण प्रवर्त्तकत्वात् प्रामाण्यम् । विहितस्मारकत्वेन मन्त्रस्यापि प्रामाण्यम् । यत् तु प्रवृत्तिनिमित्तत्वात् मन्त्रार्थवादयोः प्रामाण्यं, न तु प्रतिपादकत्वं, तन्न, उत्पत्तौ अस्तु प्रवृत्त्यर्थत्वं, ज्ञप्तौ तु सिद्धार्थपरत्वमेव । तस्मात् सिद्धार्थप्रतिपादकयोरपि अर्थवादमन्त्रयोः प्रामाण्यम् इति ॥ ३८ ॥

कार्य्ये इत्यादिना । उभयथादर्शनादितिभागस्य तात्पर्य्यं विवृणोति—कार्य्ये व्युत्पत्तिरित्यादिना । व्युत्पत्तिः—अन्वयः, सिद्धार्थे चेति चकारेण व्युत्पत्तिरित्यनुसज्यते । विध्यर्थवादमन्त्रात्मका वेदा इति, प्रमाणमिति शेषः । अत्र विध्यर्थवादशब्दौ निषेधनामधेययोरप्युपलक्षकौ । कृतिसाध्यताज्ञानस्यापि प्रवृत्तिं प्रति कारणत्वात् प्रवर्त्तकत्वानुरोधेनाह—कार्य्यतैकार्थसमवेतायामिति, कृतिसाध्यतासमानाधिकरणायामित्यर्थः, तथाचेष्टसाधनतापदमपि बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनतापरं । विधिशक्तेरुत्तम्भकत्वेन—विधेयार्थस्य फलविशेषसाधकत्वख्यापकत्वेन, अर्थवादस्यापि—साक्षात्कार्य्यतावाचकपदाघटितस्य "सन्ध्यामुपासते ये तु नियतं शंसितव्रताः । विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम्" मित्यादीष्टविशेषसाधकत्वबोधकवाक्यस्यापि, पारम्पर्य्येण—इष्टविशेषसाधनताधीजननद्वारा, प्रवर्त्तकत्वात्—पुरुषप्रवृत्तिं प्रति प्रयोजकत्वात्, प्रामाण्यमिति विध्येकवाक्यतयेत्यादिः । विहितस्मारकत्वेन—यागादिरूपविधेयस्य तत्सम्पादकद्रव्यदेवतादीनाञ्च स्मृतिसाधकत्वेन । एकदेशिमतं दूषयितुमुपन्यस्यति—यत्त्वित्यादिना । प्रवृत्तिनिमित्तत्वात्—यागादिगोचरप्रवृत्तेः प्रयोजकत्वात्, प्रतिपादकत्वं—स्वार्थप्रतिपादनसामर्थ्यं, तथाच सिद्धार्थप्रतिपादने मन्त्रार्थवादयोर्नास्ति प्रामाण्यमिति तेषां विमर्शः ।

"হরির্দ্দেবাধিদেবঃ" ইত্যাদি সিদ্ধার্থে শক্তিগ্রহ হইয়া থাকে। অতএব বিধি অর্থবাদ ও মন্ত্র সকলপ্রকার বেদই প্রমাণ, কৃতিসাধ্যতাসমানাধিকরণ ইষ্ট সাধনতায় বিধির প্রামাণ্য, যাগাদির ফলবিশেষসাধকত্ব খ্যাপন দ্বারা পরম্পরায় প্রবর্ত্তকত্ব বশতঃ অর্থবাদের প্রামাণ্য। যাগাদিরূপ বিধেয় ও তৎসম্পাদক-দ্রব্যের স্মরণ জন্মায় বলিয়া মন্ত্রেরও প্রামাণ্য। কেহ বলেন, প্রবৃত্তি নিমিত্তত্ব বশতঃ ও মন্ত্র এবং অর্থবাদের প্রামাণ্য থাকিলেও স্বার্থপ্রতিপাদনে তাহাদের সামর্থ্য নাই,তাহা ঠিক নহে, কারণ উৎপত্তি বিষয়ে প্রবৃত্তিনিমিত্তত্ব থাকিলেও স্বার্থপ্রতিপাদনে অবশ্যই সিদ্ধার্থপরতা স্বীকার করিতে হইবে,

अतीन्द्रियत्वाद्वेदार्थस्य कथमुभयथा व्युत्पत्तिः ? इत्यत आह—

लोकव्युत्पन्नस्य वेदार्थप्रतीतेः ॥ ४० ॥

ये एव लौकिकाः ते एव वैदिकाः इति सामान्यात् इहापि व्युत्पत्तिरिति ॥ ४० ॥

भवेदेवं, यदि वेदस्य पौरुषेयत्वं स्यात्, न चैवमित्याह—

न त्रिभिरपौरुषेयत्वाद्वेदस्य तदर्थस्याप्यतीन्द्रियत्वात् ॥ २८ ॥

ईश्वरस्य निराकृतत्वात् अन्यस्यासम्भवात्, भ्रान्तेः पुरुषधर्मत्वेन आप्तत्वानिश्चयात् वेदस्याप्रामाण्यापत्तेरिति ॥ ४१ ॥

तदेतन्मतं दूषयितुमाह—नन्वेति। उत्पत्तौ—उत्पत्तिविधौ, अर्थे—स्वार्थप्रतिपादने, उपसंहरति—तस्मादित्यादिना ॥ ३९ ॥

सूत्रान्तरमवतारयितुं शङ्कते—अतीन्द्रियत्वादित्यादिना। इहापि—वेदेऽपि, व्युत्पत्तिः—लौकिकवत् सिद्धार्थपरत्वसिद्धिरित्यर्थः ॥ ४० ॥

सूत्रान्तरमवतारयति—भवेदेवमित्यादिना। एवं—वेदेऽपि त्रिभिः सम्बन्धसिद्धिः, नचैवमिति, नच पौरुषेयत्वमित्यर्थः। "त्रिभि—पूर्वोक्तासोपदेशवृद्धव्यवहारप्रसिद्धपदसामानाधिकरण्यैः न वेदे सम्बन्धसिद्धिः सम्भवती"ति सूत्रप्रतिपाद्यार्थः। अत्र हेतुमाह—वेदस्यापौरुषेयत्वादिति, ननु वेदस्यापौरुषेयत्वे तदर्थस्याप्तोपदेशासम्भवेऽपि वृद्धव्यवहारादिनैव शक्तिग्रहः स्यादित्यतो हेत्वन्तरमाह—तदर्थस्यातीन्द्रियत्वादिति, तथाच वेदार्थस्यातीन्द्रियतया तत्र वृद्धव्यवहारस्य

(অন্যথা প্রবৃত্তি জন্মাইবারও সামর্থ্য থাকে না) অতএব সিদ্ধার্থপরমন্ত্র এবং অর্থবাদেরও অবশ্যই প্রামাণ্য স্বীকার করিতে হইবে ॥ ৩৯ ॥

যাহারা লৌকিক তাহারাই বৈদিক, সুতরাং লৌকিক শব্দের দৃষ্টান্তে বৈদিক শব্দেরও সিদ্ধার্থপরত্ব সিদ্ধ হইবে ॥ ৪০ ॥

বেদের অপৌরুষেয়ত্ব ও বেদার্থের অতীন্দ্রিয়ত্ব নিবন্ধন পূর্বোক্ত আপ্তোপদেশ, বৃদ্ধব্যবহার ও প্রসিদ্ধপদসামানাধিকরণ্য দ্বারা বেদের শক্তিগ্রহ হইতে পারে না। সাংখ্যমতে বেদের পৌরুষেয়ত্বও সম্ভবপর নাই, যে হেতু তাঁহার মতে ঈশ্বর পূর্বেই খণ্ডিত হইয়াছে, অন্য পুরুষও বেদের কর্তা হইতে পারে না,

वेदाप्रामाण्ये यागादौ अनाश्वासः इति वेदप्रामाण्यप्रतिपादनार्थमाह—

न यज्ञादेः स्वरूपतो धर्मत्वं वैशिष्ट्यात् ॥ ४२ ॥

वैशिष्ट्यं कालदेशपात्रापेक्षया, तन्निरपेक्षत्वे न स्वरूपतो धर्मत्वम्। अन्यथा अशुद्धकाले म्लेच्छदेशे महापातकिभिः कृताः यज्ञादयः धर्महेतवः स्युः। न चैवम् ॥ ४२ ॥

अत्रस्य फलदर्शनात् वेदप्रामाण्यमिति व्युत्पत्त्या किं क्रियते? इत्यत्राह—

निजशक्तिर्व्युत्पत्त्या व्यवच्छिद्यते ॥ ४३ ॥

अयं शब्दः अत्र वाचकत्वेन मुख्यः अत्र गौणः इति व्यवच्छिद्यते ॥ ४३ ॥

प्रसिद्धपदसामानाधिकरण्यस्यासम्भवेन ताभ्यामपि न शक्तिग्रहः सम्भवतीति भावः। हेतुतयोपन्यस्तं वेदस्यापौरुषेयत्वं साधयति—ईश्वरस्येत्यादिना ॥ ४१ ॥

सूत्रान्तरमवतारयति—वेदेत्यादिना। अनाश्वासः—अविश्वासः, तथाच वेदाप्रामाण्ये बहुवित्तव्ययायाससाध्ये वेदप्रतिपाद्ययागादौ—कोऽपि न प्रवर्त्तेत इति भावः। स्वरूपतः—वेदबोधितदेशकालाद्यनवच्छिन्नस्य, धर्मत्व—धर्महेतुत्वं, अन्यथा—यागादेः स्वरूपतो धर्महेतुत्वे, नचैवं—नच देशकालाद्यनपेक्षयज्ञादयः धर्महेतवः स्युः। तथाच देशकालाद्यनपेक्षयागादेः धर्महेतुत्वाभावादेव देशकालादिवैशिष्ट्यबोधकवेदस्य प्रामाण्यमुपपन्नमिति भावः ॥ ४२ ॥

কারণ তাহা হইলে ভ্রান্তির-পুরুষধর্ম্মত্বনিবন্ধন বেদকর্ত্তাতে আপ্তত্বানিশ্চয়ে বেদের অপ্রামাণ্যের আপত্তি হয় ॥ ৪১ ॥

বেদবোধিত দেশ, কাল ও অধিকারিনিরপেক্ষ যাগাদি ধর্ম্মের হেতু নহে, অন্যথা 'অশুদ্ধকালে ম্লেচ্ছদেশে মহাপাতকিকৃত যজ্ঞাদিও ধর্ম্মের হেতু হইতে [illegible], কিন্তু তাহা হয় না, অতএব দেশকালাদিরূপ বৈশিষ্ট্যবোধক বেদের প্রামাণ্য অবশ্যই স্বীকার করিতে হইবে ॥ ৪২ ॥

व्युत्पत्तिसिद्धिः कथं जायते ? तत्राह—

योग्यायोग्येषु प्रतीतिजनकत्वात्तत्सिद्धिः ॥ ४४ ॥

प्रसिद्धाप्रसिद्धेषु लौकिकवैदिकपदार्थेषु ज्ञानजनकत्वात् व्युत्पत्तिसिद्धिः ॥ ४४ ॥

वेदनित्यत्वं निराकरोति—

न नित्यत्वं वेदानां कार्य्यत्वश्रुतेः ॥ ४५ ॥

श्रुतिः तावत् 'नाहरासीन्न रात्रीरासीत्' 'स तपोऽतप्यत, तस्मा

सूत्रान्तरमवतारयितुं शङ्कते—अज्ञस्येत्यादिना। अज्ञस्य—वेदस्यार्थमजानतोऽपि अधिकारित्वादिगुणविशिष्टस्य तदनुष्ठातुः फलदर्शनात्—स्वर्गादिरूपतत्फलश्रवणादित्यर्थः। सूत्रतात्पर्य्यं विवृणोति—अयमित्यादिना, तथाहि अज्ञोऽपि यद्यज्ञादौ प्रवर्त्तते प्रामाणिकपुरुषोपदेशादिरेव कारणम्। स च वेदार्थज्ञानसापेक्षः, वेदार्थज्ञानञ्च नियतव्यवच्छेदसापेक्षं, तद्व्यवच्छेदश्च व्युत्पत्तिसापेक्ष इति व्युत्पत्तेरुपयोगित्वमव्याहतमेवेति भावः ॥ ४३ ॥

सूत्रान्तरमवतारयति—व्युत्पत्तीत्यादिना। प्रसिद्धाप्रसिद्धेष्विति तु योग्यायोग्येष्वित्यस्य विवरणम्, व्युत्पत्तिसिद्धिरिति च तत्सिद्धिरित्यस्य। ज्ञानजनकत्वादिति प्रतीतिजनकत्वादिति प्रतीतिजनकत्वादित्यर्थः ॥ ४४ ॥

যাহারা বেদের অর্থ জানে না, অথচ বেদবোধিত অধিকারিত্বাদিবিশিষ্ট, তাহারা যজ্ঞাদি করিয়াও স্বর্গাদিরূপ ফল লাভ করে এরূপ শুনা যায়, সুতরাং বেদের শক্তিজ্ঞানের প্রয়োজন কি ? এই আশঙ্কায় বলিতেছেন—"এই শব্দ এই অর্থের বাচক বলিয়া এই অর্থে মুখ্য ও এই অর্থের বাচক নহে বলিয়া এই অর্থে গৌণ" এইরূপ ব্যবচ্ছেদ ব্যুৎপত্তিদ্বারা হইয়া থাকে। এই স্থলে প্রশ্ন হইতে পারে যে, নিরুক্ত ব্যবচ্ছেদ না হইলে ক্ষতি কি ? তদুত্তরে বক্তব্য এই যে, অজ্ঞ ব্যক্তি যে বেদার্থানুষ্ঠানে প্রবৃত্ত হয়, প্রামাণিক পুরুষের উপদেশাদিই তাহার কারণ, সেই উপদেশাদি বেদার্থজ্ঞানসাপেক্ষ, বেদার্থজ্ঞান নিরুক্ত ব্যবচ্ছেদসাপেক্ষ, সুতরাং নিরুক্ত ব্যবচ্ছেদের আবশ্যকত্ব অনিবার্য্য ॥ ৪৩ ॥

প্রসিদ্ধ লৌকিক, পদার্থবিষয়ক ও অপ্রসিদ্ধ বৈদিক পদার্থবিষয়ক, এক-বিধ বোধ বৃদ্ধপরম্পরা জন্মায় বলিয়াই ব্যুৎপত্তিসিদ্ধি অর্থাৎ শক্তিগ্রহ স্বীকার করিতে হয় ॥ ৪৪ ॥

त्तपस्तेपानात्त्रयो वेदा अजायन्त'। अनुमानं च वेदोऽनित्यः कृतकत्वात् इत्यादि। प्रत्यक्षेणापि उच्चरितप्रध्वंसिनो वर्णाः इति दृश्यन्ते। यस्तु 'स एवायं कवर्णः' इति प्रत्ययः, स सामान्यविषयः॥ ४५॥

अनित्यत्वात् पौरुषेयाः वेदाः इति, तत्राह —

न पौरुषेयत्वं तत्कर्त्तुः पुरुषस्याभावात्॥ ४६॥

निराकृत ईश्वरः इति अभिसन्धिः॥ ४६॥

श्रुतिरिति, वेदानां जन्यत्वे श्रुतिरित्यर्थः। अनुमानमपि वेदानित्यत्वे प्रमाणं भवितुमर्हतीति—दर्शयति अनुमानञ्चेत्यादिना। दृश्यन्त इति, तथा च उत्पन्नप्रध्वंसिनां वर्णानामनित्यत्वे वर्णात्मकस्य वेदस्यानित्यत्वमत्यसिद्धमपीति भावः। सामान्यविषय इति साजात्यविषय इत्यर्थः, तथा च "स एवायं कवर्णः" इत्यस्य तत्सजातीयोऽयं कवर्ण इत्यर्थकतया वर्णानामनित्यत्वेऽपि न बाध इति भावः॥ ४५॥

सूत्रान्तरमवतारयति—अनित्यत्वादित्यादिना। अथेश्वररूपपुरुष एव तत्कर्त्तास्तु? इत्यत आह—निराकृत इति, ईश्वरासिद्धेरिति सूत्रेणेति शेषः॥ ४६॥

বেদের নিত্যত্ব খণ্ডন করিতেছেন—বেদ নিত্য নহে, যেহেতু "ত্রয়ো বেদা অজায়ন্ত" অর্থাৎ তিনটি বেদই জন্মিয়াছিল, এইরূপ শ্রুতি আছে। "কৃতকত্ব-নিবন্ধন বেদ অনিত্য" এইরূপ অনুমানও বেদের অনিত্যত্বে প্রমাণ হইতে পারে। বর্ণ যে উচ্চারিত ও বিনষ্ট হয়, ইহা প্রত্যক্ষতঃ ও সর্ব্বানুভবগম্য, (সুতরাং বর্ণাত্মক বেদের অনিত্যত্বে প্রত্যক্ষও প্রমাণ) "এইটি সেই কবর্ণ" এইরূপ যে প্রত্যভিজ্ঞা হয়, তাহা সামান্য (সাজাত্য) বিষয়ক, অর্থাৎ তাহার অর্থ এই যে "এইটি সেই জাতীয় কবর্ণ" স্থলে এই প্রত্যভিজ্ঞা দ্বারাও বর্ণের অনিত্যত্বের ব্যাঘাত হইল না॥ ৪৫॥

বেদ অনিত্য হইলেও পৌরুষেয় নহে, কারণ বেদের কর্ত্তা হইবার উপযুক্ত পুরুষেরই অভাব। ঈশ্বরই তাদৃশ পুরুষ, ইহাও বলা চলে না, যে হেতু "ঈশ্বরাসিদ্ধেঃ" এই সূত্রদ্বারা পূর্ব্বেই ঈশ্বর নিরাকৃত হইয়াছেন॥ ৪৬॥

अन्यः एव कर्त्ता भविष्यति इत्यत्राह—

न, मुक्तामुक्तयोरयोग्यत्वात् ॥ ४७ ॥

मुक्तस्य निःसङ्गत्वात् कर्त्तृत्वायोगात्, अमुक्तस्य युगपदुपादाना-नभिज्ञत्वात् इति ॥ ४७ ॥

अपौरुषेयत्वात् तर्हि नित्यत्वम्, अतः आह—

नापौरुषेयत्वान्नित्यत्वमङ्कुरादिवत् ॥ ४८ ॥

स्पष्टम् ॥ ४८ ॥

अङ्कुरादीनामपि सकर्त्तृकत्वं कार्य्यत्वादिति पक्षे मुक्तस्य कर्त्तृत्वम् इत्यत्राह—

तेषामपि तद्योगे दृष्टबाधादिप्रसक्तिः ॥ ४९ ॥

अङ्कुरादीनां कर्त्तुः अदृश्यत्वात् प्रत्यक्षबाधः। अयोग्यश्च कर्त्ता नास्तीत्युक्तम्। आदिशब्दात् व्याप्यत्वासिद्धिर्दर्शिता ॥ ४९ ॥

न मुक्तामुक्तयोरिति, वेदकर्त्तृत्वमिति शेषः। अयोग्यत्वं विवृणोति—मुक्तस्येत्यादिना। निःसङ्गत्वात् कर्त्तृत्वप्रयोजकाभिमानादिशून्यत्वात्। युगपत् एकदा सर्व्वज्ञकार्थी इति यावत्, उपादानानभिज्ञत्वात् वेदनिर्म्माणोपयोगिसर्व्वविषयकज्ञानाभावादित्यर्थः ॥ ४७ ॥

अङ्कुरादिवदिति, यथाङ्कुरादिरपौरुषेयोऽपि न नित्यः, तथापौरुषेयवेदोऽपि न नित्य इत्यर्थः। तथाचाङ्कुरादौ व्यभिचरितत्वान्नापौरुषेयत्वं नित्यत्वव्याप्यमिति नापौरुषेयत्वान्नित्यत्वा-पत्तिरिति भावः ॥ ४८ ॥

মুক্ত বা অমুক্ত পুরুষও বেদের কর্ত্তা হইতে পারে না, কারণ মুক্ত পুরুষ নিঃসঙ্গ অর্থাৎ কর্ত্তৃত্বের প্রয়োজক অভিমানাদিবর্জ্জিত, সুতরাং কর্ত্তা হইবার অযোগ্য, অমুক্ত পুরুষও বেদনির্ম্মাণোপযোগিসর্ব্বজ্ঞত্বাদিরহিত বলিয়াই বেদ রচনা করিবার অনুপযুক্ত ॥ ৪৭ ॥

পূর্ব্বে যদি অপৌরুষেয় হয়, তবে নিত্য হউক, এই আপত্তিও ঠিক নহে, কারণ অপৌরুষেয় হইলেই যে নিত্য হয়, এরূপ কোন নিয়ম নাই, যেহেতু অঙ্কুরাদি অপৌরুষেয় হইলেও নিত্য নহে ॥ ৪৮ ॥

अनित्यत्वपौरुषेयत्वयोः व्याप्तिर्नास्तीत्याह—

यस्मिन्नदृष्टेऽपि कृतबुद्धिरुपजायते, तत्-पौरुषेयम् ॥ ५० ॥

यथा घटादिषु न तु वृक्षादिषु । अदृष्टेऽपीति कर्त्तरि अदृष्टेऽपि । न कार्य्यमात्रं सकर्त्तृकं, किन्तु कार्य्यविशेषः ॥ ५० ॥

सूत्रान्तरमवतारयति—अङ्कुरेत्यादिना । तेषामपि—अङ्कुरादीनामपि, तद्योगे कर्त्तृयोगे, दृष्टस्य सकर्त्तृकत्वाभावस्य बाधादिप्रसक्तिरिति सूत्रार्थः । इममेवार्थं वृत्तिकारो दर्शयति—अङ्कुरेत्यादिना । नन्वदृश्य एव मुक्तः कर्त्ताऽस्त्वित्याशङ्कां निराकर्त्तुमाह—अयोग्यश्चेति, कर्त्तृत्वप्रयोजकाभिमानादिशून्य इत्यर्थः । उक्तमिति न मुक्तामुक्तयोरिति सूत्रेणेति शेषः । व्याप्त्यत्वासिद्धिरिति "यत् पौरुषेयं तत् शरीरजन्यमिति व्याप्तिर्लोके दृष्टा, तस्या बाधादिरेव स्यादित्यर्थः ।" क्वचित् पुस्तके इत्थमेवायं पाठो दृश्यते ॥ ४९ ॥

सूत्रे यस्मिन् कृतबुद्धिरिति यद्विशेष्यिका कृतिजन्यत्वप्रकारिका बुद्धिरित्यर्थः । कर्त्तर्यदृष्टेऽपि यत्र कृतबुद्धिर्जायते तान् दर्शयितुमाह—यथा घटादिष्विति । न तु वृक्षादिष्विति कृतबुद्धिर्जायते इति शेषः । फलितं दर्शयति—नेत्यादिना । तथाच कार्य्यत्वहेतुना पौरुषेयत्वसाधनमसमीचीनमिति भावः ॥ ५० ॥

কার্য্যত্ব হেতু দ্বারা অঙ্কুরাদিরও সকর্ত্তৃকত্ব সাধিত হইবে এবং মুক্ত পুরুষই অঙ্কুরাদির কর্ত্তা হইবে, এই আশঙ্কায় বলিতেছেন—অঙ্কুরাদিরও কর্ত্তৃযোগ স্বীকার করিলে অঙ্কুরাদির কর্ত্তা পরিদৃষ্ট হয় না বিধায় প্রত্যক্ষের বাধ হয়, অযোগ্য মুক্ত পুরুষ যে কর্ত্তা হইতে পারে না, ইহাও পূর্ব্বসূত্রেই বলা হইয়াছে—। পরন্তু "যে পৌরুষেয়, সেই শরীরজন্য" এই লোকসিদ্ধ ব্যাপ্তিরও বাধা ঘটে ॥ ৪৯ ॥

কর্ত্তা পরিদৃষ্ট না হইলেও যে বস্তুর দর্শনমাত্র ইহা কৃত অর্থাৎ জ্ঞানেচ্ছাদিমৎ পুরুষ নির্ম্মিত এইরূপ বুদ্ধি জন্মে, তাহাই পৌরুষেয়, যেমন ঘটাদিতে তাদৃশ বুদ্ধি জন্মে বলিয়া ঘটাদি পৌরুষেয়, কিন্তু বৃক্ষাদিতে তাদৃশ বুদ্ধি জন্মে না বলিয়া বৃক্ষাদি পৌরুষেয় নহে। অতএব কার্য্যমাত্রই সকর্ত্তৃক নহে, কিন্তু কার্য্য-

परतः प्रामाण्यं दूषयति—

निजशक्त्यभिव्यक्तेः स्वतः प्रामाण्यम् ॥ ५१ ॥

निजशक्तिर्ज्ञानजनकसामग्रीमात्राधीनं प्रमाणानां प्रामाण्यं, न तु अधिकं गुणमपेक्षते, उत्पत्तिपक्षे । ज्ञप्तिपक्षेऽपि औत्सर्गिकी ज्ञानग्राहकाणां प्रामाण्यबोधशक्तिः । तदभिव्यक्तेः स्वतः प्रामाण्यं झटिति प्रवृत्तेश्च । यत्रापि अप्रामाण्यशङ्कानिवृत्तये प्रामाण्यजिज्ञासार्थं प्रमाणानुसरणं तत्रापि कारणदोषोद्धारणाय, न गुणाय । अत एवाप्रामाण्यं परतः, तत्र दोषस्यापि कारणत्वात् इति ॥ ५१ ॥

गुणविशेषादेव प्रामाण्यमुत्पद्यत इति केचित्, तन्मतदूषकतया सूत्रमवतारयति—परत इत्यादिना । स्वतः पदं सावधारणमित्यभिप्रेत्य स्वतः प्रामाण्यमित्यर्थं व्याचष्टे—निजशक्तीत्यादिना, अवधारणव्यवच्छेद्यं दर्शयति,—न त्वित्यादिना । अत्र च हेतुमाह—निजशक्त्यभिव्यक्तेरिति, निजशक्त्या निजशक्तिज्ञानजनकसामग्रीमात्रेण च अभिव्यक्तेः—प्रामाण्यस्योत्पत्तेरिति तदर्थः । गुणविशेषज्ञानाधीनं प्रामाण्यज्ञानमिति च केचिदाचक्षते, तन्मतं दूषयितुमाह—ज्ञप्तिपक्षेऽपीति । औत्सर्गिकी—कारणान्तरनिरपेक्षा, ज्ञानग्राहकाणां—ज्ञानजनकसामग्र्याः, प्रामाण्यबोधशक्तिः—प्रामाण्यप्रकाशसामर्थ्यं । ततः किमित्यत आह—तदभिव्यक्तेः स्वतः प्रामाण्यमिति, तया औत्सर्गिक्या शक्त्यैव अभिव्यक्तेः—प्रामाण्यस्य प्रतीतेः स्वतः—गुणविशेषज्ञानाद्यनपेक्षमेव प्रामाण्यं—प्रामाण्यग्रहः इति तदर्थः । हेत्वन्तरं पूरयति—झटिति प्रवृत्तेश्चेति, गुणविशेषज्ञानादिकमनपेक्ष्यैव प्रवृत्तेरित्यर्थः । नन्वेवं लोकप्रसिद्धा प्रामाण्यपरीक्षार्थं परीक्षकाणां प्रवृत्तिरफला ? इत्याशङ्का-

বিশেষ, সুতরাং কার্য্যত্ব হেতু দ্বারা বেদের পৌরুষেয়ত্ব সাধন সঙ্গত হইতে পারে না ॥ ৫০ ॥

"কেহ বলেন, করণাদিগতগুণ হইতেই প্রমাণে প্রামাণ্যের উৎপত্তি হয়" সেই মত দূষিতেছেন—কেবল নিজশক্তিজ্ঞানজনক সামগ্রী হইতেই প্রমাণে প্রামাণ্যের উৎপত্তি হয়, অধিক কোনও গুণের অপেক্ষা নাই। যেহেতু জ্ঞানজনক সামগ্রীতে যে প্রামাণ্যবোধক স্বাভাবিক শক্তি আছে, তদ্দ্বারাই প্রামাণ্যের প্রতীতি হয় ও গুণবিশেষ জ্ঞানের অপেক্ষা না করিয়াই প্রবৃত্তি জন্মে, অতএব প্রামাণ্যজ্ঞানেও অন্য কোনও গুণজ্ঞানের অপেক্ষা নাই। যে স্থলে অপ্রামাণ্য শঙ্কানিবৃত্তির জন্য প্রামাণ্য জিজ্ঞাসার্থ প্রামাণ্যের অনুসন্ধান

बौद्धमतं दूषयति—

नासतः ख्यानं नृशृङ्गवत् ॥ ५२ ॥

इदं रजतमिति असदेव शुक्तिरजततादात्म्यं प्रतिभासते। तत् न, असतः अर्थक्रियाविरहात् ज्ञानजनकत्वानुपपत्तेः, यथा मनुष्यशृङ्गस्य ॥ ५२ ॥

प्राभाकरमतं दूषयति—

न, सतो बाधदर्शनात् ॥ ५३ ॥

इदं रजतम् इति 'इदम्' इति पुरोवर्त्तिविषयं, 'रजतम्' इति स्मरणम्। द्वे इमे संवित्ती। भेदाग्रहात् प्रवृत्तिः। न, अभीष्ट-

मपनयति—यतश्चेत्यादिना। अज्ञानिवृत्तये—बाधदर्शनादिजन्याप्रामाण्यशङ्काया निरासाय, प्रमाणा-नुसरणं—अप्रामाण्यग्राहकविघटकसामग्र्यन्वेषणम्। अत एवेति—प्रामाण्यस्य स्वतो ग्राह्यत्वादित्यर्थः, दोषस्यापीत्यपिशब्दः बाधज्ञानसमुच्चायकः। तथाच वेदस्यापि नाप्रामाण्यमिति भावः ॥ ५१ ॥

असत्ख्यातिवादिबौद्धमतस्य निराकरणायादौ तन्मतं दर्शयति—इदमित्यादिना। निरा-करोति—तन्नेत्यादिना। असत.—असत्तयाभिमतस्य शुक्तिरजततादात्म्यादेः। नृशृङ्ग-वदिति दृष्टान्तं विशदयति—यथा मनुष्यशृङ्गस्येति न ज्ञानमित्यर्थः ॥ ५२ ॥

अख्यातिवादिनः प्रभाकरस्य मतं दूषयितुमादावुपन्यस्यति—इदमित्यादिना। पुरोवर्त्ति-विषयमिति, दोषवशेन तद्गतशुक्तित्वसामान्यविशेषस्याग्रहणात् पुरोवर्त्तिद्रव्यमात्रविषयकं प्रत्यक्ष-

---

করা হয়, তাহাও কারণের দোষোৎসারণের জন্য গুণজ্ঞানাদির জন্য নহে। অতএব অপ্রামাণ্য ও অপ্রমাণ্য জ্ঞানেই জ্ঞানগ্রাহক সামগ্রীর অতিরিক্ত কারণের অপেক্ষা আছে, যেহেতু তাহাতে দোষও কারণ। ফলে বেদও অপ্রমাণ নহে ॥ ৫১ ॥

অসৎখ্যাতিবাদী বৌদ্ধগণের মত দূষিতেছেন—বৌদ্ধগণ বলেন, "ইদং রজতং" জ্ঞানে অলীক শুক্তি ও রজতের অভেদের ভান হইয়া থাকে। তাহা ঠিক নহে, কারণ অর্থক্রিয়াকারিত্বের অভাববশতঃ অসৎ পদার্থের জ্ঞান-জনকত্ব থাকিতে পারে না। যেমন "মনুষ্যশৃঙ্গরূপ" অলীক পদার্থের জ্ঞান-জনকত্ব নাই ॥ ৫২

ग्रहणात् प्रवृत्तिदर्शनात्, "नेदं रजतम्" इति बाधाच्च। न च सम्यग्ज्ञानस्य बाधोऽस्ति। तथा सति "अयं घटः" इति ज्ञाने जाते "नायं घटः" इति ज्ञानं स्यात्॥ ५२॥

मित्यर्थः। स्मरणमिति सदृशतया संस्कारोद्बोधक्रमेणोत्पन्नं गृहीतग्रहणस्वभावत्वेऽपि दोषवशाद्गृहीततांशमनोषित्वं ग्रहणमात्रं व्यवस्थितं स्मरणमित्यर्थः। फलितं दर्शयति—द्वे इमे संवित्ती इति, तथा चैतन्मते इदं रजतमित्यत्र न शुक्तिरजततादात्म्यावगाहित्वं, परन्तु रजतं इदमिति च अत्यनुभवरूपे द्वे एव विज्ञाने भवत इति स्थितम्। ननु यदि भिन्नज्ञानद्वयमेवानुमतं, तदा कथं तदानीं तत्र रजतार्थिनः प्रवृत्तिरित्यत आह—भेदाग्रहादिति, तद्वियोस्तद्विषययोश्च दोषवशाद्विवेकाग्रहणादित्यर्थः। तदेतन्मतं दूषयति—नेत्यादिना। अभेदग्रहणात्—इदन्तावच्छिन्ने रजतस्याभेदज्ञानात्, नहि तदभेदज्ञानं विना भेदाग्रहमात्रात् प्रवृत्तिर्भवितुमर्हति ग्रहणनिबन्धनस्यैव चेतनव्यवहारस्य इदं नेनाज्ञानमात्र पूर्वकत्वासम्भवादिति भावः। भेदाग्रहणमात्रं प्रवृत्तिं मा जनयतु, किन्तु ग्रहणस्मरणे एव मिथः स्वरूपतो विषयतश्चागृहीतभेदे प्रवृत्तिं जनयतामित्याशङ्कायां दोषान्तरमाह—नेदमित्यादिना, ननु भवतु बाधस्ततः किमित्यत आह—नचेति, तथा चैतन्मते भिन्नज्ञानद्वयस्य यथार्थतया नेदं रजतमिति बाधो न सम्भवतीति भावः। यथार्थज्ञानस्य बाधाङ्गीकारे प्रतिबन्धं दर्शयति—तथा सतीत्यादिना॥ ५२॥

অখ্যাতিবাদী প্রভাকরের মত দূষিতেছেন—"ইদং রজতং" এই স্থলে "ইদং" এইটি কেবল পুরোবর্ত্তী পদার্থবিষয়ক প্রত্যক্ষ ও "রজতং" এইটি কেবল রজতবিষয়ক স্মরণ, সুতরাং ঐস্থলে প্রত্যক্ষ ও স্মরণরূপ দুইটি জ্ঞানই জন্মিয়া থাকে। দোষবশতঃ সেই জ্ঞানদ্বয়ের ও তাহাদের বিষয়ের ভেদজ্ঞান না থাকাতেই সেই স্থলে শুক্তিতেও রজতপ্রার্থীর প্রবৃত্তি জন্মে"। ইহাই প্রভাকরের মত। বস্তুতঃ তাহা ঠিক নহে, কারণ অভেদজ্ঞান হইতেই প্রবৃত্তি হইতে দেখা যায় (ভেদাগ্রহ মাত্র হইতে দেখা যায় না) ও "নেদং রজতং" এই জ্ঞানদ্বারা বাধা হইতে দেখা যায়। যথার্থ জ্ঞানের কখনও বাধা হয় না। যথার্থ জ্ঞানেরও বাধ স্বীকার করিলে "এইটি ঘট" এই জ্ঞান জন্মিলে ও "এইটি ঘট নয়" এই জ্ঞান বাধক হইতে পারে। ফলে প্রভাকরের মতেও "ইদং রজতং" এইস্থলে প্রত্যক্ষ ও স্মরণরূপ দুইটি জ্ঞান স্বীকার করিলে সেই উভয় জ্ঞানেরই সত্যতানিবন্ধন বাধ হইতে পারে না, ইহাই দোষ হয়॥ ৫৩॥

वेदान्तिमतं दूषयति—

नानिर्वचनीयस्य, तदभावात् ॥५४॥

इदं रजतम् इति असत्त्वे अपरोक्षज्ञानाभावात् सत्त्वे बाधाभावात्, अतः सदसद्विलक्षणानिर्वचनीयत्वम्। तथा च—

न सत्त्वे बाधसंवित्तिर्न भानमसतोऽपि च।
न द्वयात्मत्वविरुद्धत्वादतस्तत्त्वान्तरं कुतः॥
मायामयत्वसिद्धौ तु प्रपञ्चस्य प्रमाणतः।
प्रत्यक्षादिप्रमाणानां प्रामाण्यं व्यावहारिकम्॥

अनिर्वचनीयख्यातिवादिनां वेदान्तिनां मतं दूषयितुमादौ दर्शयति—इदमित्यादिना। असत्त्वे—असत्यत्वे अपरोक्षज्ञानाभावात्—प्रत्यक्षासम्भवात्, सत्यत्वे—व्यावहारिकसत्ताशालित्वे बाधाभावात्—ब्रह्मसाक्षात्कारातिरिक्तज्ञानबाध्यत्वासम्भवात्, सदसद्विलक्षणानिर्वचनीयत्वमिति, सत् व्यावहारिकपारमार्थिकसत्त्ववत्, असत्—अत्यन्ततुच्छं तदतिरिक्तानिर्वचनीयत्वं प्रातिभासिकरजतादेरित्यर्थः। तथाच इदं रजतमित्यादौ रजतादेर्नापरोक्षज्ञानविषयत्वादत्यन्ततुच्छत्वं "नेदं रजत"मिति ज्ञानबाध्यत्वाच्च न व्यावहारिकपारमार्थिकत्वमिति तद्विलक्षणानिर्वचनीयत्वमिति वेदान्तिमतं पर्यवसितम्। एतन्मतसमर्थनाय पूर्वपक्षोत्तरभाविनोपनिबद्धान् प्राचीनश्लोकानुत्थापयितुमाह—तथा चेति। सत्त्वे—सत्यत्वे न बाधसंवित्तिः—संसारदशायामिव "नेदं रजत"मिति यथार्थबाधज्ञानं असतोऽपि अत्यन्ततुच्छस्यापि न भानं—न ज्ञानं, द्वयात्म्यं—सदसदुभयात्मकत्वं, विरुद्धत्वात्—सत्त्वासत्त्वयोर्विरुद्धधर्मत्वात्

অনির্ব্বচনীয় খ্যাতিবাদী বেদান্তির মত দূষিতেছেন—"ইদং রজতং" ইত্যাদি জ্ঞানের বিষয় অসত্য হইলে প্রত্যক্ষ হইতে পারে না, সত্য হইলেও "নেদং রজতং" ইত্যাদি জ্ঞানদ্বারা বাধ হইতে পারে না, অতএব সৎ ও অসৎ হইতে বিলক্ষণ অনির্ব্বচনীয়ই জ্ঞানের বিষয় বলিতে হইবে" ইহাই হইল বেদান্তির মত, প্রাচীনগণও পূর্ব্বপক্ষ ও উত্তর ভাবে ইহার সমর্থন করিয়াছেন, যথা—বস্তু সত্য হইলে সংসারদশাতেই "নেদং রজতং" ইত্যাদি যথার্থ বাধজ্ঞান হইতে পারে না, অথচ অসৎ পদার্থেরও জ্ঞান হইতে পারে না, সৎ ও অসৎ এই উভয় স্বরূপও হইতে পারে না, কারণ সত্ত্ব ও অসত্ত্ব এই দুইটি বিরুদ্ধ ধর্ম। অতএব অনির্ব্বচনীয়

अद्वैतागमवाक्यं तु तत्त्वावेदनलक्षणम्।
प्रमाणभावं भजते बाधवैधुर्य्यहेतुतः॥
तस्मान्मायामयत्वेऽपि युक्ता ब्रह्मणि मानता।
अद्वैतागमवाक्यानामिति तावद्‌व्यवस्थितिः॥

तन्न, इदं रजतम् इत्यनेनैव निर्वचनीयत्वात्, 'न सन्नासन्' इति अनिर्वचनीयत्वेन निर्वचनाच्च॥ ५४॥

अतः—एभ्यो हेतुभ्यः, तत्त्वान्तरं—अनिर्व्वचनीयं तत्त्वं, कुतः? कथं सम्भवतीति वेदान्तिनं प्रति पूर्व्वपक्षः। तत्समाधानमाह—मायेत्यादिना। प्रमाणतः—अनुमानादिप्रमाणेभ्यः, प्रपञ्चस्य—दृश्यमानस्य विश्वस्य मायामयत्वसंसिद्धौ—ब्रह्मसाक्षात्कारकालीनज्ञानाविषयत्वे निर्णीते प्रत्यक्षादिप्रमाणानां प्रामाण्यं व्यवहारिकं—सांसारिकव्यवहारसाधनीपयिं नतु पारमार्थिकमित्यर्थः। अथ तर्हि कस्य प्रामाण्यं पारमार्थिकमित्याकाङ्क्षायामाह—अद्वैतागमवाक्यन्त्विति, तत्त्वावेदनलक्षणं—पारमार्थिकतत्त्वप्रतिपादकं, "तत्त्वमसि श्वेतकेतो" इत्याद्यागमवाक्यं बाधवैधुर्य्यहेतुतः—कालत्रयेऽपि बाधाभाववशात् प्रमाणभावं—पारमार्थिकप्रामाण्यं भजते इत्यर्थः। उपसंहरति—तस्मादित्यादिना। मायामयत्वेऽपीति प्रपञ्चस्येत्यादिः। इति प्रपञ्चस्यानिर्व्वचनीयमायामयत्वं नानिर्व्वचनीयत्वं केवलब्रह्मणः पारमार्थिकत्वमित्येव, अद्वैतागमवाक्यानां व्यवस्थितिः व्यवस्थासिद्धान्त इति यावत्। एतन्मतं दूषयति—तन्नेत्यादिना। इदं रजतमिति ज्ञानस्य वाऽन्यथाऽनुपपत्त्या तेनावश्यं निर्व्वचनं "इदमनिर्व्वचनीय"मित्यनेनापि अनिर्व्वचनीयत्वेन निर्व्वचनं भवतीति नानिर्व्वचनीयत्ववादो युक्तिमत्त इति भावः॥ ५४॥

তত্ত্বান্তর হয় কিরূপে? উত্তর—অনুমানাদি প্রমাণদ্বারা এই বিশ্বপ্রপঞ্চের মায়াময়ত্ব সিদ্ধি হইলে প্রমাণের প্রামাণ্যও ব্যবহারিক বলিতে হইবে। তত্ত্বাবেদক অদ্বৈতসমর্থক বেদবাক্যই বাধাভাববশতঃ প্রমাণ। অতএব প্রপঞ্চের অনির্ব্বচনীয় মায়াময়ত্ব হইলেও ব্রহ্মের প্রামাণ্য যুক্তিসিদ্ধ। ফলে প্রপঞ্চের অনির্ব্বচনীয়তা ও ব্রহ্মের পারমার্থিকতা ইহাই অদ্বৈত বাক্যের সিদ্ধান্ত। এই বেদান্তিসিদ্ধান্তও ঠিক নহে, কারণ 'ইদং রজতম্' ইত্যাদি দ্বারাই নির্ব্বচনীয় বলিতে হইবে। "নসন্নাসন্" ইত্যাদি বাক্যদ্বারা অনির্ব্বচ-

न्यायमतं दूषयति—

नान्यथाख्यातिः, स्ववचोव्याघातात् ॥ ५५ ॥

इदं रजतम् इति शुक्तिः एव रजतात्मना अवभासते इति। न। अन्यत् अन्यात्मना अवभासते इति संविद्विरुद्धम् ॥ ५५ ॥

आरोपितरजतमेव तत्रावभासते इति स्वमतमाह—

सदसत्ख्यातिर्बाधाबाधात् ॥ ५६ ॥

इदं रजतम् इति पुरोवर्त्तिविषयतया सत्, अबाधनात्। रजत-विषयतया तु असत्, बाधात्। तस्मात् सदसती तत्त्वम् ॥ ५६ ॥

अन्यथाख्यातिवादिनो मतमादावुत्थापयति—इदमित्यादिना। सूत्रे स्ववचो व्याघातादिति, "अन्यथाख्याति"रिति वचस एवासिद्धेरित्यर्थः, तथाहि अन्यतान्यात्मकत्वस्य शशविषाणतुल्यत्व-मन्यथाशब्दे नोच्यते, तस्य च ज्ञानं ख्यातिशब्देनेति तद्वच एव व्याहतम्, असतो भानासम्भवस्या-न्यथाख्यातिवादिभिरप्युक्तत्वात्। इममेवार्थं मनसि निधाय वृत्तिकारो दूषयति—नेत्यादिना। सम्विद्विरुद्धमिति, तत्र तदसत्त्वे अन्यत्र तत्सत्तायाः तत्र तज्ज्ञानाप्रयोजकत्वादिति भावः ॥५५ ॥

ख्यातिविषये परमतनिरासकसूत्राणि व्याख्याय स्वमतप्रदर्शनपरं सूत्रमवतारयति—आरोपितेत्यादिना। सूत्रार्थं विवृणोति—इदमित्यादिना। बाधादिति नेदं रजतमिति निषेध-बुद्धिविषयत्वादित्यर्थः। उपसंहरति—तस्मादित्यादिना, तथाच सदसत्ख्यातिरेव सांख्य-सिद्धान्त इति स्थितम्। नच सत्त्वासत्त्वयोर्व्विरोध इति च वचनीयं प्रकारभेदेनाविरुद्धत्वात्। यथाहि लौहित्यं बिम्बरूपेण सदपि स्फटिकादिगतप्रतिबिम्बरूपेणासदिति दृश्यते। एवं यथा घटादिः प्रकटाद्यवस्थाभिः सम्प्रत्यङ्कुराद्यवस्थाभिरसन् भवति, तथैवावस्थाभेदेनापि प्रकृत्यादीनां

নীয়স্বরূপেও নির্ব্বাচিত হইয়াছে, কেন না "ইহা অনির্ব্বচনীয়" এই কথা বলিলেও অনির্ব্বচনীয় বলিয়া নির্ব্বাচিত হইল ইহা অবশ্য স্বীকার্য্য ॥৫৪॥

অন্যথাখ্যাতিবাদী নৈয়ায়িকের মত দূষিতেছেন—তাঁহারা বলেন, "ইদং রজতং" এই স্থলে শুক্তিই রজতরূপে জ্ঞানের বিষয় হয়। ইহাও ঠিক নহে, কারণ অন্য বস্তু অন্যরূপে জ্ঞানের বিষয় হয়, ইহা অনুভববিরুদ্ধ ॥ ৫৫ ॥

আরোপিত রজতই ঐস্থলে জ্ঞানের বিষয় হয়, এই স্বমত বলিতেছেন—"ইদং রজতং"এই স্থলে ইদং পদের অর্থ পুরোবর্ত্তী বিষয়ত্ব পুরস্কারে সৎ,কারণ,

स्फोटं निराकरोति—

प्रतीत्यप्रतीतिभ्यां न स्फोटात्मकः शब्दः ॥ ५७ ॥

प्रतीतिः वर्णेषु, अप्रतीतिः स्फोटे। तस्मात् न स्फोटात्मकः शब्दः। यदि वर्णाः किञ्चिदपि न प्रतिपादयन्ति, स्फोटप्रतिपादनमपि कुतः? अथ प्रतिपादयन्ति, किमन्तर्गडुना स्फोटेन, वर्णाः एव प्रतिपादकाः सन्तु। नानात्वादपि न स्फोटसिद्धिः ॥ ५७ ॥

सर्व्वेषामेव सदसदात्मकत्वमविरुद्धमिति मन्तव्यम्। उक्तञ्च—अव्यक्तं कारणं यत्तन्नित्यं सदसदात्मकम्। प्रधानं प्रकृतिश्चेति यदाहुस्तत्त्वचिन्तकाः। इत्यन्यत्र विस्तरः॥ ५६ ॥

अथ वाक्यघटकवर्णाः प्रत्येकं वाक्यार्थमभिदधीरन् मिलिता वा? न तावत् प्रत्येकं एकवर्णोच्चारणानन्तरमर्थप्रत्ययादर्शनात् वर्णान्तरोच्चारणानर्थक्यप्रसङ्गाच्च, नापि मिलिताः प्रतिक्षणमपवर्गित्वेनैकवक्तृप्रयुक्तानां वर्णानां मिथः साहित्यासम्भवात्, नापि प्रत्येकसमुदायाभ्यामन्यः प्रकारः सम्भवतीति वर्णानामर्थप्रत्यायकत्वासम्भवात् कम्बुग्रीवाद्यवयवेभ्योऽतिरिक्तो घटाद्यवयवीव प्रत्येकवर्णेभ्योऽतिरिक्तः घट इत्याद्यखण्डैकपदात्मकः स्फोटः योगैरभ्युपगम्यते, अर्थस्फुटीकरणाच्च स्फोट इत्युच्यते इति तन्मतनिराकरणपरं सूत्रमवतारयितुमाह—स्फोटं निराकरोतीति। सूत्रार्थं विवृणोति—प्रतीतिरित्यादिना। विषयत्वं सप्तम्यर्थः तथाहि "घट" इत्याद्युक्ते घकाराकारटकाराकारादिविषयिण्या एव प्रतीतेः सर्व्वसिद्धत्वात् स्फोटविषयिण्याश्च प्रतीतेः कस्याप्यभावात् निष्प्रमाणकः स्फोटात्मकः शब्द इति भावः। ननु पूर्व्वोक्तयुक्त्या वर्णानामर्थप्रत्यायकत्वा-

---

তদ্রূপে তাহার বাধ হয় না। রজতবিষয়ত্ব পুরস্কারে অসৎ, কারণ তদ্রূপে বাধ হয়, অতএব সদসৎই তত্ত্ব, অর্থাৎ সদসৎখ্যাতিই সাংখ্যসিদ্ধান্ত ॥ ৫৬ ॥

শব্দের ঘটক প্রত্যেক বর্ণের বাক্যার্থপ্রতিপাদনের সামর্থ্য নাই, কারণ একবর্ণের উচ্চারণমাত্রে অর্থ প্রতীতি হয় না, তাহা হইলে অন্যবর্ণের উচ্চারণও ব্যর্থ হয়। সকল বর্ণ মিলিত হইয়াও অর্থ প্রতিপাদন করিতে পারে না, কারণ বর্ণের ক্ষণবিনাশিত্ব নিবন্ধন সাহিত্য অসম্ভব। অথচ প্রত্যেকও সমুদায় ভিন্ন অন্য কোন প্রকারেরও সম্ভব হইতে পারে না, অতএব বর্ণের অর্থ প্রতিপাদনসামর্থ্য না থাকায় পাতঞ্জল মুনি কম্বুগ্রীবাদি অবয়ব হইতে অতিরিক্ত ঘটাত্মক অবয়বীর ন্যায় প্রত্যেক বর্ণ হইতে অতিরিক্ত "ঘট" ইত্যাদি অখণ্ডপদাত্মক অর্থের প্রতিপাদক স্ফোটনামক শব্দ স্বীকার করেন—সেই

प्रत्यक्षबाधात् वेदस्यानित्यत्वमुक्तम्। वर्णानामनित्यत्वं प्रति-पादयति---

न शब्दनित्यत्वं कार्य्यताप्रतीतेः ॥ ५८ ॥

प्रत्यक्षादिः शब्दश्रवणानन्तरं नास्ति इति प्रतीतेः। अन्यथा घटस्यापि नित्यत्वं स्यात् ॥ ५८ ॥

सम्भवात् स्फोटानङ्गीकारे कथमर्थप्रतीतिरिति शङ्कामपनयति—यदीत्यादिना। ननु वर्णाः स्फोटो माभ्युपेयताम्, स्फोटकल्पनापि न क्रियताम्, तथाप्युक्तयुक्त्या वर्णार्थप्रतिपादनासम्भवात् कथमर्थप्रतिपादनमिति प्रश्नादुत्तरम् इति चेन्न आनुपूर्व्वीविशेषवत् पूर्व्वपूर्व्ववर्णानुभवजनित-संस्कारसहितान्त्यवर्णेनार्थप्रतीतिसम्भवात्। अथवा तावद्वर्णा एव गृहीतार्थविशेषसम्बन्धाः स्वव्यवहारेऽप्यक्रमेणोच्चारणानन्तरं समस्तप्रत्यवमर्शिन्या बुद्धौ तादृशा एव प्रत्यवभासमानास्तन्त-मर्थमव्यभिचारेण भासयन्ति, ततः स्फोटस्य स्फोटेन वार्थस्याधिगम इति कल्पनेच गौरवं परम-वशिष्यत इति विभावनीयम्। दोषान्तरमाह—नानात्वादिति, समानुपूर्व्वीमद्वर्णानामपि प्रत्यु-च्चारणं भिन्नत्वेन प्रतिनियतानुपूर्व्वीमद्वर्णव्यञ्जनस्फोटकल्पनापत्तेरित्यर्थः। नचैवं घट इत्येकोऽयं शब्द इति बुद्धिः कथमुपपद्यत इति वाच्यं, वनसेनादिबुद्धिवत्तद्बुद्ध्युपपत्तेः वर्णेष्वेकार्थावच्छेद-निबन्धनौपचारिकत्वादित्यलं विस्तरः ॥ ५७ ॥

সংক্ষেপে বুঝা যাইতেছে—শব্দোচ্চারণ করিলে বর্ণাবয়বকই প্রতীতি হয়, স্ফোট-বিষয়ক প্রতীতি হয় না, অতএব স্ফোটাত্মক অতিরিক্ত শব্দ নাই। যদি বর্ণ-সকল কোন অর্থই প্রতিপাদন করিতে না পারে, তবে স্ফোটই প্রতিপাদিত হইবে কি প্রকারে? যদি স্ফোট প্রতিপাদন করিতে পারে, তবে বর্ণ স্ফোটাত্মক শব্দ প্রতিপাদন করে ও সেই স্ফোটাত্মক শব্দ অর্থ প্রতিপাদন করে, এইরূপ গুরুতর কল্পনা না করিয়া বর্ণ অর্থ প্রতিপাদন করে, এই কল্পনাই সঙ্গত। বর্ণ অর্থের প্রতিপাদন করে কি প্রকারে? এই প্রশ্নের উত্তরে বক্তব্য এই যে, পূর্ব্ব পূর্ব্ব বর্ণের স্মৃতি সহকারে অন্তিম বর্ণ দ্বারাই অর্থের প্রতিপাদন হইতে পারে, কারণ তাহা হইলে সেই স্মৃতির জনক সংস্কার সম্পাদন আবশ্যক বলিয়াই অন্য বর্ণের উচ্চারণ ব্যর্থ হয় না। সমানানুপূর্ব্বীমৎ বর্ণসকলও প্রতি উচ্চারণ ভেদে ভিন্ন, অতএব একবিধ আনুপূর্ব্বীমদ্ বর্ণ হইতেও উচ্চারণ-ভেদে অনন্ত স্ফোট কল্পনা করিতে হয়, অতএব এই গৌরববশতঃই অতিরিক্ত স্ফোটের সিদ্ধি হয় না ॥ ৫৭ ॥

प्रकृतिपुरुषादन्यत् सर्वं कार्य्यमिति प्रतिपादनार्थं शङ्कते—

पूर्वसिद्धसत्त्वस्याभिव्यक्तिर्दीपेनेव घटस्य ॥ ५९ ॥

यथा अन्धकारस्थो घटः दीपेनाभिव्यज्यते, तथा वर्णाः ध्वनिभिः व्यज्यन्ते। तदभावात् न सन्ति इति प्रतिभानं, न तु असत्त्वात् ॥ ५९ ॥

सूत्रान्तरमवतारयति—प्रत्यक्षबाधादित्यादिना । सूत्रे कार्य्यताप्रतीतेरिति उत्पन्नः ककार इत्यादिजन्यताबुद्धेरित्यर्थः । इदमुपलक्षणं विनष्टः ककार इति विनष्टत्वप्रतीतेरित्यपि बोध्यम् । एतदभिप्रायेणैव वृत्तिकारो व्याचष्टे—प्रत्यक्षादेरित्यादिना । प्रत्यक्षादेः—प्रत्यक्षप्रमाणतः श्रवणेन्द्रियादिति यावत् । अन्यथा—नास्तीत्यादिप्रतीतिविषयस्यापि नित्यत्वे । न च सोऽयं ककार इत्यादि प्रत्यभिज्ञावशादेव वर्णानां नित्यत्वं सेत्स्यतीति वाच्यं, तत्प्रत्यभिज्ञायाः साजात्यावलम्बनकत्वस्योक्तत्वादिति ध्येयम् ॥ ५८ ॥

अथ पूर्व्वपक्षसूत्रमवतारयति—प्रकृतीत्यादिना । दृष्टान्तं विशदयन् सूत्रतात्पर्य्यं स्पष्टयति—यथेत्यादिना । तथाचाभिव्यक्तिरेवोत्पत्तिप्रतीतेर्व्विषयः तदभिव्यक्त्यभावस्तु नास्तीति प्रतीतेर्व्विषय इति न तत्प्रतीतिभ्यां शब्दानामनित्यत्वं साधनीयमिति पूर्व्वपक्षाशयः ॥ ५९ ॥

বর্ণের অনিত্যত্বপ্রত্যক্ষের বাধ হয় বলিয়া বর্ণাত্মক বেদের অনিত্যতা বলিয়াছেন, অতএব বর্ণের অনিত্যতা প্রতিপাদন করিতেছেন—শ্রবণেন্দ্রিয় দ্বারা শব্দ শ্রবণানন্তর ককার উৎপন্ন ককার নাই ইত্যাদি প্রতীতি হয় বলিয়াই বর্ণ নিত্য নহে। তাদৃশ প্রতীতি সত্বেও নিত্যতা স্বীকার করিলে ঘটাদিরও নিত্যত্ব হইতে পারে ॥ ৫৮ ॥

এই স্থলে শব্দ নিত্যতাবাদিগণ যদি বলেন যে, অন্ধকারস্থিত ঘট যেমন দীপদ্বারা অভিব্যক্ত হয়, সেইরূপ বর্ণও ধ্বনিদ্বারা অভিব্যক্ত হয় এবং সেই অভিব্যক্তির অভাব বশতঃই নাই বলিয়া প্রতীতি হয়, অসত্বনিবন্ধন নহে, অর্থাৎ অভিব্যক্তিই উৎপত্তিপ্রতীতির বিষয় ও অভিব্যক্তির অভাবই নাই এই প্রতীতির বিষয়, বস্তুতঃ বর্ণের তদতিরিক্ত উৎপত্তি বা বিনাশ নাই।

তদুত্তরে বক্তব্য এই যে, অভিব্যক্তি অবলম্বনে বর্ণের নিত্যত্ব প্রতিপাদন

समाधानमाह—

सत्कार्य्यसिद्धान्तश्चेत् सिद्धसाधनम् ॥ ६० ॥

अभिव्यक्तिमाश्रित्य नित्यत्वमुच्यते, ततः सत्कार्य्यसिद्धान्तः चेत्, सिद्धसाधनम् ॥ ६० ॥

एक एवात्मा । तथा च “सितनीलादिभेदेन यथैकं दृश्यते नभः । भ्रान्तदृष्टिभिरेवात्मा तथैकः सन् पृथक् पृथक्” ॥ इति, तन्निराकरोति—

नाद्वैतमात्मनः, लिङ्गात्तद्भेदप्रतीतेः ॥ ६१ ॥

जरामरणादिलिङ्गनियमात् । पूर्वं सिद्धवत् उक्तम्, इदानीं साध्यते इति अपौनरुक्त्यम् ॥ ६१ ॥

समाधानमिति, पूर्व्वसूत्रोक्तपूर्व्वपक्षस्योत्तरमित्यर्थः । सूत्रतात्पर्य्यं विवृणोति—अभिव्यक्तिमित्यादिना । सिद्धसाधनमिति सत्कार्य्यवादिसांख्यमते तत्त्वमात्रस्यैव तादृशनित्यत्वेन शब्दस्यापि तादृशनित्यत्वस्य इष्टत्वात् सिद्धसाधनमित्यर्थः ॥ ६० ॥

एकात्मवादनिराकरणपरं सूत्रमवतारयितुं प्रथममेकात्मवादं दर्शयति—एक एवेत्यादिना । यथा एकं नभः आरोपितेन पार्थिवादिसितनीलादिरूपभेदेन भ्रान्तदृष्टिभिः पृथक् पृथक् प्रतीयते, तथैवात्मा एकः सन्नपि अन्तःकरणाद्युपाधिभेदेन प्रति देहं पृथक् पृथगिव प्रतीयत इति श्लोकार्थः । जरामरणादिलिङ्गनियमादिति, आत्मन एकत्वे तु एकस्य जरामरणादिभिः सर्व्वेषां जरामरणादि-

করিলে ফলে সৎকার্য্যসিদ্ধান্তই স্বীকার করিতে হয়, তাহা হইলে সিদ্ধসাধন দোষ হয়। কারণ সৎকার্য্যবাদী সাংখ্যমতে তাদৃশ নিত্যত্ব বস্তুমাত্রেরই স্বীকার্য্য, সুতরাং শব্দেও তাদৃশ নিত্যত্ব স্বীকৃত বিধায় সাধনের কোন ও প্রয়োজন নাই ॥ ৫৯—৬০ ॥

কেহ কেহ বলেন আত্মা এক. যেরূপ আকাশ এক হইয়াও আরোপিত পৃথিবীর শ্বেতকৃষ্ণাদিরূপ ভেদে ভ্রান্ত দৃষ্টি কর্ত্তৃক পৃথক্ পৃথক্ বলিয়া প্রতীয়মান হয়,সেইরূপ আত্মাও এক হইয়া অন্তঃকরণাদি উপাধিভেদে প্রতি দেহে পৃথক্ পৃথক্ বলিয়া প্রতীয়মান হয়, বস্তুতঃ আত্মা নানা নহে । এই মতের নিরাস করিতেছেন—আত্মা এক নহে, কারণ আত্মা এক হইলে জরামরণা-

मा भूत् सजातीयाद्वैतम्, "अनात्मानो भविष्यन्ति घटादयस्त्वात्मरूपाः" इति विजातीयाद्वैतं भविष्यति इत्यत्राह—

नानात्मनापि, प्रत्यक्षबाधात् ॥ ६२ ॥

न अनात्मना घटादिना आत्मनः एकत्वं, घटादीनां बाह्यत्वेन भेददर्शनात्। एकत्वे घटादीनाम् आत्मत्वम्, आत्मनश्च परिणामित्वम् इति ॥ ६२ ॥

सजातीयविजातीयाद्वैतं भविष्यति इत्यत्राह—

नोभाभ्यां, तेनैव ॥ ६३ ॥

अबाधितप्रत्ययेनैव, भेददर्शनात् ॥ ६३ ॥

।सर्वं न कस्यचिदेव जरामरणादिकं कस्यचिन्नेति नियमो नोपपद्यत इत्यर्थः। "जन्मादि-व्यवस्थातः पुरुषबहुत्व"मिति प्रथमाध्यायसूत्रे च पौनरुक्त्यमपाकर्त्तुमाह—पूर्व्वमिति ॥ ६१ ॥

सूत्रान्तरमवतारयति—माभूत्यादिना। सूत्रार्थं विवृणोति—नेत्यादिना। दोषान्तरमाह—एकत्व इत्यादिना, आत्मत्वं—चेतनत्वं, परिणामित्वं जड़त्वं, तथाच तन्मते सर्व्वानुभवसिद्धा विश्वप्रभेदव्यवस्थापि विलुप्येतेति भावः ॥ ६२ ॥

सूत्रान्तरमवतारयति—सजातीयेत्यादिना। उभाभ्यां—आत्मानात्मभ्यां नाद्वैतमिति सूत्रार्थः। तत्र हेतुप्रतिपादकं तेनैवेतिपदं व्याचष्टे अबाधितप्रत्ययेनैवेति, "अहं सुखी" "अहं दुःखी" "अयं घटः" "अयं पटः" इत्याद्यबाधितभेदबोधकप्रत्ययेनेत्यर्थः। अबाधितत्वे हेतुं दर्शयति—भेददर्शनादिति ॥ ६३ ॥

দির ব্যবস্থা হয় না। অর্থাৎ কেহ ব্যাধিগ্রস্ত নহে, কেহ মরিতেছে, কেহ জন্মিতেছে—এইরূপ হইতে পারে না। "জন্মাদিব্যবস্থাতঃ পুরুষবহুত্বং" এই প্রথমাধ্যায়সূত্রে সিদ্ধরূপে আত্মার বহুত্ব বলা হইয়াছে—এই সূত্রে সাধ্যরূপে বলা হইল, সুতরাং পুনরুক্ততা দোষ হইল না ॥ ৬১ ॥

পূর্ব্বোক্ত সজাতীয়দ্বৈতবাদ হইলেও অনাত্ম ঘটাদি সমস্ত পদার্থই আত্মস্বরূপ, এই বিজাতীয়াদ্বৈতবাদ অর্থাৎ আত্মা নানা হইলেও দৃশ্যমান ঘটপটাদি সমস্তই আত্মস্বরূপ এই সিদ্ধান্ত হইবে, এই আশঙ্কায় বলিতেছেন—"অনাত্ম ঘটাদির সহিত আত্মার একত্ব হইতে পারে না, কারণ বাহ্যরূপে ভিন্ন বলিয়া ঘটাদির প্রত্যক্ষ হয়। এবং একত্বস্বীকার করিলে ঘটাদির আত্মত্ব অর্থাৎ চেতনত্ব ও আত্মার পরিণামিত্ব হইতে পারে ॥ ৬২ ॥

एवम् अद्वैतश्रुतिविरोधः इत्यत्र आह—

अन्यपरत्वमविवेकानां तत्र ॥ ६४ ॥

अन्धानां तच्छ्रुतिः अन्यपरत्वं—सामान्यपरत्वम् ॥ ६४ ॥

एकात्मवादिनां जगदुपादानकारणमपि नास्तीत्याह—

नात्माविद्या नोभयं जगदुपादानकारणं निःसङ्गत्वात् ॥ ६५ ॥

कूटस्थत्वात् न आत्मा कारणम्। अविद्यायाः असत्यत्वात् न कारणत्वम्। सत्यत्वे अद्वैतहानिः। सम्बन्धाभावात् न उभयं कारणम् ॥ ६५ ॥

एवमिति—आत्मनो नानात्वे घटपटादिस्वरूपत्वाभावे चेत्यर्थः, अद्वैतश्रुतिविरोधः—"आत्मैवेदं सर्व्वं" "ब्रह्मैवेदं सर्व्व"मित्यादि श्रुतिविरोधः। अन्धानामिति अविवेकिनामित्यस्य विवरणम्, ये सन्तमनन्तं भेदं पश्यन्तोऽपि श्रुतीनामद्वैतपरत्वे श्रद्दधीरन्, ते अन्धा इति भावः। तच्छ्रुतिः—आत्मैवेदं सर्व्वमित्यादिश्रुतेः, सामान्यपरत्वं—आत्मनः सामान्यभेदबोधकत्वं अनुमन्तामिति शेषः, न तु विवेकिनामिति भावः। विवेकिनस्तु प्रत्यक्षबाधितेभ्यो श्रुतीनामुपासनादिप्ररोचकात्मप्रशंसापरत्वमवधारयन्तीति स्थितम् ॥ ६४ ॥

सूत्रान्तरमवतारयति—एकेत्यादिना। सूत्रार्थं विवृण्वन् कूटस्थत्वादिति, अपरिणामि

বাহ্য বস্তু মাত্রই যে আত্মা হইতে ভিন্ন ইহা প্রত্যক্ষসিদ্ধ, "আমি সুখী" "তুমি দুঃখী" "এইটি ঘট" "এইটি পট" ইত্যাদি জ্ঞানও অবাধিত, সুতরাং এই সকল অবাধিত প্রত্যয় বলেই সজাতীয় বিজাতীয়াদ্বৈতবাদও ঠিক নহে ॥ ৬৩ ॥

আত্মা যদি নানা হয় ও দৃশ্যমান বস্তুসকলও যদি আত্মা হইতে ভিন্ন হয়, তবে "আত্মৈবেদং সর্ব্বং" "ব্রহ্মৈবেদং সর্ব্বমিত্যা"দি শ্রুতির সহিত বিরোধ হইয়া পড়ে, এই আশঙ্কায় বলিতেছেন—মূঢ় ব্যক্তিরাই এই শ্রুতি অনুসারে আত্মার জগৎস্বরূপত্ব স্বীকার করে। বস্তুতঃ প্রত্যক্ষবাধবশতঃ ঐ সকল শ্রুতির উপাসনাদি প্ররোচক আত্মপ্রশংসাপরত্বই বিবেকিগণের অভিপ্রেত ॥ ৬৪ ॥

একাত্মবাদীর মতে জগতের উপাদান কারণও সিদ্ধ হয় না, কারণ

चिदानन्दस्वरूप आत्मा इत्यत्राह—

नैकस्यानन्दचिद्रूपत्वे द्वयोर्भेदात् ॥ ६६ ॥

आनन्दः—सुखम्। चित्—ज्ञानम्। आनन्दचिद्रूपत्वे द्वैतत्वापत्तिः। न च 'आनन्दो न विषयजं सुखं, चितिर्वा वृत्तिज्ञानं, किन्त्वन्यदेवालौकिकम्' इति वाच्यं, अलौकिकत्वेनाप्रामाणिकत्वात्। प्रामाणिकत्वे प्रमाणसत्त्वेनैव द्वैतत्वम्। किञ्च, आत्मनः आनन्दरूपत्वं आनन्दधर्म्मत्वं वा। आनन्दधर्म्मत्वे द्वैतत्वापत्तिः,

नित्यत्वादित्यर्थः। सत्यत्व इति अविद्याया इत्यादिः। सम्बन्धाभावादिति मिथ्यात्वादित्यस्य विवरणम्, सदसतोः सम्बन्धानुपपत्तेरिति तदर्थः, उभयं—अविद्योपहितं ब्रह्म, कारणं—जगदुपादानकारणं भवितुमर्हतीत्यर्थः ॥ ६५ ॥

सूत्रान्तरमवतारयति—चिदित्यादिना। सूत्रोक्तं चिदानन्दयोर्भेदं दर्शयितुं व्याचष्टे—आनन्दः सुखं चित् ज्ञानमिति। तयोश्च ज्ञानसुखयोर्भेदः सर्व्वानुभवसिद्ध इति भावः। ननु भवतु भेदस्तथापि तदुभयस्वरूपत्वमेवात्मनोऽस्तु? इत्यतो दोषं दर्शयति—आनन्देत्यादिना। शङ्कते—नचेति, तथा चालौकिकत्वेन नोभयोर्भिन्नत्वमित्याशयः। दोषान्तरं दर्शयितुमाह—किञ्चेति। अविद्यातिरोधानात्—अविद्यया प्रावरणात् नानुभूयत इत्यर्थः। अमूर्त्तत्वात्—अद्रव्यत्वात्, कुड्यादिद्रव्याणामेव घटादिप्रावरकत्वं दृश्यते, तद्धर्म्मायाश्चाविद्यायाः प्रावरकत्वं सम्भवतीति भावः। अविद्यया तिरोधानमुपपादयितुं तिरोधानशब्दस्यार्थान्तरं शङ्कते—अथेति,

---

অপরিণামি নিত্যত্বনিবন্ধন আত্মা কারণ হইতে পারে না, মিথ্যাত্ববশতঃ অবিদ্যাও কারণ হইতে পারে না। অবিদ্যাকে সত্য স্বীকার করিলে অদ্বৈত বাদের হানি হয়। সত্য ও মিথ্যার সম্বন্ধ থাকে না বলিয়া অবিদ্যোপহিত আত্মাও কারণ হইতে পারে না ॥ ৬৫ ॥

এক আত্মার আনন্দ ও চিৎস্বরূপত্ব হইতে পারে না, কারণ আনন্দ—সুখ ও চিৎ-জ্ঞান, সুতরাং ভিন্ন। পরন্তু উভয়স্বরূপ স্বীকার করিলে দ্বৈতত্বের আপত্তি হয়। "আনন্দ বিষয়জন্য সুখ নহে, চিৎও বৃত্তিজ্ঞান নহে, কিন্তু তাহারা অন্য কোনও অলৌকিক পদার্থ" (সুতরাং আনন্দ ও চিৎ ভিন্ন নহে) এই কথাও বলা যাইতে পারে না, কারণ তাহাদের অলৌকিকত্বে কোনও প্রমাণ নাই,

निर्गुणत्वादिश्रुतिविरोधश्च। आनन्दरूपत्वे संसारावस्थायां कथम् आनन्दः न अनुभूयते। अविद्यातिरोधानादिति चेत्, अमूर्त्तत्वात् अविद्यायाः न तया कुड्यवत् तिरोधानसम्भवः। अथ अभिभवः तिरोधानशब्दार्थः। नित्यस्य विभुनः न अभिभवः। अविद्यायाः मिथ्यात्वात् आत्मनः सत्यत्वात् नानयोः सम्बन्धः, वस्त्ववस्तुनोः सम्बन्धाभावात्, सम्बन्धे वा निःसङ्गादिश्रुतिविरोधः। आनन्दानुभवे च कर्मकर्तृविरोधः। किञ्च आनन्दात्मत्वे किं प्रमाणम्? किं प्रमाणानुसरणेन स्वयमेव प्रमाणरूपत्वादात्मन इति चेत्, तन् न, प्रमाणव्यवस्थार्थं प्रमेयस्वीकारात्। प्रमेयाभावात् किं प्रमाणेन परिच्छेत्तव्यम्? प्रमित्यप्रधानाभावाच्च प्रमाणत्वमेव नास्ति। चिद्रूपत्वं च

अभिभवः—अन्यथापरिणतिः, नित्यस्य—अपरिणामिनित्यस्य। सम्बन्धासम्भवेनाविद्यायाः तिरोधानादुत्पादसामर्थ्यमपि नास्ती। आवेदयितुं सम्बन्धासम्भवं दर्शयति—अविद्याया इत्यादिना। तुष्यतु दुर्जन इति न्यायेनाह—सम्बन्धे वेति। आत्मन आनन्दस्वरूपत्वे दोषान्तरं दर्शयति—आनन्दानुभवे चेति, कर्मकर्तृविरोधः—स्वस्मिन्नेव स्वकर्मकानुभवकर्तृत्वाङ्गीकारप्रसङ्गः। आपाद्येत इति शेषः। आत्मन आनन्दरूपत्वे प्रमाणभूतस्यात्मन एव प्रमाणत्वं सम्भवतीति नास्ति प्रमाणान्तरापेक्षेति प्रतिवादी समाचष्ट किं प्रमाणान्तरेत्यादिना। दूषयति—तन्नेति, प्रमाणव्यवस्थार्थं प्रमेयस्वीकारादिति प्रमेयभेदस्वीकाराधीनत्वात् प्रमाणव्यवस्थाया इत्यर्थः। परिच्छेत्तव्यं—स्वजन्यप्रमितिविषयीकर्त्तव्यम्, तथाच प्रमेयाभावे प्रमाणव्यवस्थायाः प्रयोजनमेव न सिध्येदिति भावः।

যদি প্রমাণ থাকে, তবে পুনরায় সেই দ্বৈতত্বাপত্তি হয়। আরও দোষ এই যে, তাহাদের মতে আত্মা আনন্দস্বরূপ, অথবা আনন্দ আত্মার ধর্ম্ম? যদি আনন্দ আত্মার ধর্ম্ম হয়, তবে দ্বৈতত্বাপত্তিও নির্গুণত্বাদি শ্রুতিবিরোধ হয়। আনন্দস্বরূপ স্বীকার করিলে বক্তব্য এই যে, সংসার দশাতে আনন্দরূপে অনুভূত হয় না কেন? অবিদ্যার আবরণবশতঃ অনুভূত হয় না, ইহাও বলা চলে না, কারণ —অবিদ্যার অমূর্ত্তত্বনিবন্ধন কুড্যাদির ন্যায় তদ্বারা তিরোধানের অসম্ভব। তিরোধান শব্দের অর্থ এস্থলে অভিভব বলিলেও ফল নাই, কারণ নিত্য এবং বিভুর অভিভবও অসম্ভব। পরন্তু অবিদ্যা মিথ্যা এবং আত্মা সত্য, সুতরাং উভয়ের সম্বন্ধও হইতে পারে না, কারণ বস্তু ও অবস্তুর সম্বন্ধ নাই, সম্বন্ধ

न आनन्दरूपत्वं, द्वयोर्भेदात्। तयोरलौकिकत्वेन अभेदसिद्धिरित्यपि न, अलौकिकत्वादेव व्याप्तिग्रहणाभावात्। ततो नात्मनो द्विरूपत्वम् इति। यदि च मुक्तावानन्दो नानुभूयते, किं तेन? अनुभूयते चेत्, अनुभवितरनुभवानुभवनीयाः वाच्याः। यथा च यावद्देहभावित्वेन आत्मसाक्षात्कारादपि समाधिरित्युच्यते, देहपातानन्तरमात्मनः स्थितिरिति क्व समाधिः? तथा च 'समाधौ सकलदुःखनिवृत्तेः आनन्दलाभः' इति अभिमन्यते। देहाभावात् समाधिनाशे क्व आनन्दानुभवः। एवं च मुक्तौ आनन्दानुभवो भ्रान्त इति॥ ६६॥

दोषान्तरं दर्शयितुमाह—प्रमित्युपधानाभावादिति, प्रमितिविशेषासाधारणकारणत्वाभावादित्यर्थः। सूत्रार्थमुपसंहर्त्तुमुक्तप्रायमप्यर्थं पुनरभिधत्ते—चिद्रूपत्वञ्चेत्यादिना। अलौकिकत्वात्—प्रमाणागोचरत्वात्, व्याप्तिग्रहणाभावात्—अभेदानुमापकव्याप्तिज्ञानासम्भवात्, चिदानन्दयोरभेदस्य सर्व्वप्रमाणागोचरत्वेन तत्सहचरिततया कस्यापि हेतोर्ज्ञानासम्भवादिति भावः। उपसंहरति तत इति। अद्वैतवादिमते दोषान्तरमुद्घोषयितुं वक्ष्यमाणसूत्रावतारणस्यावकाशमासादयितुमाह—यदिचेति। वाच्या इति, तथाच द्वैतापत्तिदोष इत्याशयः। मुक्तौ वेदान्तिनामानन्दानुभवसिद्धान्तो भ्रान्त इत्यभिधास्यन् दृष्टान्तविधया तत् सिद्धान्तस्यान्यत्रापि भ्रान्तत्वं दर्शयति—यथाचेत्यादिना। उच्यत इति वेदान्तिभिरिति शेषः, क्व समाधिरिति देहावच्छेदेनैवात्मसाक्षात्-

স্বীকার করিলে নিঃসন্দশ্রুতিবিরোধরূপ দোষও আপতিত হয়। আত্মা আনন্দস্বরূপ হইলে আরও দোষ এই যে, আনন্দানুভবে কর্ম্মকর্ত্তৃবিরোধ হয়, অর্থাৎ এক আত্মাই অনুভবের কর্ত্তা ও কর্ম্ম হইয়া পড়ে, (একেতে একক্রিয়ার কর্ত্তৃত্ব ও কর্ম্মত্ব কাহারও স্বীকার্য্য নহে) পরন্তু আত্মার আনন্দস্বরূপত্বে প্রমাণ কি? আত্মা স্বয়ংই প্রমাণ বলিয়া তাহাতে অন্য প্রমাণের অপেক্ষা নাই, ইহাও বলা যায় না, কারণ প্রমেয়ভেদ অনুসারেই প্রমাণ ব্যবস্থা হইয়া থাকে; যেমন রূপরসাদি বিভিন্ন প্রমেয় আছে বলিয়াই চক্ষু রসনাদি পৃথক্ পৃথক্ প্রমাণ স্বীকৃত হইয়াছে। প্রমেয়াভাবে প্রমাণ দ্বারা কি প্রমাণীকৃত হইবে? (সুতরাং যাহা আত্মাদ্বারা প্রমাণীকৃত হইতে পারে, এরূপ কোন প্রমেয় নাই বলিয়াই আত্মা স্বয়ং প্রমাণ নহে) প্রমিতিবিশেষের অসাধারণ কারণত্ব নাই বলিয়াও আত্মাতে প্রমাণত্ব নাই। চিদ্রূপত্বই যে আনন্দরূপত্ব তাহাও ঠিক

अथानन्दश्रुतेः का वार्त्ता ? तथा च—"आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन। यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह॥" इति (तैत्ति ०६ प ० २ वल्ली ०४।८ अनु) अत्राह—

दुःखनिवृत्तेर्गौणः॥ ६७॥

व्यक्तम्॥ ६७॥

कारस्य समाधित्वानुभावकतया देहपातानन्तरं तदुभयोरेवासम्भवादिति भावः। दार्ष्टान्तिकं दर्शयति—तथाचेत्यादिना, अभिमन्यत इति, न तु वस्तुगत्या तदानीमानन्दानुभव इति भावः, अत्र हेतुमाह—देहाभावादित्यादिना। तथाहि—यथा वेदान्तिभिरङ्गीकृत आत्मसाक्षात्कारान्मुक्तौ समाधिरिति सिद्धान्तो भ्रान्तस्तथा मुक्तावानन्दानुभवसिद्धान्तोऽपि भ्रान्त इति समुदितवाक्यार्थः। तथैवोपसंहर्त्तुमाह—एवञ्चेति॥ ६६॥

सूत्रान्तरमवतारयितुं पृच्छति—अथेति। का वार्त्ता—कथं प्रामाण्यम् श्रुतिं दर्शयितुमाह तथाचेति। व्यक्तमिति श्रुत्युक्तानन्दपदं दुःखनिवृत्तिपरमिति सूत्रतात्पर्यं स्पष्टमित्यर्थः॥ ६७॥

নহে, যে হেতু উভয়ের ভেদ আছে। তাহাদের অলৌকিকত্বনিবন্ধন অভেদ সিদ্ধি হইবে, ইহাও বলা যায় না, কারণ অলৌকিকত্ববশতঃই অভেদানুমাপক ব্যাপ্তি গ্রহণই অসম্ভব। অতএব আত্মা চিৎ ও আনন্দ এই উভয়রূপ নহে। (বেদান্তিদের ইহাও বক্তব্য যে) যদি মুক্তিকালে আনন্দ অনুভূত না হয়, তবে সেই আনন্দ কল্পনার প্রয়োজন কি ? যদি অনুভূত হয়, তবে অনুভবিতা, অনুভব ও অনুভাব্য স্বীকার করিতে হয়। (ফলে দ্বৈতাপত্তি দোষ হয়) দেহপাতানন্তর আত্মার স্থিতি সত্ত্বেও সমাধি হইতে পারে না বলিয়া যেমন যাবদ্দেহভাবিত্ব বশতঃ আত্মসাক্ষাৎকার হইতেও সমাধি হয়" এই বেদান্তিসিদ্ধান্ত ভ্রান্ত, সেইরূপ মুক্তিতে আনন্দানুভব সিদ্ধান্তও ভ্রান্ত। কারণ সমাধিতে সকল দুঃখনিবৃত্তি হয় বলিয়া আনন্দলাভের অভিমান হয় মাত্র, বস্তুতঃ দেহাভাববশতঃ সমাধিনাশে আনন্দানুভব হইতে পারে না॥ ৬৬॥

তবে আনন্দময়ত্ব শ্রুতির প্রামাণ্য হয় কিরূপে ? যথা শ্রুতিতে আছে—যাহাকে বর্ণনা করিতে না পারিয়া বাক্যসকল মনের সহিত নিবৃত্ত হয়, সেই ব্রহ্মের আনন্দস্বরূপ যিনি জানেন, তিনি কিছুতেই ভীত হন না" এই আশঙ্কায় বলিতেছেন—শ্রুতিতে যে, আনন্দ শব্দের প্রয়োগ আছে, তাহা দুঃখনিবৃত্তি লক্ষ্য করিয়াই প্রযুক্ত হইয়াছে, প্রকৃত আনন্দ বুঝাইবার জন্য নহে॥ ৬৭॥

प्रकारान्तरमाह—

विमुक्तिप्रशंसा मन्दानाम् ॥ ६८ ॥

मन्दानां—तामसानाम् । विमुक्तिप्रशंसा—प्रवर्त्तनार्थं प्रोत्साहनम् इति ॥ ६८ ॥

मनोवैभवं निराकरोति—

न व्यापकत्वं मनसः करणत्वादिन्द्रियत्वाद्वा, वास्यादिवच्चक्षुरादिवच्च ॥ ६९ ॥

यत् च 'शिरसि मे वेदना, पादे मे सुखम्' इति ज्ञानं मनसः विभुत्वं प्रतिपादयति, तदाशुसञ्चारित्वात् क्रमाग्रहणनिमित्तम् । नानेन विभुत्वसिद्धिः ॥ ६९ ॥

दूषणान्तरमाह—

सक्रियत्वाद्गतिश्रुतेः ॥ ७० ॥

सक्रियत्वात् इति अनुमानं दर्शितम् । गतिश्रुतेः इति शब्दः दर्शितः ॥ ७० ॥

प्रकारान्तरमिति, उक्तश्रुतावानन्दपदस्योपपत्त्यन्तरमित्यर्थः । तामसानामिति राजसानामप्युपलक्षकम् । अन्यत् स्पष्टम् ॥ ६८ ॥

मनो वैभवमिति मनसो विभुत्वमित्यर्थः । मनसो विभुत्वसाधकतया परैरभिहितां युक्तिं खण्डयति—यच्चेत्यादिना ॥ ६९ ॥

অথবা শ্রুতিতে যে আনন্দোৎকীর্ত্তন আছে, তাহা মূঢ় ব্যক্তিদিগকে মুক্তি বিষয়ে প্রোৎসাহিত করিবার জন্য ॥ ৬৮ ॥

করণত্ব ও ইন্দ্রিয়ত্বনিবন্ধন মন ব্যাপক পদার্থ নহে, যেমন বাস্যাদি করণ ও চক্ষুরাদি ইন্দ্রিয় ব্যাপক নহে। মস্তকে বেদনা, পদে সুখ ইত্যাদি জ্ঞানবলে যে মনের সর্ব্বদেহব্যাপকতা অনুভূত হয়, মনের শীঘ্রসঞ্চারিত্ব বশতঃ ক্রমের অজ্ঞানই তাহার কারণ। বস্তুতঃ তদ্দ্বারা মনের বিভুত্ব সিদ্ধি হয় না ॥ ৬৯ ॥

অণুত্বেঽপি কারণাভাবাৎ নিত্যং ভবিষ্যতি ইত্যত্রাহ—

ন নির্ভাগত্বং, তদ্যোগাদ্ঘটাদিবৎ ॥ ৭১ ॥

ন নির্ভাগত্বং—ন অকারণবত্ত্বম্। তদ্যোগাৎ—ভাগযোগাৎ। কিমস্য কারণম্? অহঙ্কারঃ। ষট্কেন যুগপদ্যোগাৎ পরমাণূনাং সভাগত্বসিদ্ধিঃ। তস্মাদ্ঘটাদিবদনিত্যং মনঃ ॥ ৭১ ॥

নিত্যানিত্যবিভাগমাহ—

প্রকৃতিপুরুষযোরন্যৎসর্বমনিত্যম্ ॥ ৭২ ॥

স্পষ্টম্ ॥ ৭২ ॥

দ্রব্যান্তরমিতি, মনসো বিভুত্ব ইত্যাদিঃ। যস্য চ সক্রিয়ত্বং বিদ্যতে, তস্য ব্যাপকত্বং নাস্তীতি প্রত্যক্ষসিদ্ধমেবেতি সক্রিয়ত্বাৎ ন বিভুমন ইতি ভাবঃ ॥ ৭০ ॥

সূত্রান্তরমবতারয়তি—অণুত্বেঽপীত্যাদিনা। সূত্রং ব্যাচষ্টেনেত্যাদিনা, পূর্ব্বসূত্রান্মনস ইত্যনুবর্ত্তনীয়ম্। ভাগযোগাদিতি কারণযোগাদিত্যর্থঃ। অস্য—মনসঃ। প্রসঙ্গাৎ পরমাণুনিরবয়বত্বাবাদিমতং খণ্ডয়িতুমাহ—ষট্কেনেতি, পূর্ব্বপশ্চিমোত্তরদক্ষিণোর্দ্ধাধোরূপদিক্-ষট্কেন ইত্যর্থঃ, সভাগত্বসিদ্ধিঃ সাবয়বত্বসিদ্ধিঃ, উপসংহরতি—তস্মাদিত্যাদিনা। ভাষ্যকারস্তু—"যুগপদনেকেন্দ্রিয়যোগাৎ মনসো ন নিরবয়বত্ব" মিতি সূত্রার্থং বর্ণিতবানিত্যনুসন্ধেয়ম্ ॥ ৭১ ॥

সূত্রান্তরাবতরণিকামাহ—নিত্যেত্যাদিনা। অনিত্যত্বঞ্চাত্র আবির্ভাবাদিমত্ত্বং তদ্বিরহিতত্বমেবঞ্চ নিত্যত্বমিতি মন্তব্যম্ ॥ ৭২ ॥

মন সক্রিয় এবং শ্রুতিতে তাহার গতিও বর্ণিত আছে, তজ্জন্যও মন বিভু হইতে পারে না, কারণ বিভু পদার্থের গত্যাদি পরিদৃষ্ট হয় না ॥ ৭০ ॥

অণু হইলেও তাহার কারণ নাই বলিয়া সে নিত্য হইবে, এই আশঙ্কায় বলিতেছেন—মন কারণরহিত নহে, যে হেতু অহঙ্কারই মনের কারণ, ঊর্দ্ধ, অধঃ, উত্তর, দক্ষিণ, পূর্ব্ব ও পশ্চিম এই ছয়টীদিকের সহিত এক সময়েই যোগ হয় বলিয়া পরমাণুগণও নিরবয়ব নহে, সুতরাং ঘটাদির ন্যায় মনও অনিত্য ॥ ৭১ ॥

প্রকৃতি ও পুরুষ ব্যতিরিক্ত সমস্ত পদার্থই অনিত্য ॥ ৭২ ॥

दिक्कालादीनां नित्यत्वात् कथं सर्वमनित्यमित्यताह—

न भागलाभो भागिनो निर्भागत्वश्रुतेः॥ ७३॥

न कारणलाभः भागिनः जगत्कारणस्य प्रधानस्य, निर्भागत्वश्रुतेः, 'मूलकारणत्वान्नास्य कारणान्तरमिति श्रुतेः॥ ७३॥

आनन्दाभिव्यक्तिः मुक्तिरिति। तद्दूषयति—

नानन्दाभिव्यक्तिर्मुक्तिर्निर्धर्मकत्वात्॥ ७४॥

मुक्तौ धर्मधर्मिभावाभावात्। सा अभिव्यक्तिः किं सर्वदा अस्ति ? संसारदशायामपि मुक्तिप्रसङ्गः। अथ मुक्तौ क्रियते, कार्य्यभावस्य अवश्यं नाशात् पुनरनिर्मोक्ष इति॥ ७४॥

सूत्रान्तरमवतारयितुं शङ्कते—दिक्कालेत्यादिना। न कारणलाभ इति न भागलाभ इत्यस्य विवरणम्। श्रुतिं दर्शयति—मूलेत्यादिना। तथाच जडेषु प्रधानस्यैव श्रुत्या अकारणकत्व-प्रतिपादनादन्येषां दिगादीनां सकारणकत्वप्राप्त्या न नित्यत्वसम्भव इति भावः॥ ७३॥

सूत्रान्तरमवतारयति—आनन्देत्यादिना। आनन्दाभिव्यक्तिः—नित्यसुखाभिव्यक्तिः, मुक्तौ धर्मधर्मिभावाभावादिति निर्धर्मकत्वादित्यस्य विवरणम्, तथाच मुक्तौ धर्मधर्मिभावाभावान्नित्य-सुखाभिव्यक्तिर्न मुक्तिरिति सूत्रार्थः। पुनर्व्विकल्प्य दूषयति—सेत्यादिना। नैयायिकादिसिद्ध-ध्वंसे व्यभिचारवारणाय भावपदम्॥ ७४॥

জড় পদার্থের মধ্যে একমাত্র জগৎ কারণ প্রধানেরই মূল কারণত্ব বশতঃ কারণ নাই, একথা শ্রুতিতে বর্ণিত আছে, ফলে বুঝা যায়, আর সকলেরই কারণ আছে, অতএব দিক্কালাদিরও নিত্যত্ব হইতে পারে না॥ ৭৩॥

কেহ কেহ বলেন, নিত্য সুখের অভিব্যক্তির নাম মুক্তি, তাহা ঠিক নহে; কারণ মুক্তি হইলে ধর্ম্মধর্ম্মি ভাবই থাকে না। ইহাও বক্তব্য যে, সেই অভিব্যক্তি সর্ব্বদা আছে কিনা? যদি সর্ব্বদা থাকে, তবে সংসারদশাতেও মুক্তির আপত্তি হয়, আর যদি বল মুক্তিকালেই তাহা নিষ্পাদিত হয়, তবে ভাবকার্য্যমাত্রেরই অবশ্য বিনাশ হয় বিধায় পুনরায় বন্ধের আপত্তি হয়॥ ৭৪॥

বিশেষগুণোচ্ছিত্তির্মোক্ষঃ ইতি দূষয়তি—

ন বিশেষগুণোচ্ছিত্তিস্তদ্বৎ ॥ ৭৫ ॥

বিশেষনিষেধাৎ সামান্যগুণস্বীকারঃ। তথা চ গুণযোগাৎ অনির্মোক্ষঃ ॥ ৭৫ ॥

দেহপরিমাণঃ আত্মা, তস্য দেহমাত্রাৎ গতিঃ এব মুক্তিঃ ইতি। তদ্দূষয়তি—

ন বিশেষগতির্নিষ্ক্রিয়স্য ॥ ৭৬ ॥

ন ঊর্দ্ধগত্যা মুক্তিঃ, "নির্গুণনিষ্ক্রিয়নির্ধর্মকঃ আত্মা" ইতি শ্রুতেঃ কুতো মুক্তিঃ? হস্তিকৃমিদেহপরিণামিত্বেন সঙ্কোচবিকাসাভ্যাং সাবয়বত্বেন অনিত্যত্বঞ্চ স্যাৎ ॥ ৭৬ ॥

সামান্যগুণস্বীকার ইতি, আত্মনি সামান্যগুণানাং স্বীকার আপদ্যেত ইত্যর্থঃ, অন্যথা বিশেষোপাদানমনর্থকং স্যাৎ। তথাচ নির্গুণত্বশ্রুতিবিরোধাদপি নায়ং পক্ষঃ সাধীয়ানিতি ভাবঃ ॥ ৭৫ ॥

সূত্রান্তরমবতারয়তি—দেহেত্যাদিনা। তস্য—আত্মনঃ দেহমাত্রাৎ—দেহসামান্যাৎ ন তু লিঙ্গশরীরমাদায়াপীত্যর্থঃ। গতিঃ—ঊর্দ্ধলোকগমনং। সূত্রার্থং বিবৃণোতি—নেত্যাদিনা, কুতো মুক্তিরিতি দর্শিতং, তথা নিষ্ক্রিয়স্যাত্মনঃ ঊর্দ্ধগমনরূপক্রিয়াত্মকমুক্তির্ন সম্ভবত্যেবেতি- ভাবঃ। প্রসঙ্গাদাত্মনো দেহপরিমাণকত্বং নিরাকরোতি—হস্তীত্যাদিনা ॥ ৭৬ ॥

বিশেষ গুণের উচ্ছেদের নাম মুক্তি, এইমতও যুক্তিসিদ্ধ নহে; কারণ বিশেষগুণ মাত্রের উচ্ছেদদ্বারা সামান্য গুণের স্বীকার অনুজ্ঞাত হয়, গুণযোগ থাকিলেই মুক্তি হইতে পারে না, বিশেষতঃ নির্গুণত্ব শ্রুতির বিরোধ হয় ॥৭৫॥

কেহ বলেন, আত্মা দেহ-পরিমাণ, অর্থাৎ যখন যে দেহ আশ্রয় করেন, তখন সঙ্কোচ বিকাশ দ্বারা সেই দেহের পরিমিত হন, এবং দেহমাত্র হইতে ঊর্দ্ধলোকে গমনই মুক্তি, এই মতও ঠিক নহে; কারণ শ্রুতি আছে "আত্মা নির্গুণ, নিষ্ক্রিয় ও ধর্ম্মরহিত," সুতরাং এই ঊর্দ্ধ গত্যাত্মক ক্রিয়ারূপ মুক্তি নিষ্ক্রিয় আত্মার সম্ভব হয় কিরূপে? পরন্তু আত্মার হস্তিকৃমি প্রভৃতি দেহ-পরিণামিত্ব স্বীকার করিলে সঙ্কোচ বিকাশ দ্বারা সাবয়বত্ব মানিতে হয়, তাহা হইলেই অনিত্যত্ব হইতে পারে ॥ ৭৬ ॥

बौद्धमुक्तिं दूषयति—

नाकारोपरागोच्छित्तिः क्षणिकत्वादिदोषात् ॥ ७७

स किमाकारः! ज्ञानस्वरूपः, तथाच ज्ञानस्यापि उच्छेदः इति कस्य मुक्तिः। अथ धर्मः? क्षणिकत्वात् सर्वदा तन्नाशे संसारिणामपि मुक्तिः स्यात्। अथ वासनावशात् तदा न मुच्यते, वासनोच्छित्तिः एव मोक्षः अस्तु, किमाकारोपरागोच्छित्त्या? आदिशब्दात् स्वच्छसंवित्प्रवाहस्यापि नश्वरत्वात् कस्य मुक्तिरिति ॥ ७७ ॥

क्षणिकविज्ञानमेवात्मा, तस्याकारोपरागनिवृत्तिरेव मुक्तिरिति बौद्धमतं आकारोपरागपदार्थं विकल्प्य दूषयितुं पृच्छति—स किमाकार इति, सः आकारोपरागः किमाकारः—किंस्वरूप इत्यर्थः। आकारोपरागस्य ज्ञानस्वरूपत्वपक्षे दोषं दर्शयितुं विकल्पयति ज्ञानरूप इति यदीति शेषः। दोषं दर्शयति—तथाचेत्यादिना। आकारोपरागस्य ज्ञानधर्मत्वपक्षे मूलोक्तहेतुकदोषं दर्शयति—अथेत्यादिना। अत्र बौद्धशङ्कामुत्थाप्य निराचष्टे—अथेत्यादिना। तदा—संसारदशायां। नन्वस्तु वासनोच्छित्तिरेव मुक्तिरिति क्षणिकविज्ञानात्मवादिमतान्तरं दूषयितुमादिशब्दतात्पर्यं दर्शयति—आदीत्यादिना ॥ ७७ ॥

বৌদ্ধেরা বলে, আত্মা ক্ষণিকবিজ্ঞানস্বরূপ এবং তাহার আকারোপরাগের উচ্ছেদই মুক্তি, এই মতও ঠিক নহে; কারণ তাহাদের বক্তব্য এই যে, আকারোপরাগ পদার্থের স্বরূপ কি? যদি জ্ঞানই স্বরূপ হয়, তবে জ্ঞানেরও উচ্ছেদ হইলে মুক্তি হইবে কাহার? যদি জ্ঞানের ধর্ম্ম হয়, তবে জ্ঞানের ক্ষণিকত্বনিবন্ধন সর্ব্বদাই তাহার নাশ হয় বলিয়া সংসারদশাতেও তাহার নাশে মুক্তি হইতে পারে। যদি বল বাসনাবশতঃই সংসারদশাতে মুক্ত হইবে না, তবে বাসনার উচ্ছেদেই মুক্তি হইতে পারে, আকারোপরাগ উচ্ছেদের প্রয়োজন কি? বাসনোচ্ছেদের নাম মুক্তি বলিলেও ক্ষণিক বিজ্ঞানাত্মবাদীর মত সমর্থিত হইতে পারে না, কারণ তাহাদের মতে স্বচ্ছ বিজ্ঞানপ্রবাহেরও নশ্বরত্ব বিধায় মুক্তি হইবে কাহার? (এই দোষটি আদি শব্দদ্বারা সূচিত) ॥ ৭৭ ॥

बौद्धविशेषस्य मुक्तिं दूषयति—

न सर्वोच्छित्तिरपुरुषार्थत्वादिदोषात् ॥ ७८ ॥

स्पष्टम् ॥ ७८ ॥

शून्यं मुक्तिः इति दूषयति—

एवं शून्यमपि ॥ ७९ ॥

अपुरुषार्थत्वादेः। आदिशब्दात् अनुष्ठानाभावः सूचितः। यदि आत्मा स्वीक्रियते, तदा तत्परिपन्थिनि द्वेषः, तदनुकूले च स्नेहः इति तयोः बन्धहेतुत्वात् अनिर्मोक्षः स्यात्। मैवम्। न हि रागद्वेषमात्रात् बन्धः, किन्तु तद्विशेषात्। यथा बौद्धपक्ष एव न संवित् सन्तानमात्रात् बन्धः, स्वच्छसंवित्सन्तानस्य मोक्षाङ्गत्वात्, तथा कैवल्यात्मपरिपन्थिनि द्वेषात् निरुपहितात्मस्थिता रागात् न बन्धः, प्रत्युत मोक्षहेतुत्वम् एव इति ॥ ७९ ॥

बौद्धविशेषस्येति—सर्वपदार्थोच्छेदो मुक्तिरिति वदतो बौद्धस्येत्यर्थः। सूत्रं अपुरुषार्थत्वादिदोषादिति, आत्मादिनाशस्य लोके पुरुषार्थत्वादर्शनादित्यर्थः ॥ ७८ ॥

প্রত্যক্ষের অনুরোধে যদি চক্ষুর অপসরণ স্বীকার করিতে হয়, তবে চক্ষু তৈজসিক হউক? কেননা তেজঃপদার্থেরই অপসরণ পরিদৃষ্ট হয়। এই আশঙ্কায় বলিতেছেন—তেজের ন্যায় দূরের পদার্থেরও প্রকাশ করে বলিয়া চক্ষু তৈজস এই অভিমান হয়। বস্তুতঃ বৃত্তিদ্বারা সম্বন্ধের সম্ভাবনা বশতঃই পদার্থের চাক্ষুষ নির্ব্বাহ হইতে পারে, সুতরাং চক্ষু তৈজসিক নহে ॥ ১০৫ ॥

বৃত্তির প্রত্যক্ষ হয় না, সুতরাং বৃত্তি কোন্ প্রমাণসিদ্ধ? এই আশঙ্কায় বলিতেছেন—সম্বন্ধ অর্থের প্রকাশরূপ হেতু দ্বারাই বৃত্তি সিদ্ধ হইবে। অর্থাৎ কার্য্যলিঙ্গ অনুমানই বৃত্তিসিদ্ধির প্রমাণ ॥ ১০৬ ॥

पदार्थः यतः । असम्बद्धस्य ज्ञानायोगात् तदर्थं सर्पति । तथा च—

वृत्तयः प्रसरद्रूपाः स्फारितावस्य यत्र च ।
अदृष्टानुग्रहात्तत्र सम्बन्धार्थावबोधिकाः ॥ १०७ ॥

कथममूर्त्तायाः वृत्तेः सर्पणक्रिया इत्यत आह—

न द्रव्ये नियमस्तद्योगात् ॥ १०८ ॥

अनियतत्वात् पदार्थानां न द्रव्ये एव क्रियानियमः, किन्तु यत्र प्रमाणं दृश्यते, तदनुमन्यामहे । वृत्तौ च क्रिया दृष्टा, अन्यथा वस्तूपलम्भाभावात् ॥ १०८ ॥

वृत्तिस्वरूपनिरूपकं सूत्रमवतारयति प्रकृते—वृत्तिरित्यादिना । सूत्रतात्पर्यं विवृणोति कार्य्यत्वादिना । ननु वृत्तेस्तत्त्वान्तरत्वे पञ्चविंशतिसंख्योक्तिविरोध इत्याशङ्कामपाकर्त्तुमाह—अनियतः पदार्थो यत इति । वृत्तेः प्रसरद्रूपत्वे प्राचीनसम्मतिं दर्शयितुमाह—तथा चेति । यत्र समये स्फारितावस्य वृत्तयः अदृष्टानुग्रहात् प्रसरद्रूपा भवन्ति, तस्मिन् समये सम्बद्धस्य स्वद्वारा इन्द्रियसम्बद्धस्य अर्थस्यावबोधिका भवन्तीति कारिकार्थः ॥ १०७ ॥

कथमिति, अमूर्त्तायाः—अद्रव्यभूतायाः । सूत्रतात्पर्यं विवृणोति—अनियतत्वादित्यादिना । दृष्टा—अनुमिता, वस्तूपलम्भाभावात्—इन्द्रियसम्बन्धासम्भवेन वस्तुग्रहासम्भवात् । तथा च वस्तूपलम्भान्यथाऽनुपपत्त्या क्रियावती वृत्तिरेव सांख्याचार्य्यैः स्वीक्रियते इति भावः ॥ १०८

বৃত্তি কি দীপশিখার ন্যায় অংশস্বরূপ, অথবা একটি গুণান্তর ? এই আশঙ্কায় বলিতেছেন—কার্য্যত্বহেতু বৃত্তি ভাগ ও গুণ হইতে অতিরিক্ত একটি আহঙ্কারিক তত্ত্ব, সাংখ্যাচার্য্য অনিয়ত পদার্থবাদী, সুতরাং এই বৃত্তিরূপ একটি অতিরিক্ত পদার্থ স্বীকার করিলেও কোন ক্ষতি নাই। ইন্দ্রিয়াসম্বদ্ধ পদার্থের জ্ঞান হইতে পারে না, সুতরাং সেই সম্বন্ধের জন্য বৃত্তি প্রসারিত হয়। এবিষয় প্রাচীনগণও বলিয়াছেন,—অদৃষ্টবশে যে সময়ে বৃত্তি প্রসারিত হয়, সেই সময়েই বৃত্তি দ্বারা ইন্দ্রিয় সম্বদ্ধ পদার্থের জ্ঞান জন্মায়। ১০৭ ॥

অদ্রব্যভূত বৃত্তির সর্পণক্রিয়া হয় কিরূপে ? এই আশঙ্কায় বলিতেছেন—সাংখ্যমতে পদার্থ অনিয়ত, সুতরাং দ্রব্যেই যে ক্রিয়া থাকিবে, এরূপ নিয়ম নাই, যে বিষয়ে প্রমাণ পাওয়া যায়, তাহাই অনুমত। বৃত্তিতেও ক্রিয়া অনু-

देशभेदे भौतिकानि इन्द्रियाणि भविष्यन्ति, यथा वृश्चिकदष्टस्य देशभेदे मरणम् इत्यत्राह—

न देशभेदेऽप्यन्योपादानतास्मदादिवन्नियमः ॥ १०९

स्वशरीरे एव व्याप्तिः गृहीता, आहङ्कारिकाणि इन्द्रियाणि। तद्व्यभिचारे धूमोऽपि अग्निं व्यभिचरेत् ॥ १०९ ॥

"पाञ्चभौतिकम्" इति व्यपदेशे हेतुमाह—

निमित्तव्यपदेशात्तद्व्यपदेशः ॥ ११० ॥

पञ्चोपादानता निषिद्धा, न निमित्तता। तेन पाञ्चभौतिकम् इति व्यपदेशः ॥ ११० ॥

अस्मदादीन्द्रियाणां भौतिकत्वाभावेऽपि—इन्द्रियाणां भौतिकत्वश्रुतेरपि विद्यमानतया कस्य कस्यचिदिन्द्रियाणि भौतिकानि स्युरित्याशङ्कानिरासकं सूत्रमवतारयति—देशभेद इत्यादिना। देशभेदे—प्राणिविशेषे एकधर्मावच्छिन्नस्यापि देशादिभेदे वैषम्यं भवतीति दृष्टान्तेन द्रढयितुमाह—यथेति। देशभेदे—देशविशेषे एव। "देशभेदेऽपि—प्राणिविशेषेऽपि न अन्योपादानता—अहङ्कारातिरिक्तोपादानता भूतोपादानकत्वमिति यावत्, इन्द्रियाणामिति शेषः। अस्मदादिवत्—अस्मदादीनामिव, नियमः—सर्वेषामेवेन्द्रियाणां आहङ्कारिकत्वनियमः इति सूत्रार्थः। ननु नियमो—व्याप्तिः, स कुत्र गृहीतः इत्याकाङ्क्षायामाह—स्वशरीरे इति, व्याप्तिः—इन्द्रियत्वे आहङ्कारिकत्वव्याप्तिः। ननु व्याप्तिग्रहेऽपि इन्द्रियत्वमाहङ्कारिकत्वव्यभिचारि भविष्यतीत्याशङ्कायामाह—तदिति ॥ १०९ ॥

মানগম্য, কারণ তাহা না হইলে বিষয়ে ইন্দ্রিয়ের সম্বন্ধাভাব বশতঃ বস্তুর উপলব্ধিই অসম্ভব হয় ॥ ১০৮ ॥

যেরূপ দেশবিশেষেই বৃশ্চিকদষ্ট ব্যক্তির মৃত্যু হয়, সর্ব্বত্র নহে, সেইরূপ সর্ব্বত্র না হইলেও প্রাণিবিশেষের ইন্দ্রিয় ভৌতিক বলিব, এই আশঙ্কায় বলিতেছেন—প্রাণিবিশেষেও ভূত ইন্দ্রিয়ের উপাদান নহে, কারণ অস্মদাদির ইন্দ্রিয়ের আহঙ্কারিকত্ব দৃষ্টান্তে অন্যের ইন্দ্রিয়ও আহঙ্কারিকত্বই হইবে। নিজ-শরীরান্তর্ভাবেই ইন্দ্রিয়ত্বে আহঙ্কারিকত্বের ব্যাপ্তি পরিগৃহীত হয়। ইন্দ্রিয়ত্ব যদি আহঙ্কারিকত্বের ব্যভিচারি হয়, তবে ধূমও বহ্নির ব্যভিচারী হইতে পারে ॥ ১০৯ ॥

कति शरीरभेदा इत्यत आह—

ऊष्मजाण्डजजरायुजोद्भिज्जसङ्कल्पजसांसिद्धिकं चेति न नियमः ॥ १११ ॥

ऊष्मजः दन्द्यूकादिः । अण्डजाः पक्षिसर्पादयः । जरायुजः मनुष्यादिः । उद्भिज्जाः वृक्षादयः । सङ्कल्पजः सनकादिः । सांसिद्धिकः मन्त्रौषधादिसिद्धिः । चत्वारि एव इति न नियमः

देहे किं भूतं प्रधानम् इत्यत्राह—

सर्वेषु पृथिव्युपादानमसाधारण्यात् तद्व्यपदेशः पूर्ववत् ॥ ११२ ॥

सर्वेषु इति बाहुल्येन, "सूर्य्यादिलोके तैजसं शरीरम्" इति श्रुतेः ।

नन्वेवमिन्द्रियाणां कथं भौतिकत्वप्रवादः इत्याशङ्कानिरासकं सूत्रमवतारयति—पाञ्चभौत्यादिना । पञ्चोपादानता—पञ्चानां भूतानामिन्द्रियेषूपादानकारणत्वं, न निमित्तता निमित्तकारणता निषिद्धेत्यन्वयः । तेन—पञ्चभूतनिमित्तत्वेन व्यपदेशो—व्यवहारः, न तु पञ्चभूतोपादानत्वनिबन्धनस्तादृशव्यवहार इति भावः ॥ ११० ॥

प्रसङ्गात् स्थूलशरीरगतविशेषनिरूपकं सूत्रमवतारयति—कतीत्यादिना । न नियम इत्यस्यार्थमाह—चत्वारीति, प्रथमोक्तानि चत्वारीत्यर्थः ॥ १११ ॥

পঞ্চভূতে ইন্দ্রিয় উপাদান কারণত্বই নিষিদ্ধ হইয়াছে, নিমিত্ত কারণত্ব নিষিদ্ধ হয় নাই, সুতরাং সেই নিমিত্ত কারণত্ব দ্বারাই ইন্দ্রিয়ে ভৌতিকত্ব ব্যবহার আছে—বস্তুতঃ ইন্দ্রিয় ভৌতিক নহে ॥ ১১০ ॥

শরীর কত প্রকার? এই প্রশ্নে বলিতেছেন—উষ্মজ, অণ্ডজ, জরায়ুজ, উদ্ভিজ্জ, সঙ্কল্পজ ও সাংসিদ্ধিক ভেদে শরীর ছয় প্রকার। তন্মধ্যে মশকাদি শরীর উষ্মজ, পক্ষী ও সর্পাদির শরীর অণ্ডজ, মনুষ্যাদি শরীর জরায়ুজ, বৃক্ষাদি শরীর উদ্ভিজ্জ, সনকাদি শরীর সঙ্কল্পজ ও মন্ত্রৌষধাদিসিদ্ধ শরীর সাংসিদ্ধিক। অতএব উক্ত ছয় প্রকারের মধ্যে প্রথমোক্ত প্রকারই যে শরীর এরূপ নিয়ম নাই ॥ ১১১ ॥

तत्रापि बहुतरपार्थिवावयवावष्टम्भकत्वं, अन्यत्वे च अनुपभोगात् । पूर्ववत् इति सर्वमेवोक्तम् ॥ ११२ ॥

देहे प्राणदर्शनात् तस्य देहारम्भकत्वशङ्कामपनयति—

न देहारम्भकस्य प्राणत्वमिन्द्रियशक्तितस्तत्सिद्धेः ॥११३

भौतिकवायोः देहारम्भकत्वं, न तु प्राणवायोः भौतिकत्वम्, 'प्राणात् सर्वमजायत' इति श्रुतेः । यावद्देहभावित्वे च आरम्भकत्वभ्रमः । सर्वेन्द्रियशक्त्या प्राणः धार्य्यते इति यावत् इन्द्रियं तावत् तत्सिद्धिः— प्राणधारणसिद्धिः ॥ ११३ ॥

सूत्रान्तरमवतारयति—देह इत्यादिना । अन्यथा सूत्रीयसर्व्वपदस्यार्थमाह—बाहुल्ये-नेति । तदन्यथा हेतुमाह—सूर्य्येति । तत्रापि—तैजसशरीरेऽपि, सूत्रे अन्यथात्वात्—आधिक्यादिनिकृत्कर्षात् । तद्व्यपदेशः—पाञ्चभौतिकत्वव्यपदेशः, पूर्व्ववत्—इन्द्रियवत् सर्व्वत्र मनसि इत्याह—सर्व्वमेवोक्तमिति ॥ ११२ ॥

सूत्रान्तरावतरणिकामाह—देहे प्राणदर्शनादिति । तस्य—प्राणस्य सूत्रतात्पर्य्यं विवृणोति—भौतिकेत्यादिना । अयमत्राशयः—साङ्ख्यमते इन्द्रियवृत्तिरेव, प्राणाद्याः पञ्च वायवः, कारिकयापि "सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च" अनेन तथैवाभिहितम्, एवञ्च मतद्वैतेऽपि मातेन प्राणाभावात् कथमपि प्राणस्य देहारम्भकत्वसम्भव इति ॥ ११२ ॥

দেহে কোন ভূত প্রধান? এই আশঙ্কায় বলিতেছেন—আধিক্যাদিরূপ উৎকর্ষবশতঃ সর্ব্বশরীরেই পৃথিবী উপাদান কারণ, এই সূত্রের সর্ব্ব শব্দটি বহুলে লাক্ষণিক, কারণ সূর্য্যালোকে তৈজসিক শরীরেও শ্রুত আছে, সেই শরীরেও বহুতর পার্থিবাবয়বের নিমিত্ত কারণত্ব স্বীকার করিতে হইবে, অন্যথা সেই শরীরাবচ্ছেদে ভোগের অনুপপত্তি হয়। শরীরের পাঞ্চ-ভৌতিকত্ব ব্যপদেশও অন্য চতুর্ভূতের নিমিত্তকারণতাপ্রযুক্ত ইহা পূর্ব্বেই বলা হইয়াছে ॥ ১১২ ॥

দেহবর্ত্তী প্রাণেই দেহের আরম্ভক, এই আশঙ্কানিরাসার্থ বলিতেছেন—ভৌতিক বায়ুই দেহের আরম্ভক, প্রাণ বায়ু ভৌতিক নহে। "প্রাণ হইতেই সমস্ত জন্মে" এইরূপ (প্রাণের প্রশংসার) শ্রুতি বশতঃ ও যাবদ্দেহভাবিত্ব

देहे निष्पन्ने आत्माधिष्ठानं, आत्माधिष्ठितौ वा देहनिष्पत्तिरिति निर्णयमाह—

भोक्तुरधिष्ठानाद्भोगायतननिर्माणमन्यथा पूतिभावप्रसक्तेः ॥ ११४ ॥

स्फुटम् ॥ ११४ ॥

प्रधानमूलत्वात् शरीरस्य तद्द्वारेणैवाधिष्ठानं भविष्यति इत्यत्राह—

भृत्यद्वारा स्वाम्यधिष्ठितिर्नैकान्तात् ॥ ११५ ॥

जडे भृत्ये अवलम्बिना भवेत् स्वस्थितिः यथा, तथा जडस्य प्रधानस्य अधिष्ठानात् न पूतिभावविरोधः ॥ ११५ ॥

सूत्रान्तरमवतारयति—देहे इत्यादिना। सूत्र अन्यथा—भोक्तुरधिष्ठानात् प्रागदेहनिर्माणे, पूतिभावप्रसक्तेः—भोक्तुरनधिष्ठानेन मृतदेहवत् दुर्गन्धतापत्तेः ॥ ११४ ॥

ननु कूटस्थस्य पुरुषस्य कथं देहे अधिष्ठानमित्याशङ्कानिरासकं सूत्रमवतारयिष्यन् सूत्रप्रतिपाद्यमाह—प्रधानेत्यादिना। सूत्रतात्पर्यं स्फुटयन् विशदयति—जडे इत्यादिना। अधिष्ठानादिति शरीरे इत्यादिः पुरुषस्याधिष्ठानमिति शेषः। न पूतिभावविरोधः—न पूतिभावप्रसक्तिरूपो दोषः, तथाच—भृत्यद्वारा—भृत्यप्रायप्रधानद्वारा स्वामिनः—भोक्तुः पुरुषस्य अधिष्ठितिः—शरीरे अधिष्ठानं, नैकान्तात्—न साक्षादिति सूत्रार्थः ॥ ११५ ॥

বশতঃ প্রাণের দেহধারকত্ব ভ্রম হয়। সমস্ত ইন্দ্রিয় প্রক্রিয়াদ্বারাই প্রাণ ধারণ হইয়া থাকে, সুতরাং যে পর্য্যন্ত ইন্দ্রিয় থাকে, সে পর্য্যন্ত প্রাণধারণ সিদ্ধ হয়। অর্থাৎ সাংখ্যমতে প্রাণাদি পঞ্চ বায়ু ইন্দ্রিয়েরই বৃত্তিবিশেষ, মৃতদেহে ও ইন্দ্রিয়াভাব বশতঃই প্রাণ থাকে না, অতএব মৃত দেহান্তর্ভূতে ব্যভিচার বশতঃই প্রাণ দেহের আবশ্যক নহে ॥ ১১৩ ॥

দেহ নিষ্পন্ন হইলেই আত্মার অধিষ্ঠান হয়, কি আত্মার অধিষ্ঠান হইলেই দেহ নিষ্পত্তি হয়, এই বিষয়ের নির্ণয় বলিতেছেন—ভোক্তার আত্মার অধিষ্ঠানের পরেই দেহের নির্ম্মাণ হয়, কারণ ভোক্তার অধিষ্ঠানের পূর্ব্বে দেহ নির্ম্মাণ স্বীকার করিলে ভোক্তার অনধিষ্ঠানবশতঃ মৃতদেহের ন্যায় দুর্গন্ধতা প্রসক্তি হয় ॥ ১১৪ ॥

ब्रह्मरूपनिरूपणायाम्ये वां तुल्यरूपमाह—

समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपता ॥ ११६ ॥

ब्रह्मणा सह तुल्यरूपता, सर्वत्र बाह्यासंवेदनात्, न तु ब्रह्मरूपता * ॥ ११६ ॥

अन्यथा: स्वरूपमाह—

द्वयोः सवीजत्वमन्यस्य तद्धतिः ॥ ११७ ॥

द्वयोः—समाधिसुषुप्त्योः सवीजत्वं—संस्कारवत्त्वं, अन्यस्य—मोक्षस्य तद्धतिः—वीजहानम् ॥ ११७ ॥

सूत्रान्तरमवतारयति—ब्रह्मेत्यादिना। ब्रह्मरूपनित्यस्यार्थमाह—ब्रह्मणा सह तुल्यरूपतां पुरुषस्येति शेषः। तुल्यरूपतायां हेतुं पूरयति—सर्व्वत्र (समाधिसुषुप्तिमोक्षावस्थासु) बाह्यसंवेदनादिति। ब्रह्मरूपतापदस्य ब्रह्माभिन्नत्वपरतां निषेधति—नत्वित्यादिना। स्वम पुरुषातिरिक्तब्रह्मणः एकैव सद्भावस्याभेदस्यानङ्गीकारादिति भावः ॥ ११६ ॥

समाधिसुषुप्त्योरिति समाधिसुषुप्तिमतोरित्यर्थः। संस्कारवत्त्वं दुःखप्रयोजकसंस्काराश्रयत्वम्। मोक्षस्य मोक्षभावापन्नस्य, वीजहानं दुःखप्रयोजकसंस्कारस्यापि हानं। तथा

যেরূপ জড়ভূতের হৃতপ্রায় প্রধানের অধিষ্ঠান দ্বারাই অন্য সমস্ত আত্মার স্থিতি, সেরূপ শরীরেও জড় প্রধানের অবস্থান বশতঃই আত্মার অধিষ্ঠান হয়, সাক্ষাৎ নহে। সুতরাং পূর্ত্তিভাবরূপ দোষের প্রসঙ্গ নাই। (কূটস্থ নিত্য আত্মার অধিষ্ঠান হয় কিরূপে, এই আশঙ্কারও অবকাশ নাই) ॥ ১১৫ ॥

সমাধি সুষুপ্তি ও মোক্ষাবস্থাতে বাহ্য বিষয়ের জ্ঞান থাকে না বলিয়া আত্মাতে ব্রহ্মের তুল্যরূপতা হয়। ব্রহ্মের অভিন্নত্ব নহে ॥ ১১৬ ॥

সমাধিও সুষুপ্ত অবস্থাতে আত্মায় দুঃখপ্রয়োজক সংস্কার থাকে, কিন্তু

---

* समाधिः असम्प्रज्ञातावस्था, सुषुप्तिश्चात्र समयसुषुप्तिः, मोक्षश्च विदेहकैवल्यं। आस्ववस्थासु पुरुषाणां ब्रह्मरूपता बुद्धिवृत्तिविलयमात्रद्वीपाधिकपरिच्छेदादिविगमेन स्वस्वरूपपूर्णतयावस्थानं। यथा घटध्वंसे घटाकाशस्य पूर्णता तद्वत्।

† नहिं कः समाधिसुषुप्तिभ्यां मोक्षस्य विशेष इत्यत्राह—पाठान्तरमेतत्, क्वचित् पुस्तके दृश्यते। तत्र समीचीनत्वेऽपि भाष्यसमानानुपूर्व्वीकतया प्रक्षिप्तत्वमेव प्रतिभातीति मन्तव्यम् ॥

समाधिसुषुप्त्योः दृष्टा निरुद्धवृत्तिकत्वात् कृतकृत्यता, न तु, मोक्षस्य इत्यत्राह—

द्वयोरिव त्रयस्यापि दृष्टत्वान्न तु द्वौ ११८ ॥

त्रयस्यापि—मोक्षस्यापि, दृष्टत्वात्—श्रुत्यनुमानप्रतिपादनात् कृतकृत्यता, न तु द्वौ—सुषुप्तिसमाधी । सबीजत्वात् तयोः कृतकृत्यता गौणी इति ॥ ११८ ॥

रागादीनां बन्धहेतुत्वात् किं वासनया इत्यत आह—

वासनयानर्थख्यापनं दोषयोगेऽपि, न, निमित्तस्य प्रधानबाधकत्वम् ॥ ११९ ॥

न दोषादेव बन्ध इति वक्तव्यम् ! वासनयानर्थख्यापनमवश्यं

साङ्ख्यमते तादृशसंस्कारहानमेव ब्रह्मत्वम्, तत्र विमुक्तपुरुषस्यैव तिष्ठतीति विमुक्तपुरुषात्मैव ब्रह्मपदवाच्यता, न तु ब्रह्ममीमांसासिद्धैश्वर्योपलक्षितस्येति स्थितम् ॥ ११७ ॥

मोक्षप्रमाणं नास्तीति नास्तिकाक्षेपनिरासकं सूत्रमवतारयति—समाधीत्यादिना । सूत्रे द्वयोरिवेति सुषुप्तिसमाधिवदित्यर्थः । सुषुप्तिसमाधी इति सावधारणं, तथाच मोक्षोऽप्यस्तीत्यर्थः । ननु तथापि सुषुप्तिसमाधिभ्यामेव पुरुषार्थत्वसिद्धिसम्भवात् किं मोक्षेण ? इत्याशङ्कामपाकरोति— सबीजत्वादित्यादिना । तथाच समाधिसुषुप्त्योर्दुःखबीजसत्त्वेन पुनर्दुःखोत्पादावश्यम्भावात् तयोरत्यन्तपुरुषार्थत्वेति अत्यन्तपुरुषार्थतया मोक्षः सर्व्वथैवापेक्षणीय इति भावः ॥ ११८ ॥

सूत्रान्तरमवतारयति—रागादीनामित्यादिना । पूरयित्वा सेत्स्यन्सूत्रस्यार्थमाह—

মোক্ষাবস্থাতে তাহাও থাকে না। (সাংখ্যমতে দুঃখপ্রয়োজক সংস্কারের পর্যাপ্ত নাশ হইলে আত্মাই ব্রহ্মপদবাচ্য, তদতিরিক্ত ঐশ্বর্য্যাদিশালী কোনও ব্রহ্ম নাই, ইহাই সিদ্ধান্ত) ॥ ১১৭ ॥

সুষুপ্তি ও সমাধির ন্যায় মোক্ষেরও শ্রুতি এবং অনুমান দ্বারা প্রতিপাদন বশতঃ পুরুষার্থতা আছে। সুতরাং কেবল সমাধির সুষুপ্তিই যে আছে—তাহা নহে, মোক্ষও আছে। পরন্তু সমাধি ও সুষুপ্তিতে দুঃখপ্রয়োজক সংস্কার থাকায় পুনরায় দুঃখোৎপত্তি অনিবার্য্য, সুতরাং তাহাদের পুরুষার্থতা মোক্ষের তুলনায় নিকৃষ্ট ॥ ১১৮ ॥

कर्त्तव्यम्। दोषाणामेव निमित्तस्य प्रधानस्य मुक्तौ बाधकत्वं वक्तव्यम्। मुख्यं च वासना इति ॥ ११৯ ॥

इष्वादिक्षेपे वेगाख्यात् संस्कारात् कर्म कर्मणा च संस्कार इति अनेके संस्काराः। तन्निषेधति—

एकः संस्कारः क्रियानिर्वर्त्तकः, न तु प्रतिक्रियं संस्कारभेदा बहुकल्पनाप्रसक्तेः ॥ १२० ॥

एकसंस्कारपक्षे इषोः निपातः इति उक्तम्। परिणामपक्षे च एकस्य एव मन्दतरादिपरिणामात् पातः इति बहुकल्पनायां गौरवम् इति ॥ १२० ॥

अवश्यं कर्त्तव्यमित्यन्तग्रन्थिव्यञ्जन। तत्र दोषादेव रागादेरेव, अनर्थस्थापनं सौन्दर्यादि-विस्थापनं। दोषाणां रागादीनां निमित्तस्य प्रधानस्य निमित्ततया मुख्यस्य वासनाख्यस्येत्यर्थः, मुक्तौ बाधकत्वमिति तु प्रधानबाधकत्वमित्यस्य विवरणम्। उपसंहरति—मुख्यमिति, बन्धस्य प्रधानं कारणमित्यर्थः। तथाच वासनयानर्थस्थापनं विना रागादीनामेवासम्भवात् कथं रागादिभिर्बन्धसम्भवोऽस्त्विद इति भावः ॥ ११৯ ॥

सूत्रान्तरावतरणिकामाह—इष्वादावित्यादिना। सूत्रमानुपूर्व्यं विवृणोति—एकेत्यादिना। एकमिति इषुक्षेपजनितेनैकेनैव वेगाख्यसंस्कारेण इषुनिपातो जन्यते, तत्तत्स्य वेगाख्यसंस्कारस्य नाश इत्युक्तमित्यर्थः। परिणामपक्ष इति इषुक्षेपेण वेगाख्यसंस्कारस्तेन पुनः कर्म तेन कर्मणा पुनर्मन्दवेगाख्यसंस्कारः, तेन पुनः कर्म, तेन कर्मणा पुनर्मन्दतरो वेगाख्यसंस्कारः एवं

কেবল রাগাদি দ্বারা বন্ধ হইতে পারে না, কারণ বাসনাদ্বারা সৌন্দর্য্যাদি রূপ অনর্থস্থাপন একান্ত আবশ্যক। রাগাদির নিমিত্তীভূত বাসনাই মুক্তির বিরোধী, সুতরাং বাসনাই বন্ধের মুখ্য কারণ ॥ ১১৯ ॥

কেহ কেহ বলেন,বাণাদি নিক্ষেপ করিলে বাণাদিতে বেগাখ্যসংস্কার জন্মে, তদ্দ্বারা কিঞ্চিৎ গমন করিলে সেই গমনজন্য পুনরায় বেগাখ্য সংস্কার জন্মে, তাহা হইতে পুনরায় বেগাখ্য সংস্কার জন্মে, ইত্যাদি ক্রমে বহুকর্ম্ম ও বহুসংস্কার হইতে বাণের নিপাত হয়। তাহার নিষেধ করিতেছেন—বাণাদি নিক্ষেপ-স্থলে নিক্ষেপ জন্য একটি বেগাখ্যসংস্কারই গমনদ্বারা নিপাতাদি ক্রিয়ার সম্পাদক

एकः विषयः, यतः एका बुद्धिः, सत्सत् इति प्रत्ययस्य अविशेषात् इत्यत आह—

न बाह्यबुद्धिनियमः ॥ १२१ ॥

यथा सत् इति प्रत्ययः अबाधितः, तथा घटपटादिप्रत्ययाऽपि। सत् इति प्रत्ययस्य सामान्यविषयः। तस्मात् न बाह्यबुद्धौ एकस्यैव इति नियमः ॥ १२१ ॥

पाञ्चभौतिकं जीवशरीरम्। कतिभूतारब्धं स्थावरमित्यत आह—

वृक्षगुल्मलतौषधिवनस्पतितृणवीरुधादीनामपि भोक्तृभोगायतनत्वं पूर्ववत् ॥ १२२ ॥

पूर्ववत् इति भोगायतनत्वात् पाञ्चभौतिकम्। भोगायतनत्वं च

सन्ततमादिवेगाख्यसंस्कारेण इषोर्निपातपक्षे इत्यर्थः। बहुकल्पनाया गौरवमिति अनन्ततत्तत्संस्कारकर्म तन्नाशादिरूपबहुकल्पनाप्रसक्तेः गौरवमित्यर्थः। तथा च नाशवादिप्रक्षेपादिजन्य एकः संस्कारः कल्पनीय इति भावः ॥ १२० ॥

सूत्रान्तरमवतारयति—एक इत्यादिना। बहूनामपि एकबुद्धिविषयत्वं भवतीति व्यवस्थापयितुम् भूमिकामारचयति—यथेत्यादिना। उपसंहारव्याजेन सूत्रस्यार्थमाह—तस्मादित्यादिना ॥ १२१ ॥

सूत्रान्तरमवतारयितुं शङ्कते—पाञ्चभौतिकमित्यादिना। अत इच इति सामान्यतो

অনেক ক্রিয়া এবং অনেক সংস্কার নহে, কারণ তাহা হইলে নিষ্প্রয়োজনে বহুকর্মজন্য মন্দমন্দতরাদি বহুসংস্কার ও তাহাদের নাশাদিরূপ বহুপদার্থের কল্পনারূপ গৌরব হয় ॥ ১২০ ॥

যেরূপ সদ্বিষয়ক প্রতীতি অবাধিত, সেইরূপ ঘটপটবিষয়ক প্রতীতিও অবাধিত, পরন্তু সদ্বিষয়ক প্রতীতিরও যৎসামান্যই বিষয়। অতএব বাহ্যবুদ্ধিতে যে কোন একটিই বিষয় হইবে, এরূপ নিয়ম নাই ॥ ১২১ ॥

জীবশরীর পাঞ্চভৌতিক, ইহা ব্যবস্থাপিত হইয়াছে, বৃক্ষাদি স্থাবর কোন্ কোন্ ভূত দ্বারা আরব্ধ? এই আশঙ্কায় বলিতেছেন—বৃক্ষ প্রকাণ্ডরহিত বৃক্ষলতা ওষধি (ফলপাকান্ত শস্যের গাছ) বনস্পতি (পুষ্প ভিন্ন যাহাদের

जन्मान्तरीयक्रियाविशेषात् 'जीवात्मनः एव स्थावराश्रयताम् उपगच्छन्ति, इति श्रुतेः ॥ २२ ॥

अत्र स्मृतिरपि अस्ति इति आह—

स्मृतेश्च ॥ १२३ ॥

व्यक्तम् । तथा च—

अभिवादितविप्रो यः आशिषं न प्रयच्छति ।
श्मशाने जायते वृक्षो गृध्रकङ्कनिषेवितः ॥
शरीरजैः कर्मदोषैर्याति स्थावरतां नरः ।
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ॥ १२३ ॥

वृक्षादीनां देहत्वे कर्माधिकारिता स्यात् इत्यत आह—

न देहमात्रतः कर्माधिकारित्वं वैशिष्ट्यश्रुतेः ॥ १२४ ॥

जीवदेहाः अपि चाण्डालादयो न कर्माधिकारिणः, किं पुनः स्थावरा इति, विशिष्टदेहस्य कर्माधिकारित्वात् ॥ १२४ ॥

निर्हिंस्य गुल्मलतादिना च तद्विशेषनिर्द्दिष्टबुद्धिर्वैश्वराथ । सूत्रे भोक्तृभोगायतनत्वमिति, वृक्षादीनां भोगायतनत्वं तदधिष्ठितपुरुषे तद्भोक्तृत्वञ्चेत्यर्थः । अन्यत् स्पष्टम् ॥ १२२ ॥

यान्तीति आत्मना स्थावरात्मयथी इत्यर्थः । प्रमाणभूतश्रुत्यर्थस्तु स्पष्ट एव ॥ १२२ ॥

ফল হয়, এরূপ বৃক্ষ) বীরুৎ (শাখাদি দ্বারা বিস্তৃতা লতা) প্রভৃতির ভোগ-দেহত্ব ও তদধিষ্ঠিত পুরুষের ভোক্তৃত্ব পূর্ব্ববৎ, অর্থাৎ—ভোগায়তনত্বনিবন্ধন বৃক্ষাদি শরীরও পাঞ্চভৌতিক। জীবাত্মাসকলই (কর্ম্মদোষে) স্থাবরতালাভ করে, এরূপ শ্রুতি আছে বলিয়াই বৃক্ষাদি শরীর ভোগের আয়তন, এবং তদধিষ্ঠিত পুরুষ ভোক্তা ॥ ১১২ ॥

এ বিষয়ে স্মৃতিও আছে যথা—"যে বিপ্র অভিবাদিত হইয়া আশীর্ব্বাদ প্রদান না করে, সে শ্মশানে গৃধ্রাদি পক্ষীদ্বারা নিষেবিত বৃক্ষ হইয়া জন্ম গ্রহণ করে। মনুষ্য সকল শারীর কর্ম্মদোষে স্থাবরতা, বাচিক কর্ম্মদোষে পক্ষিমৃগতা ও মানস কর্ম্মদোষে অন্ত্যজাতিতা লাভ করে ॥ ১২৩ ॥

देहभेदमाह—

त्रिधा त्रयाणां व्यवस्था कर्मदेहोपभोगदेहो-भयदेहाः ॥ १२५ ॥

वीतरागाणां फलसंन्यासेन कर्म्मकरणात् कर्मदेहः । पश्वा-दीनाम् उपभोगदेहः । भोगिनां कर्म्माधिकारिणां कर्म्मोपभोग-देहः ॥ १२५ ॥

चतुर्थमनधिकारिणं देहमाह—

न किञ्चिदप्यनुशयिनः ॥ १२६ ॥

'विद्यादनुशयं द्वेषं पश्चात्तापानुबन्धयोरिति' शाश्वतवचनात् अनुशयिनो योगिन इत्यर्थः । तेषां न किञ्चित् अपि, सर्वानधिकारात् ॥ १२६ ॥

विशिष्टो देहो यस्येति व्युत्पत्त्या विशिष्टदेहस्य—ब्राह्मणादेरित्यर्थः ॥ १२४ ॥

देहभेदमिति, देहविशेषाणामेव कर्म्माधिकारानधिकारप्रयोजकत्वेन; हि । त्रयाणां—उत्तमाधममध्यमानां त्रिधा त्रिप्रकारा व्यवस्था । शरीरभेदव्यवस्थेति सूत्रार्थं प्रकारभेदं विभज्य दर्शयति—वीतरागाणामित्यादिना । फलसंन्यासेन फलनिरपेक्षत्वेन । कर्म्मोपभोगदेह इति उभयदेह इत्यस्य विवरणम् ॥ १२५ ॥

अनधिकारिणं कर्म्माधिकारप्रयोजकं । न किञ्चिदिति न पूर्व्वोक्तकर्म्मादिशरीराणा

বৃক্ষাদির দেহত্ব স্বীকার করিলে তদবচ্ছেদে কর্ম্মাধিকারিতা হয় না কেন? এই আশঙ্কায় বলিতেছেন—দেহ হইলেই যে তদবচ্ছেদে কর্ম্মাধিকারিতা হয়, তাহা নহে, যেহেতু ব্রাহ্মণাদি বিশিষ্ট দেহধারীরই কর্ম্মাধিকার শ্রুতি আছে, অতএব চণ্ডালাদি দেহধারীরও কর্ম্মাধিকার নাই; সুতরাং স্থাবর দেহধারীর কর্ম্মাধিকারিতার প্রসক্তি কি? ॥ ১২৪ ॥

দেহের ভেদ বলিতেছেন—বীতরাগী ব্যক্তিরা ফলনিরপেক্ষ হইয়া কর্ম্ম করেন বলিয়া তাঁহাদের কর্ম্মদেহ। পশ্বাদির উপভোগ দেহ, এবং কর্ম্মাধিকারী সংসারীদিগের কর্ম্ম ও উপভোগ দেহ ॥ ১২৫ ॥

কর্ম্মানধিকারের প্রযোজক চতুর্থদেহ বলিতেছেন—যোগিদিগের দেহ

नित्यां बुद्धिं निराकरोति—

न बुद्ध्यादिनित्यत्वमाश्रयविशेषेऽपि वह्निवत् ॥१२७

आश्रयविशेषेऽपि परानुमतेश्वरेऽपीत्यर्थः। व्याप्तिस्वरूपस्य व्यभिचारे सर्व्वत्र अनाश्वासः। तथा च आश्रयविशेषे चन्दनप्रभवस्य वह्नेः अनुष्णत्वम् स्यात् ॥ १२७ ॥

दूषणान्तरमाह—

आश्रयासिद्धेश्च ॥ १२८ ॥

ईश्वरस्यासत्त्वात्, आत्मनां च धर्माभावात्, प्रकृतिधर्माणां परिणामित्वात्, महदादीनामनित्यत्वात्। न च अनित्याश्रयाः धर्माः नित्याः भवितुमर्हन्ति, तस्मात् नित्यबुद्धेः आश्रयो नास्ति ॥ १२८ ॥

किमपीत्यर्थः। योगिनां शरीरं पूर्व्वोक्तशरीरत्रयाद्भिन्नलक्षणमित्याशयः। अत्र हेतुमाह— सर्व्वानधिकारादिति ॥ १२६ ॥

नित्या बुद्धिरिति न्यायमतसम्मता नित्या बुद्धिरित्यर्थः। व्याप्तिस्वरूपस्य स्वदृष्टादावेव प्रसिद्धस्य धूमत्वादावनलत्वादिव्याप्यत्वस्य व्यभिचारे अभावे, सर्व्वत्र व्याप्तौ अनाश्वासः अविश्वासः। अनाश्वासे दोषं दर्शयति—तथाचेति। तथाहि—प्रसिद्धव्याप्यत्वे अनित्यत्व-व्याप्ते यद्यभावः स्यात्तदा वह्नित्वेऽपि उष्णत्वव्याप्तेरभावः स्यादित्याशयः ॥ १२७ ॥

दूषणान्तरमिति बुद्धेर्नित्यत्वे दूषणान्तरमित्यर्थः। सूत्रतात्पर्य्यं विवृणोति—निगद-व्याख्यानेन "ईश्वरस्यासत्त्वा"दित्यादिना ॥ १२८ ॥

উক্ত ত্রিবিধ দেহের কোন প্রকারেরই অন্তর্ভূত নহে,—যেহেতু তাঁহাদের কর্ম্ম বা উপভোগ কিছুতেই অধিকার নাই ॥ ১২৬ ॥

ন্যায়মতসিদ্ধ বুদ্ধির নিত্যত্ব নিরাস করিতেছেন—পরানুমত ঈশ্বররূপ আশ্রয়বিশেষেও নিত্যত্ব হইতে পারেনা, কারণ যাহাতে যাহার ব্যাপ্তি স্থির আছে, তাহাতেই তাহার ব্যাপ্তির অভাব হইলে চন্দনরূপ আশ্রয়বিশেষে তৎ-প্রভব বহ্নিরও অনুষ্ণত্ব হইতে পারে ॥ ১২৭ ॥

বুদ্ধির নিত্যত্বপক্ষে আরও দোষ বলিতেছেন—স্বমতে ঈশ্বর নাই, পুরুষের কোনও ধর্ম্ম নাই, প্রকৃতি নিত্য হইলেও তাহার ধর্ম্মমাত্রই পরিণামী, মহদাদি

मणिमन्त्रौषधितप:प्रभावात् सिद्धिर्दृष्टा, न तु योगसिद्धयो दृष्टा इत्यत्राह—

योगसिद्धयोऽप्यौषधादिसिद्धिवन्नापलपनीया: ॥१२९

अणिमादिसिद्धिकायव्यूहपरपुरप्रवेशादयो दृष्टा:, ते च मन्त्रादिभ्य: चद्रसिद्धिप्रदेभ्य: असम्भवन्त: योगमेवावलम्बन्ते इति न अपलप-नीया: ॥ १२९ ॥

पृथग्भूतानां चैतन्यादर्शनेऽपि संहता: शरीरभावमापन्ना: चेतयिष्यन्ति इत्यत्राह—

न भूतचैतन्यं प्रत्येकानुपलब्धे: सांहत्ये च सांहत्ये च ॥ १३० ॥

यस्य स्वल्पा शक्तिरस्ति, तस्य समुदायान्महच्छक्तिर्जायते, यथा तन्तूनां स्वल्पशक्तिमतां समुदायात् गजबन्धनशक्तिर्दृश्यते । न तथा

सूत्रान्तरमवतारयति—मणीत्यादिना। सूत्रार्थं विवृणोति—अणिमेत्यादिना। अणिमादय: अणुत्वमहत्त्वादिलक्षणा योगशास्त्रोक्ता अष्टौ, कायव्यूह: एकदा बहुशरीरधारणं, परपुरप्रवेश: अवरुद्धपरदेहप्रवेश: प्रवेशो वा। अन्यत् सुगमम् ॥ १२९ ॥

पूर्वपक्षसिद्धिप्रातिकूल्यं न देहाकारपरिणतभूतचैतन्यवादिनो मतस्य निरासकं सूत्र-

---

সমস্তই অনিত্য, অনিত্যের ধর্ম্মও নিত্য হইতে পারে না, অতএব বুদ্ধির নিত্যত্ব স্বীকার করিলে তাহার আশ্রয়ই পাওয়া যায় না ॥ ১২৮ ॥

মণি, মন্ত্র, ঔষধ ও তপঃপ্রভাব বশতঃ সিদ্ধি হইতে দেখা যায়, কিন্তু যোগজ সিদ্ধিতে পরিদৃষ্ট হয় না (সুতরাং তাহা স্বীকার্য্য নহে) এই আশঙ্কায় বলিতেছেন—অণিমাদি অষ্টৈশ্বর্য্যসিদ্ধি কায়ব্যূহ পরদেহ প্রবেশ প্রভৃতি দেখা যায় (অর্থাৎ অল্পসময়ে প্রারব্ধ ভোগক্ষয়ের জন্য একদা বহু শরীর প্রভৃতি মন্ত্রাদি হইতে অসম্ভব, অতএব তাহাদের কারণ যোগকে বলিতে হইবে, অতএব তাহা অস্বীকার করা যায় না ॥ ১২৯ ॥

भूतानां पृथक् चैतन्यं दृष्टं, येन सांहत्ये चैतन्योद्भवः स्यात्। संहतत्वाविशेषात् मृतदेहस्यापि चैतन्यप्रसङ्गः। तस्मात् अन्य एव चेतनः। उक्तमपि अर्थं प्रसङ्गात्प्रसङ्गेन व्यवहितम् इति स्मारितं, तेन न पुनरुक्तम्॥ सांहत्ये च इति वीप्साध्यायपरिसमाप्तौ॥ १३०॥

इति कापिलसांख्यप्रवचनसूत्रवृत्तौ परपक्षनिर्जयाध्यायः पञ्चमः॥ *

अवतारयति पृथगित्यादिना। सूत्रतात्पर्य्यं विवृणोति—यथेत्यादिना, भूतचैतन्यस्य प्रथमाध्याय एव निराकृततया पौनरुक्त्याशङ्कामपाकरोति—उक्तमित्यादिना॥ १२०॥

इति श्रीकृष्णविद्यावितर्कसिद्धान्तभट्टाचार्य्यविरचितायां सांख्यसूत्रानिरुद्धवृत्तिटीकायां तत्त्वबोधिनीसमाख्यायां परपक्षनिर्जयाध्यायः पञ्चमः॥

পৃথগ্‌ভাবে চৈতন্য না দেখা গেলেও মিলিত অবস্থায় শরীরভাব প্রাপ্ত হইলে চৈতন্য স্বীকার করা যায়, এই আশঙ্কায় বলিতেছেন। পৃথক্ পৃথক্ ভাবে প্রত্যেক বস্তুতে চৈতন্য উপলব্ধি হয় না বলিয়া মিলিত অবস্থায়ও তাহা হইবে না। যে প্রত্যেক বস্তুর স্বল্প শক্তি আছে, তাহারই সমুদায়ে মহাশক্তি উৎপন্ন হয়, যেমন তন্তুর অল্প শক্তি আছে বলিয়াই উক্ত তন্তুর সম্মেলনে যে রজ্জু জন্মে, তাহার গজবন্ধনশক্তিরূপ মহাশক্তি উৎপন্ন হয়। ভূতগণের পৃথক্ চৈতন্য দেখা যায় না। যে মিলিত অবস্থায় চৈতন্য হইবে। এবং মিলিত অবস্থার তুল্যতা প্রযুক্ত মৃতদেহেরও চৈতন্যাপত্তি। অতএব অন্য একটী চেতন সিদ্ধ হয়। উক্ত অর্থ পূর্ব্বে উক্ত হইলেও প্রসঙ্গক্রমে ব্যবহিত হওয়ায় স্মরণ করাইয়াছেন। অতএব পুনরুক্ত হইল না। সাংহত্যে চ ইহার পুনরুক্তি গ্রন্থের অবসানসূচক, যেদে উক্ত নিয়ম দৃষ্ট হয়॥ ১৩০॥

एतदध्यायप्रतिपाद्यसंग्राहकश्लोका भाष्यकारीया यथा—

स्वसिद्धान्तविरुद्धार्थभाषिणो ये कुवादिनः।
पञ्चमे तान्निराकृत्य स्वसिद्धान्तो दृढीकृतः॥

षष्ठाध्यायारम्भः ।

सकलशास्त्रार्थे कथिते परपक्षनिर्णयानन्तरं तमेवार्थं सङ्कलय्य तन्त्रन्यायेन वक्तुं षष्ठाध्यायारम्भः ॥

अस्त्यात्मा नास्तित्वसाधनाभावात् ॥ १ ॥

स्पष्टम् ॥ १ ॥

सामान्येनात्मनि अविप्रतिपत्तेर्विशेषनिरूपणायाह—

देहादिव्यतिरिक्तोऽसौ वैचित्र्यात् ॥ २ ॥

देहाभेदपक्षे बाल्यकौमारयौवनवार्द्धकदेहभेदात् अनेकात्मत्व-

षष्ठाध्यायावतरणिकामाह—सकलेत्यादिना। कथित इति अध्यायचतुष्टयेनेत्यादिः। परपक्षनिर्णयानन्तरं—पञ्चमाध्याये परपक्षनिराकरणप्रसाधनानन्तरं, तमेव—पूर्वपूर्वाध्याये-व्यक्तमेव। एतेन षष्ठाध्याये पुनरुक्तत्वं न दोषावहमिति सूचितम। तथाचोक्तं भाष्य-कारेण—"उक्तार्थानां हि तन्त्रान्ते विस्तरे कृते शिष्याणामसन्दिग्धाविपर्य्यस्तो दृढ़तरो बोध उत्पद्यत इत्यतः स्थूणानिखननन्यायादनुक्तयुक्त्युपन्यासाच्च नात्र पौनरुक्त्यं दोषाये"ति।

स्पष्टमिति, जानामीत्येवं प्रतीयमानतया सामान्यत आत्मा सिद्ध एवास्ति, नास्तित्वसाधना-भावात्—बाधकप्रमाणाभावादिति सूत्रविवरणं व्यक्तमित्यर्थः ॥ १ ॥

सूत्रान्तरमवतारयति—सामान्येनेत्यादिना। सूत्रे वैचित्र्यादिति अपरिणामित्वादिदेह-वैधर्म्यादित्यर्थः। आत्मनो देहाभिन्नत्ववादिनो मते दोषं दर्शयति—देहाभेदेत्यादिना। श्रुति-

অধ্যায়চতুষ্টয় দ্বারা সমস্ত সাংখ্যশাস্ত্রপ্রতিপাদ্য বিষয়গুলি কথিত হইলে পঞ্চমাধ্যায়ে পরপক্ষনিরাকরণসাধন করিয়া সাংখ্যশাস্ত্রপ্রতিপাদ্য পূর্ব্বোক্ত বিষয়গুলিই সঙ্কলন করতঃ বিস্তৃতভাবে বলিবার জন্য ষষ্ঠ অধ্যায়ের আরম্ভ।

নাস্তিত্বসাধক প্রমাণ নাই বিধায় জানামি ইত্যাদিরূপে প্রতীয়মান আত্মা আছে ॥ ১ ॥

সামান্যতঃ আত্মার অস্তিত্বে কোনও বিপ্রতিপত্তি নাই, সুতরাং বিশেষরূপে নিরূপণের জন্য বলিতেছেন—অপরিণামিত্বাদি দেহের বৈধর্ম্যবশতঃ আত্মা

प्रसङ्गः, मृते देहनाशात् तस्य जन्मान्तरवैचित्र्यानुपपत्तिः। श्रुतिश्च—

अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः।
स वेत्ति सर्वं न हि तस्य वेत्ता तमाहुरग्र्यं पुरुषं पुराणम्॥ २॥

इत्यन्तरमाह—

षष्ठीव्यपदेशादपि॥ ३॥

मम देह इति ज्ञानमस्ति, भेदे च षष्ठी श्रूयते। स्थूलोऽहम् इति सामानाधिकरण्यमस्तीति चेत्, न, देहे प्रत्युपभोगात् तन्निमित्तोऽयं गौणः प्रत्ययः॥ ३॥

श्रुतिश्चे ति आत्मनो देहव्यतिरिक्तत्वप्रतिपादिका श्रुतिश्चेत्यर्थः। तथा चानया श्रुत्या पुरुषस्य पादादिरहितत्वोत्कीर्त्तनाच्च सिद्धो देहादिव्यतिरिक्त आत्मे ति भावः॥ २॥

हेत्वन्तरमिति, आत्मनो देहव्यतिरिक्तत्वे कारणान्तरमित्यर्थः। देहव्यतिरिक्तत्वे हेतुभूतं षष्ठीव्यपदेशं दर्शयति—ममेत्यादिना। नन्वस्तु तथा व्यपदेशः, ततः किमित्यत आह—भेदे च षष्ठी श्रूयत इति, तथाच षष्ठ्या अन्यथानुपपत्त्या देहपुरुषयोर्भेदः अवश्यमङ्गीकर्त्तव्य इति भावः। नन्वेवमभेदबोधकव्यपदेशस्य का गतिरिति शङ्कामपनयति—स्थूल इत्यादिना। देहे प्रत्युप-

---

দেহ হইতে ভিন্ন। আত্মা দেহের অভিন্ন হইলে বাল্য, কৌমার, যৌবন, বার্দ্ধক্যাদি দেহভেদে অনেক আত্মা স্বীকার করিতে হয়, পরন্তু মরণ হইলেই দেহের নাশ, সুতরাং জন্মান্তরীয় বৈচিত্র্যের অর্থাৎ জন্মান্তরীয় কর্ম্মানুযায়ী ভোগের তারতম্যের অনুপপত্তি হয়। "পাণিপাদরহিত হইয়াও যিনি গমন ও গ্রহণশীল, চক্ষুরহিত হইয়াও যিনি দর্শনশীল, কর্ণরহিত হইয়াও যিনি শ্রবণশীল, তিনিই সমস্ত জানেন, তাঁহাকে জানিতে পারে, এমন কেহ নাই, এবং তাঁহাকেই শ্রেষ্ঠ পুরাণ পুরুষ বলে" এই শ্রুতিও পুরুষের পাদরহিতত্বাদিদ্বারা দেহভিন্নত্ব কীর্ত্তন করিতেছে। সুতরাং আত্মা যে দেহ হইতে ভিন্ন ইহাই সিদ্ধান্ত॥ ২॥

আত্মার দেহব্যতিরিক্তত্বে আরও হেতু এই যে, "আমার দেহ" এইরূপ ভেদপ্রতীতি আছে। কারণ ভেদেই ষষ্ঠী বিভক্তি হইয়া থাকে। "আমি

शिलापुत्रकस्य शरीरम् इति अभेदेऽपि षष्ठीदर्शनात् न भेद इत्यत आह—

न शिलापुत्रवद्धर्मिग्राहकमानबाधात् ॥ ४ ॥

न, तत्र प्रत्यक्षेणैव अभेदप्रतीतेः षष्ठी बाधिता इति गौणः प्रयोगः । मुख्यसम्भवात् गौणोऽत्र नास्ति ॥ ४ ॥

सुखोत्कर्षात् कृतकृत्यता स्यात् इत्यत आह—

अत्यन्तदुःखनिवृत्त्या कृतकृत्यता ॥ ५ ॥

सुखोत्कर्षस्यापि क्षयित्वात् न कृतकृत्यता । अत्यन्तदुःखनिवृत्तिस्तु तथा, अपुनरावृत्तेः ॥ ५ ॥

भोगात्—देहावच्छेदेनैव भोगात् । तथाच वैपरीत्यमेव कथं न भवतीति शङ्कनीयं, अभेदव्यपदेशस्य दर्शितश्रुतिविरोधेनैव गौणत्वौचित्यादिति ॥ ३ ॥

सूत्रान्तरमवतारयति—शिलेत्यादिना । तत्र—शिलापुत्रस्य शरीरमित्यादौ, अभेदप्रतीतेः—शिलापुत्रशरीरयोरभेदप्रत्ययात्, षष्ठी—भेदबोधिका षष्ठी । अत्र—मम देह इत्यत्र मुख्यसम्भवात् धर्मिग्राहकप्रमाणबाधाभावेन भेदार्थकषष्ठ्याः प्रयोगसम्भवात् गौणः—अभेदार्थकषष्ठ्याः प्रयोगो नास्तीत्यर्थः ॥ ४ ॥

सूत्रान्तरमवतारयति—सुखोत्कर्षादित्यादिना । कृतकृत्यता—परमपुरुषार्थता । तथा—परमपुरुषार्थः ॥ ५ ॥

স্থূল” ইত্যাদি অভেদাবগাহিপ্রত্যয়গুলি দেহাবচ্ছেদেই উপভোগ হয় বলিয়া তন্নিবন্ধন গৌণ, অর্থাৎ আমার দেহ স্থূল ইহাই ঐ প্রতীতির বিষয় ॥ ৩ ॥

শিলাপুত্রের শরীর ইত্যাদি স্থলে অভেদেও ষষ্ঠীপ্রয়োগ দেখা যায়, এই আশঙ্কায় বলিতেছেন—“শিলাপুত্রের শরীর” এস্থলে প্রত্যক্ষ দ্বারাই শিলাপুত্র ও তৎশরীরের অভেদজ্ঞান হয় বলিয়া ভেদবোধক ষষ্ঠী বাধিত, সুতরাং অগত্যা অভেদবোধক ষষ্ঠীদ্বারাই তাদৃশ প্রয়োগ গৌণ। কিন্তু “আমার দেহ” এস্থলে প্রত্যক্ষাদি কোনও বাধক প্রমাণ না থাকায় ভেদার্থক ষষ্ঠীর প্রয়োগের সম্ভববশতঃ ষষ্ঠীর অর্থ অভেদ হইতে পারে না ॥ ৪ ॥

সুখের উৎকর্ষ হইতেই কৃতকৃত্যতা হউক, এই আশঙ্কায় বলিতেছেন—

सुखाभावस्यापि विद्यमानत्वात् पुरुषार्थत्वम् इत्यत्राह—

यथा दुःखात् क्लेशः पुरुषस्य, न तथा सुखादभिलाषः ॥ ६ ॥

सुखे दुःखस्य अवश्यम्भावात्। यदि सुखे सति दुःखम् अवश्यं भवेत्, कः सुखम् अभिलषेत्। तस्मात् दुःखबहुलत्वात् दुःखनिवृत्तिरेव पुरुषार्थः ॥ ६ ॥

सुखस्य हेयत्वमाह—

कुत्रापि कोऽपि सुखी न ॥ ७ ॥

स्वयम् एव चिन्त्यताम् ॥ ७ ॥

सूत्रान्तरावतरणिकामाह—सुखाभावः स्यापीत्यादिना, विद्यमानत्वादिति, आत्यन्तिकदुःखनिवृत्तिरूपमोक्षदशायामित्यादिः, अपुरुषार्थत्वमिति आत्यन्तिकदुःखनिवृत्तेरपि न पुरुषार्थत्वमित्यर्थः। सुखस्य अप्राप्तिप्रार्थनीयत्वम् तुल्यायव्ययत्वादिति भावः। सूत्रतात्पर्यं विवृणोति—सुखे इत्यादिना। उपसंहरति—तस्मादित्यादिना। दुःखबहुलत्वादिति सुखस्येत्यादिः। तथाच सूत्रे विषयविधया हेतुतया पञ्चमी, क्लेशस्य द्वेषः, तथाहि यथा दुःखविषयकः पुरुषस्य द्वेषः, न तथा सुखविषयकः अभिलाष इति सूत्रार्थः ॥ ६ ॥

अत्र नञ्‌रहित एव सूत्रपाठो भाष्यसम्मतः, तथात्वे अनन्तप्राणिनां मध्ये कुत्रापि स्वर्गादौ स्थाने कोऽपि स्वल्प एव देवादिः सुखीभवति इति हेतोरपि दुःखनिवृत्तेरेव पुरुषार्थतेति सूत्रार्थः ॥ ७ ॥

সুখোৎকর্ষেরও নাশ আছে, সুতরাং তদ্দ্বারা পুরুষার্থতা হইতে পারে না, পুনরাবৃত্তি না থাকায় অত্যন্ত দুঃখনিবৃত্তিই পুরুষার্থ ॥ ৫ ॥

দুঃখনিবৃত্তিকালে সকলের অভিলষিত সুখেরও অভাব থাকে বলিয়া দুঃখনিবৃত্তিও পুরুষার্থ হইতে পারে না, এই আশঙ্কায় বলিতেছেন—সুখমাত্রেই দুঃখ অবশ্যম্ভাবি, সুখমাত্রেই যদি দুঃখ অবশ্যম্ভাবি, তবে সেই সুখে কাহার অভিলাষ হয়? অতএব সুখের দুঃখবহুলত্বনিবন্ধন দুঃখনিবৃত্তিই পুরুষার্থ ॥ ৬ ॥

प्रत्यक्षमेव वनितादीनां सुखहेतुत्वमित्यत आह—

तदपि दुःखशबलमिति दुःखपक्षे निक्षिपन्ते विवेचकाः ॥ ८ ॥

स्वर्गादीनाम् अर्जने क्षयादौ च दुःखम् इति स्वसंवेदनमेव प्रमाणम् इति ॥ ८ ॥

सुखमेव परमपुरुषार्थः, न तु अभाव इत्यत आह—

सुखलाभाभावादपुरुषार्थत्वमिति चेन्नैवं द्वैविध्यात् ॥ ९ ॥

रागिणां सुखं, वीतरागाणां दुःखाभाव इति ॥ ९ ॥

तदपि—अङ्गनालिङ्गनादिजनितसुखमपि दुःखशबलं दुःखविमिश्रितम् इति हेतोः दुःखपक्षे—दुःखकोटौ विवेचकाः—सुखदुःखविचारसमर्थाः निक्षिपन्ति इति सूत्रार्थः । स्वर्गादीनामपि दुःखशबलत्वं समर्थयति—स्वर्गेत्यादिना । तथाच योगसूत्रम्—"परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च सर्व्वमेव दुःखं विवेकिनः" इति ॥ ८ ॥

सूक्तोक्तं द्वैविध्यं दर्शयति—रागिणामित्यादिना । तथाच रागिणां सुखस्य पुरुषार्थत्वेऽपि वीतरागाणां दुःखाभाव एव पुरुषार्थ इति भावः ॥ ९ ॥

নিজে চিন্তা করিলেই বুঝাযায়, কোন স্থানে কোন ব্যক্তিও সর্ব্বতোভাবে সুখী নহে, সুতরাং সুখ হেয় ॥ ৭ ॥

বনিতাদির সুখহেতুত্ব প্রত্যক্ষসিদ্ধ, এই আশঙ্কায় বলিতেছেন—বনিতাদি জন্য সুখও দুঃখ বিমিশ্রিত, স্বর্গাদি সুখেরও অর্জনে এবং বিনাশে দুঃখ ইহাতে নিজজ্ঞানই প্রমাণ, অতএব বিবেকী ব্যক্তিগণ সমস্ত সুখকেই দুঃখকোটিতে নিক্ষেপ করিয়া থাকেন ॥ ৮ ॥

রাগী ব্যক্তিদের পক্ষে সুখ পুরুষার্থ হইলেও বীতরাগ ব্যক্তিদের পক্ষে দুঃখনিবৃত্তিই পুরুষার্থ ॥ ৯ ॥

বিশেষগুণোচ্ছিত্তি: মুক্তি: ইত্যত্রাহ—

নির্গুণত্বমাত্মনোঽসঙ্গত্বাদিশ্রুতে:॥ ১০॥

বিশেষগুণনিষেধাৎ সামান্যগুণস্বীকার:। তথা চ অসঙ্গাদি-শ্রুতিবিরোধ: স্যাৎ॥ ১০॥

যদি অসঙ্গ: পুরুষ:, কথং ধর্মাৎ স্বর্গ: অধর্মাৎ নরক:? ইত্যত্রাহ—

পরধর্মত্বেঽপি তৎসিদ্ধিরবিবেকাৎ॥ ১১॥

প্রকৃতিধর্মত্বেঽপি প্রকৃতিপুরুষাবিবেকাৎ তচ্ছায়াপত্ত্যা আত্মন: স্বর্গাদিপ্রাপ্তি: ইতি অভিমান:॥ ১১॥

পক্ষতাখ্যায়পক্ষসমাপ্তিসূত্রং ধীকাপ্রায়োঽয়মর্থ:। ভাষ্যকারস্তু পুরুষস্য দু:খনিবৃত্তের্নিত্য-সিদ্ধতয়া কথং তস্যা: পুরুষার্থত্বমিতি পূর্ব্বপক্ষপরতয়া সূত্রমিদং ব্যাখ্যায় পরসূত্রং তৎসমাধান-পরতয়া ব্যাখ্যাতবানিত্যনুসন্ধেয়ম্॥ ১০॥

সূত্রান্তরমবতারয়িতুং প্রকৃতং—যদীত্যাদিনা। সূত্রতাৎপর্য্যং বিবৃণোতি—প্রকৃতীত্যাদিনা। তথাচ পুরুষস্য ধর্মাদিনা স্বর্গাদিপ্রাপ্তেরবাস্তবিকতয়া নাসঙ্গত্বাদিশ্রুতিবিরোধ ইতি ভাব:॥ ১১॥

বিশেষ গুণের বিনাশই মুক্তি হইবে, এই আশঙ্কায় বলিতেছেন—অসঙ্গাদি শ্রুতি বশতঃ আত্মা নির্গুণ, বিশেষ গুণের উচ্ছেদকে মুক্তি বলিলে সামান্য-গুণের স্বীকার প্রতিপন্ন হয়, অথচ সামান্য গুণ স্বীকার করিলে অসঙ্গাদি শ্রুতি-বিরোধ হয়, অতএব বিশেষ গুণের উচ্ছেদ মুক্তি নহে॥ ১০॥

যদি পুরুষ অসঙ্গ, তবে তাহার ধর্ম্ম হইতে স্বর্গ ও অধর্ম্ম হইতে নরক হয় কি প্রকারে? এই আশঙ্কায় বলিতেছেন—যদ্যপি স্বর্গাদি প্রকৃতির ধর্ম্ম হইলেও প্রকৃতি পুরুষের অভেদজ্ঞানবশতঃ প্রকৃতিপ্রতিবিম্বিত স্বর্গাদি প্রাপ্তির অভিমান হয়। বস্তুতঃ স্বর্গাদি পুরুষের নহে, সুতরাং অসঙ্গ শ্রুতির বিরোধ নাই॥ ১১॥

अविवेकः किं सादिः अनादिर्वा इत्यत्राह—

अनादिरविवेकोऽन्यथा दोषद्वयप्रसक्तेः ॥ १२ ॥

यदि सादिरविवेको भवेत्, तदुत्पत्तेः पूर्वं मोक्षः स्यात्, तदुत्पत्तौ च बन्धः इति मुक्तस्य बन्धः इति एको दोषः। अविवेकप्रागभावस्यापि विद्यमानत्वात् मुक्तिसिद्धौ अविवेकनाशार्थमनुष्ठानं व्यर्थम् इति द्वितीयो दोषः ॥ १२ ॥

अविवेकः अनादित्वात् किं नित्यः अनित्यो वा इत्यत्राह—

न नित्यः स्यादात्मवदन्यथानुच्छित्तिः ॥ १३ ॥

नित्यः द्विधा, कूटस्थनित्यः आत्मा, परिणामिनित्या प्रकृतिः। न द्वयम् अपि अविवेकः, किन्तु अनित्यः एव नाशात्। अन्यथा नित्यत्वे अनुच्छित्तिः। आत्मवदिति उपलक्षणं प्रकृतिवदित्यपि द्रष्टव्यम् ॥ १३ ॥

प्रकृतीतात्संसर्गकमुभयविषयकं ज्ञानमविवेकः, स च प्रवाहरूपेणानादिर्नित्यश्च, प्रकृतौ वासनारूपेण तिष्ठतीति सांख्यसिद्धान्तः। तस्य सादित्वपक्षे प्रसक्तं दोषद्वयं विशद्य दर्शयति—यदीत्यादिना ॥ १२ ॥

अविवेके नित्यत्वाभावं व्यवस्थापयिष्यन् द्विविधं नित्यत्वं प्रागुपाद्य तदुभयाभावं दर्शयति—नित्यो द्विविधेत्यादिना। प्रकृतेरपि नित्यतया दृष्टान्तविधया तदनुल्लेखेन सूत्रकृतो न्यूनतां परिहरति—आत्मवदित्यादिना ॥ १३ ॥

অবিবেক সাদি কি অনাদি এই আশঙ্কায় বলিতেছেন—অবিবেক অনাদি, কারণ সাদি হইলে দুইটি দোষের প্রসক্তি হয়। তাহার এক দোষ এই যে, অবিবেক সাদি হইলে অবিবেকোৎপত্তির পূর্ব্বে মুক্তি ও অবিবেকোৎপত্তির পরে পুনরায় বন্ধ, সুতরাং মুক্তেরও বন্ধাপত্তি। দ্বিতীয় দোষ এই যে, অবিবেকের প্রাগভাবের বিদ্যমানতাবশতঃ মুক্তির সিদ্ধি হবে অবিবেকনাশের জন্য অনুষ্ঠান ব্যর্থ হয়। ১২।

অবিবেক যদি অনাদি, তবে নিত্য কি না? এই শঙ্কায় বলিতেছেন—নিত্য দুই প্রকার, আত্মা অপরিণামী নিত্য, প্রধান পরিণামী নিত্য; অবিবেক

अविवेकनाशः केन इत्यत्राह—

प्रतिनियतकारणनाश्यत्वमस्य ध्वान्तवत् ॥ १४ ॥

यथा ध्वान्तस्य नाशकः प्रकाशः इति ॥ १४ ॥

अत्र कः नाशकः इत्यत्राह—

अत्रापि प्रतिनियमोऽन्वयव्यतिरेकात् ॥ १५ ॥

अव्यभिचारात् विवेकः एव नाशकः इति ॥ १५ ॥

किम् अविवेकात् बद्धः आत्मा, अथ अन्यदपि बन्धकारणमस्ति इत्यत्राह—

प्रकारान्तरासम्भवादविवेक एव बन्धः ॥ १६ ॥

व्यक्तम् ॥ १६ ॥

प्रतिनियतं—श्रुतिस्मृत्यादिसिद्धं अन्वयव्यतिरेकसिद्धं यत् अविवेकनाशकारणं तन्नाश्यत्वं अस्य—बन्धकारणस्याविवेकस्येति सूत्रप्रतीकार्थं स्पष्टतयानभिधाय ध्वान्तवदिति दृष्टान्तं विवृणोति—यथेत्यादिना ॥ १४ ॥

अविवेकस्य नियतं नाशकारणमभिधास्यन् पृच्छति—अत्र को नाशक इति । अन्धकारालोकयत्प्रकृतेऽपि प्रतिनियमः, अविवेकनाशं प्रति विवेकत्वेन कारणत्वमिति नियमः अस्तीति शेषः, अत्र हेतुमाह—अन्वयव्यतिरेकादिति । अस्यैवार्थमाह—अव्यभिचारादिति, उपसंहारव्याजेन सूत्रकाराभिमतं नियतकारणं स्पष्टं उल्लिखति—विवेक एव नाशक इति ॥ १५ ॥

व्यक्तमिति, प्रकारान्तरस्य—स्वाभाविकत्वादेः असम्भवात्—असम्भवस्य प्रथमपादे एवोक्तत्वात् अविवेक एव बन्धः—दुःखयोगाख्यबन्धकारणमिति सूत्रविवरणं स्पष्टमित्यर्थः ॥ १६ ॥

প্রকৃতি বা পুরুষের ন্যায় কোন প্রকার নিত্যই নহে, কিন্তু নাশ হয় বিধায় অনিত্য। নিত্য হইলে তাহার নাশ হইতে পারে না ॥ ১৩ ॥

অন্ধকারের নাশক যেমন নিয়ত আলোক, সেইরূপ অবিবেকও নিয়ত কারণনাশ্য ॥ ১৪ ॥

সেই নিয়ত নাশক কে? এই প্রশ্নে বলিতেছেন—অন্ধকার ও আলোকের ন্যায় প্রকৃতেও নিয়ম আছে, অর্থাৎ অব্যভিচারবশে বিবেকই অবিবেকের নাশক ॥ ১৫ ॥

मुक्तेः कार्य्यत्वात् नाशे पुनः बन्धः स्यादत्राह—

न मुक्तस्य पुनर्बन्धयोगोऽप्यनावृत्तिश्रुतेः ॥ १७ ॥

श्रुतिश्च 'आत्मा ज्ञातव्यः प्रकृतितः विविक्तव्यः न पुनरावर्त्तते' इति। न्यायश्च 'भावकार्य्यस्यैव नाशात्' दुःखनिवृत्तिस्तु अभावरूपा इति ॥ १७ ॥

विपक्षे दोषमाह—

अपुरुषार्थत्वमन्यथा ॥ १८ ॥

विवेकः पुरुषार्थः ॥ १८ ॥

सूत्रे न केवलं विवेकान्मुक्तिरिति अप्यर्थः। अभावरूपेति, तथाच अभावरूपकार्य्यस्य न विनाशसम्भव इति भावः ॥ १७ ॥

अन्यथा—मुक्तस्यापि पुनर्बन्धे अपुरुषार्थत्वं—मोक्षस्यापि परमपुरुषार्थत्वभावः स्यादिति सूत्रार्थः। इत्थं पुरुषार्थपदं पुरुषार्थसाधकपरं, विवेकपदं वा विवेकसाध्यात्यन्तिकदुःखनिवृत्तिपरम् ॥ १८ ॥

অবিবেক বশতঃই আত্মা বদ্ধ কি বন্ধের অন্য কোনও কারণ আছে? এই আশঙ্কায় বলিতেছেন—অন্য কোনও কারণের অসম্ভব বিধায় অবিবেকই বন্ধের কারণ ॥ ১৬ ॥

কার্য্যত্ব নিবন্ধন মুক্তির নাশে মুক্তেরও পুনরায় বন্ধ হয় না কেন? এই প্রশ্নে বলিতেছেন—"প্রকৃতি হইতে বিভক্তরূপে আত্মা জ্ঞাতব্য এবং সেই বিবেকজ্ঞানী ব্যক্তির পুনরাবৃত্তি নাই" এই শ্রুতি অনুসারেই নির্দ্ধারিত হইতেছে যে, বিবেক জ্ঞান হইতেই পুরুষ মুক্ত হয় এবং মুক্ত পুরুষের পুনরায় বন্ধ নাই। পরন্তু ভাবকার্য্যেরই নাশ নিয়ত, সুতরাং আত্যন্তিক দুঃখ-নিবৃত্তিরূপ অভাব কার্য্যের নাশ হইতে পারে না ॥ ১৭ ॥

মুক্ত ব্যক্তিরও যদি পুনরায় বন্ধ হয়, তবে মোক্ষেরও পরমপুরুষার্থতা হইতে পারে না। অতএব অবিনাশী আত্যন্তিক দুঃখনিবৃত্তিই পরম পুরুষার্থ ॥ ১৮ ॥

दूषणान्तरमाह—

अविशेषापत्तिरुभयोः ॥ १९ ॥

संसारिमुक्तयोः बन्धयोगाविशेषात् ॥ १९ ॥

व्याध्यादयः योगान्तरायाः। तथा च पतञ्जलिः—व्याधिस्त्यान-संशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपाः ते अन्तरायाः। व्याधिः ज्वरादिः, स्त्यानम् अकर्मण्यता, संशयः उभयकोटिस्पृग्ज्ञानं, प्रमादः समाधौ अनवधानम्, आलस्यं कायगुरुत्वं, अविरतिः विषयतृष्णा, भ्रान्तिदर्शनं मिथ्याज्ञानं, अलब्धभूमिकत्वं समाधिभूमेः अलाभः। अनवस्थितत्वं लब्धभूमेः भ्रंशित्वम्। मुक्तौ किम् एषां ध्वंसमात्रं, धर्मान्तरप्राप्तिः वा इत्यत आह—

मुक्तिरन्तरायध्वस्तेर्न परः ॥ २० ॥

धर्मान्तरपक्षे कूटस्थत्वप्रच्यवः इति ॥ २० ॥

दूषणान्तरमिति मुक्तस्य पुनर्बन्धे इत्यादिः। संसारिमुक्तयोरिति उभयोरित्यस्य विवरणम्। अविशेषापत्तिरित्यत्र हेतुं पूरयति—बन्धयोगविशेषादिति। तथाहि भाविबन्धसाम्ये न संसारिमुक्तयोर्विशेषाभावे मोक्षस्य पुरुषार्थत्वं न सम्भवतीति भावः ॥ १९ ॥

सूत्रान्तरमवतारयति—व्याध्यादय इत्यादिना। एषां व्याध्यादीनां। अन्तरायध्वस्तेः पूर्वोक्तान्तरायाणां विनाशात्, परः—अतिरिक्तः न मुक्तिरिति सूत्रार्थः, वैपरीत्ये दोषं दर्शयति—

মুক্ত ব্যক্তির যদি পুনরায় বদ্ধ হয়, তবে বন্ধ যোগের অবিশেষবশতঃ সংসারী ও মুক্ত ব্যক্তির অবিশেষাপত্তি হয়, সুতরাং মোক্ষেরও পুরুষার্থতা হইতে পারে না ॥ ১৯ ॥

ব্যাধিপ্রভৃতি যোগের অন্তরায়। ভগবান্ পাতঞ্জলিমুনিও বলিয়াছেন— ব্যাধি (জ্বরাদি) স্ত্যান (অকর্ম্মণ্যতা) সংশয় (ভাবাভাবপ্রকারক জ্ঞান) প্রমাদ (সমাধি বিষয়ে অনবধান) আলস্য (শরীরের গুরুত্ব) অবিরতি (বিষয়ের তৃষ্ণা) ভ্রান্তিদর্শন (মিথ্যাজ্ঞান) অলব্ধভূমিকত্ব (সমাধিভূমির

अभ्युपगम्यापि आह—

तथाप्यविरोधः ॥ २१ ॥

भवतु धर्मयोगः, तथापि न काचित् क्षतिः। सुखी अनावृत्तिः उक्ता, सा धर्मान्तरयोगेऽपि अस्ति इति ॥ २१ ॥

श्रवणमननिदिध्यासनं किं सर्वपुरुषसाधारणं न वा इत्यत्राह—

अधिकारित्रैविध्यान्न नियमः ॥ २२ ॥

त्रिविधाः तु अधिकारिणः मृदुमध्याधिमात्राः। अधिमात्रस्य/

धर्मेत्यादिना, धर्मान्तरपक्षे—मुक्तेरन्तरायध्वंसातिरिक्तधर्मविशिष्टत्वपक्षे कूटस्थत्वप्रच्यवः—पुरुषस्यापरिणामिनित्यत्वहानिः स्यादिति शेषः ॥ २० ॥

अभ्युपगम्यापीति वस्तुगत्या स्वमते पुरुषे धर्मादियोगाभावात् "तुष्यतु दुर्जनः" इति न्यायेन धर्मयोगं स्वीकृत्यापीत्यर्थः। अतएव भाष्यकारः सूत्रमिदमन्यथा व्याख्यातवान्, तथाहि भाष्यं" नन्वेवं बन्धमोक्षयोर्मिथ्यात्वे मोक्षस्य पुरुषार्थताप्रतिपादकश्रुत्यादिविरोध इत्याह—तथाप्य-विरोध इति। तथापि अन्तरायध्वंसस्य मोक्षत्वेऽपि पुरुषार्थत्वाविरोधः इत्यर्थः। दुःखयोग-वियोगावेव हि पुरुषे कल्पितौ, न तु दुःखभोगोऽपि, भोगस्य प्रतिबिम्बरूपेण दुःखसम्बन्धस्य इष्यतः प्रतिबिम्बरूपेण दुःखनिवृत्तेर्यथायथं पुरुषार्थः। स एवान्तरायध्वंसः। तादृशस्य मोक्षो यथार्थ एवेति इति भावः" ॥ २१ ॥

অলাভ) অনবস্থিতত্ব (মনে মনে লব্ধভূমির ভ্রংশিত্ব) এই সকল চিত্তের বিক্ষেপক, সুতরাং যোগের অন্তরায়। মুক্তি অবস্থাতে কি কেবল এই সমস্ত অন্তরায়ের ধ্বংসমাত্রই হয়, অথবা অন্য কোনও ধর্মান্তরের প্রাপ্তি হয়? এই প্রশ্নে বলিতেছেন—মুক্তি অন্তরায় ধ্বংসের অতিরিক্ত আর কিছুই নহে, কারণ অতিরিক্ত কোনও ধর্ম হইলে পুরুষের অপরিণামিনিত্যত্বের হানি হয় ॥ ২০ ॥

"তুষ্যতু দুর্জনঃ" ন্যায় স্বীকার করিয়া বলিতেছেন—মোক্ষাবস্থায় ধর্ম যোগ হইলেও কোন ক্ষতি নাই, কারণ মুক্তিতে যে অনাবৃত্তি উক্ত হইয়াছে, ধর্মান্তর যোগ হইলেও সেই অনাবৃত্তি থাকিবে। (বস্তুতঃ সাংখ্যমতে মুক্তিতে ধর্মান্তর-যোগ নাই) ॥ ২ ॥

श्रवणमात्रात् मुक्तिः, मध्यमस्य द्वाभ्यां, मन्दस्य त्रिभिः। न सर्वं सर्वस्य ॥ २२ ॥

पक्षान्तरम् आह—

दार्ढ्यार्थमुत्तरेषाम् ॥ २३ ॥

उत्तरेषां—मन्दानां दार्ढ्यार्थं साधनत्रयम् उक्तम्। श्रुतिरपि 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्यश्च' (बृह०, उप०, २अध्या, ४ब्रा, ०५मन्त्र) इति ॥ २३ ॥

स्वस्तिकादीनां मध्ये किमासनम् अनुष्ठेयम् इत्यत आह—

स्थिरसुखमासनमिति न नियमः ॥ २४ ॥

स्थैर्यार्थं सुखार्थं च आसनानुष्ठानं तदेव अस्तु व्यापकत्वात् इति ॥ २४ ॥

सूत्रान्तरमवतारयितुं शङ्कते—श्रवणेत्यादिना। अधिकारित्रैविध्यं, दर्शयति—त्रिविधा इत्यादिना। मृदु मध्याधिमात्राः—अधममध्यमोत्तमाः द्वाभ्यां श्रवणमननाभ्यां त्रिभिः श्रवणमननिदिध्यासनैः। न नियम इत्यस्यार्थमाह—न सर्वं सर्वस्येति, सर्वं श्रवणादित्रयं सर्वस्यैव कर्त्तव्यमिति न नियम इत्यर्थः ॥ २२ ॥

पक्षान्तरमिति श्रवणादित्रयमेव मन्दानामवश्यं कर्त्तव्यमिति नियमरूपपक्षान्तरमित्यर्थः, दार्ढ्यार्थं तत्त्वज्ञानस्य दृढत्वार्थं शेषं पूरयति—साधनत्रयमुक्तमिति। अत्रार्थे श्रुतिं प्रमाणयति—श्रुतिरपीति ॥ २३ ॥

শ্রবণ, মনন ও নিদিধ্যাসন সমস্ত পুরুষেরই অবশ্য কর্ত্তব্য কিনা? এই আশঙ্কায় বলিতেছেন—অধম, মধ্যম ও উত্তমভেদে অধিকারী তিন প্রকার। তন্মধ্যে উত্তমাধিকারীর শ্রবণমাত্রেই মুক্তি হইবে। মধ্যমাধিকারীর শ্রবণ ও মনন দ্বারা মুক্তি হইবে। অধমাধিকারীর শ্রবণ, মনন ও নিদিধ্যাসন দ্বারা মুক্তি হইবে। সুতরাং সমস্তই সকলের কর্ত্তব্য এরূপ নিয়ম নাই ॥ ২২ ॥

মন্দাধিকারীর পক্ষে তত্ত্বজ্ঞানের দৃঢ়তার জন্য শ্রবণাদি সাধনত্রয়ই অবশ্য কর্ত্তব্য। শ্রুতি বলিয়াছেন—"আত্মার শ্রবণ, মনন ও নিদিধ্যাসন অবশ্য কর্ত্তব্য ॥ ২৩ ॥

एकाग्रतया विषयचिन्तनं ध्यानं, निर्विषयं वा मनः ध्यानम् ? इत्यत्राह—

ध्यानं निर्विषयं मनः ॥ २५ ॥

समाधौ अत्र ध्यानशब्दः इति ॥ २५ ॥

वृत्तिनिरोधतुल्यत्वे सुषुप्तिसमाध्योः को विशेषः इत्यत्राह—

उभयथाप्यविशेषश्चेन्नैवमुपरागनिरोधाद्विशेषः ॥२६॥

उपरागः विषयवासना । तन्निरोधः समाधौ इति शेषः ॥ २६ ॥

सूत्रान्तरमवतारयति—स्वस्तिकेत्यादिना . तद्दैवेति यच्चैव यदासनं रोचते, तच्च तदैवेत्यर्थः, व्यापकत्वात् । स्थैर्यार्थत्वस्य सुखार्थत्वस्य च सर्व्वासनसाधारणत्वात्, तथाच न नियमः—आसने स्वस्तिकादिनियमो नास्तीत्यर्थः ॥ २४ ॥

सूत्रान्तरमवतारयितुं प्रश्नं—एकाग्रतयेत्यादिना । निर्व्विषयं वृत्तिशून्यं यत् मनः—अन्तःकरणं भवति तत् ध्यानं समाधिरिति सूत्रार्थः । वचनापातसूचीयध्यानस्य तद्रूपत्वप्रश्ना निरस्तिनुमाह—समाधाविति ॥ २५ ॥

सुषुप्तितः समाधेर्व्विशेषप्रतिपादकं सूत्रमवतारयति—वृत्तीत्यादिना । सूत्रार्थमाह—उपराग इत्यादिना । तथाच समाधिसुषुप्त्योरुभयत्रैव वृत्तिनिरोधाविशेषेऽपि समाधौ विषयवासनाया अपि निरोधो भवति, सुषुप्त्यां न तथेति विशेष इति सूत्रदर्शितार्थः ॥ २६ ॥

স্বস্তিকাদি আসনের মধ্যে কোন্ আসন করা উচিত ? এই প্রশ্নে বলিতেছেন—স্থিরতা ও সুখের জন্য আসনের অনুষ্ঠান, অতএব স্থিরতাসাধনত্বাদির সর্ব্বসাধারণত্ব বশতঃ যাহার যেই আসন ইচ্ছা, সে সেই আসনই গ্রহণ করিতে পারে, "এই আসনই গ্রহণ করিবে" এরূপ কোন নিয়ম নাই ॥২৪॥

একাগ্রতা সহকারে বিষয়ের চিন্তা করাই ধ্যান, কি বৃত্তিরহিত অন্তঃকরণ ধ্যান । এই প্রশ্নে বলিতেছেন, বৃত্তিশূন্য অন্তঃকরণই ধ্যান. এই সূত্রের ধ্যান শব্দের অর্থ সমাধি ॥ ২৫ ॥

সমাধি ও সুষুপ্তি উভয়াবস্থাতেই বৃত্তিনিরোধের তুল্যতা, তবে বিশেষ কি ? এই আশঙ্কায় বলিতেছেন—উভয়ত্রই বৃত্তিনিরোধের তুল্যতা থাকিলেও

निःसङ्गत्वादात्मन उपरागाभावात् सर्वदा मुक्तिरित्यत्राह—

निःसङ्गेऽप्युपरागोऽविवेकात् ॥ २७ ॥

प्रकृतिपुरुषाविवेकात् प्रकृत्युपरागेण आत्मोपरागः इति अभिमानः ॥ २७ ॥

उपरागोऽपि न तात्त्विक इत्यत्राह—

जवास्फटिकयोरिव नोपरागः, किन्त्वभिमानः ॥२८

तयोः संसर्गात् उपरागः युक्तः । आत्मनः तु असंसर्गात् न उपरागः, किन्तु अभिमानः आत्मनि अहङ्काराध्यासात् उपरागाध्यासः ॥ २८ ॥

सूत्रान्तरावतरणिकामाह—निःसङ्गत्वादित्यादिना । सूत्रार्थमाह—प्रकृतीत्यादिना, तथाच स अभिमान एव मुक्तिप्रतिबन्धक इति भावः ॥ २७ ॥

तयोरिति जवास्फटिकयोरित्यर्थः संसर्गात् परस्परसम्बन्धात् उपरागः मेलनं । असंसर्गात् सम्बन्धाभावात् । तथाच जवास्फटिकयोरिवापि उपरागः प्रकृतिपुरुषयोर्नास्तीति हृतिकृदाशयः । भाष्यकारस्तु—"यथा जवास्फटिकयोर्नोपरागः किन्तु जवाप्रतिबिम्बवशात् उपरागाभिमानमात्रं रक्तः स्फटिक इति तथैव बुद्धिपुरुषयोर्नोपरागः" इत्यन्यथा सूत्रमिदं व्याख्यातवानित्यनुसन्धेयम् ॥ २८ ॥

সমাধিতে বিষয়বাসনারও নিরোধ হয়, সুষুপ্তিতে তাহা হয় না, ইহাই বিশেষ ॥ ২৬ ॥

আত্মার নিঃসঙ্গত্ববশতঃ সর্ব্বদাই তাহাতে উপযোগের অভাব আছে, তবে সর্ব্বদাই মুক্তি হয় না কেন? এই আশঙ্কায় বলিতেছেন—আত্মা নিঃসঙ্গ হইলেও প্রকৃতি ও পুরুষের ভেদজ্ঞান না থাকায় প্রকৃতির উপরাগের দ্বারাই আত্মার উপরাগের অভিমান হয়। (সেই অভিমানই মুক্তির প্রতিবন্ধক ॥ ২৭ ॥

পরস্পর সম্বন্ধ বশতঃ জবা ও স্ফটিকের উপরাগ যুক্ত, কিন্তু সংসর্গাভাব বশতঃ আত্মার উপরাগ যুক্ত নহে, পরন্তু অহঙ্কারের আরোপ বশতঃ আত্মাতেও উপরাগের আরোপ হয় ॥ ২৮ ॥

कथमभिमाननाश इत्यत्राह—

ध्यानधारणाभ्यासवैराग्यादिभिस्तन्निरोधः ॥२९॥

आदिशब्दात् समाधिग्रहणम् ॥ २९ ॥

एकदेशिमतमुक्त्वा स्वमतमाह—

लयविक्षेपयोर्व्यावृत्त्येत्याचार्य्याः ॥ ३० ॥

लयः सुषुप्तिः, विक्षेपः जागरितम्। तयोः व्यावृत्त्या अहं मान-विनाशः ॥ ३० ॥

गुहादिस्थानेषु केषु ध्यानादयः कर्त्तव्याः ? इत्यत्राह—

न स्थाननियमश्चित्तप्रसादात् ॥ ३१ ॥

यत्र चित्तप्रसादः न भवति, तत्र न कर्त्तव्यमनुष्ठानम् ॥ ३१ ॥

सूत्रे तन्निरोध इति अभिमाननिवृत्तिरित्यर्थः, तत्र च वैराग्यादीनां पूर्व्वपूर्व्वद्वारा कारणत्वं बोध्यं, तथाहि—विषयवैराग्येण (चित्तस्थैर्य्यसाधनप्रयत्नलक्षणः) अभ्यासः, तेन (विषयान्तर-सञ्चारपरिहारेण नाभिचक्रादिदेशे चित्तस्य यत् स्थिरीकरणं तदात्मिका) धारणा, तया (यत्र देशे चित्तं स्थिरीकृतं, तत्र चित्तवृत्तेः सदृशप्रवाहः तदात्मकं) ध्यानं, तेन समाधिः ततश्च अभिमाननिवृत्तिर्भवतीत्यर्थः ॥ २९ ॥

तयोः—सुषुप्तिजागरितयोः व्यावृत्त्या—ध्यानादिभिर्निरोधेन अहंमानविनाशः—अभिमान-विनाशः। तथाचार्य्याणामाशयः ॥ ३० ॥

व्यतिरेकेण सूत्रतात्पर्य्यमाह—यत्रेत्यादिना। तथाच यत्र चित्तप्रसादो भवति, तत्रैवानुष्ठानं कर्त्तव्यमिति स्थाननियमो नास्तीति सूत्रार्थः। नचैवं गिरिगुहादिरूपस्थाननिर्द्देशकं शास्त्रं

অভিমানের নাশ হয় কি প্রকারে ? এই আশঙ্কায় বলিতেছেন—বিষয়-বৈরাগ্য হইতে ধারণা, ধারণা হইতে ধ্যান, ধ্যান হইতে সমাধি ও সমাধি হইতে অভিমানের নিবৃত্তি হয় ॥ ২৯ ॥

আচার্য্যগণ বলেন, সুষুপ্তি ও জাগ্রৎ অবস্থার অতিক্রম দ্বারা, অর্থাৎ সুষুপ্তি ও জাগ্রদবস্থার অতিক্রমে অসম্প্রজ্ঞাত যোগ হইতে অভিমানের নিবৃত্তি হয় ॥ ৩০ ॥

গিরিগুহাদি যে স্থানে চিত্তের প্রসন্নতা জন্মে, সে স্থানেই ধ্যানাদির অনুষ্ঠান

महदादीनामुपादानत्वमस्तु, कुतं प्रकृत्या इत्यत आह—

प्रकृतेराद्योपादानतान्येषां कार्य्यत्वश्रुतेः ॥३२॥

महदादीनां कार्य्यत्वश्रुतेः तेषाम् अपि कारणं प्रकृतिः इति असकृत् आवेदितम् ॥ ३२ ॥

प्रकृतिपुरुषयोः पूर्व्वकालभावित्वाविशेषात् कः कारणम् ? इत्यत आह—

नित्यत्वेऽपि नात्मनो योगात्वाभावात् ॥ ३३ ॥

गुणवत्त्वसंसर्गित्वे कारणयोग्यता, सा चात्मनि नास्तीति प्रकृतिः कारणम् ॥ ३३ ॥

नियतमिति वाच्यं, यत्र यत्रश्चित्तप्रसादो भवति, तन्निर्देशाभिप्रायकत्वात्तस्य । अतएव "यत्र काग्रता तत्राविशेषादिति ब्रह्मसूत्रे चापि स्थाननियमभावो वर्णित इति ॥ ३१ ॥

मोक्षविचारसमाप्त्यनन्तरं जगत्कारणविचारकं सूत्रमवतारयति—महदादीनामित्यादिना । सूत्रे आद्योपादानेति मूलकारणतेत्यर्थः, महदादीनामिति अन्येषामित्यस्य विवरणम्, कार्य्यत्वश्रुतेः—प्रकृतेर्म्महान् महतोऽहङ्कार इत्यादिना कार्य्यत्वश्रवणात्, तेषामपि—महदादीनामपि ॥ ३२ ॥

सूत्रान्तरमवतारयति—प्रकृतीत्यादिना । सूत्रे नात्मन इति कारणत्वमिति शेषः, अत्र हेतुमाह—योग्यत्वाभावादिति । योग्यत्वाभावमात्मनि—स्पष्टयति—गुणेत्यादिना ॥ ३३ ॥

করিবে, স্থানের কোনও নিয়ম নাই, তবে যেখানে চিত্তের প্রসন্নতা হয় না, সেস্থানে করিবে না ॥ ৩১ ॥

মহদাদি উপাদান কারণ হউক, প্রকৃতি স্বীকারের প্রয়োজন কি ? এই আশঙ্কায় বলিতেছেন,—মহদাদিরও কার্য্যত্ব শ্রুতি আছে, সুতরাং তাহাদের কারণও প্রকৃতি ইহা বহুবার বলা হইয়াছে, অতএব প্রকৃতিই মূল কারণ ॥ ৩২ ॥

গুণবত্ত্ব এবং সংসর্গিত্বই কারণের যোগ্যতা, তাহা না থাকায় আত্মা নিত্য হইলেও কারণ নহে, প্রকৃতিই কারণ ॥ ৩৩ ॥

आत्मनः चेतनत्वात् भोक्तृत्वादि युज्यते, न जड़स्य प्रधानस्य इत्यत्राह—

श्रुतिविरोधान्न कुतर्कापसदस्यात्मलाभः ॥ ३४ ॥

व्यक्तम् ॥ ३४ ॥

तन्मात्राणां महाभूतकार्य्यत्वदर्शनात् कथं प्रकृतेः कारणत्वम् ? इत्यत्राह—

पारम्पर्य्येऽपि प्रधानानुवृत्तिरणुवत् ॥ ३५ ॥

यथा घटादेः मृत्पिण्डकार्य्यत्वेऽपि पारम्पर्य्येण परमाणूपादानत्वं, तथा अत्रापि इति ॥ ३५ ॥

प्रकृतिः व्यापिका न वा ? इत्यत्राह—

सर्व्वत्र कार्य्यदर्शनाद्विभुत्वम् ॥ ३६ ॥

स्पष्टम् ॥ ३६ ॥

सूत्रान्तरमवतारयति—आत्मन इत्यादिना। व्यक्तमिति श्रुतिविरोधात्—आत्मनः कर्त्तृत्वादीनां श्रुतिविरुद्धत्वात् कुतर्कापसदस्य—आत्मनः कर्त्तृत्वादिवादिकुतार्किकाधमस्य आत्मलाभः—आत्मज्ञानं न सम्भवतीति सूत्रविवरणं स्पष्टमित्यर्थः। तथाच श्रुतिविरोधादेव तेषां युक्तयो न श्रद्धेया इति भावः ॥ ३४ ॥

महाभूतकार्य्यत्वदर्शनादिति आकाशादिमहाभूतकार्य्यकत्वश्रवणादित्यर्थः। अणुवदिति दृष्टान्तं विशदयति—यथेत्यादिना। परमाणूपादानत्वं परमाणूपादानकत्वं तथा अत्रापीति तथैव भूतानामपि साक्षात्तन्मात्रकार्य्यत्वेऽपि पारम्पर्य्येण प्रकृत्युपादानकत्वमित्यर्थः ॥ ३५ ॥

চেতনত্বনিবন্ধন আত্মারই ভোক্তৃত্ব হওয়া উচিত, জড়প্রধানের ভোক্তৃত্ব ঠিক নহে, এই আশঙ্কায় বলিতেছেন—আত্মার কর্ত্তৃত্বাদি শ্রুতিবিরুদ্ধ, সুতরাং আত্মার কর্ত্তৃত্বাদিবাদিকুতার্কিকগণের, কখনও আত্মজ্ঞান সম্ভবপর নহে। (অতএব তাহাদের যুক্তিও অশ্রদ্ধেয়) ॥ ৩৪ ॥

তন্মাত্রেরই মহাভূতের কারণত্ব শ্রুতি আছে, সুতরাং প্রকৃতির কারণত্ব কি প্রকারে ? এই আশঙ্কায় বলিতেছেন—যেরূপ ঘটাদি সাক্ষাৎ মৃৎপিণ্ডের কার্য্য হইলেও পরম্পরায় পরমাণুই ঘটাদির উৎপাদন কারণ, সেইরূপ আকাশাদি মহাভূত প্রকৃতিই তাহাদের উপাদান কারণ ॥ ৩৫ ॥

विपक्षे दोषमाह—

गतियोगेऽप्याद्यकारणताहानिरणुवत् ॥ ३७ ॥

गतिः क्रिया, तद्योगो यस्यास्ति तत् अव्यापकम्। प्रकृतेर्गतिमत्त्वे कार्य्यत्वं परमाणुवत्, न तु आद्यकारणता ॥ ३७ ॥

प्रकृतेः उपादानत्वे द्रव्यस्य उपादानत्वात् तदन्तर्भावः स्यात् इत्यत आह—

प्रसिद्धाधिक्यं प्रधानस्य, न नियमः ॥ ३८ ॥

प्रसिद्धद्रव्येभ्यः अधिकं प्रधानं, अनियतत्वात् पदार्थस्य। उपादानकारणता च न समवायिकारणता, किन्तु प्रधानता, वैशेषिकसमवायस्य अनभ्युपगमात् ॥ ३८ ॥

स्पष्टमिति, सर्व्वत्र कार्य्यदर्शनात्—अव्यवस्थया सर्व्वत्र विकारदर्शनात् विभुत्वं—प्रधानस्य व्यापकत्वमिति सूत्रविवरणं व्यक्तमित्यर्थः ॥ ३६ ॥

विपक्ष इति प्रधानस्याविभुत्वेऽपि यत्र कार्य्यमुत्पद्यते, तत्रैव गतिं परिकल्प्य सर्व्वत्र विकारोपपादनपक्षे इत्यर्थः। सूत्रतात्पर्य्यं विवृणोति—गतिरित्यादिना ॥ ३७ ॥

सूत्रान्तरमवतारयति—प्रकृतेरित्यादिना। द्रव्यस्य उपादानत्वात् द्रव्यस्यैवोपादानकारणत्वदर्शनात् तदन्तर्भावः—प्रकृतेरपि द्रव्यान्तर्भावः। सूत्रतात्पर्य्यं विवृणोति—प्रसिद्धेत्यादिना। प्रसिद्धद्रव्येभ्यः—वैशेषिकादिसिद्धपृथिव्यादिनवद्रव्येभ्यः अधिकं द्रव्यं प्रधानमित्यर्थः। नन्वेवं नवसंख्याोत्कीर्त्तनविरोध इत्यत आह—अनियतत्वात् पदार्थस्येति, तथाच सूत्रे 'न नियम' इत्यस्य नवैव द्रव्याणीति न नियम इत्यर्थः। प्रसङ्गात् स्वमतसिद्धामुपादानकारणतां निर्व्वक्तु-

---

